विशेषणमस्ति। धातोरित्यनुवर्तनसामर्थ्यादुपसर्जनस्यापि विशेषणं भविष्यति। अस्त्यन्यद् धातोरित्यनुवृत्तौ प्रयोजनम्। किम्। इवर्णं विशेष्यते। नैतदस्ति प्रयोजनम्। यद्व्यधातोरिवर्णं भवितव्यमेव तस्य यणादेशेन इको यणचीति॥

वर्षाभ्वश्च॥ ८४॥ वर्षाभूपुनर्भ्वोश्च *। वर्षाभूरित्यत्र पुनर्भ्वश्चेति वक्तव्यम्। पुनर्भ्वौ पुनर्भ्व इति। अपरल्पमिदमुच्यते। वर्षादृन्कारपुनःपूर्वस्य भुव इति वक्तव्यम्। वर्षाभ्वः। दृन्भ्वौ दृन्भ्वः। कारभ्वौ। कारभ्वः। पुनर्भ्वौ। पुनर्भ्वः॥

हुश्नुवोः सार्वधातुके॥ ८७॥ हुश्नुग्रहणानर्थक्यमन्यस्याभावात्। हुश्नुग्रहणमनर्थकम्। किङ्कारणम्। अन्यस्याभावात्। नह्यन्यत्सार्वधातुके अस्ति यस्य यणादेशः स्यात्। ननु चायमस्ति याति वातीति क्ङितीत्यनुवर्तते। इदं तर्हि यातः वात इति। अचीति वर्तते। इह तर्हि यान्ति वान्तीति। य्वोरिति वर्तते। एवमपि धियन्ति पियन्ति अत्र प्राप्नोति। ओरिति वर्तते। एवमपि सुवन्ति रुवन्तीत्यत्र प्राप्नोति। अनेकाजिति वर्तते। एवमप्ययुवन् अरुवन् इत्यत्रापि प्राप्नोति। एतदप्यटोसिद्धत्वादेकाज्भवति। एवमपि ऊर्णुवन्तीत्यत्र प्राप्नोति। असंयोगपूर्वस्येत्यनुवर्तते। यङ्लुगर्थं तर्हि हुश्नुग्रहणं कर्तव्यम्। यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति तदर्थमिदम्। युवं यो युवतीनाम्। वृषभं भवतु रोरुवतीनाम्। यङ्लुगर्थमिति चेत्। तन्न। किङ्कारणम्। आर्द्धधातुकत्वात्सिद्धम्। कथमार्धधातुकत्वम्। उभयथा छन्दसीति वचनात्। अन्योपि हि धातुप्रत्ययाश्छन्दस्युभयथा दृश्यन्तइति। एवं तर्हि सिद्धे सति यत् हुश्नुग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामपि यङ्लुग्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। वेभि-

---

धिकरणं विशेषणम्। उद्ध्याविति। भावे कर्तरि चात्र क्विप्। इकारः संयोगपूर्वः। धातोरिति। अविद्यमानधात्ववयवसंयोगपूर्वस्य यणित्यर्थः। उपसर्जनमिति। अन्यपदार्थं प्रति। नचोपसर्जनस्येति। सम्बन्धिशब्दादन्यदुपसर्जनं पदं पदान्तरवाच्येनार्थेन सम्बन्धं नोपैतीत्यर्थः। अस्त्यन्यदिति। गुणप्रधानं संनिधौ प्रधानस्य सत्यर्थित्वे विशेषणसम्बन्धं न भाव्यमनर्थित्वे प्रधानस्य गुणो विशेषणेन सम्बध्यते। यद्व्यधातोरिति। यथा कुमार्याविति। ननु चमणीपाणीइत्यादावधातोः पूर्वसवर्णदीर्घबाधनार्थो यण् मा भूदिति धातुनेवर्णस्य विशेषणे प्रयोजनमस्ति। एवं तर्हि इयङ्बाधनार्थत्वाद्यणादेशस्याधातोरियङोप्रसङ्गादधातुनिवृत्त्यर्थाधातुग्रहणस्यानुवृत्तिर्न भवति॥ ८२॥

वर्षाभ्वश्च॥ वर्षासु भवति वर्षा वा भवते प्राप्नोतीति वर्षाभूरोषधिविशेषः। दृन्भूशब्दोऽन्दूदृन्भूइति निपातितः। अत्र भूशब्दस्यानर्थक्यान्नभूसुधियोरित्यत्र ग्रहणाभावाद्यणादेशः सिद्धः॥ ८४॥

दीति चेच्छिदीत्येतत्सिद्धं भवति भाषायामपीति ॥

ऊदुपधाया गोहः ॥ ८९ ॥ किमर्थं गुहेर्विकृतस्य ग्रहणं क्रियते । न गुह इत्येवोच्येत । गोहिग्रहणं विषयार्थम् * । गोहिग्रहणं क्रियते विषयार्थम् । विषयः प्रतिनिर्दिश्यते यत्रास्यैतद्रूपं तत्र यथा स्यादिह मा भूत् । निजुगुहतुः । निजुगुहुरिति । अयादेशप्रतिषेधार्थं च * । अयादेशप्रतिषेधार्थं च विकृतग्रहणं क्रियते । ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्वस्यासिद्धत्वात् * । ह्रस्वादेशे हि सति अयादेशः प्रसज्येत । प्रतिगूह्य गतः, उपगूह्य गत इति । किङ्कारणम् । ऊत्वस्यासिद्धत्वात् । असिद्धमूत्वं तस्यासिद्धत्वात् ल्यपि लघुपूर्वादित्ययादेशः प्रसज्येत । विषयार्थेन तावन्नार्थो गोहिग्रहणेन । प्रश्लिष्टनिर्देशात्सिद्धम् * । प्रश्लिष्टनिर्देशोयम् । उ ऊत् ऊदिति । तत्र ह्रस्वस्यावकाशः, निजुगुहतुः । निजुगुहुः । गुणस्यावकाशः, निगोढा । निगोढुम् । इहोभयं प्राप्नोति । निगूहयति निगूहति । निगूहकः । साधु निगूही । परत्वाद् गुणे कृते आन्तर्यतो दीर्घस्य दीर्घो भवति । अयादेशप्रतिषेधेन चापि नार्थः । समानाश्रयवचनात्सिद्धम् * । समानाश्रयवचनात्सिद्धं भवति । व्याश्रयं चैतत् । णावुत्वं णेर्ल्यप्ययादेश इति ॥

दोषो णौ ॥ ९० ॥ किमर्थं दुषेर्विकृतस्य ग्रहणं क्रियते । न दुष इत्येवोच्येत । दोषिग्रहणे च * । किम् । अयादेशप्रतिषेधार्थं विकृतग्रहणं क्रियते । ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्वस्यासिद्धत्वात् * । ह्रस्वादेशे हि सति अयादेशः प्रसज्येत । प्रदूष्य गतः । उपदूष्य गतः । किं कारणम् । ऊत्वस्यासिद्धत्वात् । असिद्धमूत्वं तस्यासिद्धत्वाद् ल्यपि लघुपूर्वादित्ययादेशः प्रसज्येत । समानाश्रयवच-

---

हुश्नुवोः ॥ अधिकारानुवृत्तिसामर्थ्यादतिप्रसङ्गाभावं मत्वाह हुश्नुग्रहणानर्थक्यमिति । भाषायामपीति । ततो यङ्लुङ्निवृत्त्यर्थं हुश्नुग्रहणमर्थवत् ॥ ८७ ॥

ऊदुप ॥ किमर्थमिति । लघुं विहाय निर्देशे कस्माद् गौरवमाश्रितमिति प्रश्नः। गोहिग्रहणमिति । कृतगुणस्योत्वं यथा स्यादकृतगुणस्य मा भूदित्येवमर्थमित्यर्थः । अयादेशप्रतिषेधार्थमिति । गुणे कृते तस्य स्थाने ऊत्वे कृते सत्यूत्वस्यासिद्धत्वे गुरुपूर्वादुत्तरो णिर्भवति न तु लघुपूर्वादिति ल्यप्ययादेशो न भवति । गुह इति निर्देशे क्रियमाणे नित्यत्वाद् बाधित्वा गुणमुकारस्थाने ऊकारः प्राप्नोति । तस्य चासिद्धत्वाद् लघुपूर्वादुत्तरो णिर्भवतीति अयादेशः स्यात् । उ ऊत् ऊदिति । ह्रस्वदीर्घादेशौ सूत्रे निर्दिश्येते तत्र स्थानेन्तरतमपरिभाषावशाद् ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः । निजुगुहतुरिति । अत्र कित्त्वाद् गुणप्रतिषेधादुकारस्यादेश उकारः । निगोढेति । अचीत्यधिकारादुकारस्यात्राप्रसङ्गः । निगूहयतीति । उकारस्य गुणश्च प्राप्नोति उकारश्च । तत्र परत्वाद् गुणे कृते एकदेशविकृतस्यानन्यत्वादूकारादेश इति नार्थो विकृतनिर्देशेन । दोषो णावित्यत्र तु लक्ष्यदर्शनवशादूकारोपेक्ष्यते न तु ह्रस्व

नातिसिद्धमित्येव । समानाश्रयमसिद्धम् । व्याश्रयं चैतत् । णावुत्वं णेर्ल्यप्ययादेश इति ॥

चिण्णमुलोर्दीर्घोन्यतरस्याम् ॥ ९३ ॥ चिण्णमुलोर्णिज्व्यवेतानां यङ्लोपे च * । चिण्णमुलोर्णिज्व्यवेतानां यङ्लोपे चोपसंख्यानं कर्त्तव्यम् । शमयन्तं प्रयोजितवान् । अशमि अशामि । शमंशमम् । शामंशामम् । शंशमयतेः । अशंशमि । अशंशामि । शंशमंशंशमम् । शंशामंशंशामम् । किं पुनः कारणं न सिध्यति । चिण्णमुल्परे णौ मितामङ्गानां दीर्घो भवतीत्युच्यते । यश्चात्र णिश्चिण्णमुल्परो न तस्मिन् मिदङ्गम् । यस्मिंश्च मिदङ्गं नासौ चिण्णमुल्पर इति । लोपे कृते चिण्णमुल्परो भवति । स्थानिवद्भावान्न चिण्णमुल्परः । ननु च प्रतिषिध्यते तत्र स्थानिवद्भावः । दीर्घविधिं प्रति न स्थानिवदिति । एवमप्यसिद्धत्वान्न प्राप्नोति । एवं तर्हि चिण्णमुलोर्णिज्व्यवेतानां यङ्लोपे चान्तरङ्गलक्षणत्वातिसिद्धम् । किमिदमन्तरङ्गलक्षणत्वादिति । यावद् ब्रूयात्समानाश्रयवचनात्सिद्धमिति । व्याश्रयं चैतत् । कथम् । णौ णिलोपः । णौ चिण्णमुल्परे मितामङ्गानां दीर्घत्वम् । तस्मान्नार्थ उपसंख्यानेनेति ॥

छादेर्घेद्व्युपसर्गस्य ॥ ९६ ॥ अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् । इहापि यथा स्यात् । समुपाभिच्छादः । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यत्र नि-

---

इति तत्रापि न दोषः ॥ ८९ ॥

चिण्णमुलोर्दीर्घोन्यतरस्याम् ॥ णिज्व्यवेतानामिति । चिण्णमुल्परे णौ मितामङ्गानां दीर्घ उच्यते । तत्र यदा ण्यन्ताद्यङन्ताच्च णिज्विधीयते तदा पूर्वेण णिचा यङ्कारेण च व्यवधानाद्दीर्घो न प्राप्नोतीति वचनम् । प्रयोजितवानिति । यद्यपि चिण्विषयं कर्म प्रदर्शनीयं तथापि णिजुत्पत्तये हेतुव्यापारप्रदर्शनार्थं कर्तुरुपादानं नत्वत्र कर्ता विवक्षितः । शंशमयतेरिति । शमेर्यङि नुगतोनुनासिकान्तस्येति नुकि कृते शंशम्यशब्दाण्णिचि अल्लोपयलोपो । लोपे कृत इति । यद्यपि परस्यापि णिचो लोपस्तथापि प्रत्ययलक्षणेन भूतपूर्वगत्या वा चिणमुल्परो णिः । दीर्घविधिं प्रति नेति । एतदेव हि दीर्घग्रहणस्य प्रयोजनं स्थानिवत्त्वप्रतिषेधो यथा स्यात् । यदि तु प्रकृतो ह्रस्वो विकल्पेत तदा णौ णिलोपस्य स्थानिवत्त्वाद्विकल्पो ह्रस्वस्य न स्यात् यङ्कारलोपस्य स्थानिवद्भावान्नित्यं ह्रस्वः श्रूयेत । हेडवेष्टन इत्यस्य च ह्रस्वाभावपक्षे अहेडीति स्यात् दीर्घे तु ह्रस्वस्य कृते अहीडीति सिध्यति । अन्तरङ्गलक्षणत्वादिति । णियङोर्लोपो णिमात्रापेक्षत्वादन्तरङ्गः । दीर्घस्तु चिण्णमुल्परण्यपेक्षत्वाद् बहिरङ्ग इति समानाश्रयत्वाभावादसिद्धत्वाभाव इत्यर्थः ॥ ९३ ॥

छादेः ॥ अद्विप्रभृत्युपसर्गस्येति वक्तव्यमिति । इह संख्यान्तरोपजने आश्रयाविनाशेपि पूर्वसंख्याविनाशात्तद्वाचिशब्दाप्रवृत्तिरिति भावः । यत्र त्रिप्रभृतय इति । वस्तुसद्भावमाश्रित्य परिहारः । अद्व्युपसर्गस्येति च प्रसज्य प्रतिषेधो वा-

Indira Gandhi National Centre for the Arts

प्रभृतयः सन्ति द्वावपि तत्र स्तः । तत्राद्व्युपसर्गस्यैव सिद्धम् । न वै एष लोके संप्रत्ययः । न हि द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयते । तस्मादाद्विप्रभृत्युपसर्गस्येति वक्तव्यम् ॥

घसिभसोर्हलि ॥ १०० ॥ हल्ग्रहणानर्थक्यमन्यत्रापि दर्शनात् * । हल्ग्रहणमनर्थकम् । किं कारणम् । अन्यत्रापि दर्शनात् । अन्यत्रापि हि लोपो दृश्यते । अग्निर्वनानि बप्सति । शरारुं बप्सतीति ॥

हुझल्भ्यो हेर्धिः ॥ १०१ ॥ इटः प्रतिषेधो वक्तव्यः । रुदिहि । स्वपिहि । झल इति धित्वं प्राप्नोति । हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः * । हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । धित्वं कस्मान्न भवति । हलधिकारात् । प्रकृतं हल्ग्रहणमनुवर्तते । क्व प्रकृतम् । घसिभसोर्हलीति। तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । तद्वै तत्र प्रत्याख्यायते । प्रत्याख्यातं सद्यया विभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिष्टमिहानुवर्तते । अथ वा हुझल्भ्य इत्येषा पञ्चमी हलीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति । अथ वा निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । इटा व्यवहितत्वात् । यद्येवं भिन्धकि छिन्धकीत्यत्र

---

त्ययभेदेनाश्रीयते। पर्युदासाश्रयणे ह्यनुपसर्गस्य ह्रस्वो न स्यात् । न वै एष इति संख्याशब्दानामेष स्वभावो यत्संख्यान्तरस्योत्तरस्य गौणस्य मुख्यस्य वा विषये न प्रवर्तन्ते। यथा चोक्तमेकाजनेकाज्ग्रहणेषु आवृत्तिसंख्यानात्सिद्धमिति । नैधेय इति च पूर्वविधिग्रहणस्य प्रत्युदाहरणमुपन्यस्तं स्थानिवद्भावे सति द्व्यच्त्वाभावात्तदाश्रयो ढक् न स्यादिति ॥ ९६ ॥

घसिभ ॥ अचीत्यधिकाराद्धलि न प्राप्नोतीति हल्ग्रहणं क्रियते । ननुपादाने चाचि न प्राप्नोतीति चकारोच्सम्बन्धार्थः क्रियते तत्राज्ग्रहणस्येहानधिकारादेव सर्वत्र लोपः सिध्यतीति हलि चेति न वक्तव्यम् । अन्यत्रापीति । वचनाद्वार्तिककारश्चकारं न पपाठेति लक्ष्यते । बप्सतीति । एकवचने प्राप्ते व्यत्ययेन सिः श्लौ द्विवचनम् । अद्भ्यस्तादित्यदादेशः, उपधालोपः खरि चेति चर्त्वम् । अत्रान्तरङ्गत्वादुपधालोपात् पूर्वं द्विवचनं क्रियते यदि तु प्रागेव पूर्वं लोपः स्यात्ततो द्विर्वचनं न स्यात् ॥ १०० ॥

हुझल् ॥ रुदिहीति । शब्दान्तरप्राप्त्या द्वयोरप्यनित्यत्वात्परत्वादिटि कृते पुनः प्रसङ्गविज्ञानाद्धित्वप्रसङ्गः । अथ वेति । यद्यपि सप्तम्यचरितार्था तथापि हुझल्भ्य इत्यनया पञ्चम्या अचरितार्थया हेरित्येतदनुगुणा षष्ठी प्रकल्प्यते। ननु षष्ठीप्रकॢप्तौ तदादिविधेरसम्भवः । यस्मिन् विधिस्तदादावल्ग्रहण इति ह्युच्यते। नैष दोषः । हल्ग्रहणानुवृत्तिसामर्थ्यात् हलन्तत्वासम्भवाच्च तदादिविधिर्विज्ञास्यते ।अथ वेति। यत् षष्ठ्या निर्दिश्यते तस्यैवादेशः सागमकस्त्वागमानामभ्यासि-

घित्वं न प्राप्नोति। एवं तर्हि घित्वे कृते ऽकज्भविष्यति। इदमिह सम्प्रधार्यं घित्वं क्रियतामकजिति। किमत्र कर्तव्यम्। परत्वाद्धित्वं नित्योऽकच्। कृते ऽपि घित्वे प्राप्नोत्यकृते ऽपि। अकजप्यनित्यः। अन्यस्य कृते घित्वे प्राप्नोति अन्यस्याकृते। शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवतीति। उभयोरनित्ययोः परत्वाद्धित्वं घित्वे कृते ऽकज्भविष्यति। अथ वा हकारस्यैवैतदशक्तिजेनेकारेण ग्रहणमिति॥

चिणो लुक्॥ १०४॥ चिणो लुकि तग्रहणम् *। चिणो लुकि तग्रहणं कर्तव्यम्। इह मा भूत्। अकारितराम्। अहारितराम् इति। चिणो लुकि तग्रहणानर्थक्यं सङ्घातस्याप्रत्ययत्वात् *। चिणो लुकि तग्रहणमनर्थकम्। सङ्घातस्य लुक् कस्मान्न भवति। सङ्घातस्याप्रत्ययत्वात्। प्रत्ययस्य लुक्श्लुलुपो भवन्तीत्युच्यते। न च सङ्घातः प्रत्ययः। तलोपे तर्हि कृते परस्य प्राप्नोति। तलोपस्य चासिद्धत्वात्। असिद्धस्तलोपस्तस्यासिद्धत्वान्न भविष्यति। कार्यकृतत्वाद्वा *। अथ वा कृतश्चिणो लुगिति कृत्वा पुनर्न भविष्यति। तद्यथा। वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति। विषम उपन्यासः। युक्तं यत्तस्यैव पुनः प्रवृत्तिर्न स्यात्। यत्तु तदाश्रयं

---

धाराच्छब्दान्तरे श्रूयमाणे प्रतीयते न तूच्चार्यत इति तस्यादेशाभावः। यस्तर्हीति। आगमं विहाय हिशब्दस्यादेशो भवत्वित्यर्थः। इटेति। तस्मादित्युत्तरस्येति वचनादनन्तरस्यैव षष्ठ्या कार्येण च भाव्यम्। तत्र यो निर्दिष्टो नासावनन्तरो यश्चानन्तरः सागमको नासौ निर्दिष्ट इति घित्वाभावः। यद्येवमाति। यदि निर्दिश्यमानस्यादेशास्तर्ह्यकचि कृते शब्दान्तरत्वाद्धित्वाप्रसङ्गः। घित्वे कृते ऽकजिति। पुनः प्रसङ्गविज्ञानाश्रयणात् नह्यन्यथा ज्ञाताद्यर्थावगतिर्भवति। अथ वाऽज्ञातार्थापेक्षत्वाद् बहिरङ्गोऽकजिति पूर्वं घित्वं पश्चादकच्। अथ वेति। इकारेणागन्तुना हेरिति निर्देशः। हकारमात्रन्तु स्थानित्वेन निर्दिश्यते। एवं धिरिति धकारमात्रमादेशः। इकारस्तूच्चारणार्थो व्यञ्जनस्य स्वररहितस्योच्चारयितुमशक्यत्वात्। ततश्च रुदिहीत्यत्र हकारस्येटा व्यवधानाद्धकाराभावः। सहि समुदायभक्तत्वात्तमेव न व्यवदध्यात्। अवयवं तु व्यवदधात्येव। तथा भिन्धकीत्यत्र सत्यपि पूर्वमकचि हकारस्य धकारे कृते रूपं सिध्यति॥ १११॥

चिणो॥ तग्रहणमिति। इदमस्मिन्नसिद्धमिति भेदनिबन्धनत्वाद्विषयविषयिभावस्य चिणो लुगित्यस्य लक्षणस्य भेदाभावादकारितरामित्यत्र लोपस्यासिद्धत्वाभावात्तरपोऽपि लुक् प्राप्नोति। एवं सति प्रत्ययत्रयात्मकस्य समुदायस्य लुक्प्रसङ्गः। इतरस्तु युगपत्प्रत्ययत्रयस्य लुक्प्रसङ्गोऽनेनोक्त इति मत्वाह चिणो लुकीति। इतरः स्वाभिप्रायं प्रकाशयति तलोप इति। तलोपस्यासिद्धत्वादिति। प्रतिलक्ष्यं लक्षणभेदादस्ति विषयविषयिभावः। अभेदपक्षमाश्रित्याह कार्यकृतत्वाद्वेति।

Indira Gandhi National Centre for the Arts

प्राप्नोति न तच्छक्यं बाधितुम्। तद्यथा। वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति। अग्न्याधाननिमित्तं वसन्ते वसन्तइज्यते। तस्मात्पूर्वोक्तावेव परिहारौ। अथ वा क्ङितीति वर्तते। क्व प्रकृतम्। गमहनजनखनघसां लोपः क्ङित्यनङीति। तद्वै तत्र सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। चिण इत्येषा पञ्चमी क्ङितीति। सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति॥

उतश्च प्रत्ययादसंयोगपूर्वात्॥ १०६॥ कथमिदं विज्ञायते उकारात् प्रत्ययादिति आहो स्विदुकारान्तात् प्रत्ययादिति। किञ्चातः। यदि विज्ञायते उकारात्प्रत्ययादिति। सिद्धं तनु कुरु। चिनु सुनु इति न सिद्ध्यति। अथ विज्ञायते उकारान्तात्प्रत्ययादिति। सिद्धं चिनु सुनु। तनु कुर्विति न सिध्यति। तथा। असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात्। अक्ष्णुहि। तक्ष्णुहि। आप्नुहि। शक्नुहीत्यत्र न स्यात्। यथेच्छसि तथास्तु। अस्तु तावदुकारात्प्रत्ययादिति। कथं चिनु सुन्विति। तदन्तविधिना भविष्यति। अथ वा पुनरस्तूकारान्तात्प्रत्ययादिति। कथं तनु कुरु। व्यपदेशिवद्भावेन भविष्यति। यदप्युच्यते। यथाऽसंयोगपूर्वग्रहणेनेहैव पर्युदासः स्याद् अक्ष्णुहि तक्ष्णुहि। आप्नुहि शक्नुहीत्यत्र

---

एकस्मिन् विषये सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् पुनः प्रवृत्त्यभावः। तद्यथेति। यथैकस्मिन् वसन्ते अग्न्याधानं कृत्वा वसन्तान्तरे ब्राह्मणोऽग्न्याधानं न कुरुते शास्त्रस्यानुष्ठितत्वात्तथैकस्य प्रत्ययस्य लुकि कृते प्रत्ययान्तरस्य तरबादेर्लुङ्न प्रवर्तते। युक्तं यत्तस्यैवेति। इहाभिन्नरूपमपि फलभेदाद्भिन्नमुच्यते। अग्न्याधानं तु कर्मान्तरेषु कर्तुर्योग्यतोत्पादनार्थमिति फलभेदाभावात् पुनर्न क्रियते। काम्यानां तु कर्मणां फलभेदात् पुनरनुष्ठानं भवति। तथेहापि तस्य लुकि कृते तरबादेर्लुक्प्रसङ्गः। अग्न्याधानं निमित्तमस्येति बहुव्रीहिः। क्रियाविशेषणं चैतत्। अनाहिताग्नेरनधिकारादग्न्याधाननिमित्तत्वं यागस्योच्यते॥ १०४॥

उतश्च॥ कथमिति। उतः प्रत्ययादित्यनयोर्विशेषणविशेष्यभावे कामचाराद्यदोकारः प्रत्ययेन विशेष्यते तदा तदन्तविधेरभावादुकारात् प्रत्ययादिति पक्षोऽवतिष्ठते। उकारस्य विशेष्यत्वात् तेन नास्ति तदन्तता। न सम्भवति चोकारः प्रत्ययान्तो यदा पुनः॥ विशेष्यते उकारेण प्रत्ययो ऽतस्तदन्ततो। आश्रीयते प्रत्ययस्य तस्मात्पक्षद्वयोद्भवः॥ पक्षद्वयेपि दोषदर्शनात् प्रश्नः। तथेति। तदन्तपक्षेयं दोषः। आद्ये तु पक्षे उकारस्योप्रत्ययत्वात् लुक्प्रसङ्ग एव नास्तीत्यत्र दोषाभावः। ननूकारात् प्रत्ययादिति विज्ञायमाने उकारस्य प्रत्ययस्य संयोगपूर्वत्वासंभवादसंयोगपूर्वग्रहणं किमर्थं स्यात्। उच्यते। अङ्गविशेषणं स्यात्। तथा च क्षिणु इत्यत्र न स्यादित्ययमपि दोषो वक्तव्यः। तदन्तविधिनेति। ननूकारस्य विशेष्यत्वात्कथं तदन्तविधिः। विशेषणत्वात्तु तदन्तविधौ वक्ष्यमाणात्पक्षादस्य भेदो न प्राप्नोति। एवं तर्हि तन्त्रेण सूत्रद्वयमभ्युपगम्यैतदुच्यते। तत्रैकस्मिन् सूत्रे प्रत्ययेनोकारो विशेष्यते

न स्यादिति । नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते । किं तर्हि । उकारो विशेष्यते । उकारो यो ऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति । उतश्च प्रत्ययाच्छन्दो वावचनम् * । उतश्च प्रत्ययादित्यत्र छन्दसि वेति वक्तव्यम् । अवास्थिरा तनुहि यातु जूनाम् । धिनुहि यज्ञं धिनुहि यज्ञपतिम् । तेन मा भागिनं कृणुहि । उत्तरार्थं च । केचित्तावदाहुः छन्दोग्रहणं कर्तव्यमिति । अपर आहुः । वावचनं कर्तव्यमिति । लोपश्चास्यान्यतरस्यामित्यत्रान्यतरस्यांग्रहणं न कर्तव्यं भवति ॥

अत उत् सार्वधातुके ॥ ११० ॥ सार्वधातुकइति किमर्थम् । इह मा भूत् । सञ्चस्करतुः । सञ्चस्करुरिति । स्यान्तस्य प्रतिषेधो वक्तव्यः * । करिष्यति । करिष्यते । कृञ उत्वे उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः * । कृञ उत्वे उकारान्तस्य निर्देशात्स्यान्तस्याप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । उत्वं कस्मान्न भवति । उकारान्तनिर्देशात् । अशक्यः करोतावुकारान्तनिर्देशस्त्वाश्रयितुम् । इह सम्परिभ्यां भूषणसमवाययोः करोताविति । इहैव स्यात् संस्करोति । संस्कर्ता संस्कर्तुमित्यत्र न स्यात् । न ब्रूमोऽस्मादुकारान्तनिर्देशाद्योयं करोतेरिति । किं तर्हि । उकारान्तप्रकरणादुकारान्तमङ्गं संबध्यतेउत इति वर्तते । यद्येवं नार्थः सार्वधातुकग्रहणेन । कस्मान्न भवति संचस्करतुः, संचस्करुरिति । उत इति वर्तते । उत्तरार्थं तर्हि सार्वधातुकग्रहणं कर्तव्यम् । श्नसोरल्लोप इति । श्नः सार्वधातुकएवास्तेरप्यार्धधातुके भूभावेन भवितव्यम् । उत्तरार्थमेव तर्हि श्नाभ्यस्तयोरात इति । श्ना सार्वधातुक एव । अभ्यस्तमप्याकारान्तमार्द्धधातुके ना

---

द्वितीये तूकारेण प्रत्यय इति दोषाभावः । व्यपदेशिवद्भावेनेति । आद्यन्तवदेकस्मिन्नित्यनेनेत्यर्थः । किं तर्हि उकारो विशेष्यते इति । ननूकारस्य संज्ञात्वात् संज्ञिपरतन्त्रत्वादप्रधानस्य कथं विशेषणेन सम्बन्धः । नैष दोषः । यावदस्य विशेषणत्वं न विवृतं तावत् संज्ञात्वं नास्तीत्यप्राधान्याभाव : । तत्रासंयोगपूर्व उकारः प्रत्ययस्य विशेषणमिति विशेषणेन संम्बन्धमनुभूय संज्ञात्वमुकारो लभते । छन्दोग्रहणमिति। नित्यं करोतेरित्यत्र वाक्यभेदेन छन्दसि वेति सम्बध्यते ॥ १०६ ॥

अत उत् ॥ सार्वधातुक इति किमर्थमिति । सत्यपि सार्वधातुकग्रहणे स्यान्तस्य निवृत्त्यर्थोऽवश्यं कर्तव्यो यत्न इति तेनैव यत्नेनार्धधातुके न भविष्यतीति भावः। स्यान्तस्येति। इह सार्वधातुके विकरणे कृते तेन व्यवधानात्सार्वधातुकपरतः करोतेरित्यस्यार्थस्यासम्भवात्सार्वधातुके परतो यदङ्गं तदवयवस्य करोतेरित्याश्रयणीयम् । एवं च स्यान्तस्यापि प्राप्नोति । स्यग्रहणमुपलक्षणं तास्यन्तस्यापि प्रसङ्गात् । कृञ उत्व इति । उत इत्यनुवर्तनादिति भावः । इतरस्तु करोतेरित्युकारनिर्देशाश्रयेणोक्तमिति मत्वाहाशक्य इति । उत इति वर्तत इति । तेनोकारान्तस्याङ्गस्यावयवस्य करोतेरत उत् सार्वधातुके क्ङिति भवतीति सूत्रार्थः संपद्यते अभ्यस्तमपीति।

स्ति। ननु चेदमस्ति । अप्सु यायावरः प्रवपेत पिण्डानिति । नैतदाकारान्तम् । किं तर्हि। यकारान्तमेतत् । उत्तरार्थमेव तर्हि ईहल्यघोरिति। तत्रापि श्नाभ्यस्तयोरित्येव । अतोऽप्युत्तरार्थमेव तर्हि इद्दरिद्रस्येति । वक्ष्यत्येतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति । अतोऽप्युत्तरार्थं भियोन्यतरस्याम् । अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थमेव तर्हि जहातेश्च । अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थमाच हौ । हावित्युच्यते अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थमेव लोपोयि । अभ्यस्तस्येत्येव। अतोऽप्युत्तरार्थमेव घ्वसोरेद्धावभ्यासलोपश्च । हावित्युच्यते । तदेव तर्हि प्रयोजनं श्नसोरल्लोप इति । ननु चोक्तं श्नः सार्वधातुक एव अस्तेरप्यार्धधातुके भूभावेन भवितव्यमिति । अनुप्रयोगे तु भुवास्त्यबाधनं स्मरन्ति कर्त्तुर्वचनान्मनीषिणः ॥ अनुप्रयोगे तु भूभावे नास्तेरबाधनमिष्यते । इहामासतुः । इहामासुः । किं च स्यादयत्र लोपः स्यात् । लोपे द्विर्वचनासिद्धिः * । लोपे कृतेऽनच्कत्वाद्द्विर्वचनं न स्यात् । स्थानिवद्भावाद्भविष्यति । स्थानिवदिति चेत्कृते भवेद् द्वित्वे ॥ स्थानिवदिति चेत् कृते द्वित्वे लोपः प्राप्नोति । अस्तु तर्हि परस्य लोपः । अभ्यासस्य योकारस्तस्य दीर्घत्वं भविष्यति । नैवं सिध्यति । कस्मात् । प्रसङ्गत्वाद्भवेद्धि पररूपम् ॥ न चैवं सिध्यति । कस्मात् । प्रसङ्गत्वात्पररूपं प्राप्नोति । तस्मिंश्च कृते लोपः ॥ पररूपे च कृते लोपः प्राप्नोति । दीर्घत्वं बाधकं भवेत् ॥ तत्रात आदेरिति दीर्घत्वं बाधकं भविष्यति । इदं तर्हि प्रयोजनं सार्वधातुके

---

यत्र नेष्यते लोप इति भावः । यत्र त्वस्ति तत्र भवत्येव लोप. ययतुर्ययुरिति । यायावर इति । ननु चातो लोपस्य स्थानिवद्भावात् प्राप्त आकारलोपे वरेऽ जादेशस्य स्थानिवत्त्वं निषिध्यते । यदि चात्र श्नाभ्यस्तयोरात इत्यालोपः स्यात् स्थानिवत्त्वनिषेधोऽनर्थकः स्यात् । ईहल्यघोरितीत्त्वमत्र प्राप्नोतीति चेद्वक्ष्यमाणाद्भेदाभावः । एवं तर्हि भाष्यकार आलोपप्राप्तिमभ्युपेत्य परिहारान्तरमाह नैतदाकारान्तमिति। याय् इति स्थिते सन्यङन्तस्य प्रथमैकाचो द्विर्वचनं ततो याय् इत्यस्य द्विर्वचनं ततो यायाय् इत्यभ्यस्तमाकारान्तं न भवति । ननु या याय्शब्दस्याभ्यस्तसंज्ञायां यलोपे कृते भवत्येवावशिष्टस्याभ्यस्तसंज्ञा । एवं तर्हि उपदेशग्रहणानुवृत्त्या उपदेशे यदकारान्तमभ्यस्तं तस्याल्लोपो न तु कृते यलोप इति मत्वा परिहार उक्तः । अभ्यस्तस्येत्येवेति । ननु च बिभीवानित्यत्रापि प्राप्नोति। एवं तर्हि छान्दसः क्वसुरिति भाष्यकारस्य दर्शनं छन्दसि च दृष्टमनुविधीयते । कृते द्वित्वे लोपः प्राप्नोतीति । ननु च नियतकालवत्त्वात् स्थानिवद्भावस्य कृते द्वित्वे लक्षणप्रवृत्तिमन्तरेण स्वत एवादेशरूपमवतिष्ठते इति कथं लोपप्राप्तिः । उच्यते । पुनः प्रवृत्तिर्लक्षणस्येति स्थानिवद्भावप्रकरणे प्रतिपादितम् । अस्तु तर्हीति । अनन्त्यविकारेऽन्त्यसदेशस्येति वचनात् । अथ वा क्ङित्यनन्तरस्याकारस्य लोपः तत्र येन नाव्यवधानमित्येकवर्णव्यवहितस्य लोपः । दीर्घत्वमिति । अतआदेरित्यनेन । प्रसङ्गत्वादिति । वर्णाश्रय-

Indira Gandhi National Centre for the Arts

भूतपूर्वमात्रेपि यथा स्यात् कुरु इति ॥

श्नसोरल्लोपः ॥ १११ ॥ अथात्र तपरकरणं किमर्थम् । इह मा भूत् । आस्ताम् । आसन् । नैतदस्ति प्रयोजनम् । आटोसिद्धत्वान्न भविष्यति ॥

इद्दरिद्रस्य ॥ ११३ ॥ दरिद्रातेरार्द्धधातुके लोपः * । दरिद्रातेरार्धधातुके लोपो वक्तव्यः । सिद्धश्च प्रत्ययविधौ * । स च सिद्धः प्रत्ययविधौ । किं प्रयोजनम् । दरिद्राति । दरिद्रः आकारान्तलक्षणः प्रत्ययविधिर्मा भूदिति । न दरिद्रायके लोपो दरिद्राणे च नेष्यते । दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥ अद्यतन्यां वा * । अद्यतन्यां वेति वक्तव्यम् । अदरिद्रासीत् अदरिद्रीत् ॥

अत एक हल्मध्येनादेशादेर्लिटि ॥ १२० ॥ णकारषकारादेरेत्ववचनं लिटि * । णकारषकारादेरेत्वं लिटि वक्तव्यम् । नेमतुः । नेमुः । सेते । सेहाते । सेहिरे । किं पुनः कारणं न सिध्यति । अनादेशादेरिति प्रतिषेधः प्राप्नोति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । लिटादेशादिं विशेषयिष्यामः । लिटि य आदेशादिस्तदादेर्नेति । अस्त्यन्यल्लिड्ग्रहणस्य प्रयोजनम् । किम् । इह मा भूत् । पक्त्वा । पक्तुम् । नैतदस्ति प्रयोजनम् । क्ङितीति वर्तते । एवमपि पक्वः पक्ववानित्यत्र प्राप्नोति । अभ्यासलोपसन्नियोगेनैत्वमुच्यते न चात्राभ्यासलोपं पश्यामः । एवमपि पापच्यते अत्र प्राप्नोति । दीर्घत्वमत्र बाधकं भविष्यति । नाप्राप्ते

---

त्वात्पररूपमन्तरङ्गं तत्र कृते अल्लोपे च सतुः सुरिति प्राप्नोति । दीर्घत्वमिति । येन नाप्राप्तिन्यायेन पररूपं बाधित्वा दीर्घत्वं भविष्यतीत्यर्थः । कुर्विति । अत्र न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादुत्वं न स्यादिति भूतपूर्वगत्या सार्वधातुकग्रहणाद्भवति ॥ ११० ॥

श्नसोरल्लोपः ॥ आस्तामिति । लङ् ताम् । अल्लोपे च कृते तस्यासिद्धत्वादाट् । नैतदस्तीति । अत्र प्रत्याख्यातं तपरकरणं परस्तात्तु ज्ञापकत्वमस्य वक्ष्यते । श्नसोरत्वे तकारेण ज्ञाप्यते त्वेत्वशासनमिति ॥ १११ ॥

इद्दरिद्रस्य ॥ सिद्धश्चेति । आर्धधातुके इति विषयसप्तमीत्यर्थः । अकारान्तलक्षण इति । यद्यार्धधातुक इति परसप्तमी स्यात्तदा दरिद्र इति श्याद्व्यधेति णे कृते द्वयोरनित्ययोः परत्वाद्युच् स्यात् । लोपस्य च शब्दान्तरप्राप्त्याऽनित्यत्वम् । युकस्तु लोपे कृतेऽप्राप्त्याऽनित्यत्वम् । अथाप्याकृतिपक्षे नित्यत्वादाल्लोपस्तथाप्यदरिद्र इत्यत्राच्काववशक्तावित्यन्तोदात्तत्वं न स्यात् । ईषद्दरिद्रमित्यातो युजिति युच् प्रसज्येत । दिदरिद्रासतीति । तनिपतिदरिद्राणामुपसंख्यानमिति व्यवस्थितविभाषाविज्ञानाल्लोपपक्षे इडागमः । लोपाभावपक्षे त्विडभावः । अदरिद्रासीदिति । यमरमेत्यत्रैकाच इत्यधिकारादेकाचः सगिटावित्येकीयमतमित्यनेकाचोपि भवतः । चिणि अदरिद्रि अदरिद्रायीति भवति ॥ ११३ ॥

अत एक ॥ लिटि य आदेशादिरिति । नत्वसत्वयोर्नैमित्तिकत्वाल्लिण्निमि-

ऽभ्यासविकारएत्वमारभ्यते । तद्यथा । अन्यानभ्यासविकारानसौ बाधते । एवं दीर्घत्वमपि बाधेत । सत्यमेवैतत् । अभ्यासविकारेष्वपि तु ज्येष्ठमध्यमकनीयांसः प्रकारा भवन्ति । तत्र ह्रस्वहलादिःशेषावुत्सर्गौ तयोर्दीर्घत्वमपवादः । एत्वं च । अपवादविप्रतिषेधाद्दीर्घत्वं भविष्यति । इहापि तर्हि बभणतुः बभणुरित्यभ्यासादेशस्यासिद्धत्वादेत्वं प्राप्नोति । फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशासिद्धत्वस्य । यदयं फलिभज्योर्ग्रहणं करोति तज्ज्ञापयत्याचार्यः अभ्यासादेशः सिद्ध एत्व इति । यद्येवं प्रथमतृतीयादीनामादेशादित्वादेत्वाभावः । प्रथमतृतीयादीनामपि तर्ह्यादेशादित्वादेत्वं न प्राप्नोति।पेचतुः। देभतुः ।पेचुः।देभुः ।न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्य * । न वा एष दोषः । किङ्कारणम् । शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्य । यदयं शसिदद्योः प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः रूपाभेदेन ये आदेशादयो न तेभ्यः प्रतिषेधो भवतीति । दम्भ एत्वम्*। दम्भ एत्वं वक्तव्यम् । देभतुः। देभुः। किं पुनः कारणं न सिध्यति । नलोपस्यासिद्धत्वात्।असिद्धो नलोपस्तस्यासिद्धत्वादेत्वं न प्राप्नोति । नशिमन्योरलिट्येत्वम् । नशिमन्योरलिटि एत्वं वक्तव्यम् । छन्दस्यमिपचोरपि ॥ छन्दसि अमिपचोरपीति वक्तव्यम् । किं प्रयोजनम् । अनेशंमेनकेत्येतद् व्येमानं लिङ्ङि पेचिरन् ॥ यजायेजे वपावेपे । यज । आयेजे । वप । आवेपे ।

---

बाधकत्वाभावः। अभ्यासलोपसंनियोगेनेति । अभ्यासलोपश्चेति चशब्दः समुच्चये न त्वन्वाचये। दीर्घत्वमत्रेति । अभ्यासविकारेषु बाधका न बाध्यन्त इत्येतत्तु यत्र सर्वेषां प्रवृत्तिस्तत्राश्रीयते। यद्यपि कृते दीर्घत्वे एत्वाभ्यासलोपप्रसङ्गस्तथाप्येत्वाभ्यासलोपयोः कृतयोर्दीर्घत्वाप्रसङ्ग इति विरुद्धत्वादत्र बाधकत्वाभावः । नाप्राप्त इति । क्व चित् ह्रस्वः क्व चिद्धलादिः शेषश्च प्राप्नोति । ज्येष्ठमध्यमकनीयांस इति मध्यमापेक्षयोत्सर्गस्य प्रकर्षसद्भावात् कनीयानुत्सर्गोऽल्पतर इत्यर्थः। मध्यमो यः कस्य चिद्बाधकः कस्य चिद् बाध्यः। ज्येष्ठो यो बाधकस्यापि बाधकः। असिद्धत्वादिति। पूर्वत्रासिद्धमिति लक्षणेन । बभणतुरित्यादावेव तु प्रतिषेधः स्यात्। पेचतुरिति। प्रकृतिचरां प्रकृतिचराः प्रकृतिजशां प्रकृतिजश इत्यादेशादित्वम् । वचनं तु देणतुर्येमतुरित्यादौ चरितार्थम्।अभ्यासे चर्चेति जश्चरोः प्राप्तयोः स्थानेऽन्तरतम इति परिभाषाया व्यापारदर्शनमिदं प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति। अनेशमिति। लुङ् मिपोऽम्भावः। पुषादित्वादङादेशः छन्दसीति पूर्वेणापि सम्बन्धाद्भाषायामेत्वाभावः। एवं तु मेनकेत्यपि भाषायां न प्राप्नोति । यदि त्विष्यते पृषोदरादित्वाद्भविष्यति। मनेराशिषि चेति वुन्प्रत्ययः । न यासयोरित्यत्राशिषि चोपसंख्यानमितीत्वाभावः । व्येमानमिति । विपूर्वाद्मतेस्ताच्छील्यादिषु चानश्छान्दसः शपो लुक्। पेचिरन्निति पचेरन्निति प्राप्ते छान्दस एत्वह्रस्वत्वे क्रियेते। आयेजे इति। लङ् इट् छन्दस्यपि दृश्यत इति आट् । दम्भेरेत्वमलक्षणमिति।

Indira Gandhi National
Centre for the Arts

दम्भएत्वमलक्षणम् ॥ असिद्धत्वान्नलोपस्य दम्भएत्वं न सिध्यति । श्नसोरत्वे तकारेण ज्ञायते त्वेत्वशासनम् ॥ अनित्योयं विधिरिति ॥

**थलि च सेटि ॥ १२१ ॥** थल्ग्रहणं किमर्थम् । थल्ग्रहणमकिडर्थम् * । थल्ग्रहणं क्रियतेऽकिडर्थम् । अकिडेत्वं यथा स्यात् । पेचिथ । शेकिथ । नैतदस्ति प्रयोजनम् । सेड्ग्रहणमेवात्राकिडर्थं भविष्यति । इदं तर्हि प्रयोजनं समुच्चयो यथा स्यात् थलि च सेटि क्ङिति च सेटीति । किं प्रयोजनम् । पेचिव । पेचिम । तत्र पचादिभ्य इड्वचनमिति वक्ष्यति तन्न वक्तव्यं भवति । इह कस्मान्न भवति । लुलविथ । गुणस्य नेति प्रतिषेधात् । इहापि तर्हि न प्राप्नोति पेचिथ । शेकिथ । गुणस्य यो ऽकार इत्येवमेतद्विज्ञास्यते । एवमपि शशरिथेत्यत्र न प्राप्नोति । गुणस्यैवैषो ऽकारः । कथम् । वृद्धिर्भवति गुणो भवति इति रेफशिरागुणवृद्धिसंज्ञका ऽभिनिर्वर्तते । अथ वा आचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामेत्वं भवतीति यदयं तॄफलभजत्रपश्चेति तॄग्रहणं करोति ॥

**राधो हिंसायाम् ॥ १२३ ॥** राधादिषु स्थानिनिर्देशः * । राधादि-

---

लक्षणेन न प्राप्नोति नलोपस्यासिद्धत्वादित्यर्थः । श्नसोरत्व इति । असिद्धत्वस्यानित्यत्वज्ञापनाय तकारः कृतः । नित्ये त्वसिद्धत्वे आसन्नित्यादावटो ऽसिद्धत्वाल्लोपो न भविष्यतीति किं तन्निवृत्त्यर्थेन तकारेण । तेन सिद्धत्वाभावाद् दम्भ एत्वं सिध्यतीत्यर्थः ॥ १२० ॥

थलि च ॥ थल्ग्रहणमिति । क्ङिति सेटि एत्वस्य सिद्धत्वात्सेड्ग्रहणमेवाकिडर्थं भविष्यति थल् एव च सेडक्ङिद् इति प्रश्नः । क्ङिति च सेटीति । यथा पेचिवपेचिमेति । इदं वचनं न नियमार्थं सेट्येव क्ङितीति नियमे हि पेचतुरित्यादौ न स्यात् । किं तर्हि । एत्वस्य कालावधारेण क्रियते यथा लिट्यनां संटीत्यत्र । तत्र पेचिवेत्यादावििट कृते एत्वाभ्यासलोपौ भवतः । अन्यथैकाच इतीट्प्रतिषेधः प्रसज्येत । यदोपदेशग्रहणमनुदात्तविशेषणं नैकाज्विशेषणं तदा श्रूयमाणेदकाच इतीट्प्रतिषेधेन भाव्यमिति कृसृभृ इति सूत्रे विध्यर्थं भवति न तु नियमार्थम् । तत्र पचेरेत्वाभ्यासलोपयोः कृतयोरेकाच्त्वादिट्प्रतिषेधप्रसङ्गे पचादिभ्य इड्वचनमिति वक्ष्यते । क्ङीति च सेटीति तु कालावधारणार्थे सति पूर्वमिट् तत एत्वाभ्यासलोपावित्यानुपूर्व्या सिद्धं भवतीति नार्थो वचनेन । लुलविथेति । अवादेशे कृते एकहल्मध्यगतो ऽकार इत्येत्वप्रसङ्गः । समुदायग्रहणे च लक्षणप्रतिपदोक्तपरिभाषोपतिष्ठते न वर्णमात्रग्रहणे । न चायमकारो गुणशब्दाभिनिर्वृत्त इति न शसददेति प्रतिषेधोपि नास्तीति मत्वा प्रश्नः । गुणस्य योकार इति । वैयधिकरण्येन सम्बन्ध आश्रीयते । लुलविथेत्यादावाकारस्यावादेशविधानाद् गुणस्याकार इति प्रतिषेधः प्रवर्तते । पेचिथेत्यादौ तु गुण एवाकारो न तु गुणस्येति प्रतिषेधाभावः । एवमपीति । गुण एवात्राकारो न तु गुणस्येति । अवयव इत्यर्थः । ऋः आ-

Indira Gandhi National Centre for the Arts

षु स्थानिनिर्देशः कर्तव्यः। न कर्तव्यः। एकहल्मध्य इति वर्तते। यद्येवं त्रेसतुः त्रेसुः रशब्दस्यैत्वं प्राप्नोति। अस्तु। अलोन्त्यस्य विधयो भवन्तीति अकारस्य भविष्यति। अनर्थके ऽलोन्त्यविधिर्नेत्येष न प्राप्नोति। नैतस्याः सन्ति परिभाषायाः प्रयोजनानि। अथ वा ऽत इति वर्तते। एवमपि राधेन प्राप्नोति। आकारग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। श्नाभ्यस्तयोरात इति। अथ वा श्नसोरल्लोप इत्यत्र तपरकरणं प्रत्याख्यायते। तत्प्रकृतमिहानुवर्तिष्यते। यदि तदनुवर्तते। अत एकहल्मध्ये नादेशादेर्लिटि। अस्य चेति। अवर्णमात्रस्यैत्वं प्राप्नोति। बबाधे। अकारेण तपरेणा ऽवर्णं विशेषयिष्यामः। अस्या ऽत इति। इहेदानीमस्येत्यनुवर्तते अत इति निवृत्तम्॥

अर्वणस्त्रसावनञः॥ १२७॥ मघवा बहुलम्॥ १२८॥ अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत्। अर्वणस्तृ मघोनश्च न शिष्यम्। किङ्कारणम्। छान्दसं हि तत्। दृष्टानुविधिश्छन्दसि भवतीति। मतुब्वन्योर्विधानाच्च॥ मतुवनौ खल्वपि छन्दसि विधीयेते। छन्दस्युभयदर्शनात्॥ उभयं खल्वपि छन्दसि विधीयेते। छन्दस्युभयदर्शनात्॥ उभयं खल्वपि छन्दसि दृश्यते। इमान्यर्वणः पदानि अनर्वाणं वृषभं मन्द्रजिह्वम्॥ इति श्रीमहाभाष्ये षष्ठाध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्॥

पादः पत्॥ १३०॥ पाद उपधाह्रस्वत्वम् *। पाद उपधाया ह्रस्वत्वं वक्तव्यम्। द्विपदः पश्य। आदेशे हि सर्वादेशप्रसङ्गः *। आदेशे हि सर्वादेशः प्रसज्येत। सर्वस्य द्विपाच्छब्दस्य त्रिपाच्छब्दस्य च पच्छब्द आदेशः प्रसज्येत।

———————

मेण प्रसज्यमान एव रपरो भवति पूर्वभक्तश्च रेफ इत्ययं गुणः॥ १२१॥

राधो॥ राधादिर्द्विर्भवति। अलोन्त्यस्येति वचनादेत्वमन्त्यस्य प्राप्नोतीत्युपधाया इति वक्तव्यमित्यर्थः। अथ वात इति। ततो भ्रमादीनामेवैत्वमाकारस्य भवति। अकारेणेति। समुच्चयेऽत इत्यनर्थकं स्यादिति विशेषणविशेष्यभावाश्रयः॥ १२३॥

अर्वणः॥ छान्दसमिति। छन्दसीवनिपाविति वनिबस्ति मतुप् चेति प्रत्ययद्वयेन रूपद्वयासिद्धत्वान्नार्थः सूत्रद्वयेन। तत्रैतत्स्यात्सर्वत्र रूपद्वयप्रसङ्गो ऽत आह दृष्टानुविधिरिति। भाषाशब्दा अपि नियतविषयाः किं पुनश्छान्दसाः। तत्र ऋ इत्यस्य विचि गुणे अरिति। रूपं तस्मान्मतुप्यर्वन्ताविरयादि भवति। वनिप्यर्वण इत्यादि भवति। मघशब्दादपि प्रत्ययद्वये यथाविषयं रूपद्वयं सिद्धम्। एवं चार्वन्मघवन्शब्दस्य भाषायां नास्ति प्रयोग इत्युक्तं भवति॥ १२७॥ १२८॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठाध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्।

पादः पत्॥ आदेशे हीति। पादन्तस्याङ्गस्य विधीमानो ऽनेकाल्त्वात्सर्वादेशः प्राप्नोति। नवेति। यद्यपि पाच्छब्देन तदन्तः समुदाय प्रत्याख्यत तथापि

Indira Gandhi National Centre for the Arts

येन विधिस्तदन्तस्येति । तर्त्तर्हि वक्तव्यम् । न वा निर्दिश्यमानस्यादेशत्वात् * । न वा वक्तव्यम् । किङ्कारणम् । निर्दिश्यमानस्यादेशा भवन्तीत्येषा परिभाषा कर्तव्या । कः पुनरत्र विशेषः । एषा वा परिभाषा क्रियते उपधाह्रस्वत्वं वोच्यते । अवश्यमेषा परिभाषा कर्तव्या बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि पुनस्तानि प्रयोजनानि । प्रयोजनं सुप्तिङादेशेषु ॥ सुप्, कुमार्याम् । किशोर्याम् । खट्वायाम् । मालायाम् । तस्याम् । यस्याम् । आड्याट्स्याट्सु कृतेषु आड्याट्स्याट्कस्याम्प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । इदमिह संप्रधार्यम् ।आड्याट्स्याटः क्रियन्तामामिति । किमत्र कर्तव्यम्। परत्वादाम् । नित्या आड्याट्स्याटः । कृतेप्यामि प्राप्नुवन्त्यकृतेपि । अनित्या-आड्याट्स्याटः । कथम् । अन्यस्य कृते आमि प्राप्नुवन्त्यन्यस्याकृते । शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति । उभयोरनित्ययोः परत्वादाम्।इदं तर्हि यस्यै तस्यै स्याटि कृते सस्याट्कस्य स्यैभावः प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । स्याटा व्यवहितत्वात् । सुप् । तिङ्, अरुदिताम् । अरुदितम् । अरुदितेति इटि कृते सेट्कस्य तांतंतामादेशाः प्राप्नुवन्ति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । इदमिह सम्प्रधार्यताम् । इट् क्रियतां तांतंताम इति । किमत्र कर्तव्यम् । परत्वादिडागमः अन्तरङ्गास्तांतन्तामः । इदं तर्हि, क्रियास्ताम् । क्रियास्तम् । क्रियास्त । क्रियासम् । यासुटि कृते सयासुट्कस्य तांतन्तामः प्राप्नुवन्ति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । ल्यब्भावे च ॥ ल्यब्भावे च

---

यो निर्दिश्यते यतः षष्ठी श्रूयते तस्यैव षष्ठी स्थानेयोगेति वचनादादेशो न तु प्रतीयमानस्य । यद्यप्युच्चार्यमाणस्यानुकरणस्यादेशेन सम्बन्धाभावस्तथाप्यनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादेवमुक्तम् । तत्र यथालोन्त्यस्येति वचनाद्गुह: प इत्युक्ते रुहिहकारस्य पकारो भवति । एवं पाच्छब्दप्रत्ययेनतदन्तसमुदायावयवस्य पाच्छब्दस्य पदादेशः । न दोषो भवतीति । अत्रैव वक्तव्यम् । यो निर्दिश्यते तस्यागमव्यवधानादाम्न प्राप्नोति । अत एव परत्वाश्रयेणाव्यवधानं कर्तुमाह इदमिहेति । आडादीनामवकाशः । खट्वायाः । कुमार्याः । सर्वस्या इत्यामोऽवकाशः । कृतेष्वाडादिषु वचनाद्व्यवधानेपि प्रवर्तनात् । यदि तु नाप्राप्तेष्वाडादिष्वादेश आरभ्यते इत्युच्यते । ततोपवादत्वादामा तेषां बाधः प्राप्नोति इत्यागमानामादेशस्य चात्र समावेश एष्टव्यः । सेट्कस्येति । प्राग्लादेशेभ्यो धात्वधिकार इत्यस्मिन् पक्षे ऽवध्यनुपादानाद् व्यवधानात्तमादीनामप्रसङ्ग इति नोच्यते । अन्तरङ्गा इति । प्राग्लादेशेभ्यो धात्वधिकारात्तामादयोन्तरङ्गाः । क्रियास्तामिति । परत्वादन्तरङ्गत्वाद्वा यासुटि कृते तामादयः । स्कान्तस्येति । प्रत्ययग्रहणपरिभा-

Indira Gandhi National Centre for the Arts

प्रयोजनम् । प्रकृत्य । प्रहृत्य । क्त्वान्तस्य ल्यप्प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु प्रयोजनम् ॥ अतितिस्रः । अतिचतस्रः । त्रिचतुरन्तस्य तिसृचतसृभावः प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । युष्मद् अस्मद् अतियूयम् । अतिवयम् । युष्मदस्मदन्तस्य यूयवयौ प्राप्नुतः । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । त्यदादिविकारः, अतित्यः । उत्तमस्यः । अत्यसौ । उत्तमासौ । त्यदाद्यन्तस्य त्यदादिविकाराः प्राप्नुवन्ति । किमन्तस्य कादेशः प्राप्नोति । अतिकः । परमकः । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । उदस्थास्तम्भोः पूर्वत्वे प्रयोजनम् ॥ उदस्थात् । उदस्थाताम् । आटि कृते साट्कस्य पूर्वसवर्णः प्राप्नोति उदः स्थास्तम्भोरिति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । अटा व्यवहितत्वात् । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । उक्तं षष्ठी स्थाने योगेत्यस्य वचने प्रयोजनम् । षष्ठ्यन्तं स्थानेन युज्यते । यतः षष्ठी उच्चारितेति ॥

वाह ऊठ् ॥ १३२ ॥ अडादिः कस्मान्न भवति । आदिष्टिद्भवतीत्यादि प्राप्नोति । संप्रसारणमित्यनेन यणः स्थाने क्रियते । यद्येवं; वाह ऊठ्वचनार्थक्यं

---

यया धातुप्रत्ययसमुदायस्य ल्यपः प्रसङ्गः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमित्येषा तु परिभाषा ऽनञ्पूर्व इति वचनान्नोपतिष्ठते । सामान्यशब्दस्यापि ल्यपः प्रकरणाद्यपेक्षस्य विशेषावसायहेतुत्वं स्यात् । अतित्स्य इति । शोभनः स्य इत्युत्तरपदार्थप्रधानस्तत्पुरुषो द्रष्टव्यः । उपसर्जने तु त्यदाद्यत्वाभावः । अत्र पदाङ्गाधिकार इति वचनात्तदन्तस्य समुदायस्यातिशब्दतकारस्यापि तदोः सः सावनन्त्ययोरिति सत्वप्रसङ्गः । अत्वं त्वलोन्त्यस्येति वचनादन्त्यस्यैव भवति इति तत्र विशेषाभावः । परमक इति । अनेकाल्त्वात्सर्वादेशः कः प्राप्नोति । ननु सत्वविधौ त्यदादीनामिति न स्थानषष्ठी । का तर्हि तदादिरित्येषेति । कथं सत्वमतिशब्दतकारस्य परिह्रियते । एवं तर्हि त्यदादीनां गणसन्निविष्टानां यौ निर्दिश्येते तकारदकारौ तयोः सत्वविधानादतिप्रसङ्गाभावः ॥ १३० ॥

वाह ऊठ् ॥ ऊडादिरिति । यद्यपि च्छ्वोः शूडित्यत्रास्य ठित्वं प्रतिपादितं तथापि यथाश्रुतं गृहीत्वा प्रश्नः । संप्रसारणमित्यनेनेति । वाक्यस्य भाविवर्णस्य वा संप्रसारणसंज्ञायां विज्ञायमानायां यणः स्थाने ऊठ् भवति । अथ यण आदिरूठ् कस्मान्न भवति । संप्रसारणप्रदेशान्तरेषु यण इति स्थानषष्ठ्याश्रयणादिहापि स्थानषष्ठ्येव युक्ता । यथोक्तं सप्तदशादेशाः स्थानेयोगत्वं प्रयोजयन्तीति । कित्करणन्तु वृद्ध्यर्थम् । यद्येवमिति । प्रष्ठवाह अस् इति स्थिते वकारस्य संप्रसारणे पूर्वैकादेशे च कृते गुणे ओकारो ण्विप्रत्ययाश्रयः । तथा वृद्धिरेचीति वृद्धौ कृतायां प्रष्ठौह इत्यादि सिध्यति । अनकारान्ते चोपपदे छन्दसि ण्विर्न दृश्यत इति शाक्यु-

सम्प्रसारणेन कृतत्वात् * । वाह ऊठ्वचनमनर्थकम् । किङ्कारणम् । सम्प्रसारणेन कृतत्वात् । सम्प्रसारणेनैव सिद्धम् । का रूपसिद्धिः । प्रष्ठौहः पश्य । गुणः प्रत्ययलक्षणत्वात् * । प्रत्ययलक्षणत्वाद् गुणो भविष्यति । एज्ग्रहणाद् वृद्धिः * । एज्ग्रहणाद् वृद्धिर्भविष्यति । एवं तर्हि सिद्धे सति यद्वाह ऊठं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति । किमेतस्य ज्ञापने प्रयोजनम् । पचावेदम् । पचामेदम् । असिद्धत्वाद् बहिरङ्गलक्षणस्याद्गुणस्यान्तरङ्गलक्षणमैत्वं न भवति ॥

श्वयुवमघोनामतद्धिते ॥ १३३ ॥ श्वादीनां सम्प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम् * । श्वादीनां सम्प्रसारणे नकारान्तग्रहणं कर्तव्यम् । किं प्रयोजनम् । अनकारान्तस्य मा भूत् । मघवता । मघवते । तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येति । एवं युवतीः पश्येत्यत्रापि स्यादिति । यत्तावदुच्यते नकारान्तग्रहणं कर्तव्यमिति । न कर्तव्यम् । उक्तं वा * । किमुक्तम् । उक्तमेतदर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तद् इति । यदप्युच्यते । तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति । यथेह भवति यूनः पश्येति एवं युवतीः पश्येत्यत्रापि स्यादिति । लिङ्गविशिष्टग्रहणं चोक्तम् । न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति । अथ वोपरिष्टाद्योगविभागः करिष्यते । श्वयुवमघोनामतद्धिते । अल्लोपः । अकारस्य च लोपो भवति । ततो ऽनइत्युभयोः शेषः । श्वयुवः ॥

---

ह इत्यादिसिध्यर्थमप्यूड्विधानं नोपपद्यते । सत्यपि वा प्रयोगे वह्यर्थे प्रवर्त्तमानस्यौहतेः क्विपि शाल्यूह इत्यादि भविष्यति । उपसर्गेप्युपपदे वहेर्ण्विः छन्दसि नास्ति ॥ यतो वृद्धिबाधकं पररूपं प्रसज्येतेत्यूठविधानं सार्थकं स्यात् । एवं तर्हीति । संप्रसारणं यजादिप्रत्ययनिमित्तभसंज्ञाश्रयत्वाद्बहिरङ्गमन्तरङ्गे व्याश्रये गुणे कर्तव्ये ऽसिद्धमिति गुणो न स्यात्तदभावे रूपं न सिध्येदित्यूठविधानमसिद्धपरिभाषां ज्ञापयति । ननु नैतज्ज्ञापकसाध्यं लोकतः सिद्धत्वात् । प्रत्यङ्गवर्ती हि लोकः । नैतदस्ति । यत्र युगपदन्तरङ्गबहिरङ्गयोः प्राप्तिस्तत्र लौकिकन्यायाश्रयणाद्भवत्वन्तरङ्गम् । इह तु बहिरङ्गनिमित्तमन्तरङ्गमिति लौकिकन्यायानवतारः ॥ १३२ ॥

श्वयुव ॥ श्वादीनामिति । मघवा बहुलमिति त्रादेशे कृते एकदेशविकृतस्यानन्यत्वान्मघवतेत्यादौ संप्रसारणप्रसङ्गः । अर्वणस्त्रिति । मघवच्छब्दो मतुबन्त इत्यर्थः । न वा विभक्ताविति । यद्यपि विभक्तिमाश्रित्य संप्रसारणं विधीयते तथापि विभक्तौ विधीयत इति लिङ्गविशिष्टपरिभाषानुपस्थानम् । अन इत्युभयोः शेष इति । समुदायापेक्षणात् । न च त्रादेशे कृते अन्नन्तत्वमस्ति । एकदेशविकृतस्यानन्यत्वेनाप्यन्नन्तत्वं नास्ति । सामान्यातिदेशे विशेषानतिदेशात् । युवतिशब्दो ऽप्यन्नन्तो न भवतीति तस्यापि संप्रसारणाभावः ॥ १३३ ॥

षपूर्वहन्धृतराज्ञामणि ॥ ॥ १३५ ॥ अथ किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहो स्विन्नियमार्थम् । कथं वा अल्लोपार्थं कथं वा नियमार्थम् । यद्यविशेषेणाल्लोपटिलोपयोः प्रकृतिभावस्ततो विध्यर्थम् । अथ हि अणि टिलोपस्यैव प्रकृतिभावस्ततो नियमार्थम् अत उत्तरं पठति । षपूर्वादीनां पुनर्वचनमल्लोपार्थम् । षपूर्वादीनां पुनर्वचनं क्रियते अल्लोपार्थम् । अविशेषेणाल्लोपटिलोपयोः स प्रकृतिभावः । अवधारणे ह्यन्यत्र प्रकृतिभावे उपधालोपप्रसङ्गः *। अवधारणे हि सति अन्यत्र प्रकृतिभावे उपधालोपः प्रसज्येत । कथम् । यदि तावदेवं नियमः स्यात् षपूर्वादीनामेवाणीति । एवमपि भवेदिह नियमान्न स्यात् सामनो वैमन इति । ताक्षण्य इति च प्राप्नोति । अथाप्येवं नियमः स्यात् । षपूर्वादीनामण्येवेति । एवमपि भवेदिह नियमान्न स्यात् ताक्षण्य इति । सामनो वैमन इत्यत्र तु प्राप्नोति । अथाप्युभयतो नियमः स्यात् षपूर्वादीनामेवाणि अण्येव षपूर्वादीनामिति । एवमपि सामन्यो वैमन्य इति प्राप्नोति । तस्मात्सुष्ठूच्यते षपूर्वादीनां पूर्ववचनमल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्ग इति ॥

आतो धातोः ॥ १४० ॥ आतोऽनापः *। अतोऽनाप इति वक्तव्यम् । इहापि यथा स्यात् । समासे नञ्पूर्वे क्त्वो ल्यबिति । अनाप इति किम् । खट्वायाम् । मालायाम् । यद्यनाप इत्युच्यते कथं क्त्वायामिति।निपातनात्सिद्धम् । किं निपातनम् । क्त्वायां च प्रतिषेध इति । यद्येवं नार्थोऽनाप इत्यनेन । कथम् । समासे ऽनञ्पूर्वे क्त्वो ल्यबिति निपातनादेतत्सिद्धम् । कथम् । हलः श्नः शानज्झाविति । एतदपि निपातनात्सिद्धम् । अथ वा योगविभागः करिष्यते ।

---

षपूर्व ॥ अथेति । किमिदं विध्यर्थमथ नियमार्थमिति प्रश्नः । यद्यविशेषेणेति । प्रकृत्यैकाजित्यादिः प्रकृतिभावः प्राकरणिकविध्यपेक्षो न तु वृद्धिगुणापेक्षः । तत्प्राकरणिकानि कार्याणि भेदेनापेक्षेरन् अभेदेन वेति पक्षद्वयोपपत्तिः । अविशेषेणेति । अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते । ताक्षण्य इति । तक्ष्णोपत्यमिति सेनान्तलक्षणेति ण्यः, ये चाभावकर्मणोरिति प्रकृतिभावाट्टिलोपाभावः । अस्मान्नियमादल्लोपाभावः । सामन इति । सास्यदेवतेत्यण् । अत्रापीति प्रकृतिभावाट्टिलोपाभावेऽल्लोपप्रसङ्गः । अथापीति । तन्त्रस्यावृत्तेर्वाश्रयणात् । सामन्य इति । तत्र साधुरिति यत् ॥ १३५ ॥

आतो ॥ समास इति । ननु सौत्रोयं निर्देश इति किं तदर्थेन योगविभागेन । एवं तर्हि यदा वैयाकरणा अनुकरणशब्दैर्व्यवहारमिच्छन्ति तदर्थो योगविभागः । ते हि साधुभिर्व्यवहारमाणा अभ्युदयभाजो भवन्ति । क्त्वायामिति । निपातनाल्लोपाभावो याडागमश्च । सामान्यापेक्षं च निपातनं सप्तम्यपेक्षम् । क्त्वाया इत्यपि भवति । ततो धातोरिति । इदं मित्यार्थं सत्पूर्वेण विकल्पं ज्ञापयति । सा च व्यव-

Indira Gandhi National Centre for the Arts

आतः। आकालोपो भवति। ततो धातोः। धातोश्चाकारस्य लोपो भवतीति॥

मन्त्रेष्वाङ्यादेरात्मनः॥ १४१॥ मन्त्रेष्वात्मनः प्रत्ययमात्रे *। मन्त्रेष्वात्मनः प्रत्ययमात्रे लोपः प्रसङ्क्तव्यः। इहापि यथा स्यात्। त्मन्या समञ्जन्। त्मनोरन्तरस्य इति। यदि प्रत्ययमात्रे लोप उच्यते कथमात्मन एव निर्मिमीष्वेति। तस्मान्नार्थः प्रत्ययमात्रे लोपेन। कथं त्मन्या समञ्जन्। त्मनोरन्तरस्य इति। छन्दस्त्वादिसिद्धम्। दृष्टानुविधिश्छन्दसि भवति। आदिग्रहणानर्थक्यमाकारप्रकरणात् *। आदिग्रहणं चानर्थकम्। किङ्कारणम्। आकारप्रकरणात्। अत इति वर्तते। मन्त्रेष्वाङ्यादेरात्मनः॥

ति विंशतेर्डिति॥ १४२॥ तिग्रहणं किमर्थम्। न विंशतेर्डिति लोप इत्येवोच्येत। नैवं शक्यम्। विंशतेर्डिति लोप इतीयत्युच्यमानेऽन्त्यस्य प्रसज्येत। सिद्धोऽन्त्यस्य यस्येति लोपेनैव। तत्रारम्भसामर्थ्यात्तिशब्दस्य भविष्यति। कुतो नु खल्वेतत्। अनन्त्यार्थे आरम्भे तिशब्दस्य भविष्यति न पुनरङ्गस्येति। तस्मात्तिग्रहणं कर्तव्यम्। अथ क्रियमाणेऽपि तिग्रहणेऽन्त्यस्य कस्मान्न भवति। निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति॥

टेः॥ १४३॥ अभस्योपसंख्यानम् *। अभस्योपसंख्यानं कर्तव्यम्। इहापि यथा स्यात्। उपसरजो मन्दुरज इति। तर्हि वक्तव्यम्। न वक्तव्यम्। कथमुपसरजो मन्दुरज इति। डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् *। अभस्याप्यनुबन्धकरणसामर्थ्याद्भविष्यति॥

———

स्थितविभाषेत्याबन्तस्याल्लोपाभावोऽन्तस्य यथाप्रयोगं विकल्पः। क्व चित्स्त्रीलिङ्गपुंलिङ्गाश्रयं कृत्वाया क इत्यादिरूपद्वयं व्याचक्षते॥ १४०॥

मन्त्रे॥ आङ्गिति पूर्वाचार्यप्रक्रिययैकवचनग्रहणाद्व्याप्ति मत्वाह मन्त्रेष्विति। त्मन्येति। सप्तम्येकवचनस्य स्थाने यशब्द आदेशः। छान्दसत्वादिति। यथा शिवाऽरुद्रस्येति प्राप्ते शिवाउद्रस्येति रेफलोपः एवमिहाकारलोपः। एवं च ब्रुवता सूत्रमेव प्रत्याख्यातम्। सति त्वारम्भे नार्थ आदिग्रहणेन। आतो धातोरित्यत आत इत्यनुवर्तनात्॥ १४१॥

तिविं॥ कुतो नु खल्विति। वचनसामर्थ्यादलोऽन्त्यपरिभाषाया अनुपस्थानात्समुदायस्यैव षष्ठीनिर्देशाल्लोपः प्रसज्येत न त्वसंशब्दितस्य तिशब्दस्य। तिग्रहणे तु सति तल्लोपो भवति। निर्दिश्यमानस्यादेशा भवन्तीति। नानेन परिभाषाया व्यापारः कथ्यते। नहि निर्दिश्यमानपरिभाषा अलोऽन्त्यस्यादेःपरस्येत्येतयोर्बाधिका। एतयोर्निर्विषयत्वप्रसङ्गात्। तस्मात्तिग्रहणसामर्थ्यादलोऽन्त्यस्यानुपस्थाने सर्वस्य लोपो भवतीत्ययमस्य भाष्यस्यार्थः॥ १४२॥

टेः॥ डित्यभस्यापीति। चुट्ट इति वचनादित्संज्ञा तावड्डकारस्य प्रवर्तते। दीर्घकाशतुषभ्राष्ट्रवटंजे इति निर्देशात्। तत्रश्चानुबन्धकरणसामर्थ्याद् भवति

नस्तद्धिते ॥ १४४ ॥ नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् * । नकारान्तस्य टिलोपे सब्रह्मचारिन्पीठसर्पिन्कलापिन्कौथुमिन्तैतिलिन्जाजलिन्लाङ्गलिन्शिलालिन्शिखण्डिन्सूकरसद्मन्सुपर्वन् इत्येतेषामुपसंख्यानं कर्तव्यम्। सब्रह्मचारिन्, सब्रह्मचारिण इमे साब्रह्मचाराः। सब्रह्मचारिन् । पीठसर्पिन्, पैठसर्पाः । पीठसर्पिन् । कलापिन्, कलापाः । कलापिन् । कौथुमिन्, कौथुमाः । कौथुमिन् । तैतिलिन्, तैतिलाः । तैतिलिन् । जाजलिन्, जाजलाः । जाजलिन् । लाङ्गलिन्, लाङ्गलाः । लाङ्गलिन् । शिलालिन्, शैलालाः । शिलालिन् । शिखण्डिन्, शैखण्डाः । शिखण्डिन् । सूकरसद्मन्, सौकरसद्माः । सूकरसद्मन् । सुपर्वन्, सौपर्वाः । सुपर्वन् । चर्मणः कोशे * । चर्मकः कोश उपसंख्यानं कर्तव्यम् । चार्मः कोशः । अश्मनो विकार उपसंख्यानम् * । अश्मनो विकार उपसंख्यानं कर्त्तव्यम् । अश्मनो विकार आश्मः । शुनः सङ्कोचे* । शौवः सङ्कोचः । अव्ययानां च सायम्प्रातिकाद्यर्थम्* । अव्ययानां च सायम्प्रातिकाद्यर्थमुपसंख्यानं कर्त्तव्यम् । किं प्रयोजनम् । सायम्प्रातिकाद्यर्थम् । सायम्प्रातिकः । पौनःपुनिकः । शाश्वतिके प्रतिषेधो वक्तव्यः * । न वक्तव्यः । निपातनादेतत्सिद्धम् । किं निपातनम् । येषां च विरोधः शाश्वतिक इति । एवं तर्हि शाश्वते प्रतिषेधो वक्तव्यः । शाश्वतम् । नस्तद्धिते ॥

---

**प्रकरणमिह बाध्यते ॥ १४३ ॥**

नस्तद्धिते॥नकारान्तस्येति॥इनण्यनपत्ये अनिति च प्रकृतिभावे प्राप्ते वचनम्। सब्रह्मचारिण इति। तस्येदमित्यण् । पीठेन सर्पतीति पीठसर्पी पूर्ववदण् । कलापिना प्रोक्तमधीयते कालापाः। कलापिनोणित्यण् । ततोऽध्येतृवद्विवणोः प्रोक्ताल्लुगिति लुक् । कौथुमिना प्रोक्तमधीयते कौथुमाः । तेन प्रोक्तमित्यण् । पूर्ववद् द्वितीयस्याणो लुक् । तैतिलिजाजलिलाङ्गलिप्रोक्तमध्ययनं साहचर्यात्तैतिल्यादिशब्दैरुच्यते । तेभ्यस्तदधीते तद्वेदेत्यण् प्रत्ययः । तेन प्रोक्तमित्यत्र तु शैषिकेर्थे वृद्धाच्छ इति छः प्रसज्येत । केचित्तु तितिलशब्दमत्राधीयते । चार्म इति । तस्य विकार इत्यण् । शौव इति । तस्येदमित्यण् । श्वे ग्रामजनपदमनुष्येभ्य इत्येतत्तु प्रत्याख्यातम् । अत्र परत्वाद्वृद्धौ प्राप्तायां द्वारादीनामेव तत्प्रतिषेधे ऐजागमे च कृते टिलोपः क्रियते । संकोचादन्यत्र शौवन इति । विकारावयवयोः प्राण्यणि प्रकृतिभावाच्छौव इत्येव भवति । सायम्प्रातिक इति । सायम्प्रातःशब्दाद् द्वन्द्वाट्ठजिति ठञ्प्रत्ययः। यथाकथंचित्कालशब्दादपि ठञ् भवतीति कालसमुदायवाचिनोपि ठञ् भवति । पौनः पुनिक इति । पूर्ववट्ठञ् । आदिशब्दः प्रकारे टिलोपदर्शनेन च साहश्यमाश्रीयत इति आरातीयः शाश्वतिक इत्यत्र टिलोपाभावः । निपातनादिति । अत एव निपातनासान्तादिति कादेशाभावः। शाश्वतमिति भाष्यकारवचनप्रामाण्यादण्प्रत्ययः॥१४४॥

Indira Gandhi National Centre for the Arts

यस्येति च ॥ १४८ ॥ इवर्णस्येति किमुदाहरणम् । हे दाक्षि । दाक्ष्या । दाक्षेयः । हे दाक्षि इति । यदि लोपो न स्यात्परस्य ह्रस्वत्वे कृते सवर्णदीर्घत्वं प्रसज्येत । दाक्ष्या इति । यदि लोपो न स्यात्परस्य यणादेशे कृते पूर्वस्य श्रवणं प्रसज्येत । दाक्षेय इति । यदि लोपो न स्यात्परस्य लोपे कृते पूर्वस्य श्रवणं प्रसज्येत । नैतानि सन्ति प्रयोजनानि । सवर्णदीर्घत्वेनाप्येतानि सिद्धानि । इदं तर्हि अतिसखेरागच्छति । अतिसखेः स्वम् । यदि लोपो न स्याद् उपसर्जनह्रस्वत्वे कृते असखीति प्रतिषेधः प्रसज्येत । यस्येत्यादौ श्यां प्रतिषेधः * । यस्येत्यादौ श्यां प्रतिषेधो वक्तव्यः । काण्डे सौर्ये नाम हिमवतः शृङ्गे । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । इह श्यामित्यपि प्रकृतं नेत्यपि । तत्राभिसम्बन्धमात्रं कर्तव्यम् । यस्येत्यादौ लोपो भवति श्यां न । इयङुवङ्भ्यां लोपो विप्रतिषेधेन*। इयङुवङोरवकाशः, श्रियौ । श्रियः । भ्रुवौ । भ्रुवः । लोपस्यावकाशः, कामण्डलेयः । माद्रबाहेयः । इहोभयं प्राप्नोति । वात्सप्रेयो लैखाभ्रेयः । लोपो भवति विप्रतिषेधेन । गुणवृद्धी च * । गुणवृद्धी चेयङुवङ्भ्यां भवतो विप्रतिष-

---

यस्येति च ॥ सवर्णदीर्घत्वे लोपे वा नास्ति विशेष इति मत्वा पृच्छति इवर्णस्येति । हे दाक्षीति । दाक्षिशब्दादितो मनुष्यजातेरिति ङीषि कृते तस्य संबुद्धौ ह्रस्वे कृते सवर्णदीर्घस्य श्रवणप्रसङ्गः । ननु चान्तरङ्गत्वात्सवर्णदीर्घत्वे कृते ह्रस्वो भविष्यति । एवं तर्हि वार्णादाङ्गं बलीय इति ह्रस्वत्वं मन्यते । दाक्षि ई आ इति स्थिते शब्दविप्रतिषेधात्परस्य यणादेशे कृते पूर्वस्य यणादेशप्रसङ्गः । सवर्णदीर्घस्यापूर्वविधित्वात्तत्र कर्तव्ये यणादेशस्य नास्ति स्थानिवत्त्वम् । यणादेशे पि कर्तव्ये वर ई इति इकारप्रश्लेषाद्दीर्घविधिं प्रति स्थानिवत्त्वनिषेधः । दाक्षी ई इति स्थिते स्त्रीभ्यो ढगिति ढकि कृते परस्य लोपे कृते पूर्वस्य श्रवणप्रसङ्गः । परलोपस्य स्थानिवद्भावात्तन्निमित्तस्य लोपस्याप्रसङ्गात् । नैतानीति । यत्राङ्गवार्णयोर्युगपत्प्रसङ्गस्तत्र वार्णादाङ्गं बलीयो भवतीति भावः । यण्ढकौ त्वाङ्गौ न भवतः । इदं तर्हीति । सखिशब्दात्सख्यशिश्वीति भाषायामिति ङीषि कृते सखीमतिक्रान्त इति प्रादिसमासे कृते लिङ्गविशिष्टपरिभाषाया अनित्यत्वादसति टचि गोस्त्रियोरिति ह्रस्वः । तत्रासतीकारलोपे एकादेशस्य पूर्वान्तवद्भावाद् घिसंज्ञाप्रतिषेधः स्यात् । प्रसज्यप्रतिषेधं चायं दोषो न तु पर्युदासे तदन्तस्य सखिशब्दादन्यत्वाद् घिसंज्ञायाः सिद्धत्वात् । ङीषि तु लोपे कृते ह्रस्वत्वे च कृते लाक्षणिकत्वात्सखिरूपस्य घिसंज्ञायाः प्रतिषेधाभावः । काण्डे इति । यचि भमिति भत्वाल्लोपः प्राप्नोति । सौर्ये इति । सूर्येणैकदिगिति तेनैकदिगित्यण् । तत्र यस्येति चेत्यकारलोपः प्राप्नोति सूर्यतिष्येति यलोपश्च । यथा तु वक्ष्यते सूर्यमत्स्ययोर्ङ्यामिति तथात्र यलोपस्याप्रसङ्गः । इह श्यामिति । विभाषा ङिश्योरित्यतः शीग्रहणं न संयोगाद्वमन्तादित्यतो नेति चानुवर्तते । तेन वाक्यभेदेन श्यां कार्यं प्रतिषिध्यते ।

Indira Gandhi National Centre for the Arts

धेन । गुणवृद्ध्योरवकाशः, चेता । गौः । इयङुवङोः स एव । इहोभयं प्राप्नोति । चयनम् । चायकः । गुणवृद्धी भवतो विप्रतिषेधेन । नवेयङुवङादेशस्यान्यविषयवचनात् * । न वार्थो विप्रतिषेधेन । किङ्कारणम् । इयङुवङादेशस्यान्यविषये वचनात् । इयङुवङादेशः अन्यविषये आरभ्यते । किंविषये । यणादेशविषये । यथैव यणादेशं बाधते । एवं गुणवृद्धी अपि बाधेत । तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः । तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधो वक्तव्यः । न वक्तव्यः। मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्तइत्येवमियङुवङादेशो यणादेशं बाधिष्यते । गुणवृद्धी न बाधिष्यते । यस्येति च ॥

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ १४९ ॥ सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात् * । सूर्यादीनामणन्ते ऽप्रसिद्धिः । सौरी बलाका । किं कारणम् । अङ्गान्यत्वात् । अणन्तमेतदङ्गमन्यद्भवति । लोपे कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गान्यत्वं भवति । सिद्धं तु स्थानिवद्भावप्रतिषेधात् * । सिद्धमेतत् । कथम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावः । यलोपविधिं प्रति न स्थानिवद्भवतीति । एवमपि न सिध्यति । किङ्कारणम् । अङ्गान्यत्वात् । अन्यो हि सूर्यशब्दः । अन्यः सौर्यशब्दः । नैष दोषः । एकदेशविकृतमनन्यवद्भवतीत्येवं भविष्यति । उपधाग्रहणानर्थक्यं च * । स्थानिवद्भावे चेदानीं प्रतिषिद्धे उपधाग्रहणमनर्थकम् । किङ्कारणम् । अन्त्य एव हि सूर्यादीनां यकारः । किं यातमेतद्भवति । सुष्ठु यातम् । साधु च यातम् । यदि प्राग्भादसिद्धत्वम् । अथ सह तेनासिद्धत्वम् । असिद्धत्वाल्लोपस्यानन्त्यो यकारो भवति । यद्यपि सह

---

कामण्डलेय इति । चतुष्पाद्भ्यो ढञिति ढञ् । एवं वास्तवेय इति, लैखाभ्रेय इति । शुभ्रादिभ्यश्चेति ढक् । इयङुवङादेश इति । षष्ठीसमासः । यथेहयङुवङौ सवर्णान्यपूर्वकौ नैवं गुणवृद्धी इति विप्रतिषेधानुपपत्तिरित्यर्थः ॥ १४५ ॥

सूर्य ॥ सौरीति । तेनैकदिगित्यण् । तदन्तान्ङीप् । इकारे परतोऽत्र सूर्यशब्दोऽङ्गं न भवति । किं तर्हि अणन्तमिति यकारलोपाप्रसङ्गः । पुंयोगविवक्षायां तु देवतायां चाविवक्षानादन्यत्र ङीपि कृते सूर्यशब्दोऽङ्गमीकारे भवतीति तत्रैव लोपःस्यात् सूरीति । अङ्गान्यत्वादिति । राजदन्तादित्वात्परनिपातः । यलोपविधिमिति । उपधाविधिं प्रति नेति तु प्रतिषेधः प्रत्ययविधावेव । स्थानिवत्त्वनिषेधे चावशिष्टस्याङ्गसंज्ञायामेकदेशविकृतस्यानन्यत्वाद् यलोपः सिध्यति । अन्त्यएवेति । अकारद्वयलोपे सति यकारस्यान्त्यत्वात् । तत्र यान्तानां सूर्यादीनां लोपो भवतीत्युच्यमाने अलोऽन्त्यस्येति यकारस्यैव भविष्यति । यग्रहणं तु न प्रत्याख्यायते । तदन्तरेण यान्तत्वाभावादुत्तरार्थत्वाच्च यग्रहणस्य । यातमिति । गतं ज्ञातं सिद्धमित्यर्थः । साधु च यातमिति । अनेन सिद्धेर्दार्ढ्यं प्रतिपाद्यते यदि प्रागिति । अकारद्वयलोपस्य

Indira Gandhi National Centre for the Arts

तेनासिद्धत्वम् । एवमपि न दोषः । नैवं विज्ञायते सूर्यादीनामङ्गानां यकारलोप इति । कथं तर्हि । अङ्गस्य यलोपो भवति स चेत्सूर्यादीनां यकार इति । एवमपि सूर्यचरी अत्र प्राप्नोति । तस्मादुपधाग्रहणं कर्तव्यम् । विषयपरिगणनं च * । विषयपरिगणनं च कर्तव्यम् । सूर्यमत्स्ययोर्ङ्याम् * । सूर्यमत्स्ययोर्ङ्यामिति वक्तव्यम् । सौरी । मत्सी । सूर्यागस्त्ययोश्छे च ङ्यां चेति वक्तव्यम् * । सौरी । सौरीयः । आगस्ती । आगस्तीयः । तिष्यपुष्ययोर्नक्षत्राणि * । तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्यः । तैषम् । पौषम् । अन्तिकस्य तसिकादिलोपश्चाद्युदात्तत्वं च * । अन्तिकस्य तसिकादिलोपो वक्तव्यः, आद्युदात्तत्वं च वक्तव्यम् । अन्तितो न दूरात् । तमे तादेश्च * । तमे तादेश्च कादेश्च लोपो वक्तव्यः । अग्ने त्वं नो अन्तमः अन्तितमे भवरोहति । तसीत्येव न वक्तव्यो दृष्टो दाशतयेपि हि । घौलोपोन्तिषदित्यत्र । अन्तिषत् । यथा ऽथो यन्त्यथर्वसु ॥१॥ अन्ति ये च दूरके । सूर्य ॥

बिल्वकादिभ्यश्छस्य लुक् ॥ १५३ ॥ छग्रहणं शक्यमकर्तुम् । इह कस्मान्न भवति बिल्वकेभ्यः । भस्येति वर्तते । एवमपि बिल्वकीयेत्यत्र प्राप्नोति । तद्धितस्येति वर्तते । एवमपि बिल्वकस्य विकारः अवयवो वा बैल्वकः । अत्र

---

सिद्धत्वादन्त्यो यकारो भवति । भथेति इति अकारलोपस्य समानाश्रयस्यासिद्धत्वाद्यान्तत्वाभावः । ततश्चोपधाग्रहणं कर्तव्यम् । यद्यपीति । न चोपधाग्रहणं क्रियते नापि सूर्यादीन्यङ्गत्वेन विशेष्यन्ते इत्यर्थः । इति तद्धिते च यदङ्गमनाश्रितरूपविशेषं तस्य यकारस्य लोपः स चेद्यकारः सूर्याद्यवयवो भवतीति सूत्रार्थः । सूर्यचरीति । सूर्यस्य स्त्री सूरी सा भूतपूर्वेति चरट्प्रत्ययः । तसिलादिष्विति पुंवद्भावः । सूर्यमत्स्ययोरिति । मत्स्यस्य ङ्याम् । सूर्यागस्त्ययोश्छे चेत्येवं सिद्धेऽर्थप्रदर्शनपरत्वाल्लाघवेऽनादरः कृतः । सौरीय इति । सौर्यस्यायमिति वृद्धाच्छः । अगस्त्यस्यापत्यमिति ऋष्यण् तदन्ताद्ङीप् छश्च नक्षत्राणीति । नक्षत्रसंम्बन्धिन्यणीत्यर्थः । तिष्यपुष्ययोरित्युभयोपादानात्सिध्यशब्दस्य यलोपाभावः । अन्तित इति । अपादाने चाहीयरुहोरिति तसिः । तादेश्चेति । चकारात्कादेश्च । यद्वा तादेस्तदान्तमः कादिलोपे त्वन्तितमः । तसीत्येव इति । कादिलोपश्च बहुलमित्येव विषयमनुपादाय पठितव्यमित्यर्थः । दाशतय इति । दशावयवा अस्य दशतयस्तत्र भवो दाशतयः । चतुःषष्ट्याख्यो ग्रन्थः । घौलोप इति घुशब्देनोत्तरपदं पूर्वाचार्यैरसिद्धमुच्यते । अन्तिके सीदतीति सत्सूद्विषेति क्विप् । पूर्वपदादिति षत्वम् । अद्याविति । अनुत्तरपद इत्यर्थः । यो यत्प्रत्यये परतोऽन्तीति कृतकादिलोपोऽन्तिकशब्दो गृह्यते अथर्ववेदे । अन्तिके भव इति भवे छन्दसीति यति कृते अन्तिय इति भवति । कादिलोपस्यासिद्धवदत्राभादित्यासिद्धत्वाद्यस्येति लोपो न भवति ॥१४९॥

बिल्व ॥ छग्रहणमिति । कृतकुगागमस्य निर्देशाच्छ एव ग्रहीष्यत इति भावः ।

Indira Gandhi National Centre for the Arts

प्राप्नोति। तद्धिते तद्धितस्येति वर्तते। एवमपि बिल्वकीयायां भवो बैल्वकः बैल्वकस्य किञ्चिद् बैल्वकीयम्। अत्र प्राप्नोति। न सबिल्वकात् ॥ बिल्वकादिभ्यो यो विहित इत्युच्यते। न चासौ बिल्वकशब्दाद्विहितः। किं तर्हि। बिल्वकीयशब्दात्। एवं तर्हि सिद्धे सति यच्छग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा। सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभाव इति। तस्माच्छग्रहणं कर्तव्यम्। छस्यैव लुग्यथा स्यात्कुको मा भूदिति ॥

तुरिष्ठेमेयःसु ॥ १५४ ॥ तुः सर्वस्य लोपो वक्तव्यः अन्त्यस्य मा भूदिति। स तर्हि वक्तव्यः। न वक्तव्यः। सर्वलोपस्य विज्ञानमन्त्यस्य वचनानर्थक्यात् *। तुः सर्वलोपो विज्ञायते। कुतः। अन्त्यस्य वचनानर्थक्यात्। अन्त्यस्य लोपवचने प्रयोजनं नास्तीति कृत्वा सर्वस्य भविष्यति। अथ वा लुक् प्रकृतः सोऽनुवर्तिष्यते। अशक्यो लुगनुवर्तयितुम्। किङ्कारणम्। विजयिष्ठकरिष्ठयोर्गु-

---

बिल्वकेभ्य इति बिल्वशब्दादत्पादावर्थे कप्रत्ययं सति छग्रहणे कुगागमनिर्देश एव न निर्श्रीयेतेति कप्रत्ययान्तादपि परस्य भ्यसो लुक्प्रसङ्गः। भस्येति वर्तते इति। तत्रार्थाद्विभक्तिविपरिणामे सति भसंज्ञकेभ्यः परस्य लुग् भवति। बैल्वक इति। अनुदात्तादेश्चेत्यञ्। तद्धित इति। नस्तद्धित इत्यतस्तद्धित इति वर्तते। तेन बिल्वकादिभ्यो भसंज्ञकेभ्यः परस्य तद्धितस्य तद्धिते परे लुग्भवतीति सूत्रार्थः सम्पद्यते एवमपीति। बिल्वा ऽस्यन्ते ऽस्यामिति उत्करादिभ्यश्छः। नडादीनां कुक् चेति छ कुगागमश्च। ततस्तत्र भव इत्यण्, तस्मिन् परतश्छस्य लुक्। ततो वृद्धाच्छः। भवति छग्रहणे छे परतो ऽणोलुक्प्रसङ्गः। ततश्च न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्वृद्ध्यभावे रूपं न सिध्येत्। न स बिल्वकादिति। विहित इति शेषः। बिल्वकादिभ्यो यो विहित इति बिल्वकादिभ्य इत्यागन्तुनाकारेण कृतकुगागमनिर्देशः। तेनायमर्थः। भाविकुगागमेभ्यो बिल्वकादिभ्यो यो विहितः प्रत्ययस्तस्य तद्धिते लुग् भवति। न च छादन्यो भाविकुगागमेभ्यो बिल्वादिभ्यः प्रत्ययो विधीयते इति नार्थश्छग्रहणेन। एवं तर्हीति। छग्रहणं छमात्रस्य लुग्यथा स्यात् कुगागमो मा भूदनिष्टं तदित्येवमर्थं क्रियते। यदि चैषा परिभाषा न स्यात्तदा कुको नैव निवृत्तिः प्राप्नोतीति किं तदभावार्थेन छग्रहणेन। क्व चित्त्वेषा परिभाषा नाश्रीयते। यथा श्यैनेय इत्यादौ यस्येति लोपेन निवृत्तो ऽपीकारे तत्सन्नियुक्तो नकारो न निवर्तते। तथा च स्त्रियाः पुंवदित्यत्रोक्तम्। एतभार्य इत्यत्र पुंवद्भावेन स्त्रीप्रत्ययमात्रस्य निवृत्तिः क्रियते। अर्थस्य त्वनिवृत्तत्वान्नकारस्य श्रवणं प्रसज्येतेति। तथा च श्रोत्रियस्य यलोपश्चेति घे विनिवृत्तेपि श्रोत्रभावो न निवर्तते इति। तत्रानित्या परिभाषेति प्रतिविधेयम् ॥ १५३ ॥

तुरि ॥ तुः सर्वस्येति। सर्वस्य तृशब्दस्य लोपो नत्वलोन्त्यस्येत्यर्थः। अन्त्यस्य लोप इति। टेरित्येवान्त्यलोपस्य सिद्धत्वात्। विजयिष्ठेति। विजेतृशब्दात्तुश्छन्दसीतीष्ठन् प्रत्ययः। तस्य लुकि सति न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद् गुणो

णदर्शनात् * । विजयिष्ठकरिष्ठयोर्गुणो दृश्यते । विजयिष्ठः । आस्तुतिङ्करिष्ठः ॥

टेः ॥ १५५ ॥ णाविष्ठवत्प्रातिपदिकस्य * । णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः । किं प्रयोजनम् । पुंवद्भावरभावटिलोपयणादिपरार्थम् । पुंवद्भावार्थम् । एनीमाचष्टे एतयति । श्येतयति । रभावार्थम् । पृथुमाचष्टे प्रथयति । म्रदयति । टिलोपः । पटुमाचष्टे पटयति । यणादिपरार्थम् । दूरमाचष्टे दवयति । किं पुनरिदं परिगणनमाहो स्विदुदाहरणमात्रम् । उदाहरणमात्रमित्याह । प्रादयोपि हीष्यन्ते । प्रियमाचष्टे प्रापयतीति । भारद्वाजीयाः पठन्ति । णाविष्ठवत् प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरप्रादिविन्मतोर्लुक्कन्विध्यर्थमिति ॥

इष्ठस्य यिट् च ॥ १५९ ॥ किमयं यिशब्द आहोस्विद्यकारः । किञ्चातः । यदि लोपोप्यनुवर्तते ततो यिशब्दः । अथ निवृत्तं ततो यकारः ॥

ज्यादादीयसः ॥ १६० ॥ किमर्थं ज्यात्परस्येयस आत्वमुच्यते । न लोपः प्रकृतः सोनुवर्तते । का रूपसिद्धिः । ज्यायान् । अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यत् ज्यात्परस्येयस आत्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अङ्गवृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिवेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति । अथ किमर्थं

---

न स्यात् पूर्वं तु गुणो न प्रवर्तते । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति वचनात् । करिष्ठ इति । तृजन्तादिष्ठन् प्रत्ययः ॥ १५४ ॥

टेः ॥ णाविति । प्रातिपदिकग्रहणं प्रत्ययकार्याणामतिदेशो मा भूदित्येवमर्थम् । तेन बहून्याचष्टे भावयतीति णिचोपि यिण्न भवति । तदभावे भूभावेनापि न भवितव्यं सन्नियोगशिष्टत्वादिति बहयतीति भवितव्यमिति केचित् । एतयतीति । तसिलादिष्वादिष्ठ पुंवद्भावो विहित इति णावपि भवति । टिलोपेनैव सन्नियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायां पुंवद्वचनं सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं तेन श्यैनेय इत्यादि सिद्धं भवति । विन्मतोरिति । स्रग्विणमाचष्टे स्रजयति । अङ्गवृत्त इति वृद्धिरत्र न भवति । यत्र त्वनिष्ठितमङ्गं तत्र वृद्धिर्भवत्येव प्रापयति । युवानमाचष्टे ऽल्पमाचष्टे कनयति ॥ १५५ ॥

इष्ठस्य ॥ किमयमिति । किमिकारान्तः समुदाय आगमोऽथ यकारमात्रमिकारस्तूच्चारणार्थ इति प्रश्नः । किञ्चात इति । उभयथा दोषाभाव इत्यर्थः । तत्प्रतिपादयति यदीति ॥ १५६ ॥

ज्यादादीयसः ॥ ज्यात्परस्येयस आदेः परस्येत्याकारः क्रियते तत्रोच्यते किमर्थमिति । अकृत्सार्वधातुकयोर्दीर्घ इति क्ङितीति तत्र नानुवर्तते इति भावः । उरुयेत्यादौ छान्दसत्वाद्दीर्घाभावः । अङ्गवृत्त इति । अङ्गे वृत्तं निष्पन्नं यत्कार्यं तस्मिन् सति पुनरन्यस्याङ्गकार्यस्य प्रवृत्तावविधानं भवति । ज्ञाजनोर्जेत्यत्रापीयं परिभाषा ज्ञापिता । तत्रास्मिन् स्थिते ज्ञापके जा इत्यादेशविधानं दीर्घश्रवणार्थम् । त-



Indira Gandhi National Centre for the Arts

ज्यात्परस्येयसो दीर्घ उच्यते । न अकार एवोच्येत। का रूपसिद्धिः । ज्यायान्। आन्तर्यतो दीर्घस्य दीर्घो भविष्यति । एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति॥

र ऋतो हलादेर्लघोः ॥ १६१ ॥ कथमिदं विज्ञायते हलादेरङ्गस्येति आहो स्विद्धलादेर्ऋकारस्येति । युक्तं पुनरिदं विचारयितुम् । नन्वनेनासन्दिग्धेनाङ्गविशेषणेन भवितव्यम् । कथम् । ऋकारस्य नाम हलादिः स्यात्। अन्यस्यान्यः । अयमादिशब्दोऽस्त्येवावयववाची । तद्यथा । ऋगादिः अर्धर्चादिः श्लोकादिरिति । अस्ति सामीप्ये वर्तते । तद्यथा । दधिभोजनमर्थसिद्धेरादिः । दधिभोजनसमीपे । घृतभोजनमारोग्यस्यादिः । घृतभोजनसमीपे । यावता सामीप्येऽपि वर्तते । जायते विचारणा । हल्समीपस्य ऋकारस्येति । अथ वा हलादेरङ्गस्येति। किञ्चातः । यदि विज्ञायते हलादेरङ्गस्येति । अप्रथीयान् । अम्रदीयान् । अत्र न प्राप्नोति । अथ विज्ञायते हलादेर्ऋकारस्येति । अनृचीयान् । अत्रापि प्राप्नोति । उभयथा स्रचीयानित्यत्र प्राप्नोति । यथेच्छसि तथास्तु । अस्तु तावद्धलादेरङ्गस्येति । कथमप्रथीयानिति । तद्धितान्तेन समासो भविष्यति । न प्रथीयान् अप्रथीयानिति । भवेत्सिद्धं यदि तद्धितान्तेन समासः । यदा खलु समासात्तद्धितोत्पत्तिस्तदा न सिध्यति । न वै समासात्तद्धितोत्पत्त्या भवितव्यम् । किङ्कारणम्। बहुव्रीहिणोक्तार्थत्वान्मत्वर्थस्य । भवेद्यदि बहुव्रीहिस्तदा न स्यात् । यदा तु त-

---

स्मिंश्च ज्ञापके स ति ज्यायानिति सिद्ध्यर्थमाद्वचनम् । अन्यथादिलोपे कृते परिभाषावशाद्दीर्घो न स्यात् । पिबतीति । पाघ्रादिसूत्रेण यदा पिबादेशो हलन्तः क्रियते तदा गुणप्रसङ्गः । यदा त्वदन्तस्तदा गुणप्राप्त्यभावः ॥ १६० ॥

रऋ ॥ कथमिदमिति । इहाङ्गस्येति प्रकृतम् । ऋत इति च श्रुतम् । तत्र विशेषणविशेष्यभावे कामचारात्प्रश्नः । युक्तं पुनरिति । ऋगादिरित्यादावेवयववाचिन आदिशब्दस्य दर्शनादवयवव्यपेक्षत्वाच्चावयवस्यावयवान्तरेण सम्बन्धाभावादिति भावः । अन्यस्यान्य इति । अत्यन्तभेदात्सम्बन्धं परस्परस्यावयवयोर्दर्शयति । यत्र भेदाभेदविवक्षा वृक्षाणां वनं वृक्षा वनमिति तत्रावयवावयविभावो नान्यत्रेत्यर्थः । दधिभोजनमिति । यदृच्छोपनीतं दधिभोजनं कार्यसिद्धेः सूचकत्वात्समीपमित्यर्थः । अप्रथीयानिति । अपृथुशब्दात् पृथुम्रदशगुणवचनादीयसुन्प्रत्ययः । अनृचीयानिति ।न सन्त्यृचो येषां तेऽनृचा माणवकास्ते सन्ति यस्मिन् देशे सोनृचवान् तत ईयसुन् विन्मतोरिति मतुब्लुक् । तत्राङ्गं हलादि न भवति । ऋकारस्तत्र हलादिरिति रादेशप्रसङ्गः । स्रचीयानिति । स्रग्वच्छब्दादीयसुन् विन्मतोरिति मतुब्लुक् । यथेच्छसीति । वक्ष्यमाणपरिगणनादतिप्रसङ्गनिरासादिति भावः । न वै समासादिति । प्रकृताभिप्रायेणेदमुच्यते । ईदृशात्समासादीदृशस्तद्धितो नोत्पद्यते । तथाहि । अपृथुशब्दस्तत्पुरुषो बहुव्रीहिर्वा गुणवचनो भवतीति तत ईयसुन्न भवत्ये-

Indira Gandhi National Centre for the Arts

त्पुरुषस्तदा प्राप्नोति न पृथुः अपृथुः अयमपृथुः अयमप्यपृथुरयमनयोरतिशयेनापृथुरप्रथीयानिति । समासादजादिभ्यां भवितव्यम् । किङ्कारणम् । गुणवचनादित्युच्यते । न च समासो गुणवचन इति । यदा तर्हि समासाद्विन्मतुपौ विन्मतुबन्तादजादी तदा प्राप्नुतः । अविद्यमानाः पृथवोऽपृथवः अपृथवोस्य सन्त्यपृथुमान् । अयमपृथुमान् अयमप्यपृथुमान् । अयमनयोरतिशयेनापृथुमान् अप्रथीयानिति । नष दोषः । अपृथव एव न सन्ति कुतो यस्यापृथव इति । इह कस्मान्न भवति । मातयति । लोपोत्र बाधको भविष्यति । इदमिह सम्प्रधार्यम् । लोपः क्रियतां रभाव इति । किमत्र कर्तव्यम् । परत्वाद्रभावः । यदि पुनरविशिष्टस्य रभाव उच्यते । नैवं शक्यम् । इहापि प्रसज्येत । कृतमाचष्टे कृतयति । एवं तर्हि परिगणनं क्रियते । पृथुमृदुभृशकृशदृढपरिवृढानामिति वक्तव्यम् ॥

प्रकृत्यैकाच् ॥ १६३ ॥ प्रकृत्यैकाजिति किमिष्ठेमेयस्सु आहो स्विदविशे-

---

ष । अथ मत्वन्तादीयसुन उत्पत्तिस्तत्र बहुव्रीहिणोक्तत्वान्मतुपोभावात् । नापि तत्पुरुषान्मतुबुत्पत्तिर्लाघवाद्बहुव्रीहेर्न्याय्यत्वात् । भवेद्यदेति । स ह्यन्यपदार्थप्रधानत्वाद् गुणवचनो न भवति । यदा त्विति । यथा अब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिरुच्यते । तथा अपृथुरिति पृथुत्वसदृशगुणान्तरयुक्तोभिधीयते । न च समास इति । गुणमुक्तवान् गुणवचनः यः शब्दो गुणमभिधाय गुणोपसर्जने द्रव्ये वर्तते तस्मादजादिभ्यां भाव्यम् । न च समासः केवले गुणे कदाचित्प्रयुज्यते नित्यं द्रव्यवाचित्वात् अथ वा ऽपृथुशब्दः पृथुसदृशगुणवाचित्वेऽपि विशिष्टगुणवचनो न भवति पृथुशब्दवत् । अपृथव एव न सन्तीति । मतुपः प्रकृतय इति शेषः । समाने ऽर्थे बहुव्रीहिणा भाव्यं न तु मत्वर्थीयार्थेन तत्पुरुषेण । भिन्नार्थत्वे तु भाव्यमेव । गौरखरवदरण्यं कृष्णसर्पवान् वल्मीक इति अत्र हि जातिविशेषेण तद्वत्ताप्रतिपिपादयिषिता नान्तरेण तत्पुरुषं मत्वर्थीयार्थे बहुव्रीहिमात्रेण प्रतिपादयितुं शक्यते । अन्ये त्वाहुः । अविद्यमाना ये पृथवस्ते सन्तीति विरोधादस्त्युपाधिकत्वाभावान्मतुब्भवतीति । एतदपरे न क्षमन्ते । पृथुत्वगुणरहिताः स्वरूपेण विद्यमानाः पृथव एवापृथव उच्यन्त इति कथं सत्तोपाधिकत्वं न स्यात् । ननु च यथानुचीयानित्यत्र बहुव्रीह्यर्थे न तद्वत्ताविवक्षायां मत्वन्तादीयसुन् भवति तथा पृथुशब्दादपि मतुपा तदन्ताच्च ईयसुना भाव्यम् । एवं तर्ह्यनभिधानाद् बहुव्रीहेः कुतश्चिन्मतुपा न भवितव्यमिति मन्यते तदेवमप्रथीयानिति तद्धितान्तेन समास इति स्थितम् स्वृचीयानित्येतस्यापि परिहाराय चोद्यमुपन्यस्यति । इह कस्मादिति । मातयतीति । उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति पक्षाश्रयणात्तुरिष्ठेमेयस्सु इति इष्ठवद्भावात्तृशब्दस्य लोपाभावः । यदि पुनरिति । टिलोपोप्यनुवर्तते ततश्चान्त्यस्य ऋशब्दस्य टिलोपोऽनन्त्यस्य तु रभाव इति मातयतीत्यादौ रादेशाभावः । कृतयतीति अत्रानन्त्यऋकारोस्तीति रभावप्रसङ्गः । एवं स्वृचीयानित्यत्रापि । एवं तर्हीति । परिगणने च सति हलादेर्लघोरिति न कर्तव्यम् ॥ १६१ ॥

Indira Gandhi National Centre for the Arts

षेण। किञ्चातः। यद्यविशेषेण। स्वी। खी। शौवम्। अधुना अत्रापि प्राप्नोति। स्विखिनावेव न स्तः। कथमुक्तमेतदेकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ। स्ववान्। खवानित्येव भवितव्यम्। शौवमिति परत्वादैजागमे कृते टिलोपेन भवितव्यम्। अधुना इति सप्रकृतिकस्य सप्रत्ययकस्य स्थाने निपातनं क्रियते। इह तर्हि प्राप्नोति द्रव्यम्। यस्येत्यादौ प्रकृतिभावः। यस्येति यस्य लोपप्राप्तिस्तस्य प्रकृतिभावः। न चैतानि यस्येत्यादौ। एवमपि श्रियै हितः श्रीयः। ज्ञा देवतास्य स्थालीपाकस्य ज्ञः स्थालीपाक इत्यत्र प्राप्नोति। तस्मादिष्ठेमेयस्सु प्रकृतिभावः। अथेष्ठेमेयस्सु प्रकृतिभावे किमुदाहरणम्। प्रेयान्। प्रेष्ठः। नैतदस्ति। प्रादीनामसिद्धत्वान्न भविष्यति। इदं तर्हि श्रेयान्। श्रेष्ठः। प्रकृत्यैकाजिष्ठेमेयस्सु चेदेकाच उच्चारणसामर्थ्यादवचनात्प्रकृतिभावः *। प्रकृत्यैकाजिष्ठेमेयःसु चेत्तन्न। किङ्कारणम्। एकाच उच्चारणसामर्थ्यात्। अन्तरेणापि वचनं प्रकृतिभावो भविष्यति। विन्मतोर्लुगर्थं प्रकृतिभावो वक्तव्यः। स्रग्वितरः। स्रजीयान्। स्रग्वितमः। स्रजिष्ठः। स्रग्वत्तरः। स्रग्वत्तमः। स्रचीयान्। स्रचिष्ठः। ननु विन्मतोर्लुक् टिलोपं बाधिष्यते। कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्। असति खल्वपि सम्भवे बाधकं भवति। अस्ति च सम्भवो यदुभयं स्यात्। यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधते। एवं नस्तद्धित

---

प्रकृत्यैकाच्॥ किमिष्ठेमेयःस्विति। किं प्रत्यासत्त्याश्रयेणेष्ठेमेयसोऽपेक्ष्यन्ते अथ वा व्याप्त्याश्रयेण तद्धित इति प्रश्नः। स्वीति। स्वशब्दादिनि कृते प्रकृतिभावाद्यस्येति लोपो न प्राप्नोति। शौवमिति। शुनो विकारावयवयोः प्राण्यञि कृते नस्तद्धित इति टिलोपो न प्राप्नोति। अधुनेति। इदमोऽधुनाप्रत्यये परत इशादेशस्तस्य यस्येति लोपो न प्राप्नोति। शौवमिति। टिलोपं बाधित्वा परत्वाद् वृद्धिः प्राप्ता द्वारादीनां चेति प्रतिषिध्यते। ऐजागमश्च क्रियते। तत्रानेकाच्त्वाट्टिलोपाभावः। अधुनेति। इदम इशभावो धुनाप्रत्ययश्च ऽनिपात्यते। द्रव्यमिति। द्रोर्विकारो द्रोश्चेति यत्प्रत्ययः। ओर्गुण इति। गुणोऽत्र न प्राप्नोति। यस्येत्यादीनि कार्याणि अपेक्ष्य प्रकृतिभावो विधीयते। ओर्गुणस्तु तेभ्यः पूर्व इति प्रकृतिभावाभावः। श्रियै हित इति। प्राक्क्रीताच्छ इति छः। तत्र यस्येति लोपो न प्राप्नोतीतीयङः प्रसङ्गः। प्रादीनामिति। असिद्धत्वादेवैकाच्त्वाभावात् प्रकृतिभावोऽप्यत्र नास्ति नापि टिलोपः। स्वाश्रयष्टिलोपः प्राप्नोतीति चेत् विप्रतिषिद्धे तावदसिद्धत्वाभावस्य ज्ञापितत्वात्परत्वादिषु तेषामसिद्धत्वेनाविद्यमानत्वाच्च स्वाश्रयो नापि पराश्रयष्टिलोपः प्राप्नोति। श्रेयानिति असिद्धाधिकाराद् बहिः आदिविधानादसिद्धत्वाभावः। एकाच उच्चारणसामर्थ्यादिति। अकार उच्चारणार्थो न प्रतिज्ञातोऽपितु श्रवणार्थः। विन्मतोस्तु लुगर्थमिति। लुक्यर्थो यस्य तल्लुगर्थम्। लुकि कृते टिलोपाभावार्थमित्यर्थः। कथमन्यस्येति। विन्मतुवन्तस्य यष्टिलोपस्तं लुग् बाधतां तस्मिन् कृते यष्टि-

Indira Gandhi National Centre for the Arts

इस्रेतमपि बाधेत । यतरो नौ ब्रह्मीयान् ब्रह्मवत्तर इति । यत्तावदुच्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति । इदं तावदयं प्रष्टव्यः । यदि तर्हि विन्मतोर्लुग्नोच्येत किमिह स्यादिति । टिलोप इत्याह । टिलोपश्चेत्प्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स बाधको भविष्यति । यदप्युच्यते ऽसति स्वल्पापि सम्भवे बाधनं भवति । अस्ति च सम्भवो यदुभयं स्यादिति । सत्यपि सम्भवे बाधनं भवति । तद्यथा । ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति । सत्यपि सम्भवे दधिदानं तक्रदानस्य निवर्तकं भवति । तद्यथा । एवमिहापि सत्यपि सम्भवे विन्मतोर्लुक् टिलोपं बाधते । एवं नस्तद्धितइस्रेतमपि बाधेत । न बाधेत । किङ्कारणम् । येन नाप्राप्ते तस्य बाधनम् । नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते । नस्तद्धित इत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च। अथ वा पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरानित्येवं विन्मतोर्लुक् टिलोपं बाधिष्यते । नस्तद्धित इत्येतन्न बाधिष्यते । यदि तर्हि विन्मतोर्लुक् टिलोपं बाधते पयिष्ठ इति न सिध्यति । पयसिष्ठ इति प्राप्नोति । यथालक्षणमप्रयुक्तइति । प्रकृत्याके राजन्यमनुष्ययुवानः * ।

---

लोपः प्राप्नोति तत्कथं बाधते न हि तस्मिन् प्राप्ते लुगारभ्यत इत्यर्थः । यद्येवेति । लुका बाधकत्वाभ्युपगमेऽतिप्रसङ्ग इत्यर्थः । ब्रह्मीयानिति । अतिशयेन ब्रह्मवानिति ईयसुनि मतुब्लुकि च नस्तद्धित इति टिलोपः । नाप्राप्त इति । यद्यपि विषयभेदेन टिलोपोभिन्नस्तथाप्यनपेक्षितविषयभेदं टिलोपशास्त्रं येन नाप्राप्तिन्यायेन लुका बाध्यते । तेन स्रजीयानित्येतस्मिन्नङ्गे सांप्रतिकी भाविनी च टिलोपप्राप्तिः पटिष्ठादौ सावकाशा लुका बाध्यते । तत्र विन्नन्तस्य नान्तत्वान्नस्तद्धित इत्ययमपि टिलोपो लुका बाध्यते । मतोस्तु लुका नस्तद्धित इति टिलोपो न बाध्यते । ननु किमुच्यते नस्तद्धित इत्यस्मिन् पुनः प्राप्ते चाप्राप्ते चेति । यावता मतोर्नान्तत्वाभावादप्राप्त एव नस्तद्धित इति टिलोपः । नैष दोषः । मतुप्प्रत्ययो नकारान्तादनकारान्ताच्च विधीयते । तत्र यद्यप्यकृते मतुब्लुकि नस्तद्धित इति टिलोपो न प्राप्नोति तथापि कृते मतुब्लुकि प्राप्नोति । एकदेशविकृतं चानन्यवदिति यदेवाङ्गं ब्रह्मवदिति तदेव ब्रह्मन्निति । तदेवमभेदाश्रयेणेदमुक्तं प्राप्ते चाप्राप्ते चेति । अथवेति । ननु विन्मतोर्लुगित्येतस्य नस्तद्धित इत्ययमेव योगोनन्तरः । टेरित्ययं तु व्यवहितः । तत्र केचिदाहुः । पाठक्रमादर्थक्रमो बलीयानिति टेरित्येष योगः सर्वविषयस्य व्यापनादनन्तरो भवति । यद्येवं पूर्वमेवायमर्थ उक्तो येन नाप्राप्त इति किमर्थं पुनरुच्यते । पूर्वमुत्सर्गापवादन्याय उक्त इदानीं त्वर्थक्रमप्रतिपत्त्याश्रयणेनोच्यते । येन हि सर्वो विषयो व्याप्तः स एव बाधितुं युक्तः । यस्तु विषयविशेषे प्रवर्तते न तस्य बाधा युक्ता । सामान्ये हि पूर्वं प्रतिपत्तिरुदेति पश्चाद्विशेषेषु । अन्ये तु न्यासभेदाश्रयेण व्याचक्षते । टेरित्यस्य पश्चान्नस्तद्धित इति पठितव्यम् । पयिष्ठइति । पयस्विन् इष्ठ इति स्थिते विनो लुकि कृते असो लोपो न प्राप्नोति । यथालक्षणमिति । न भवति टिलोप इत्यर्थः । ततश्च रजस्विनमाचष्टे रजसयति । आयुष्मन्तमाचष्टआयुषयतीति भवि-

Indira Gandhi National Centre for the Arts

राजन्यमनुष्ययुवानः अके प्रकृत्या भवन्तीति वक्तव्यम् । राजन्यकम् । मानुष्यकम् । यौवनिका ॥

न मपूर्वोपत्ये ऽवर्मणः ॥ १७० ॥ मपूर्वात्प्रतिषेधे वाहितनाम्नः * । मपूर्वात्प्रतिषेधे वाहितनाम्न इति वक्तव्यम् । हैतनामः । हैतनामनः । अरोहितो वै हैतनामः । समानो हैतनामः समानो हैतनामन इति ॥

ब्राह्मोजातौ ॥१७१॥ अथ किमिदं ब्राह्मस्याजातौ अनो लोपार्थं वचनमाहोस्विन्नियमार्थम् । कथं चानो लोपार्थं स्यात्कथं च नियमार्थम्। यदि तावदपत्यइति वर्तते ततो नियमार्थं, मथ निवृत्तं ततो लोपार्थम् । अत उत्तरं पठति । ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते । अपत्यइति निवृत्तम् । तत्राप्राप्तविधाने प्राप्तप्रतिषेधः * । तत्राप्राप्तस्य टिलोपस्य विधाने प्राप्तस्य प्रतिषेधो वक्तव्यः । ब्राह्मणः । न वा पर्युदाससामर्थ्यात् * । न वा वक्तव्यः । किङ्कारणम् । पर्युदाससामर्थ्यात् । पर्युदासोत्र भविष्यति । अस्त्यन्यत्पर्युदासे प्रयोजनम् । किम् । या जातिश्च नापत्यं ब्राह्मी ओषधिरिति । न वै अत्रेष्यते । अनिष्टं च प्राप्नोति

———— ————

तव्यम् । राजन्यकमिति । समूहेर्थे गोत्रोक्षोष्ट्रेति वुञ् । आपत्यस्य च तद्धितेनातीति यलोपाभावार्थं प्रकृतिभावविधानम् । यस्येति लोपे सत्यसति वा विशेषाभावान्न तदर्थः प्रकृतिभावः । यौवनिकेति । यूनो भाव इति मनोज्ञादित्वाद्वुञ् । तत्र नस्तद्धित इति टिलोपः प्राप्तः प्रकृतिभावान्न भवति ॥ २६३ ॥

न मपूर्वो ॥ हैतनामन इति । हितनाम्नोपत्यमित्यण् । अन्निति प्रकृतिभावात्पक्षे टिलोपाभावः ॥ १७० ॥

ब्राह्मो ॥ ब्राह्मशब्दोऽपत्ये चेष्यते । ब्राह्मो मुहूर्त्तो ब्राह्मो नारदः ब्राह्मः स्थालीपाकइति । जातौ त्वपत्ये ब्राह्मण इतीष्यते । अनपत्ये तु जातौ ब्राह्मो ओषधिरिति टिलोप इष्यते एतच्च यथाभिधानं न सिध्यतीति मत्वा पृच्छति अथ किमिति । यदि तावदिति । ब्रह्मणोपत्यमित्यण् । अल्लोपोन इत्यकारलोपः प्राप्तो न संयोगाद्वमन्तादिति निषिद्धः । नस्तद्धित इति टिलोपे प्राप्ते अन्निति प्रकृतिभावः प्राप्तो नमपूर्वोपत्ये वर्मण इति प्रतिषिद्धः तत्राष्टिलोपे प्राप्ते नियमार्थमिदम् । अजातावेवापत्ये टिलोपो भवति ब्राह्मो नारद इति । जातौ त्वपत्ये न भवति ब्राह्मण इति । एवमपत्ये सिध्यति व्यवस्था । अनपत्ये त्वन्निति प्रकृतिभावाद् ब्राह्मशब्दो न सिद्धति । अथ निवृत्तमिति । अपत्यग्रहणं निवृत्ते विधिनियमसम्भवे विधिरेव ज्यायानिति अनपत्ये अन्निति प्रकृतिभावे प्राप्ते जातौ टिलोपार्थं निपातनं भवति । तत्र ब्राह्मो मुहूर्त्तो ब्राह्मः स्थालीपाक इति सिध्यति । ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात् । ब्राह्मणी ओषधिरिति तु प्राप्नोति । अपत्ये जातौ ब्राह्मण इति न सिध्यति । न मपूर्वोपत्ये वर्मण इति प्रकृतिभावप्रतिषेधाट्टिलोपप्रसङ्गात्। नवेति । वक्ष्यमाणोभिप्रायः नत्वपत्यइत्यनेन । इतरस्त्वेतमभिप्रायमबुद्ध्वाह अस्त्यन्यदिति । ब्राह्मी ओषधिरित्यत्र कृतार्थः पर्युदासो ब्राह्मण इत्यत्र पूर्वसूत्रविहितप्रकृतिभावप्रतिषेधप्राप्तं टिलो-

Indira Gandhi National Centre for the Arts

इष्टं च न सिध्यति । एवं तर्ह्यनुवर्तते ऽपत्यइति । नात्रापत्यइत्यनेन निपातनमभिसम्बध्यते । ब्राह्म इति निपात्यते अपत्ये ऽजाताविति । किं तर्हि । प्रतिषेधो ऽभिसम्बध्यते । ब्राह्म इति निपात्यते अपत्ये जातौ नेति ॥

कार्मस्ताच्छील्ये ॥१७२॥ किमर्थमिदमुच्यते । नस्तद्धिते इत्येव सिद्धम् । न सिध्यति । अन्नणीति प्रकृतिभावः प्रसज्येत । अणीत्युच्यते । णश्चायम् । एवं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यः ताच्छीलिके ऽण्कृतानि भवन्तीति । किमेतस्य ज्ञापने प्रयोजनम् । चौरी । तापसी । अणन्तादीतीकारः सिद्धो भवति ॥

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ १७४ ॥ अत्र भ्रौणहत्येति किं निपात्यते । यकारादौ तद्धिते तत्त्वं निपात्यते । भ्रौणहत्ये तत्त्वनिपातनानर्थक्यं सामान्येन कृतत्वात् * । भ्रौणहत्ये तत्त्वनिपातनमनर्थकम् । किङ्कारणम् । सामान्येन कृतत्वात् । सामान्येनैवात्र तत्त्वं भविष्यति । हनस्तोऽचिण्णलोरिति । ज्ञापकं तु तद्धिते तत्त्वप्रतिषेधस्य * । एवं तर्हि ज्ञापयत्याचार्यस्तद्धिते तत्वं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । भ्रौणघ्नो वार्त्रघ्न इत्यत्र तत्वं न भवति । ऐक्ष्वाकस्य स्वरे भेदान्निपातनं पृथक्त्वेन * । ऐक्ष्वाकस्य स्वरे भेदा-

---

पेन निवर्तयेत् । न वै अत्रेष्यतइति । अजाताविति पर्युदासः । न चानिष्टार्थे शास्त्रप्रक्लृप्तिरिति पर्युदाससामर्थ्याद्‍ब्राह्मण इत्यत्र टिलोपो न भविष्यतीत्यर्थः । इतरस्तु लक्षणमुपालब्धुमाहानिष्टं च प्राप्नोतीति । ब्राह्मणी ओषधिरिति प्राप्नोत्यजाताविति पर्युदासात् । इष्टञ्च न सिध्यति ब्राह्मण इति । एवं तर्हीति । योगविभागः क्रियतइति भावः । तत्र ब्राह्म इत्यत्र सामर्थ्यादपत्य इति न सम्बध्यते अपत्ये टिलोपस्य सिद्धत्वात् । तेनानपत्ये सर्वत्र जातावजातौ च ब्राह्म इति निपात्यते अपत्येपि ब्राह्मो नारद इत्यत्र परत्वाद्‍ब्राह्म इत्यनेनैव टिलोपो भवति । ततः अजाताविति । तत्रापत्यइत्यनुवर्तते तेनायमर्थो भवति । अपत्ये जातौ ब्राह्मणशब्दे टिलोपो न भवति । अजाताविति प्रसज्यप्रतिना नञः सम्बन्धादिति सर्वेष्टसिद्धिः ॥ १७१ ॥

कार्मः ॥ किमर्थमिति । कर्मशीलमस्य छत्रादिभ्यो ण इति णे कृते सिद्धष्टिलो इति भावः । ताच्छीलिक इति । एवञ्च छत्रादिभ्योऽणिति लाघवाय कर्तव्यं णवचने प्रयोजनाभावात् । प्रज्ञाश्रद्धेति ज्वलितिकसन्तेभ्य इति तदस्यां प्रहरणमिति ङीबभावः प्रयोजनम् ॥ १७२ ॥

दाण्डिनायन ॥ यकारादाविति । भ्रूणघ्नो भाव इति ब्राह्मणादित्वात् ष्यञ् । ज्ञापकं त्विति । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्यनपेक्ष्य ज्ञापकमुक्तं तदपेक्षायां तत्त्वस्याप्रसङ्गात् । ननु टिलोपाभावार्थं निपातनं स्यादिति सति प्रयोजने

Indira Gandhi National Centre for the Arts

न्निपातनं पृथक्त्वेन कर्तव्यम् । ऐक्ष्वाकः ऐक्ष्वाकः । एकश्रुतिनिर्देशात्सिद्धम् * । एकश्रुतिः स्वरसर्वनाम । यथा नपुंसकं लिङ्गसर्वनाम । अथ मैत्रेये किं निपात्यते । मैत्रेये ढञि यादिलोपनिपातनम् । मैत्रेये ढञि यादिलोपो निपात्यते । इदं मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते । गृष्ट्यादिषु प्रत्ययविध्यर्थं पाठः क्रियते । द्वितीयेऽध्याये यस्कादिषु लुगर्थं क्रियते । सप्तमेऽध्याये इयादेशार्थम् । इदं चतुर्थं यादिलोपार्थम् । द्विर्ग्रहणं शक्यमकर्तुम् । बिदादिष्वञ्प्रत्ययविध्यर्थं पाठः कर्तव्यः । तत्र नैवार्थो लुका नापि यादिलोपेन । इयादेशेनैव सिद्धम् । नैवं शक्यमिह हि मैत्रेयकः सङ्घ इति सङ्घाङ्कलक्षणेष्वञ्यञिञामणित्यण् प्रसज्येत । हिरण्मये किं निपात्यते । हिरण्मये यलोपवचनम् । हिरण्मये यलोपो निपात्यते । हिरण्मयं कलशं बिभर्षि ॥

ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि ॥ १७५ ॥ अथ-हिरण्यये किं निपात्यते । हिरण्यये छन्दसि मलोपवचनात्सिद्धम् * । हिरण्यये छन्दसि मलोपो निपात्यते । हिरण्ययी नौरभवत् । हिरण्ययाः पन्थान आसन् । हिरण्ययमासनम् ॥ इति श्रीमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थपादे चतुर्थमाह्निकम् ॥ पादोऽध्यायश्च षष्ठः समाप्तः ॥

---

ज्ञापकत्वमनुपपन्नम् । नैष दोषः । उभयोर्नित्ययोः परत्वाट्टिलोपं बाधित्वा तत्त्वं भविष्यति । अनेकप्रयोजनत्वाद्वा निपातनानाम् । अत एव कुत्वप्रतिषेधार्थमपि निपातनम् । ऐक्ष्वाक इति । इक्ष्वाकोरपत्यमिति जनपदशब्दादित्यञ् । उकारलोपो निपात्यते । ञित्वादाद्युदात्तत्वम् । इक्ष्वाकुषु जात इत्यणि प्राप्ते ओर्देशे ठञिति ठञि प्राप्ते तं परत्वाद्बाधित्वा जनपदतदवध्योश्चावृद्धादपि बहुवचनविषयादिति वुञि प्राप्ते कोपधादित्यण् तत्रान्तोदात्तत्वम् । तत्र भिन्नस्वरयोरेकस्मिन्निपात्यमानेऽपरस्यासंग्रहादुभयमपि निपात्यम् । एकश्रुतिनिर्देशादिति । स्वरभेदप्रत्ययस्तमयेन निपातनं सर्वस्वरलौकिकप्रयोगसंग्रहार्थमित्यर्थः । यथा नपुंसकमिति । सामान्यस्थितावाविर्भावतिरोभावस्थितिविशेषाणामन्तर्भावात् । मैत्रेय इति । मित्रयोरपत्यमिति गृष्ट्यादिभ्यश्चेति ढञ् । मित्रयु एय इति स्थिते ओर्गुण इति गुणापवादे ढे लोपोऽकद्र्वा इति लोपे प्राप्ते केकयमित्रयुप्रलयानां यादेरियः इति यादेरियादेशे प्राप्ते लोपो निपात्यते । तल्लोपस्यासिद्धत्वाद्यस्येति लोपाभावादतो गुण इति पररूपमेकारः । द्वितीय इति । मित्रयव इति बहुषु लुगर्थः पाठः । सप्तम इति । ढञ्यन्यत्रेयादेशः मित्रयोरिदं मैत्रेयमिति । मैत्रेयक इति । मित्रयूनां सङ्घ इति गोत्रेलुगचीति लुकि प्रतिषिद्धे ढजन्तादृगोत्रचरणाद्वुञिति वुञ् । यदि तु सङ्घाङ्केत्यत्र न मैत्रेयादित्युच्यते तदा त्रीणि ग्रहणानि स्युरिति इह निपातनं न कर्तव्यं स्यादिष्टस्य सिद्धत्वात् । इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् ॥

इति षष्ठोऽध्यायः समाप्तः ॥

Indira Gandhi National Centre for the Arts

# अथ प्रदीपसहिते व्याकरणमहाभाष्ये सप्तमोऽध्यायः ।

युवोरनाकौ ॥ १ ॥ युवोरनाकावित्युच्यते । कयोर्युवोरनाकौ भवतः । प्रत्ययोः । कथं पुनरङ्गस्येति वर्तमाने प्रत्ययोः स्याताम् । युशब्दवुशब्दान्तमेतद्विभक्तावङ्गं भवति । यदि युशब्दवुशब्दान्तस्यानाकौ भवतः । सर्वादेशौ प्राप्नुतः । निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यतः । यत्र तर्हि विभक्तिर्नास्ति नन्दना कारिकेति । अत्रापि प्रत्ययलक्षणेन विभक्तिः । यत्र तर्हि प्रत्ययलक्षणं नास्ति नन्दनप्रियः कारकप्रिय इति । मा भूतां यासौ साप्तमिकी विभक्तिस्तस्याम् । यासौ समासाद्विभक्तिस्तस्यां भविष्यतः । न चैतस्यां युशब्दवुशब्दान्तमङ्गं भवति । भवेद्यो युशब्दवुशब्दाभ्यामङ्गं विशेषयेत् । तस्यानन्त्ययोर्न स्याताम् । वयं खल्वङ्गेन युशब्दवुशब्दौ विशेषयिष्यामः । अङ्गस्य युवोरनाकौ भवतो यत्रतत्रस्थयोरिति । यत्र तर्हि समासाद्विभक्तिर्नास्ति नन्दनदधि । कारकद-

---

युवोरनाकौ ॥ युवोरिति । समाहारद्वन्द्वे युवुन इति प्राप्नोति । इतरेतरयोगे तु युव्वोरिति । तत्र सौत्रत्वान्निर्देशस्य नुममकृत्वा वकारलोपं वा कृत्वा निर्देश इति न दोषः । केचित्तु कर्मधारयं व्याचक्षते । अवयवधर्मेण समुदायस्य व्यपदेशाद्यथा समं चूर्णं कृष्णेत इति । एवं युश्चासौ समुदायो युवुलक्षणो वुश्चासाविति । तत्र समुदायस्याङ्गनिमित्तत्वासम्भवादवयवयोर्यथासंख्यं कार्यविज्ञानम् । यथा च भाष्यम् । कयोर्युवोरिति तथेतरेतरयोग द्वन्द्व इति निर्णयः । अतिप्रसङ्गं मत्वा पृच्छति कयोरिति । प्रत्यययोरिति । अङ्गाधिकारादङ्गस्य निमित्ते यौ युवू तयोरनाकाविति सूत्रार्थाश्रयणात् । कथं पुनरिति । अङ्गाधिकारादङ्गस्यैव कार्यत्वं युक्तमिति भावः । सिद्धान्तवादिना तु वैयधिकरण्येन सम्बन्धो दर्शयितव्यः । सम्प्रति तु सामानाधिकरण्येन सम्बन्धमाश्रित्य समाधीयते । युशब्दवुशब्दान्तमिति । कृत्तद्धितान्तत्वाद्युवुशब्दान्तस्य प्रातिपदिकत्वाद्विभक्तावुत्पन्नायांसत्यङ्गत्वेऽनाकौ क्रियेते इत्यर्थः । यत्र तर्हि विभक्तिर्नास्ति नन्दना कारिकेति । लौकिके प्रयोगे अत्यन्तमत्र विभक्तेरभावः । अत्राहुः । विभक्तावुत्पन्नायामनाकयोः कृतयोरकारान्तलक्षणेन टापा भाव्यम् । ततो हल्ङ्यादिलोपे नेत्यानुपूर्व्या सिद्धमेतत् यथा यास्येति । ततश्चाप्रन्थोयमिति । नन्दनकारकेति पाठो युक्तः । नन्दयुस् इति स्थिते सम्बुद्धिगुणे कृतेऽकृते वा नित्यत्वादेङ्ह्रस्वात्सम्बुद्धेरिति लोपे कृते अङ्गत्वाभावादनाकाप्रसङ्गः । नन्दनप्रिय इति । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधतइति लुकि कृते नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादनाकयोरप्रसङ्गः । भवेदिति । विशेषणविशेष्यभावे कामचारादङ्गेन युवू विशेष्यते । न च तावङ्गान्तौ सम्भवतः । न च विशेष्येण त-

Indira Gandhi National Centre for the Arts

धि । एवं तर्हि न वा परं निमित्तं संज्ञा च प्रत्ययलक्षणेन । न चेह परं निमित्तमाश्रीयते अस्मिन् परतो युवोरनाकौ भवत इति । किं तर्हि । अङ्गस्य युवोरनाकौ भवत इति । अङ्गसंज्ञा भवति प्रत्ययलक्षणेन । अथ वा तयोरेव यदङ्गं तन्निमित्तत्वेनाश्रयिष्यामः । कथम् । अङ्गस्येति सम्बन्धसामान्ये षष्ठी विज्ञास्यते । अङ्गस्य यौ युवू । किं चाङ्गस्य युवू । निमित्तम् । ययोर्युवोरङ्गमित्येतद्भवति । कयोश्चैतद्भवति । प्रत्यययोः । युवोरनाकाविति चेद्धातुप्रतिषेधः * । युवोरनाकाविति चेद्धातुप्रतिषेधो वक्तव्यः । युत्वा । युतः । युवान् । भुज्य्वादीनां च प्रतिषेधो वक्तव्यः । भुज्युः किंयुः । शंयुः । अनुनासिकपरत्वात्सिद्धम् । अनुनासिकपरयोर्युवोर्ग्रहणम् । न चैतावनुनासिकपरौ । यद्यनुनासिकपरयोर्ग्रहणम् ।

---

इग्ताविधिर्भवतीति युवुभ्यां तदन्तविध्यभावाद्यत्र तत्र स्थितयोरङ्गावयवयोर्युवोरनाकौ भवत इति । नन्दनदधीति । स्वमोर्नपुंसकादिति लुकि नित्यत्वात् कृते नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्वादेशाप्राप्तिः । नवापरमिति । नहीह विभक्तिः । प्रत्ययान्तरं वा परं निमित्तत्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः । केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते । अस्ति हि प्रत्ययलक्षणेनाङ्गसंज्ञा । नहि तस्यां विधीयमानायां नलुमताङ्गस्येति निषेधः प्रवर्तते लब्धाङ्गसंज्ञस्य कार्यान्तरे विधातव्ये स प्रतिषेधः प्रवर्तते । न चाङ्गसंज्ञाङ्गस्य कार्यमिति प्रतिषेधाभावः । ननु चाङ्गस्येत्यत्रासप्तमाध्यायपरिसमाप्तेरङ्गाधिकारे वव्रश्चेत्यत्रोरदत्वस्य परनिमित्तकत्वात् स्थानिवद्भावे सति न सम्प्रसारणे सम्प्रसारणमिति वकारस्य सम्प्रसारणप्रतिषेध उक्तः स इहत्येन नवापरं निमित्तमित्यनेन ग्रन्थेन विरुध्यते । नास्ति विरोधो लक्षणाभेदात् यथोद्देशं संज्ञापरिभाषमिति पक्षमाश्रित्य न वा अपरं निमित्तमित्याद्युक्तम् । कार्यकालं संज्ञापरिभाषमाश्रित्य वव्रश्चेत्युक्तम् । तत्र हि पक्षे उरदित्यत्रासंज्ञासूत्रोपस्थानात् सन्निहितः प्रत्ययो निमित्तत्वेनाश्रीयतइति परनिमितत्वं भवति । अथ वेति । भवतु कार्यकालपक्षस्तत्रापि न दोष इति भावः । निमित्तत्वेनेति । अनाकादेशविधाने । सम्बन्धसामान्ये षष्ठीति । निमित्तनिमित्तिभावलक्षणसम्बन्धोऽनङ्गत्वादाश्रीयते । प्रत्ययनिमित्तत्वाच्चाङ्गव्यपदेशस्य प्रत्यययोरेव ग्रहणं विज्ञायते । धातुप्रतिषेध इति । नन्वधुनैवोक्तं प्रत्यययोर्ग्रहणमिति । सत्यमुक्तं न तु लभ्यते । सामानाधिकरण्येन सम्बन्धसम्भवे वैयधिकरण्यपक्षाश्रयणस्यायुक्तत्वाद्भेदे हि निमित्तनिमित्तिभावो भवति । अभेदे च सम्भवति कथं भेद आश्रीयते । अथ वा भाष्यकारेण पूर्वं स्वातन्त्र्येणोक्तमिदानीं वार्तिकमवतारितमित्यदोषः । भुज्य्वादीनामिति । भुज्य्वादीनां सम्बन्धिनः प्रत्ययस्येत्यर्थः । सत्यपि वैयधिकरण्येन सम्बन्धेऽति प्रसङ्गः । भुज्युरिति । भुजिमृङ्भ्यां युक्त्युकौ चेति युक्प्रत्ययः । मृत्युरित्यत्र त्युप्रत्ययो न युरिति मत्वा भाष्यकारेण मृत्युरिति नोदाहृतम् । कंयुरिति । कंशंभ्यां बभयुस्तितुतयस इति युस्प्रत्ययः । ननु सित्करणं पदत्वे सति हल्यनुस्वारार्थमिति तत एवादेशो न

Indira Gandhi National Centre for the Arts

नन्दनः। कारकः। अत्र न प्राप्नुतः। नह्येताभ्यां युशब्दवुशब्दाभ्यामनुनासिकं परं पश्यामः। अनुनासिकपरत्वादिति। नैवं विज्ञायते ऽनुनासिकः पर आभ्यां ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। कथं तर्हि। अनुनासिकः परोनयोस्ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। यद्यनुनासिकपरयोर्ग्रहणमित्संज्ञा प्राप्नोति। तत्र को दोषः। तत्र ङीम्नुमोः प्रतिषेधः। ङीम्नुमोः प्रतिषेधो वक्तव्यः। नन्दनः कारकः। नन्दना कारिका। उगिल्लक्षणौ ङीम्नुमौ प्राप्नुतः। धात्वन्तस्य च प्रतिषेधः *। धात्वन्तस्य च प्रतिषेधो वक्तव्यः। दिवुसिवुषिट्टित्करणं तु ज्ञापकमुगित्कार्याभावस्य। यदयं युशब्दवुशब्दौ षिट्टितौ करोति। शिल्पिनि ष्वुन् ट्युट्युलौ तुट्चेति। तज्ज्ञापयत्याचार्यो न युवोरुगित्कार्यं भवतीति। कथं कृत्वा ज्ञापकम् । षिट्टित्करणे एतत्प्रयोजनम्। षिट्टित ईकारो यथा स्यात्। यदि चोगित्कार्यं स्यात्। षिट्टित्करणमनर्थकं स्यात्। पश्यति त्वाचार्यो न युवोरुगित्कार्यं भवतीति । ततो युशब्दवुशब्दौ षिट्टितौ करोति। न वा षित्करणं ङीष्विधानार्थम्। नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम्। किम्। षित्करणं क्रियते ङीष्विधानार्थम्। षित इति ङीष्यथा स्यात्। टित्करणमनुपसर्जनार्थम् । टित्करणेप्येतत्प्रयोजनमस्ति । अनुपसर्जनाट्टित इति इकारो यथा स्यात्। टितोनुपसर्जनाद्भवति। उगित उपसर्जनाच्चानुपसर्जनाच्च। एवं तर्हि, विप्रतिषेधाट्टापो बलीयस्त्वम् *। विप्रतिषेधाट्टापो बलीयस्त्वं भविष्यति। टापो ऽवकाशः। खट्वा। माला। ङीपोवकाशः। गोमती। यवमती। इहोभयं प्राप्नोति। नन्दना। कारिका। टाब् भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते। पूर्वश्च टाप्। परो ङीप्। ङीपः परष्टाप्

---

भविष्यति। नैतदस्ति। अवयवाय स्त्वित्वं स्यात् । अहलादावप्यनुस्वारार्थं वा। नह्येताभ्यामिति । रजः क्युन्वुन्वुञ्ष्वुन् इत्यादीनामेव प्रसङ्गः । अनुनासिकः परोऽनयोरिति। अवयवान्तरापेक्षया लब्धपरव्यपदेशोवयव एवानुनासिक आश्रीयते नान्यः। न च भुज्युरित्यादावुकारस्य सानुनासिकत्वं प्रतिज्ञातमिति दोषाभावः। इत्संज्ञा प्राप्नोतीति। लोपस्तु भवतु मा वाभूदिति न विचार्यते कृते ऽपि उकारलोपे ऽवशिष्टस्यादेशविधानेन रूपनिष्पादनात्। धात्वन्तस्येति। दिवु इत्ययमपि अनुनासिकपर इत्यादेशप्रसङ्गः। न वा षित्करणमिति। ङीपि सतीकारोनुदात्तो भवति ङीषि तूदात्त इति सति प्रयोजने न ज्ञापकं षित्करणम्। टित्करणमिति। टिड्ढेत्यत्रानुपसर्जनादिति वर्तते अत्रोगिल्लक्षणे ङीप्यविशेषेण प्राप्ते अनुपसर्जनादेव यथा स्यादिति नियमार्थं टित्करणं स्यादित्यज्ञापकमुगित्कार्याभावस्य। विप्रतिषेधादिति। पूर्वविप्रतिषेधोऽत्र विवक्षितः। एवं तर्हीति। यदीष्टवाची परशब्दो न गृह्यते तदानुवृत्तिर्वाक्यभेदश्चाश्रीयतइत्यर्थः। एवमपीति । एकवाक्यताश्रयणेन पर्यनुयुङ्क्ते

Indira Gandhi National Centre for the Arts

करिष्यते । सूत्रविपर्यासः कृतो भवति। एवं तर्हि उगितो ङीब् भवतीत्यत्रापि अ-तष्टाबित्यनुवर्तिष्यते । एवमप्यकारान्तादुगित इहैव स्यात् । नन्दना । कारिका । गोमती । यवमतीत्यत्र न स्यात्। एवं तर्हि सम्बन्धानुवृत्तिः करिष्यते । अजाद्यत-ष्टाप् । ऋन्नेभ्यो ङीप् । अतष्टाप् । उगितश्च ङीब् भवति अतष्टाप् । वनो र च । वनो ङीब्भवति उगितः अतष्टाप् । पादोऽन्यतरस्यां ङीब्भवति उगितः अतष्टाप् । तत ऋचि । ऋचि च टाब्भवति उगितो ऽत इति निवृत्तम् । तत्रायमप्यर्थः । द्विष्टाब्ग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । सिध्यत्येवम् । यत्त्विदं वार्तिक-कारः पठति विप्रतिषेधाद्दापो बलीयस्त्वमिति । एतदसंगृहीतं भवति । एतच्च सं-गृहीतं भवति । कथम् । इष्टवाची परशब्दः । विप्रतिषेधे परं यदिष्टं तद्भवतीति । धात्वन्तस्य चार्थवद्ग्रहणात् * । अर्थवतोर्युवोर्ग्रहणम् । न च धात्वन्तोऽर्थवान् । नुम्विधौ झल्ग्रहणम् * । नुम्विधौ झल्ग्रहणं कर्तव्यम् । झलन्तस्य उगित इष्य-ते । उगिदचां सर्वनामस्थानेऽधातोर्झल इति । तच्चावश्यं कर्तव्यम् । लिङ्गविशि-ष्टप्रतिषेधार्थम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति । यथेह भ-वति । गोमान् । एवं गोमतीत्यत्रापि स्यात् । न वा विभक्तौ लिङ्गविशिष्टाग्रह-णम् * । न वा वक्तव्यम् । किङ्कारणम् । विभक्तौ लिङ्गविशिष्टग्रहणं नेत्येषा परिभाषा कर्तव्या । कः पुनरत्र विशेषः । एषा वा परिभाषा क्रियते झल्ग्रहणं

---

तस्मादन्तादुगितः पर्यायेण टाप्ङीपोः प्रसङ्गः । एवं तर्हि सम्बन्धानुवृत्तिरिति । यद्यपि वाक्यभेदेन सम्बन्धे दोषाभावः । उगितो ङीब् भवति । अदन्तादुगितष्टाब् भवति । तथापि परिहारान्तरसद्भावप्रतिपादनायेदमुक्तम् । उगितश्च ङीब् भवती-ति । अतष्टाबित्युत्तरार्थमत्रानुवर्तते । वनो र चेत्यत्रात उगितष्टाबिति वर्तते तत्र व-न्नन्तस्यानुगित्वाददन्तत्वासम्भवाच्च वाक्यभेद आश्रीयते । वन्नन्तस्य ङीब्रौ भ-वतः । उगितो ऽदन्तान्ङीब्रबाधकत्वादृष्टाबित्यस्योत्तरत्रोपस्थानाय प्रतिसूत्रमनुवृत्तिं दर्शयति । टाबृचीत्यत्र टाब्ग्रहणं न कर्त्तव्यं भवतीति । यद्युत्तरत्रानुवृत्तिरुपयुज्यते टापः स्वातन्त्र्यनिराकरणायात उगित इत्येताभ्यां सम्बन्धः । उगितोऽत इति निवृ-त्तमिति । उगित इत्यस्य निवृत्तिराख्यायते । अत इत्येतत् सर्वत्र प्रकरणेऽनुवर्तते । शितिर्ब्राह्मणीति ङीन्नकारौ मा भूतामिति । कृकवाकुरित्यत्र जातिलक्षणो ङीष् मा भूदित्येवमर्थम् । धात्वन्तस्य चार्थवद्ग्रहणादिति । वर्णसमुदायग्रहणमिह न वर्ण-ग्रहणमित्यर्थवद्ग्रहणपरिभाषोपतिष्ठते । प्रत्ययाप्रत्यययोः प्रत्यये सम्प्रत्यय इत्यय-मप्यत्र परिहारः सम्भवति । एवं गोमतीति । ईकारात्परो नुम् प्राप्तो ऽझलन्तत्वान्न भवति । एवं नन्दनः कारक इत्यत्राझलन्तत्वान्नुमभावः । न वा विभक्ताविति । विभक्तौ यत्कार्यं विधीयते लिङ्गविशिष्टस्य तन्न भवतीत्यर्थः । शुनेति । सावेकाच इति प्राप्तं विभक्तेरुदात्तत्वं न गोश्वन्निति प्रतिषिध्यते । शुन्येति । गौरादिस्वत्

वेति । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि । प्रयोजनं शुनः स्वरे । यथेह भवति । शुना शुने।शुन्या इत्यत्रापि स्यात् । यूनः सम्प्रसारणे प्रयोजनम् । यथेह भवति यूनः पश्येति । एवं युवतीः पश्येत्यत्रापि स्यात् । उगिदचां नुम्विधौ प्रयोजनम् । यथेह भवति गोमान् यवमान् । एवं गोमती यवमतीत्यत्रापि स्यात् । अनडुह आम्विधौ प्रयोजनम् । यथेह भवति अनड्वानिति । एवमनडुहीत्यत्रापि स्यात् । न वा भवत्यनड्वाहीति । भवत्यन्येन यत्नेन आमनडुहः स्त्रियां वेति लिङ्गविशिष्टग्रहणादीकारान्तस्य प्राप्नोति । पथिमथोरात्वे प्रयोजनम् । यथेह भवति । पन्थाः । मन्थाः । एवं पथी मथीत्यत्रापि प्राप्नोति । न केवलः पथिशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते। सुपथी । पुंसो ऽसुङ्विधौ प्रयोजनम् । यथेह भवति । पुमान् । एवं पुंसीत्यत्रापि स्यात् । न केवलः पुंशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते । सुपुंसीति । सख्युर्णित्वानङौ प्रयोजनम् । यथेह भवति । सखायौ । सखायः । एवं सखी सख्यौ सख्य इत्यत्रापि प्राप्नोति । भवद्भगवदघवतामोत्त्वे प्रयोजनम् । यथेह भवति भोः भगोः अघोरिति । एवं भवतीभगवत्यघवतीत्यत्रापि स्यात् । एतान्यस्याः परिभाषायाः प्रयोजनानि । यदर्थमेषा परिभाषा कर्तव्या । एतस्यां च सत्यां नार्थो झल्ग्रहणेन । तदेतदनन्यार्थं झल्ग्रहणं कर्तव्यं नुम्प्रतिषेधो वा वक्त-

---

ङीपि कृते उदात्तयणो हल्पूर्वादित्यस्य विभक्तिस्वरस्य प्रतिषेधप्रसङ्गः । ननु विभक्तेरेतत्कार्यं न तु विभक्तौ परतः पूर्वस्येति कथं लिङ्गविशिष्टपरिभाषायाः प्रतिषेधः । नैष दोषः । विभक्तेर्यत्कार्यं यच्च विभक्तौ परत कार्यं तत्सर्वं विभक्तौ कार्यमिति सर्वत्र प्रतिषेधप्रवृत्तिः । एवं युवतीरिति । एवमर्थमन इत्युभयोः शेष इति नाश्रयितव्यं भवति । पथीति । समासैकदेश उदाहृतः । इतर एतावदेवोदाहृतमिति मत्वाह न केवल इति । सुपथीति । शोभनः पन्था अस्यामिति बहुव्रीहिः । न पूजनादिति समासान्तप्रतिषेधः । ऋन्नेभ्यो ङीबिति ङीप् । भस्य टेर्लोप इति टिलोपः । सुपुंसीति । शोभनाः पुमांसो ऽस्यामिति बहुव्रीहिः । उरः प्रभृतिषु पुमानिति विभक्त्यन्तपाठस्य प्रयोजनमुक्तम् । एकवचनान्तस्यैव नित्यः कब्यथा स्यादिति । तेनात्र शेषाद्विभाषेति विकल्पो भवति । पातेर्डुमसुन्निति प्रत्ययस्योगित्वादुगितश्चेति ङीप् । सखी सख्याविति । सख्यशिश्वीति भाषायामिति ङीष् । अनङ्णित्वे अत्र प्राप्नुतः । ङीष्विधानं तु सखीभ्यामित्याद्यर्थं स्यात् । भवद्भगवदिति । यदा सम्बुद्ध्या भवदादयो विशेष्यन्ते तदा भवत्यादीनामपि प्रसङ्गः । यदा त्ववशब्दो विशेष्यते तदा येन नाव्यवधानमित्येकवर्णव्यवधाने ओत्वं प्रवर्तते । भवत्यादौ तु वर्णद्वयव्यवधानादोत्वाभावः । तदभावात्तत्संनियोगविहितस्य रुत्वस्याप्यभाव इति केचिदाहुः । नार्थो झल्ग्रहणेनेति । गोमत्याद्यर्थेनेत्यर्थः । पुरस्तादिति । उगि-

Indira Gandhi National Centre for the Arts

व्यः । उभयं न वक्तव्यम् । उपरिष्टाद् झल्ग्रहणं क्रियते । तत्पुरस्तादपकृष्यते । एवमपि सूत्रविपर्यासः कृतो भवति । एवं तर्हि योगविभागः करिष्यते । उगिदचां सर्वनामस्थानेऽधातोः । युजेरसमासे । ततो नपुंसकस्य । नपुंसकस्य नुम् भवति । झल इत्युभयोः शेषः । ततोऽचः अजन्तस्य च नपुंसकस्य नुम्भवति । यद्यपि तावदेतदुगित्कार्यं परिहृतम् । इदमपरं प्राप्नोति । शातनितरा । पातनितरा । उगितो नद्याघादिषु ह्रस्वो भवतीत्यन्यतरस्यां ह्रस्वत्वं प्रसज्येत । नित्यं चेष्यते । उगितो या नदी एवमेतद्विज्ञायते । उगित एषा नदी । उगितो या परा । अत्र चैव दोषो भवति । उगितो ह्येषा परा नदी । ऐषुमतितरायां च प्राप्नोति । उगितः परा या विहिता । उगित एषा विहिता । उगित इत्येवं या विहिता । एवमपि भोगवतितरायां दोषो भवति । भोगवतितरा । भोगवतीतरा । तस्मादुगितो या नदी । उगितो या विहितेत्येवमेतद्विज्ञास्यते । एवं विज्ञायमाने शातनितरायां दोष एव । सिद्धं तु युवोरनुनासिकत्वात् * । सिद्धमेतत् । कथम् । यकारवकारयोरेवेदमनुनासिकयोरिह ग्रहणम् । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च ॥

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ २ ॥ आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थम् * । आयन्नादिषूपदेशिवद्भावो वक्तव्यः । उप-

---

दचां सर्वनामस्थाने धातोर्झल इति । ततो युजेरसमासे नपुंसकस्याच इति । अत्र झल इति वर्तते । उभयोः शेष इति । युजेर्झलन्तत्वाव्यभिचारादाद्यन्तावेव योगावपेक्ष्येते । झलिति लुप्तषष्ठीकं पदमाश्रीयते । शातनितरेति । शातिपातिभ्यां करणे ल्युटि कृते गौरादिषु शानपातनेति पाठान् ङीष् । उगितो या नदीति उगिच्छब्दोच्चारणेनेति भावः । इतरोऽगृहीताभिप्राय आह उगित एषेति । पूर्वेणैवाभिप्रायेणाह उगितो या परेति । उगिच्छब्दव्यापारेण विहितोगितः परेत्यर्थः । इतर आह । अत्र चैवेति । इषवोस्य सन्तीतीषुमान् । तस्येदमित्यण् ङीप् । यस्येति लोपे कृते उगितः परा नदीति विकल्पेन ह्रस्वत्वं प्राप्नोति नित्यं चेष्यते । पूर्वोक्तेनाभिप्रायेणाह उगितो या परा विहितेति । ऐषुमतितरायां चाणन्तान्नदी विहिता नतूगितः। इतरस्तु शातनितरामाश्रित्याह उगित एषेति । भोगवतितरेति । शार्ङ्गरवादिषु भोगवद्गौरिमतोः संज्ञायामिति पाठात् ङीन् प्रत्ययः उगित इत्येवं न विहित इति विकल्पेन ह्रस्वत्वं न प्राप्नोति । उगितस्तु विहित इति विधानाश्रयणाद्विकल्पः सिध्यति । शातनितरायां तु विकल्पः प्राप्नोति । सिद्धं त्विति । भाष्यकारीयमिदं वाक्यमित्याहुः । अन्ये त्वनुनासिकपरत्वादिति वाक्यमेवानेन व्याख्यातमित्याहुः । अनुनासिकप्रधानत्वादिति हि तस्यार्थः । अनुनासिकयणौ युवू इहानुकृतौ इत्यतिप्रसङ्गाभावः । उकारस्तु निरनुनासिक एवेत्युगित्कार्याभावः ॥ १ ॥

आयने ॥ आयन्नादिष्विति । अङ्गाधिकारे विधानात्प्रकृतिप्रत्ययापेक्षा बहिर-

Indira Gandhi National Centre for the Arts

देशावस्थायामायन्नादयो भवन्तीति वक्तव्यम् । किम्प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामायन्नादिषु इष्टः स्वरो यथा स्यादिति । शिलेयम् । तैत्तिरीयः । आक्रियमाणे ह्युपदेशिवद्भावे प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वे कृते आन्तर्यत आदेशा अस्वरकाणामस्वरकाः स्युः । न वा * चिच्चित्करणात् * । न वा वक्तव्यम् । किङ्कारणम् । क्व चिच्चित्करणात् । यदयं क्व चिद् घादींश्चितः करोति । अग्राद्यत् । घच्छौ च । तज्ज्ञापयत्याचार्यः उपदेशावस्थायामायन्नादयो भवन्तीति । कथं कृत्वा ज्ञापकम् । चित्करणे एतत्प्रयोजनम् । चित इत्यन्तोदात्तत्वं यथा स्यात् । यदि चोपदेशावस्थायामायन्नादयो भवन्तीति ततश्चित्करणमर्थवद्भवति । तत्रोणादिप्रतिषेधः । * तत्रोणादीनां प्रतिषेधो वक्तव्यः । शङ्खः । षण्ढः । धातोर्वेयङ्वचनात् * । अथ वा यदयमृतेरीयङिति धातोरीयङं शास्ति तज्ज्ञापयत्याचार्यो न धातुप्रत्ययानामायन्नादयो भवन्तीति । यदि हि स्युः ऋतेश्छङित्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति । न च ऋतेश्छङ सिध्यति । छङि सति वलादिलक्षण इट् प्रसज्येत । इटि कृते ऽनादित्वादादेशो न स्यात् । इदमिह सम्प्रधार्यम् । इट् क्रियतामादेश इति । किमत्र कर्तव्यम् । परत्वादिडागमः । नित्य आदेशः । कृतेपीटि प्राप्नोत्यकृतेपि । अनित्य आदेशः । नहि कृतइटि प्राप्नोति । किङ्कारणम् । अनादित्वात् । अन्तरङ्गस्तर्ह्यादेशः । कान्तरङ्गता । इदानीमेवोक्तमायन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति ।

---

ङ्गा आयन्नादयः । प्रत्ययाद्युदात्तत्वं तु प्रकृतिनिरपेक्षत्वादन्तरङ्गमिति तदेव पूर्वं प्राप्नोतीत्युपदेशिवद्वचनं कर्तव्यम् । शिलेयमिति । शिलेव शिलेयम् । शिलाया ढः । तित्तिरिणा प्रोक्तमधीते तित्तिरिवरतन्तुखण्डिकोखेति छण् । अस्वरकाः स्युरिति । प्रवृत्तिकालापेक्षयेदमुच्यते । प्रयोगे तु स्वररहितस्याच उच्चारणाभावात् । अनुदात्तं पदमेकवर्जमिति वचनाच्चानिष्टस्वराः प्राप्नुवन्ति । केचिस्त्वान्तर्यत इत्यन्यथा व्याचक्षते । यथानुदात्तोच्चारणे गात्राणां स्रंसनं, स्वरस्य स्निग्धता, कण्ठविवरस्य महत्त्वं च भवति । एवं व्यञ्जनोच्चारणेप्ययोग्यत्वादनुदात्तधर्मोपजनो व्यञ्जनेषु नास्ति तदेवमस्वरकाणामुदात्तत्वरहितानामस्वरका इष्टोदात्तत्वरहितत्वादनुदात्ता एव स्युरित्यर्थः । नवेति । सत्यप्यङ्गाधिकारेऽङ्गत्वमनपेक्ष्य प्रत्ययोत्पत्तिकालएवायन्नादयो भवन्तीति चित्करणेन ज्ञाप्यते । तत्राङ्गानपेक्षत्वादसति बहिरङ्गत्वे परत्वान्नित्यत्वाच्च कृतेष्वायन्नादिषु प्रत्ययाद्युदात्तत्वं भवतीतीष्टस्वरसिद्धिः । तत्रोणादिनिषेध इति । ये त्वनुणादयः खलघञादयस्तेषु खघयोरित्संज्ञया भाव्यम् । खित्यनव्ययस्य चजोः कुघिण्यतोरिति लिङ्गात् । तद्धितेषु सावकाशेनादेशविधानेनेत्संज्ञा न बाध्यते । नित्य आदेश इति । उपदेशे यः प्रत्ययादिस्तस्यादेश इति कृतेपीटि प्राप्नोति । अनादित्वादिति । सांप्रतिकं प्रत्ययादित्वमाश्रित्यादेशो



Indira Gandhi National Centre for the Arts

तदेतद्धतेरीयङ्वचनं ज्ञापकमेव न धातुप्रत्ययानामायन्नादयो भवन्तीति । प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् * । प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥

झोऽन्तः ॥ ३ ॥ झादेशे धात्वन्तप्रतिषेधः * झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः । उज्झिता उज्झितुमिति । प्रत्ययाधिकारात्सिद्धम् * । प्रत्ययग्रहणं प्रकृतमनुवर्तते । क्व प्रकृतम् । आयनेयीनीयियः फढखच्छघां प्रत्ययादीनामिति । प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशवचनम् * । प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशो वक्तव्यः । अपि नः श्वो वा विजनिष्यमाणाः पतिभिः सह शयान्तै । एवं तर्हि प्रत्ययग्रहणमनुवर्तते आदिग्रहणं निवृत्तम् । कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्तते एकदेशो वा निवर्तते । असमासनिर्देशात्सिद्धम् * । असमासनिर्देशः करिष्यते प्रत्ययस्यादीनामिति । स तर्ह्यसमासनिर्देशः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । कथम् । अविभक्तिको निर्देशः । प्रत्यय आदीनामिति । तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः * । तत्रैतस्मिन् प्रत्ययग्रहणे अनुवर्तमाने आदिग्रहणे निवृत्ते शयान्तै इत्यनकारान्तत्वादङ्गस्याद्भावः प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः *। सिद्धमेतत् । कथम् । अनानन्तर्यादनकारान्तेनाद्भावो न भविष्यति । कथं कृत्वा चोदितं कथं कृत्वा परिहारः । अनकारान्तग्रहणं प्रत्ययविशेषणमिति कृत्वा चोदितं झकारविशेषणमिति कृत्वा परिहारः । यद्यनकारान्तग्रहणं झकारविशेषणं,

---

विधीयते । प्रातिपदिकविज्ञानादिति । पक्षान्तरैरपि परिहाराः सम्भवन्तीत्यव्युत्पत्तिपक्षाश्रयः ॥ २ ॥

झोऽन्तः ॥ इह प्रत्ययग्रहणेऽनुवर्तमाने एकसमासनिर्दिष्टमादिग्रहणमप्यनुवर्तेत । तथा च शयान्तै इत्यत्रानादित्वात् झस्यान्तादेशो न स्यादिति प्रत्ययग्रहणं नानुवर्त्यमिति मत्वाह झादेश इति । झकारोपदेशस्तु प्रत्यय इव लाघवार्थः स्यात् । शयान्ता इति शीङ उपसंवादाशङ्कयोश्चेति लेट् । तस्य झः । लेटोऽडाटावित्याडागमे टेरेत्वं वैतोऽन्यत्रेत्यैत्वं झोऽन्तादेशः शब्लुक् शीङः सार्वधातुके गुण इति गुणः । कथं पुनरिति । यदार्थाधिकारपक्ष उपात्तार्थशब्दाधिकारपक्षो वा तदायं पर्यनुयोगः । वर्तिपदार्थस्य समुदायार्थेऽन्तर्भावात्पृथगनुवृत्त्यसम्भवात् । यदा त्वनाश्रितार्थं शब्दमात्रं प्रतिज्ञातस्वरितत्वमनुवर्तत इति पक्षस्तदा नास्ति चोद्यावकाशः । संख्याव्ययादेर्ङीबित्यतो दामहायनान्ताच्चेत्यत्राव्ययग्रहणाननुवृत्तावपि संख्याग्रहणानुवृत्तिदर्शनात् । तत्रेति । अन्तरङ्गत्वादाटि कृतेऽन्तादेशापवादोऽदादेशः प्राप्नोति । अनकारान्तादङ्गात्प्रत्ययस्य परत्वात् । सिद्धमिति । अनकारान्तेनाङ्गेन प्राधान्याद्झकार एव विशेष्यते । तत्र व्यवधानादद्‌आदेशाभावः । अन्तादेशस्त्वविभ-

Indira Gandhi National Centre for the Arts

शेरते अत्र न प्राप्नोति । तत्र रुटि सन्नियोगवचनात्सिद्धम् * । तत्र रुटि सन्नियोगः करिष्यते । क एष यत्नश्चोद्यते सन्नियोगो नाम । चकारः कर्तव्यः । रुट् च । किञ्च । यच्चान्यत्प्राप्नोति । किञ्चान्यत्प्राप्नोति । अद्भावः । स तर्हि चकारः कर्तव्यः । न कर्तव्यः । योगविभागः करिष्यते । शीङः । शीङ उत्तरस्य झस्याद्भावो भवति । ततो रुट् । रुट् च भवति शीङ इति । एवमपि पर्यायः प्रसज्येत । एवं तर्हि अच्छब्दस्य रुटं वक्ष्यामि । तदच्छब्दग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अदभ्यस्तादिति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति ॥

शीङो रुट् ॥ ६ ॥ रुटि दृशिगुणप्रतिषेधः * । रुटि दृशिगुणः प्राप्नोति । अदृश्रन्नस्य केतव इति तस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः । परस्मिन्निमित्ते क्ङिति चेति निषेधो भविष्यति । एवमदृश्रमस्य केतव इत्यत्रापि प्राप्नोति। एवं तर्हि पूर्वान्तः करिष्यते । पूर्वान्ते शीङो गुणविधिः * । पूर्वान्ते शीङो गुणो विधेयः । शेरते । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं रुटि-

---

गुणाद्राय विधीयमानो व्यवधानेपि भवति । शेरतइति । प्रतिपदविधेर्बलवत्त्वाद्रुटि कृते व्यवधानादद्रादेशो न प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीति वचनाज्झकारमात्रस्यादेशो विधीयते, तत्र रुटा व्यवधीयते । रुटि सन्नियोगवचनादिति । आगमादेशयोः सहविधानादागमेन स्थानिनो व्यवधानाभावः । एवमपि पर्याय इति। अद्भावे कृते रुट् न प्राप्नोति झस्य रुड्विधानादझ्विधित्वात् स्थानिवत्त्वाभावाद्रुटि कृतेऽद्भावो न प्राप्नोति व्यवधानात् ततो विरोधात्तुल्यबलत्वाच्च पर्यायप्रसङ्गः । एवं तर्हीति । अच्छब्दस्य रुटि सत्यवयवावयवोपि समुदायावयवो भवतीति रुटा व्यवधानाभावाद् गुणः शीङः प्रवर्तते ॥ ३ ॥

शीङो रुट् ॥ अदृश्रन्निति । दृशोर्लुङि झेरन्तादेशे इरितो वेत्यङि तस्यान्तरङ्गत्वाद् गुणात्पूर्वं रुटि कृते ऋदृशोऽङि गुण इति गुणप्रसङ्गः । परस्मिन्निति । यदा क्ङिति चेत्यत्र निमित्तसप्तमीपक्षस्त्यक्तः परसप्तमीपक्ष आश्रितस्तदैतदुच्यते । वार्णादाङ्गं बलवदित्यनपेक्षिते वर्णाश्रयत्वादन्तरङ्गे यणादेशे कृते तस्य परं प्रत्याविषद्भावात् क्ङित्सार्वधातुकं परमाश्रित्य क्ङिति चेति गुणप्रतिषेधः प्रवर्तते । येन नाप्राप्तिन्यायेन अङ्गनिमित्त एव प्रतिषेधो गुणेन बाध्यते न तु क्ङित्सार्वधातुकनिमित्तः । प्रतिषेधाश्च बलीयांसो भवन्तीत्युभयप्रसङ्गे प्रतिषेधः प्रवर्तते । अदृश्रमिति। मिपादेशस्यामः पित्त्वान्ङित्त्वाभावान्नास्ति गुणप्रतिषेधः । एवं तर्हीति । पूर्वान्ते रुटि अलघूपधत्वाद् गुणाभावः । लघूपधगुणस्यैव हि ऋदृशोऽङि गुण इति गुणप्राप्तिः क्रियते । अथ वा गुणश्रुत्येक इत्युपस्थानात्तस्यैवाङ्गविशेषणाद् येन नाव्यवधानमित्येकवर्णव्यवहितस्य गुणो भवति रुटि कृते न भवति । शेरतइति ।

Indira Gandhi National Centre for the Arts

दृशिगुणप्रतिषेध इति । पूर्वान्तेप्येष दोषः । कथम् । अयं दृशिगुणः प्रतिषेधवि-षय आरभ्यते स यथा क्ङिति चेत्येतं प्रतिषेधं बाधते एवमनुपधाया अपि प्रसज्येत। तस्मादुभाभ्यामेव दृशेरक्प्रत्ययान्तरं वक्तव्यम् । पितरं च दृशेयं मातरं च दृशेय-मित्येवमर्थम् । झादेशादाट् लेटि * । झादेशादाट् लेटि भवति विप्रतिषेधेन । झादेशस्यावकाशः, लुनते लुनतामलुनत । आटोवकाशः, पताति दिद्युत्। उदर्धि च्यावयति । इहोभयं प्राप्नोति अपि नः श्वो वा विजनिष्यमाणाः पतिभिः सह शयान्तै । आट् लेटि भवति विप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वा नित्यत्वादाटः * । नवा वक्तव्यः । किङ्कारणम् । नित्यत्वादाटः । नित्य आडागमः । कथं नित्यः । यद्यनकारान्तग्रहणं झकारविशेषणम् । अथ हि प्रत्य-यविशेषणम् । झादेशोपि नित्यः । अन्तरङ्गलक्षणत्वाच्च । अन्तरङ्गः खल्वपि आडागमः । कथमन्तरङ्गः, यदि प्राग्लादेशाद्धात्वधिकारः । अथ हि लादेशे धात्वधिकारोऽनुवर्तते । उभयं समानाश्रयम् । यद्येवमनकारान्तग्रहणं प्रत्ययविशे-षणम् । अथापि लादेशे धात्वधिकारोनुवर्तते । उभयथापि पूर्वविप्रतिषेधेन नार्थः। कथम् । बहुलं छन्दसीत्येवमत्र शपो लुङ्न भविष्यति । तत्रानत इति प्रतिषेधो भविष्यति ॥

**वेत्तेर्विभाषा** ॥ ७ ॥ **बहुलं छन्दसि** ॥ ८ ॥ इदं बहुलं छन्दसीति द्विः क्रियते । एकं शक्यमकर्तुम् । कथम् । यदि तावत्पूर्वं क्रियते परं न करिष्यते अतो भिस ऐसित्यत्र बहुलं छन्दसीत्येतदनुवर्तिष्यते । अथ परे क्रियते न पूर्वं करिष्यते । बहुलं छन्दसीत्यत्र रुडप्यनुवर्त्तिष्यते । अपर आह । उभे बहुलग्रहणे

---

रुकि सत्यानिगन्तत्वाद् गुणप्रसङ्गः । पूर्वान्तेपीति । क्ङिति चेति गुणे प्रतिषिद्धे अ-पूर्वः ऋदृशोऽङि गुण इति गुणो विधीयते । स यथैव प्रातिषेधविषये प्रवर्तते तथै-वानुपधाया अपि इकः प्रवर्तेत । अङ्ग्रहणं च श्रुतत्वाद् दृशेरेव विशेषणं नेकः । दृशेरक्प्रत्ययान्तरमिति । यश्च लिङ्याशिष्यङ् । यश्चोरितो वेत्यङ् । तत्प्रसङ्गे छन्द-सि दृशेरग्वक्तव्यः । अथ भाषायामदर्शन्नित्यत्र ङित्सार्वधातुकनिमित्तः प्रतिषेधः कस्मान्न भवति । ङ्कितीति निमित्तसप्तमीविज्ञानाद्वा वर्णादाङ्गं बलीय इत्येकादेशात्पू-र्वमेव गुणविधानाद्वा स्थानिवद्भावाद्वा । एकादेशस्य व्यवधानात्कृतार्थस्य वा प्रति-षेधस्य परत्वाद्गुणेन बाधनात् । झादेशोपि नित्य इति । द्वयोश्च नित्यत्वेन चानि-त्यत्वादाट इति न शक्यते वक्तुम् । झविशेषणपक्षेप्यभेदाश्रयेणाटो नित्यत्वम् । भेददर्शने तु शब्दान्तरप्राप्तत्वाडप्यनित्यः । यदि प्राग्लादेशादिति । तदा प्रत्यय-मात्रापेक्षत्वादाडन्तरङ्गः ॥ ७ ॥

वेत्तेर्विभाषाबहुलं छन्दसि ॥ अतोभिस एस् इत्यत्रेति । वाक्यभेदेन सम्ब-

Indira Gandhi National Centre for the Arts

एकं छन्दोग्रहणं शक्यमकर्तुम् । कथम् । इदमस्ति । वेत्तेर्विभाषा । ततः । छन्दसि च विभाषा । ततोतो भिस ऐस् भवति । छन्दसि विभाषेति ॥

अतो भिस ऐस् ॥ ९ ॥ इह वृक्षैः प्लक्षैरिति परत्वादेत्वं प्राप्नोति । एत्वे कृते विहतनिमित्तत्वादैस्त्वं न भविष्यति। भिस्त्वम एसिपरत्वाच्चेदत ऐस् क्व भविष्याति ॥ ऐस्भाव इदानीं क्व भविष्यति । कृते एत्वे भौतपूर्व्यात् ॥ कृते एत्वे भूतपूर्वमकारान्तमिति ऐस् भविष्यति । ऐस्तु नित्यस्तथासति ॥ एवं सति नित्य ऐस्भावः कृतेप्येत्वे प्राप्नोत्यकृतेपि । नित्यत्वादैस्त्वे कृते विहतनिमित्तत्वादेत्वं न भविष्यति । एत्वं भिसि परत्वाच्चेदत एस् क भविष्याति ॥ कृते एत्वे भौतपूर्व्यादैस्तु नित्यस्तथासति ॥ १ ॥

नेदमदसोरकोः ॥ ११ ॥ इमौ द्वौ प्रतिषेधावुच्येते उभौ शक्यावव-क्तुम् । कथम् । एवं वक्ष्यामि इदमदसोः कादिति । तन्नियमार्थं भविष्यति इद-मदसोः कादेव नान्यत इति ॥

टाङसिङसामिनात्स्याः ॥ १२ ॥ किमर्थमिनादेश उच्यते । न नादेश एवोच्येत । का रूपसिद्धिः । वृक्षेण । प्लक्षेण । एत्वे योगविभागः करिष्यते । कथम् । इदमस्ति बहुवचने झल्येत् । ओसि च । ततः आङि च । आङि च परतो ऽत एत्वं भवति । वृक्षेण प्लक्षेण । तत आपः सम्बुद्धौ च । आपः आङि च ओसि चेति । नैवं शक्यम् । इह हि अनेनेति इद्रूपलोपः प्रसज्येत । झलि लोपः करिष्यते । न शक्यो झलि लोपः कर्तुम् । इह हि दोषः स्यात् । अगा-विष्टेति । एवं तर्हि अन्लोपापवादो विज्ञास्यते । कथम् । एवं वक्ष्यामि । अन् ने

---

न्धाद्भाषायामपि ऐस् भवति । छन्दसि च विभाषेति । प्रत्ययमात्रस्य छन्दसि रुड्विधीयते विभाषा । व्यवस्थितविभाषाविज्ञानाच्च यथाप्रयोगं रुड्विधिः ॥ ८ ॥

अतो भिस ऐस् ॥ परत्वादिति । एत्वस्यावकाशो वृक्षेष्विति । ऐसोवकाशः कृत एत्वे प्रागेत्वादुभयप्रसङ्गे परत्वादेत्वप्रसङ्गः । मुख्यशब्दार्थाश्रयणेनानवकाशं मत्वा पृच्छति एस्भाव इदानीमिति । कृत एत्वे इति । सांप्रतिकाभावे भूतपूर्वगतिराश्रीयते । ननु नाप्राप्त एत्वे ऐसारभ्यमाणस्तस्यापवादो युक्तः । उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । एवं तर्हि पूर्वपक्षवादिनोत्सर्गापवादमनाश्रित्य चोदितमिति तदनुसारेणैव सिद्धान्तवादी परिहरति ऐस्तु नित्य इति ॥ ११ ॥

टाङसिङसाम ॥ आङि चेति । स्थानिवद्भावाभादेशे एत्वं विज्ञायते । अनेनेति । तस्य हलादित्वाल्लोपे सत्येनेति प्राप्नोति । झलि लोप इति । हलि लोप इत्यपनीय झलि लोप इति सूत्रं कर्तव्यम् । नकारस्तु झल्न भवतीति लोपाभावः । अ-येति । इदमश्चतुर्थ्येकवचनस्य सुपांसुलुगिति यादेशः । तस्य झलादित्वादिद्रूप-लोपाप्रसङ्गाज्झलि लोप इति वक्तव्यं तथा चानेनेति न सिध्यति । एवं तर्हीति ।

Indira Gandhi National Centre for the Arts

च आपि चात । तन्नकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । लुप्तनिर्दिष्टो नकारः । यद्येवं नोपधाया इति दीर्घत्वं प्राप्नोति । सौत्रो निर्देशः । अथ वा नपुंसकनिर्देशः करिष्यते । अथ किमर्थमादित्युच्यते । न अदेवोच्येत । का रूपसिद्धिः । वृक्षात् । प्लक्षात् । सवर्णदीर्घत्वेन सिद्धम् । न सिध्यति । अतो गुणे पररूपत्वं प्राप्नोति । अकारोच्चारणसामर्थ्यान्न भविष्यति । यदि प्राप्नुवन् विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । यं विधिं प्रत्यकारोच्चारणमनर्थकं स विधिर्बाध्यते । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । पररूपं प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घस्य पुनर्निमित्तमेव ॥

ङेर्यः ॥ १३ ॥ किमिदं चतुर्थ्येकवचनस्य ग्रहणमाहोस्वित् सप्तम्येकवचनस्य । कुतः सन्देहः । समानो निर्देशः । चतुर्थ्येकवचनस्य ग्रहणम् । कथं ज्ञायते । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । इहापि तर्हि चतुर्थ्येकवचनस्य ग्रहणं स्यात् । ङेराम्नद्याम्नीभ्यः । एवं तर्हि व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति । इह चतुर्थ्येकवचनस्य ग्रहणं व्याख्यास्यामस्तत्र सप्तम्येकवचनस्येति ॥

**सर्वनाम्नः स्मै ॥१४॥** अश एकादिष्टत्वात्स्मायादीनामुपसंख्यानम्* ।

---

नश्च आप् च नाप् तस्मिन् परत इदमो नादेश इति सूत्रार्थ आश्रीयते । लुप्तनिर्दिष्ट इति । निर्दिश्य लुप्त इत्यर्थः । यद्येवं नलोपस्यासिद्धत्वाद्दीर्घत्वं प्राप्नोति यथा राजेति । नैष दोषः । छन्दोवत्सूत्राणि भवन्ति सुपांसुलुगिति लुकि कृते नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद् दीर्घस्याभावः । सौत्र इति । सूत्रे कृतः सौत्रः कृतलब्धेत्यण् । अकारोच्चारणसामर्थ्यादिति । अन्यथा तकार एव विधीयेत । आद्गुणः परस्येत्यादेस्तकारे विहिते संयोगान्तलोपे च वृक्षादिति सिध्यति । तदेवं भाष्यकारेण नादेशोऽदादेशश्च व्यवस्थापितः । अन्ये त्वतिजरसिनाऽतिजरसादिति सिद्धये इन आच्च विहितावित्याहुः सांनिपातपरिभाषाया अनित्यत्वाज्जरसादेशं वदन्तः । भाष्यकारस्तु सन्निपातपरिभाषामाश्रित्य जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यमिति मत्वा गौरवमुद्भावितवान् ॥ १२ ॥

ङेर्यः ॥ कुतः संदेह इति । प्रयोगे वृक्षायेत्यादौ चतुर्थ्यर्थावगमादयुक्तः संदेह इति भावः । इतरो लक्षणमात्रशरणो भूत्वाह समानो निर्देश इति । लक्षणप्रतिपदोक्तयोरिति । चतुर्थ्येकवचनस्य ङे इति रूपं प्रतिपदोक्तम् । सप्तम्येकवचनस्य तु घेर्ङितीति गुणे कृते लाक्षणिकरूपम् । इहापि तर्हीति । ङेरिति षष्ठ्यन्तं रूपमुपात्तं तच्चोभयोरपि लाक्षणिकमिति परिभाषाया अयमविषयः । अथ प्रत्ययारपूर्वस्य भागस्य लाक्षणिकत्वप्रतिपदोक्तत्वसम्भवापेक्षपरिभाषाप्रवृत्तिस्तदाऽन्यत्रापि प्रवर्तेत । एवं तर्हीति । लिङ्गदर्शनं चास्ति । तस्मै प्रभवति सन्तापादिभ्यः । तदस्यां प्रहरणमिति क्रीडायां ण इति ॥ १३ ॥

Indira Gandhi National Centre for the Arts

अथ एकादिष्टत्वात्स्मायादीनामुपसंख्यानं कर्तव्यम् । अथो अत्रास्मै । अथो अत्रास्मात् । अथो अत्रास्मिन् । एकादेशे कृत अत इति स्मायादयो न प्राप्नुवन्ति । किं पुनः कारणम् । एकादेशस्तावद्भवति न पुनः स्मायादयः । न परत्वात्स्मायादिभिर्भवितव्यम् । न भवितव्यम् । किङ्कारणम् । नित्यत्वादेकादेशः । नित्य एकादेशः । कृतेष्वपि स्मायादिषु प्राप्नोत्यकृतेष्वपि । नित्यत्वादेकादेशे कृते ऽत इति स्मायादयो न प्राप्नुवन्ति । किमुच्यते अथ इति । न । इहापि कर्तव्यम् । अत्रास्मै । अत्रास्मात् । अत्रास्मिन्निति । एकादेशे कृते ऽत इति स्मायादयो न प्राप्नुवन्ति । आनुपूर्व्यात्सिद्धमेतत् । नात्राकृतेषु स्मायादिषु हलादिर्विभक्तिरस्ति हलादौ च इद्रूपलोपः । नचाकृते इद्रूपलोपे एकादेशः प्राप्नोति । तदानुपूर्व्यात्सिद्धम् । तत्तर्ह्युपसंख्यानं कर्तव्यम् । न वा बहिरङ्गलक्षणत्वात् * । न वा कर्तव्यम् । किङ्कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गलक्षण एकादेशः । अन्तरङ्गाः स्मायादयः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

जसः शी ॥ १७ ॥ जश्शसोः शिः ॥ २० ॥ किमर्थं शीभावः शिभावश्चोच्यते । न शिभाव एवोच्येत । का रूपसिद्धिः । ते । ये । के । आद्गुणेन सिद्धम् । नैवं शक्यम् । इह हि त्रपुणी । जतुनी । दीर्घश्रवणं न स्यात् । एवं तर्हि शीभाव एवोच्येत । नैवं शक्यम् । इह हि कुण्डानि वनानीति ह्रस्वस्य श्रवणं न प्रसज्येत । तस्माच्छीभावः, शिभावश्च ॥

औङ आपः ॥ १८ ॥ किमर्थो ङकारः । सामान्यग्रहणार्थः । औ इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात् । अथापि औडित्युच्यते । एवमपि द्वितीयाद्विवचनस्यैव स्यात् । अस्ति प्रयोजनमेतत् । किं तर्हीति । ङित्कार्यं तु प्राप्नोति।

---

सर्वनाम्नः स्मै ॥ अथ एकादिष्टत्वादिति । लोकेऽर्थप्रतिपादनाय वाक्यमुच्चार्यते तदेव व्याकरणेपि विभज्यान्वाख्यायते । ततश्च अत्र अए इति स्थिते नित्यत्वादेकादेशः प्राप्नोति तस्मिन् कृते ऽदन्तत्वाभावाद्वर्णविधावन्तादिवद्भावाभावात्तद्रूप्यानतिदेशात् स्मायाद्यसिद्धिरिति भावः । आनुपूर्व्येति । अत्र इदम् ए इति स्थिते त्यदाद्यत्वे कृते स्मायादयः । ततो नित्यत्वादाद्गुणं बाधित्वा इद्रूपलोपे कृते सवर्णदीर्घत्वेन रूपं सिध्यतीत्यर्थः । नवेति । पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः । एकपदाश्रयत्वात् स्मायादयोन्तरङ्गाः ॥ १४ ॥

जसःशी ॥ शीभावाशिभावयोः क्वचिद्रूपाभेदं दृष्ट्वा प्रश्नः । किमर्थमिति ॥ २० ॥

औङ आपः ॥ किमर्थ इति । औङ इति भूतानुवादः । न क्वचिदाङिति रूपं विज्ञातमभूत्तस्य च भूतवदुपादाने किं प्रयोजनमिति प्रश्नः । औ इत्युच्यमान इति । निरनुबन्धकपरिभाषयेति भावः । यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्ध-

Indira Gandhi National Centre for the Arts

खट्वे । माले । याडाप इति याट् प्राप्नोति । नैष दोषः । नैवं विज्ञायते ङकार इद् यस्य सोयं ङित् ङितीति । कथं तर्हि । ङकार एव इत ङित् ङितीति । एवं तर्हि वर्णग्रहणमिदं भवति । वर्णग्रहणेषु चैतद्भवति यस्मिन् विधिस्तदादावल्ग्रहण इति न दोषो भवति । अथ वा वर्णग्रहणमिदं भवति । न चैतद्वर्णग्रहणेषु भवति। अननुबन्धकग्रहणे न सानुबन्धकस्येति । अथ वा पूर्वसूत्रनिर्देशोयम् । पूर्वसूत्रेषु च ये ऽनुबन्धा न तैरिहेत्कार्याणि क्रियन्ते । औकारोयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोयं प्रकारः । सामान्यार्थस्तस्य चासञ्जने स्मिन्ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥ १ ॥ ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ । वर्णश्चायं तेन ङित्वे न दोषो निर्देशोयं पूर्वसूत्रेण वा स्यात्॥२॥

**अष्टाभ्य औश्** ॥ २१ ॥ औशद्यौ * । औशद्याविति वक्तव्यम् । किमिदमद्याविति । अनुत्तरपद इति । किम्प्रयोजनम् । इह मा भूत् । अष्टपुत्रः अष्टभार्यः । अस्तु लुक्तत्र । अस्त्ववौश्त्वं लुग्भविष्यति । षड्भ्योप्येत्र प्रसज्यते । इहापि तर्हि प्राप्नोति । अष्टौ तिष्ठन्ति । अष्टौ पश्येति । अपवादः ॥ अपवादत्वा-

---

स्तथाप्यनेकान्ता अनुबन्धा इति दर्शने एकान्ता इति दर्शने वा अवयवावयवस्यापि समुदायावयवत्वदर्शनात् प्रत्ययस्याप्यनुबन्धः स्यात् । प्रयोजनाभावात्प्रत्ययानुबन्धो न भविष्यतीति चेदिह तस्य ग्रहणं मा भूदिति प्रयोजनं स्यात् । यद्येवमौङ इत्युच्यमाने तदनुबन्धकग्रहणेनातदनुबन्धकस्येति द्वितीयाद्विवचनग्रहणं न प्राप्नोति । ङकारोच्चारणसामर्थ्याद्भविष्यतीत्यदोषः । ङित्कार्यं त्विति । औङ इति वचनात् प्रथमाद्वितीयाद्विवचनयोरौङोर्विधायकं वाक्यमनुमीयत इत्युपदेशेन्त्यत्वान्ङकारस्येत्संज्ञायां सत्यां ङित्कार्यप्रसङ्गः । अथ वेति । औङ इति वर्णमात्रं निर्दिश्यते ङकारस्त्वसंदेहार्थो नानुबन्धार्थः । ऋदोरबिति यथा दकारः । अङ्गाक्षिप्तश्च प्रत्यय औकारेण विशेष्यते इति औकारान्तस्य शीभावो विधीयमानान्तवद्भावात् केवलस्याप्यौकारस्य प्रवर्तते । प्रत्ययस्य चानुबन्धभावाभावाभ्यां निरनुबन्धकपरिभाषाव्यवस्थां करोति न वर्णस्य । अथ वेति । पूर्वाचार्यैर्द्वि अपि द्विवचने ङिती पठिते । न चेह कश्चिदप्यौङ्प्रत्ययोस्ति । सामान्यग्रहणार्थं च पूर्वसूत्रनिर्देशस्तेन यः पूर्वसूत्र औङ् तस्य ग्रहणं भवतीति प्रथमाद्वितीयाद्विवचनयोर्ग्रहणसिद्धिः । वर्णश्चायमिति । औकारो वर्ण एव निर्दिष्टो न प्रत्यय इत्यर्थः । तेन ङित्त्वे न दोष इति।ङित्त्वे सति यो दोषः स नास्ति ङित्वस्यैवाभावादित्यर्थः१८

अष्टाभ्य औश् ॥ औशद्याविति । औशादेशो नाप्राप्ते लुक्यारभ्यमाणो विशेषाभावात्सर्वस्य लुको बाधकः प्राप्नोतीति भावः । इतरो येन नाप्राप्तिन्यायेन षड्भ्यो लुगित्यस्यैवायमपवादः न सुपो धातुप्रातिपदिकयोरित्यस्यापीति मत्वाहास्त्विति । भवत्वौशादेशस्तस्य लुग्भविष्यतीत्यर्थः । एतच्चौशादेशप्रवृत्तिमभ्युपगम्योच्यते । नित्यत्वात् पूर्वमेव लुका भाव्यम् । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्

दत्रौश्त्वं लुकं बाधिष्यते । इहापि तर्हि बाधेत । अष्टपुत्रः । अष्टभार्यः । यस्य विषय ॥ यस्य लुको विषये औश्त्वं तस्यापवादः । यो वा तस्मादनन्तरः॥ अथ वा ऽनन्तरस्य लुको बाधकं भविष्यति । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । अथेह कस्मान्न भवत्यौश्त्वम् । अष्ट तिष्ठन्ति अष्ट पश्येति । आत्वं तु यत्र तत्रौश्त्वम् ॥ यत्रैवात्वं तत्रैवौश्त्वेन भवितव्यम् । कुत एतत् । तथा ह्यस्य ग्रहः कृतः ॥ तथा ह्यस्यात्वभूतस्य ग्रहणं क्रियते अष्टाभ्य इति । ननु च नित्यमात्वम् । एतदेव ज्ञापयत्याचार्यः विभाषा आत्वमिति । यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति । इतरथा अष्टन इत्येव ब्रूयात् । औशयावस्तु लुक्तत्र षड्भ्योप्येवं प्रसज्यते । अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥ १ ॥ आत्वं हि यत्र तत्रौश्त्वं तथा ह्यस्य ग्रहः कृतः ॥ स्वमोर्लुक् च सदादीनां कृते ह्यत्वे न लुग्भवेत ॥ २ ॥

स्वमोर्नपुंसकात् ॥ २३ ॥ स्वमोर्लुक् सदादिभ्यश्चेति वक्तव्यम् ।

---

बाधत इति वा । इतरो लुको विशेषमपश्यन् यद्यपवादे प्रवृत्ते उत्सर्गः प्रवर्तते तदातिप्रसङ्ग इत्याह षड्भ्य इति । सूत्रैकदेशानुकरणमेतत् । षड्भ्यो लुगित्ययमप्यौशो लुक् प्राप्नोति । अथ विधानसामर्थ्यान्न भवति तदाष्टपुत्र इत्यत्रापि न प्राप्नोतीत्यर्थः । इतरो येन नाप्राप्ते तस्य बाधनमित्याश्रित्याहापवाद इति । षड्भ्यो लुगिति सर्वत्र प्राप्नोतीति स एवौशा बाध्यते सुपो धातुप्रातिपदिकयोरित्ययं तु क्वचित् प्राप्नोतीति तं प्रत्यस्य बाधकत्वायोगादन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधत इति पूर्वमेव लुक् प्रवर्तते । यो वा तस्मादिति । औशः षड्भ्यो लुगित्ययमन्तरः । द्वितीयाध्यायविहितस्तु व्यवहितः । ननु मध्येपवादा इति द्वितीयाध्यायविहितस्यैव लुको बाधः प्राप्नोति । नैष दोषः । यत्र द्वावपि व्यवहितौ पूर्वोत्तरौ तत्र पूर्वानुभवाहितसंस्कारोपजनितस्मृत्युपारूढस्य पूर्वस्य युक्तो बाधः । इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितो लुङ् महता यत्नेन स्मरणीयोनन्तरस्त्वनुभवनीय इति स एव बाध्यते, अथ वा सत्यामसत्यां चोपलब्धौ प्रत्यासत्त्याऽनन्तरस्यैव बाधेन भाव्यम् । एतच्च लुकः समकक्ष्यत्वमभ्युपगम्योक्तम् । भिन्नकक्ष्यौत्वे तौ लुकौ । एकस्य सर्वत्र प्राप्त्याऽपरस्य क्वचित् प्राप्त्या । अथेहेति । अष्टाभ्य इति विभक्तौ लक्षणवशादाकारो निर्दिष्टोऽशक्त औशं विषयविशेषे व्यवस्थापयितुम् । आत्वं तु यत्रेति । कृताकारस्यानुकरणमष्टाशब्दः । ननु चेति । लक्षणवशाद्विभक्तावात्वं विधाय निर्देशः कृत इति चोदकाशयः । एतदेवेति । लाघवार्थमष्टन इति वक्तव्ये कृतात्वस्येदमनुकरणम् । तस्य चैतत् प्रयोजनं कृतात्वाद्यथा स्यादकृतात्वान्मा भूदिति । यदि च नित्यमात्वं स्यात्तदा व्यवच्छेद्याभावात् कृतात्वानुकरणमनर्थकं स्यात्तस्मात् कृतात्वानुकरणनिर्देश आत्वविकल्पस्य ज्ञापकः॥२१

स्वमोरिति ॥ उत्तरसूत्रोपस्थाप्यमानार्थसंग्रहः । स्वमोर्नपुंसकात् । तदिति ।



Indira Gandhi National Centre for the Arts

इहापि यथा स्यात् । तद् ब्राह्मणकुलमिति । किं पुनः कारणं न सिध्यति । कृते ह्रस्वे न लुग्भवेत् । अत्वे कृते लुङ् न प्राप्नोति । इदमिह सम्प्रधार्यमत्वं क्रियतां लुगिति । किमत्र कर्तव्यम् । परत्वादत्वम् । नित्यो लुक् । कृतेऽप्यत्वे प्राप्नोत्यकृतेऽपि । अनित्यो लुक् । नहि कृते अत्वे प्राप्नोति । अतोमिसम्भावेन भवितव्यम् । तस्मात्त्यदादिभ्यश्चेति वक्तव्यम् । इदं विचार्यते । शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं वा स्यादर्थग्रहणं वेति । कश्चात्र विशेषः । शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः * । शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधो वक्तव्यः । बहुत्रपुः । बहुत्रपू । बहुत्रपव इति । अस्तु तर्ह्यर्थग्रहणम् । यद्यर्थग्रहणं प्रियसक्थ्ना ब्राह्मणेनेत्यत्रानङ् न प्राप्नोति । अस्तु तर्हि शब्दग्रहणमेव । ननु चोक्तं शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेध इति । सिद्धं तु प्रकृतार्थविशेषणत्वात् * ।

---

तदोः सः साविति सत्वमप्यत्र प्राप्नोति । नित्यो लुगिति । अत्वं तु लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्विभक्त्यभावान्न प्राप्नोतीत्यनित्यम् । अनित्यो लुगिति । यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमित्येतत्तु पाक्षिकम् । यदा द्वयोर्लक्षणयोः संप्रधारणं क्रियते तदा यल्लक्षणप्रवृत्तावपि तस्य द्वितीयस्य लक्षणस्य प्रवृत्तिव्याघातो नास्ति तत्प्रति न तस्य दौर्बल्यं लक्षणान्तरेण चैतत्प्रवृत्तिनिवारणात् । यथा वालिसुग्रीवयोर्युद्धे भगवता रामेण वालिनो वधेपि न सुग्रीवापेक्षं दौर्बल्यमभिदधति शूरमानिनः । एतद्दर्शनसंश्रयेणोच्यते यस्य च लक्षणान्तरेणेति । यदा त्वेष न्याय आश्रीयते लक्षणान्तरप्रवृत्तिनिमित्तमुपसंहरत् लक्षणं बलवद्भवति, इतरत्तु तदुपसंहृतनिमित्तलक्षणान्तरोपपादितप्रवृत्तिविघातं दुर्बलमेव । यथा च भगवद्वासुदेवसहायत्वात्पाण्डवा बलिनो दुर्बलान् धार्तराष्ट्रान् विजिग्यिरे तदा नास्त्येव यस्य च लक्षणान्तरेणेति । केचित्तु अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इत्यत्रापिग्रहणान्नित्यानां च परेषां च लुका बाधनमिच्छन्तस्त्यदाद्यत्वं लुका बाध्यत इत्याहुः । तथा चोच्यते । सर्वविधिभ्यो लुग्विधिर्बलवानिति । शिशीति । अङ्गस्येत्यनुवर्तनादङ्गस्य य औङ् नपुंसकात्परस्तस्य शीति विज्ञायमाने शब्दग्रहणं भवति यदाप्यङ्गादिति विभक्तिविपरिणाम आश्रीयते नपुंसकेन चाङ्गं विशेष्यते नपुंसकान्तादङ्गात्परस्येति तदापि शब्दग्रहणम् । यदा तु नपुंसकाद्यो विहित इत्याश्रीयते प्रधानं वा नपुंसकमङ्गेन विशेष्यते नपुंसकादङ्गात्परस्येति तदार्थग्रहणं शब्दद्वारकं चार्थेन पौर्वापर्यादिकमाश्रीयते । प्रियसक्थ्नेति । नपुंसकस्य झलच इत्यतो नपुंसकग्रहणमस्थ्यादिसूत्रे नपुंसकसंज्ञाशब्दनिवृत्त्यर्थमनुवर्तते । यद्यपि अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्वितिसंज्ञाशब्दानामप्रसङ्गः । तथापि न्यायानुसरणे गौरवप्रसङ्गाद् नपुंसकानुवृत्तिराश्रीयते । उत्तरार्थं च । ईचद्विवचन इत्यत्र नपुंसकस्येति पुंवदिति चानुवर्तते तेन छन्दसि नपुंसकस्य पुंवद्भावान्मधोर्गृह्णातीत्यादौ नुमभावसिद्धिः । सिद्धं त्विति ।

Indira Gandhi National Centre for the Arts

सिद्धमेतत् । कथम् । प्रकृतस्यार्थो विशेष्यते । किञ्च प्रकृतम् । अङ्गम् । अङ्गस्य शिशीलुङ्नुमो भवन्ति नपुंसके वर्तमानस्य । कथं प्रियसक्थ्ना ब्राह्मणेन । अस्थ्यादिषु शब्दग्रहणम् * । अस्थ्यादिषु नपुंसकग्रहणं शब्दग्रहणं द्रष्टव्यम् । युक्तं पुनरिदं विचारयितुम् । नन्वनेनासन्दिग्धेनार्थग्रहणेन भवितव्यम् । नहि नपुंसकं नाम शब्दोऽस्ति । किं तर्ह्युच्यते ऽस्थ्यादिषु शब्दग्रहणमिति । अत्राप्यर्थग्रहणमेव । अत्रैतावान् सन्देहः । क्व प्रकृतस्यार्थो विशेष्यते क्व गृह्यमाणस्येति । शिशीलुङ्नुम्विधिषु प्रकृतस्यार्थो विशेष्यते अस्थ्यादिषु गृह्यमाणस्य ॥

अदूड्डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥ अद्भावे पूर्वसवर्णप्रतिषेधः * । अद्भावे पूर्वसवर्णस्य प्रतिषेधो वक्तव्यः । कतरत्तिष्ठति । कतरत्पश्यति । सिद्धं त्वनुनासिकोपधात् * । सिद्धमेतत् । कथम् । अनुनासिकोपधो ऽच्छब्दः करिष्यते । डुक्करणाद्वा * । डुक् डतरादीनामिति वक्ष्यामि । डित्करणाद्वा * । अथ वा डिदच्छब्दः करिष्यते । स तर्हि डकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः । अदूड्डतरादिभ्यः पञ्चभ्यः ॥

नेतराच्छन्दसि ॥ २६ ॥ इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्र * ।

---

विषयविभागाश्रयेणाभिमतार्थसिद्धिः । शिशीलुङ्नुम्विधिष्वर्थग्रहणमस्थ्यादिषु शब्दग्रहणमित्यर्थः । अस्थ्यादिष्विति । विशेषणविशेष्यभावे कामचारात् नपुंसकलिङ्गविशिष्टैरस्थ्यादिभिरङ्गं विशेष्यत इति नपुंसकास्थ्याद्यन्तस्याङ्गस्य नपुंसकस्याप्यनङ् भवति । पदाङ्गाधिकारे तस्य चेति वचनात्केवलानामप्यस्थ्यादीनामनङ् भवति । इदानीं भाष्यकारो विचारमेव पूर्वोक्तमाक्षिप्यमाण आह युक्तं पुनरिति । अर्थमनपेक्ष्य शब्दग्रहणपक्षासंभव इति भावः । किं तर्ह्युच्यत इति । नैवेदं वक्तव्यमित्यर्थः । कस्मादिदानीं न वक्तव्यमित्याह अत्रापीति । अर्थधर्मत्वाल्लिङ्गस्य नपुंसकार्थाभिधायित्वादस्थ्यादयो नपुंसकशब्देनाभिधीयन्त इत्यर्थग्रहणमेव भवति । तस्माद्विशेषणविशेष्यभावविचार एव युक्तः । न तु यथेष्टसिद्ध्यनङ्गत्वादसम्भवादेकतरपक्षग्रहणविचारः ॥ २३ ॥

अदूड्डतरादिभ्यः पञ्चभ्यः ॥ अद्भाव इति । सुस्थानिके ऽदादेशो ऽयं दोषः अमादेशे त्वादि स्थानिवद्भावादमि पूर्वरूप सिद्धमिति । सिद्धं त्विति । अनुनासिकत्वेन निवृत्तिर्लक्ष्यते तेनोच्चारणार्थो ऽकारो दकारमात्र स्यादेशः । अदेः परस्येत्यम आदेर्भवति । मकारस्य तु संयोगान्तलोपः । उच्चारणार्थानां त्वनुनासिकत्वप्रतिज्ञायां ब्रुवो वचिरिति वच्यादीनां नुम्प्रसङ्गः । एतस्मिन् पक्षे हे कतरदित्यत्र संबुद्धिलोपप्रसङ्गं मत्वाह डुक्करणाद्वेति । कार्यिभेदाच्च डुका लुङ् न बाध्यते । द्विडकारक इति । दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गान्न कृतं नापि डकारस्य संयोगान्तलोपः ॥ २५ ॥

नेतरा ॥ नपुंसकादेशेभ्य इति । अलिङ्गे युष्मदस्मदी इत्यनाश्रित्यायं विचा-

Indira Gandhi National Centre for the Arts

इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्रेति वक्तव्यम् । एकतरं तिष्ठति । एकतरं पश्य । नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन * । नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । नपुंसकादेशानामवकाशः, त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः, त्वं ब्राह्मणः । अहं ब्राह्मणः । युवां ब्राह्मणौ । आवां ब्राह्मणौ । यूयं ब्राह्मणाः । वयं ब्राह्मणाः । इहोभयं प्राप्नोति । त्वं ब्राह्मणकुलम् । अहं ब्राह्मणकुलम् । युवां ब्राह्मणकुले । आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि । वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु पुनः प्रसङ्गात् शिशीलुङ्नुम्विधयः कस्मान्न भवन्ति । सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥ किमर्थः शकारः । सर्वादेशार्थः । शित्सर्वस्येति सर्वादेशो यथा स्यात् । नैतदस्ति प्रयोजनम् । अक्रियमाणेपि शकारे ऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्याकारे कृते त्रयाणामकाराणामतोगुणे पररूपत्वे सिद्धं रूपं स्यात् । तव स्वम् । मम स्वम् । यद्येतल्लभ्येत कृतं स्यात् । तत्तु न लभ्यम् । किङ्कारणम् । अत्र हि तस्मादित्युत्तरस्य आदेः परस्येत्यकारस्य प्रसज्येत । अत उत्तरं पठति । ङस आदेशे शित्करणानर्थक्यमकारवचनानर्थक्यात् * । ङस आदेशे शित्करणमनर्थकम् । किङ्कारणम् । अकारस्याकारवचनानर्थक्यात् । अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वा ऽन्तरेणापि शकारं सर्वादेशो भविष्यति । अर्थवत्त्वादेशे लोपार्थम् * । अर्थवत्त्वाकारस्याकारवचनम् । कोर्थः । आदेशे लोपार्थम् । यः स शेषे लोपः आदेशे स विज्ञायते । ननु चादेशो या विभक्तिरित्येवमेतद्विज्ञायते । आदेश एषा विभक्तिः । कथम् । सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः । एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥ तस्माच्छित्करणम् * । तस्माच्छकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास

---

रः । स्वौजसमां लुक्शीशयः परत्वादमा बाध्यन्तइत्यर्थः ॥ २६ ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ किमर्थ इति । अकारस्याकारवचने प्रयोजनाभावादादेः परस्येत्यस्यानुपस्थानादलोन्त्यस्येति सकारस्याकारः । अतो गुण इति पररूपेण सिद्धमिति भावः । इतरस्त्वस्त्यकारस्याकारवचने प्रयोजनमिति मत्वाह शित्सर्वस्येति । अन्तरेणापि शकारं सर्वादेशो भविष्यतीति । आद्यानुसंहाराभावे अन्त्यानुसंहाराद् द्वयोरकारयोः पररूपमित्यर्थात्सर्वादेशः संपद्यते । यः स शेषे लोप इति । अनादेशे आत्वयत्वविधानादादेशः शेषः । ननु चेति । शेषे लोप इत्यत्र विभक्ताविन्यनुवर्तते तद्विशेषणं च शेषग्रहणमित्यादेशो या विभक्तिरिति विज्ञायेत नाह त-

Indira Gandhi National Centre for the Arts

एव । कथम् । प्रश्लिष्टनिर्देशोयम् । अ अ इति । सो ऽनेकाल्शित्सर्वस्येति सर्वस्य भविष्यति ॥

ङेप्रथमयोरम् ॥ २८ ॥ प्रथमयोरित्युच्यते । कयोरिदं प्रथमयोर्ग्रहणम् । किं विभक्त्योराहो स्वित्प्रत्यययोः । विभक्त्योरित्याह । कथं ज्ञायते । अन्यत्रापि हि प्रथमयोर्ग्रहणे विभक्त्योर्ग्रहणं विज्ञायते न प्रत्यययोः । क्वान्यत्र । प्रथमयोः पूर्वसवर्ण इति । अस्ति कारणं येन तत्र विभक्त्योर्ग्रहणं विज्ञायते । किङ्कारणम् । अचीति वर्तते । न चाजादी प्रथमौ प्रत्ययौ स्तः । ननु चैवं विज्ञायते । अजादी यौ प्रथमौ अजादीनां वा यौ प्रथमाविति । यत्तर्हि तस्माच्छसो नः पुंसीत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति । इहाप्या-

———————

दादिविधिरस्ति यत आदेशादाविति विज्ञायते । तस्मात्सत्यप्यादेशादित्वे विभक्तेरनादेशत्वान्नैवायं शेषः । ततो नास्त्यकारस्याकारवचने प्रयोजनम् । सर्वे सर्वपदादेशा इत्यादिविकारद्वारेण विभक्तेरेवादेशा विधीयन्त इति विभक्तिरेवादेशः स्यादिति शित्वं सर्वादेशार्थं क्रियते । सर्वपदादेशा इत्यत्र पदशब्देन न सुप्तिङन्तमुच्यते । किं तर्हि पद्यते प्रतीयते ऽर्थोनेनेति अन्वयव्यतिरेकाभ्यां कल्पिताभ्यां यस्य कल्पितार्थवत्ता तदभिधीयते तत्रानन्यार्थादकारविधानादेकदेशद्वारेण विभक्तिरेवादेशः । प्राश्लिष्टनिर्देश इति । ततश्चाकारद्वयलक्षणः समुदायो ऽनेकाल्त्वात्सर्वादेशः प्रवर्तते । तस्मिन् प्रवृत्ते ऽतो गुण इति पररूपमिति सिद्धमिष्टम् ॥ २७ ॥

ङेप्रथेमयोरम् ॥ प्राधान्यलक्षणस्य प्रथमार्थस्येहासम्भवात्सन्निवेशापेक्षयाद्यस्य तावद् ग्रहणं विज्ञायते विशेषज्ञानाय पृच्छति कयोरिति । यदि स्त्रीलिङ्गनिर्देशस्ततो विभक्त्योर्ग्रहणेन भाव्यम् । पुंल्लिङ्गेन निर्देशे तु प्रत्यययोः तत्र यद्यन्तरङ्गं प्राथम्यमाश्रीयते ततः पुंल्लिङ्गेन निर्देशात् प्रत्ययग्रहणम् । वर्गस्यासमाप्तावेव प्रत्यययोः प्राथम्यसंप्रत्ययात् । अथ तु सपूर्वायाः प्रथमाया विभाषा प्रथमायाश्च द्विवचने इत्यत्र शास्त्रे प्रसिद्धिराश्रीयते ततः स्त्रीलिङ्गनिर्देशाद्विभक्तिग्रहणम् । प्रत्ययग्रहणपक्षे च युष्मदस्मदोः प्रातिपदिकत्वात्प्रातिपदिकप्रत्यययोः सु औ इत्यनयोर्ग्रहणेन भाव्यम् । ननु द्वयोः कथं प्राथम्यं यावताद्यापेक्षया परस्य द्वितीयत्वम् । नैष दोषः । राश्यपेक्षया द्व्यात्मकस्य समुदायस्य प्राथम्याविरोधात् । प्रथमसाहचर्याद्वा द्वितीयस्यापि प्रथमव्यपदेशः यथार्धर्चा पुंसि चेति गोमयादीनामर्धर्चव्यपदेश । अन्यत्रापीति । प्रसिद्धिमाह अस्ति कारणमिति । यस्मात्कारणात्तत्र विभक्तिग्रहणं तदिह नास्ति । न चाजादी इति प्रथमयोर्विशेष्यत्वमचीत्यस्य विशेषणभावः । न चाजादित्वं संभवतीति सामर्थ्यात्तत्र विभक्तिग्रहणं विज्ञायते । अजादी यौ प्रथमाविति । अजादी विशेष्यौ प्राथम्यं विशेषणं तेन चाजादित्वाभावात् सुः परिहृतः औजसोः प्राथम्यं न विहन्ति । यथा ब्राह्मणपङ्क्तौ ब्राह्मणौ प्रथमावानयेत्युक्ते अब्राह्मणः प्रथमोपि चोदनायामनन्तर्भावाद् ब्राह्मणयोर्न प्रथमव्यपदेशविघातहेतुः । अजादीनां वेति । अचीत्यनुवृत्तं निर्धारणसप्तम्यन्तं विज्ञायते । यदयं शसो नेति ।

Indira Gandhi National Centre for the Arts

चार्यप्रवृत्तिर्ज्ञापयति विभक्त्योर्ग्रहणमिति । यदयं शसो नेति प्रतिषेधं शास्ति । नैष प्रतिषेधः । नत्वमेतद्विधीयते । सिद्धमत्र नत्वं तस्माच्छसो नः पुंसीति । यत्र तेन न सिध्यति तदर्थम् । क्व च तेन न सिध्यति । स्त्रियां नपुंसके च । युष्मान् ब्राह्मणकुलानि पश्य । अस्मान् ब्राह्मणकुलानि पश्येति । यत्तर्हि युष्मदस्मदोरनादेशे द्वितीयायां चेत्याह । तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति ॥

भ्यसोभ्यम् ॥ ३० ॥ किमयं भ्यम्शब्द आहो स्विदभ्यमशब्दः । कुतः सन्देहः । समानो निर्देशः । किञ्चातः । यदि तावद् भ्यम्शब्दः शेषे लोपश्चान्त्यस्य एत्वं प्राप्नोति । अथाभ्यमशब्दः शेषे लोपश्च टिलोपः । उदात्तनिवृत्तिस्वरः प्राप्नोति । यथेच्छसि तथास्तु । अस्तु तावद् भ्यम्शब्दः शेषे लोपश्चान्त्यस्य । ननु चोक्तमेत्वं प्राप्नोतीति । नैष दोषः । अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति । अथ वा पुनरस्तु अभ्यमशब्दः शेषे लोपष्टिलोपः । ननु चोक्तमुदात्तनिवृत्तिस्वरः प्राप्नोतीति । नैष दोषः । उक्तमेतदादौ सिद्धमिति ॥

———————

ङप्रथमयोरित्यम्भावस्य प्राप्तस्य शसो नेति प्रतिषेधः क्रियते । ततो योचीति यत्वे प्राप्ते द्वितीयायां चेत्यात्वे कृते प्रथमयोरिति पूर्वसवर्णे तस्माच्छसो नः पुंसीति नत्वे युष्मानस्मानिति रूपं सिध्यति । इतरः प्रतिषेध आश्रीयमाणे पुंस्येव नत्वं स्यात् न स्त्रीनपुंसकयोरिति मत्वाह नैष प्रतिषेध इति । आदेः परस्येत्यादेर्नकारे कृते संयोगान्तत्वाल्लोपः । एतच्चाभ्युपगम्य लिङ्गत्रयत्वमुक्तम् । यत्तर्हीति । यदि प्रत्यययोरिदं ग्रहणं स्यात्ततो द्वितीयाया अनादेशत्वात्तस्यामात्वं सिद्धमेवेति द्वितीयायां चेत्यात्वविधानमनर्थकं स्यात् । ननु च योचीति यत्वे प्राप्ते तद्बाधनार्थमात्वविधानं स्यादिति कथं ज्ञापकम् । उच्यते । यद्येतावद् प्रयोजनं स्याद्योऽच्यनमीटोरिति ब्रूयात् । यत्वे प्रतिषिद्धे आत्वस्य भावात् । युष्मानस्मानित्यत्रापि शसो नकारे कृते शेषे लोपे सुपि चेति दीर्घत्वं भविष्यति ॥ २८ ॥

भ्यसोभ्यम् ॥ किमयमिति । संहितायां निर्देशस्य साम्याद्विचारः । चत्वारोऽत्र पक्षाः सम्भवन्ति । भ्यमादेशः शेषेलोपोन्त्यलोपः, भ्यमादेशः शेषेलोपष्टिलोपः । अभ्यमादेशः शेषे लोपोन्त्यलोपः, अभ्यमादेशःशेषे लोपष्टिलोप इति । तत्र यदा भ्यमादेशः तदा शेषे लोपोन्त्यलोप एवाश्रयितव्यः टिलोपे रूपासिद्धिप्रसङ्गात् । अभ्यमादेशे शेषे लोपेन्त्यलोपे च द्वयोरकारयोः पररूपमेकादेश उदात्तेनोदात्त इत्युदात्तत्वं भवति । युष्मदस्मदोः प्रातिपदिकस्वरेण प्रत्ययस्वरेण चान्तोदात्तत्वात् । टिलोपपक्षे चाकारोच्चारणमर्थवद् अन्त्यलोपेप्येत्वनिवृत्त्यर्थमिति अकारोच्चारणसामर्थ्यात्सवर्णदीर्घत्वेन भाव्यमिति न चोदनीयम् । तदेवं द्वितीयपक्षो ऽत्यन्तदुष्टस्तृतीयस्तु निर्दोष इति तत्परिहारेण पक्षद्वयाश्रयो भाष्ये विचारः । उदात्तनिवृत्तिस्वर इति । कर्षात्वतो घञोन्त उदात्त इत्यतोन्तग्रहणमनुदात्तस्य च यत्रोदात्तलोप इत्यत्रानुवर्तते ततश्चान्तोदात्तत्वं प्राप्नोति मध्योदात्तत्वं चेष्यते । अङ्गवृत्त

Indira Gandhi National Centre for the Arts

**साम आकम्** ॥ ३३ ॥ किमर्थं सामः ससकारस्य ग्रहणं क्रियते । न आम आकमित्येवोच्येत । केनेदानीं ससकारस्य भविष्यति । आमोयं भक्त आमग्रहणेन ग्राहिष्यते । अत उत्तरं पठति । सामग्रहणं यथा गृहीतस्यादेशवचनात् * । सामग्रहणं क्रियते । निर्दिश्यमानस्यादेशा भवन्तीति ससकारस्य न प्राप्नोति । इष्यते च स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति साम आकमेवमर्थमिदमुच्यते । न वा द्विपर्यन्तानामकारवचनादामि सकाराभावः * । न वैतत्प्रयोजनमस्ति । किङ्कारणम् । द्विपर्यन्तानामकारवचनात् । द्विपर्यन्तानां हि त्यदादीनामत्वमुच्यते । तस्मादामि सकारो न भविष्यति । सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् * । सुट्प्रतिषेधस्तु वक्तव्यः । किङ्कारणम् । आदेशे लोपविज्ञानात् । यः स शेषे लोप आदेशे स विज्ञायते । न वा टिलोपवचनादेशे टाप्प्रतिषेधार्थम् * । न वा सुट्प्रतिषेधो वक्तव्यः । किङ्कारणम् । टिलोपवचनात् । आदेशे यः स शेषे लोपः स टिलोपो वक्तव्यः । किम्प्रयोजनम् । टाप्प्रतिषेधार्थम् । टाप् मा

---

इति । एत्वषत् सुपि चेति दीर्घत्वमपि न भवति । आदौ सिद्धमिति । अन्तग्रहणं नानुवर्तते । उच्चारणक्रमप्रत्यासत्त्या चादेरेवोदात्तत्वम् ॥ ३० ॥

साम आकम् ॥ किमर्थमिति । युष्मदू आमिति स्थिते आदेशेनात्र भाव्यमिति यत्वं न प्रवर्तते । आदेशश्च शेष इति अकृत आदेशे शेषत्वाभावाल्लोपाप्रसङ्गः । त्यदाद्यत्वमपि नास्ति द्विपर्यन्तानां विधानात्ततश्चानकारान्तत्वाभावादादेशप्रवृत्तिकाले सुड्नास्तीति नार्थः ससकारनिर्देशेन । कृते ऽप्याकमादेशे शेष लोपे टिलोपे च तथैव सुग् नास्तीति भावः । इतरः कृते आदेशे शेषलोपेन्त्यलोपे च सुट् प्राप्नोतीति भाविनः सुटो निवृत्त्यर्थं ससुट्कोपादानं कर्तव्यमिति मत्वाह केनेदानीमिति । स एव परमतमाशङ्कते आमो ऽयमिति । सुडप्ययमाम्भक्त इति यदि त्वं मन्यसे तत इदमुच्यते । सामग्रहणमिति । निर्दिश्यमानस्येति यदि ससकारको न निर्दिश्येत तदादेशविधानकाले संनिहितः पश्चादन्त्यलोपे कृते प्राप्नुवन् सुट् केन निवर्त्येत । इष्यते च तन्निवृत्तिरित्येवमर्थं ससकारग्रहणम् । अथ वा त्यदाद्यत्वे कृते सुटि च निर्दिश्यमानस्यादेशा इति सुट्सहितस्य न प्राप्नोति । यस्तु निर्दिश्यते तस्य वचनसामर्थ्यान्निर्दिष्टग्रहणपरिभाषानुपस्थानाद् व्यवहितस्याकमादेशः प्राप्नोति । ससुट्कनिर्देशात्ससुट्कस्य भवति । अत्र पक्षे आमोऽयं भक्त आमग्रहणेन ग्रहीष्यत इति चोदकस्यैव ग्रन्थः । इतरस्तु पूर्वां व्याख्यामबुध्वोत्तरां च दोषवतीमवगम्याह नवेति । टिलोप इति । वक्ष्यमाणमपर्यन्तस्थान्यपेक्षया शेषे विज्ञायमाने टिरेव शेष इति तस्यैव लोपो विज्ञायते शेष इति स्थानी विषयसप्तम्या निर्दिष्टः । लोपस्य चास्मिन् पक्षे उत्सर्गत्वादनादेशे आत्वयत्वविधानादादेश एव विभक्ताववस्थितः । टाप्प्रतिषेधार्थमिति । टापोनुत्पत्त्यर्थमित्यर्थः । युष्मदस्मदोर्द्रव्यवाचित्वाद् द्रव्यस्य च लिङ्गसंख्यासंम्बन्धादन्त्यलोपे सत्यकारान्तत्वाट्टाप् प्राप्नो-

Indira Gandhi National Centre for the Arts

भूदिति। स तर्हि टेर्लोपो वक्तव्यः। न वक्तव्यः। न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम् *। न वा वक्तव्यम्। किङ्कारणम्। लिङ्गाभावात्। अलिङ्गे युष्मदस्मदी। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा। अस्ति कारणं येनैतदेवं भवति। किङ्कारणम्। योसौ विशेषवाची शब्दः स्त्रीप्रत्ययष्टाप्शब्दस्तदसान्निध्यात्। अङ्ग हि भवांस्तं समुच्चारयतु गंस्यते स विशेषः। ननु च नैतेनैवं भवितव्यम्। न हि शब्दनिमित्तकेन नामार्थेन भवितव्यम्। किं तर्हि। अर्थनिमित्तकेन नामशब्देन भवितव्यम्। तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते योसौ विशेषवाची शब्दः स्त्रीप्रत्ययष्टाप्शब्दस्तदसांनिध्यात्तत्र विशेषो न गम्यत इति। इहापि तस्य विशेषो न गम्येत दृषत्समिदिति। तस्मात्सुट्प्रतिषेधः। तस्मात्सुट्प्रतिषेधो वक्तव्यः। सस-

---

ति। संनिपातपरिभाषायाश्च दोषः पठितस्त्यदाद्यकारष्टाब्विधेरिति टापि सा नाश्रीयते। अलिङ्ग इति। अभिधेयस्यालिङ्गत्वादलिङ्गे। शब्दशक्तिस्वाभाव्याल्लिङ्गरहित एव ताभ्यामर्थोऽभिधीयते इति तन्निवृत्तये टिलोपो नाश्रयितव्यः। योसौ विशेषवाचीति। ननु द्योतकाष्टाबादयस्तदुक्तम्। सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादय इति। नैष दोषः। इदमप्युक्तम्। अथ वा पुनरस्तु स्त्रियामभिधेयायामिति। अथ वा वचिर्द्योतने वर्तते। वाचकेन खल्वप्युत्पत्तव्यम्। वाचकश्चेत् प्रयोक्तव्यो वाचकश्चेत् प्रयुज्यतामित्यत्र वचिर्द्योतने प्रयुक्तः। न हि शब्दनिमित्तकेनेति। ननु शब्दनिमित्त एवार्थस्तथा चैकरूपोऽप्यर्थोऽभिन्नशब्दोच्चारणान्नानारूपः प्रतिभाति। यथा पचति पाकं करोति पाकक्रियाया निर्वृत्तिं करोतीति। तथा च बलाहकाद्विद्योतते बलाहके विद्योतते बलाहको विद्योतते इति। कंसादीनां च साधनत्वं शब्दोपहितरूपाणां बुद्धिविषयाणां हेतुमति चेत्यत्र प्रतिपादितम्। एवं तर्हि यः शब्दो लोकेऽत्यन्तमदृष्टप्रयोगस्तन्निमित्तोऽर्थो न भवतीत्युच्यते। शब्दं प्रयुयुक्षमाणेन लोकस्यानुसरणात्। स्वसामर्थ्येन हि शब्दोऽर्थं प्रत्याययति तच्च सामर्थ्यं लौकिकप्रयोगादवधार्यम्। अर्थरूपमिति। सत्यपि वस्तुनो लिङ्गवत्त्वे युष्मदस्मद्भ्यां न तत्प्रत्याययितुं शक्यत इत्यर्थः। युष्मदस्मदभिधेयं चार्थरूपशब्देनोच्यते न वस्तुरूपम्। तस्यैव वस्तुनो ब्राह्मणादिशब्दैर्लिङ्गयुक्तस्य प्रतिपादनात्। न चायं नियमः सत्त्वभूतोऽर्थोऽवश्यं लिङ्गयुक्तः प्रतीयते पञ्च सप्तेति लिङ्गानवगमात्। तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधं मन्यमाना लिङ्गसर्वनामनपुंसकयोगं युष्मदस्मदोरिच्छन्ति। तथा च शिशीलुङ्नुमां युष्मदस्मद्विभक्त्यादेशानां च विप्रतिषेध उक्तः। अन्येतु दर्शनभेदेन शिशीलुङ्नुमां विप्रतिषेधः पुंसि नत्वं च लिङ्गत्वाभ्युपगमेन प्रदर्शितम्। सत्वभूतस्यार्थस्यावश्यं लिङ्गसंख्यायोगः। तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययनिषेधः। इह त्वलिङ्गत्वेन टाप्परिहृत इति विरोधं परिहरन्ति तस्मादिति। टाबभावे टिलोपानाश्रयणादन्त्यलोपे सति सुटः प्राप्तस्य प्रतिषेधो विधेयः लाघवात्

Indira Gandhi National Centre for the Arts

कारग्रहणं वा कर्तव्यम् । अथ क्रियमाणेपि ससकारग्रहणे कस्मादेवात्र सुट् न भवति । ससकारग्रहणसामर्थ्याद्भाविनः सुट आदेशो विज्ञायते ॥

आत औ णलः ॥ ३४ ॥ इह पपौ तस्थाविति । त्रीणि कार्याणि युगपत् प्राप्नुवन्ति द्विर्वचन,मेकादेश, औत्वमिति । तद्यदि सर्वत्र औत्वं लभ्येत कृतं स्यात् । अथापि द्विर्वचनं लभ्येत एवमपि कृतं स्यात् । तत्तु न लभ्यम् । किङ्कारणम् । अत्र हि परत्वादेकादेशो द्विर्वचनं बाधते । परत्वादौत्वम् । नित्य एकादेशः औत्वं बाधेत । कं पुनर्भवान् औत्वस्यावकाशं मत्वाह नित्य एकादेश इति । अनवकाशमौत्वमेकादेशं बाधिष्यते । औत्वे कृते द्विर्वचनमेकादेश इति । यद्यपि परत्वादेकादेशः । स्थानिवद्भावाद् द्विर्वचनं भविष्यति ॥

विदेः शतुर्वसुः ॥ ३६ ॥ विदेर्वसोः कित्त्वम् * । विदेर्वसोः कित्वं

———

त्ससकारग्रहणं वा कर्तव्यम् । अथेति । आदेशप्रवृत्तिकाले संनिहित आदेशेन निवर्त्यो नान्यः । ससकारग्रहणसामर्थ्यादिति । न हि सत आदेशेन निवृत्तिः क्रियते । किं तर्हि अत्यन्ताभावस्तस्मिन् विषये तस्यानेनोपायेनाख्यायते । शास्त्रेण तु प्रसङ्गवतो निवृत्तिराख्यायत इति भाविनः सुटो निवृत्तिः ससुट्कनिर्देशेन प्रतिपाद्यते३२॥

आत औ णलः ॥ त्रीणि कार्याणीति । लित्स्वरस्तु प्रयोजनाभावान्नोपन्यस्तः । सर्वथान्तोदात्तत्वस्य सिद्धत्वात् । आत्वं लभ्येत कृतं स्यादिति । एकादेशे कृते औत्वाप्राप्तिदोषस्तावत्परिहृत इत्यभिसंधाय द्विर्वचनासिद्धावपि कृतमित्युक्तम् । द्विर्वचनं लभ्येतेति । एकादेशे कृते व्यपवर्गाभावाद्या द्विर्वचनाप्राप्तिः सा परिहृता भवतीत्येतावता द्विर्वचनसिद्ध्या कृतमित्युक्तम् । परत्वादेकादेश इति । वर्णाश्रयत्वादन्तरङ्गत्वादपीति द्रष्टव्यम् । नित्य एकादेश इति । यद्यप्यकृते औत्वे सवर्णदीर्घत्वं प्राप्नोति कृते तु वृद्धिः तथापि व्यक्तिभेदमनाश्रित्यैकादेशसामान्याश्रयं नित्यत्वमुच्यते । औत्वं कृते एकादेशे नैव प्राप्नोतीत्यनित्यम् । अनवकाशमौत्वमिति सावकाशस्य सवर्णदीर्घस्य बाधकमित्यर्थः । यद्यपीति । वार्णादाङ्गं बलीय इति पूर्वं द्विर्वचनं भवति । तथाप्यङ्गाधिकारविहितमाङ्गमुच्यते तथापि न दोष इति भावः । स्थानिवद्भावादिति । द्विर्वचननिमित्ते ऽचि परतोऽजादेशः स्थानिवद्भवतीति सूत्रार्थमाश्रित्यैकादेशे कृते ऽचः परत्वाभावात् स्थानिवद्भावाभाव आशङ्कितः । अचि यो विहितोऽजादेशः स स्थानिवदिति सूत्रार्थाश्रयणेन तु स्थानिवद्भाव उक्तः । न हि स्थानिवद्भावस्य परभूतोऽज्निमित्तभूत आश्रीयते । किं तर्हि । आदेशस्य । यदि तर्हि स्थानिवद्भावाद् द्विर्वचनं ततो नित्यं तदिति पूर्वमेव तेन प्रवर्त्यम् । नैतदस्ति । एकादेशोपि नित्योन्तरङ्गश्चेति स एव पूर्वं प्रवर्तते । क्रमप्रतिपत्त्यर्थं चानवकाशत्वमौत्वस्याश्रितम् । वृद्धिलक्षणं चैकादेशमौत्वं नबाधते न हि तस्मिन् नाप्राप्ते औत्वमारभ्यते ॥ ३४ ॥

वदेः शतुर्वसुः ॥ वसोः कित्वमिति । लिडादेशस्य कित्त्वमस्तीति तदनुरोधे-



Indira Gandhi National Centre for the Arts

वक्तव्यम् । वसुग्रहणेषु लिडादेशस्यापि ग्रहणं यथा स्यात् । किङ्कारणं न स्यात् । अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं नेत्येवं लिडादेशस्य न प्राप्नोति । सानुबन्धको हि स क्रियते । किं पुनः कारणं सानुबन्धकः क्रियते । अयकारान्तानां लिटि गुणः प्रतिषेधविषय आरभ्यते स पुनः कित्करणाद् बाध्यते । आतितीर्वान् । निपुपूर्वानिति । स तर्ह्यस्यैतमर्थोऽनुबन्धः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विसकारको निर्देशः । विदेः शतुर्वसुस्समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥

समासे ऽनञ्पूर्वे क्त्वो ल्यप् ॥ ३७ ॥ ल्यबादेश उपदेशवचनम् *। ल्यबादेशे उपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायां ल्यब्भवतीति वक्तव्यम् । किम्प्रयोजनम् । अनादिष्टार्थम् । अकृतेष्वादेशेषु ल्यब् यथा स्यात् । के पुनरा-

---

नास्य कित्त्वमुच्यते । अनुबन्धान्तरेणापि तस्य सानुबन्धकत्वं संपद्यते । अननुबन्धग्रहण इति । स्थानिवद्भावादुगित्कार्यस्य सिद्धत्वाद् उकार उच्चारणार्थो नानुबन्ध इति मन्यते । सत्यपि वास्य सानुबन्धत्वे तदनुबन्धकपरिभाषया क्वसोरग्रहणप्रसङ्गः । परिभाषोपादानं त्वग्रहणोपलक्षणम् । किं पुनः कारणमिति । असंयोगाल्लिट् किदिति कित्त्वस्य सिद्धत्वाद्वसुरेव लिटो विधीयताम् । अयमिति । यथा तेरतुरित्यादौ गुणो भवति तथा वसावपि स्यादिति तद्बाधनार्थं कित्त्वं क्रियते । एतच्च प्रयोजनोपलक्षणमिति संयोगान्तार्थमपि कित्त्वमित्याहुः । तेनाजिवानित्यत्र रेभिवानिति रधेर्नुमि सिद्धं भवति । ननु संयोगान्तार्थत्वे कित्त्वस्य कथं प्रतिषेधविषय आरभ्यमाणो गुणो बाध्यः । उच्यते । ऋकारान्तेभ्यः परस्य क्वसोरौपदेशिकातिदेशिककित्त्वद्वयसामर्थ्यात् क्ङिति चेति गुणनिषेधो द्विरुपतिष्ठते । तत्र पुनरुपस्थानं प्रतिषेधविषये गुणनिषेधं विधास्यति । केचिदाहुः । छान्दसः क्वसुः ततश्छन्दस्युभयथेति सार्वधातुकत्वाद् ङित्त्वान्नलोपस्य सिद्धत्वात्संयोगान्तार्थं कित्त्वं नोपयुज्यते । द्विसकारक इति । वसुस्स् इत्यादेशो निर्दिष्टः । तत्र सकारस्य रुत्वविसर्जनीयौ कृतौ ततः सकारेण सानुबन्धकत्वं वसोः संपद्यते इति वसुप्रदेशेषूभयोरविशेषेण ग्रहणं सिध्यति ॥ ३६ ॥

समासेनञ्पूर्वे ॥ ल्यबादेश इति । अनेकपदाश्रयसमासनिमित्तो ल्यबादेशो बहिरङ्गो हित्वादयस्त्वेकपदविषयप्रकृतिप्रत्ययापेक्षा अन्तरङ्गा इति ते पूर्वं प्राप्नुवन्तीति भावः । तत्रोपदेशे समास इति विरोधात्समासो विषयत्वेनाश्रीयते । समासे विषयेऽकृत एव तस्मिन् क्त उपदेशावस्थायामेव ल्यब् भवति तस्मिन् कृते ऽनल्विधाविति स्थानिवत्त्वनिषेधाद्धित्वाद्यभावः । पूर्वोक्तविरोधपरिहाराय भाष्यकारोतिदेशं व्याचष्टे उपदेशिवद्भावो वक्तव्य इति । उपदेशावस्थायामिति । अत्राप्युपमानोपमेयसम्बन्धो द्रष्टव्यः । कृते ऽपि समासे ल्यब् भवन्नुपदेशिवद्भवति । अकृतेषु हित्वादिषु भवतीत्यर्थः । अथ वा समास इति विषयसप्तम्याश्रयमेव भाष्यमुपदेशावस्थायां ल्यब्भवतीत्युपदेशिवद्भावो वक्तव्य इत्येतत्तु वस्तुव्याख्यानम् । उपदेशावस्थायां ल्यब्भवन्नन्यैरुपदेशिभिस्तुल्यं भवतीत्यर्थः । अनादिष्टार्थमिति ।

Indira Gandhi National Centre for the Arts

देशा उपदेशिवद्वचनं प्रयोजयन्ति । हित्वदत्वात्वेत्वेत्वदीर्घत्वशूडिटः । हित्वम्, हित्वा । प्रधाय । हित्वम् । दत्वम्, दत्वा । प्रदाय । दत्वम् । आत्वम्, खात्वा-प्रखन्य । आत्वम् । इत्वम्, स्थित्वा । प्रस्थाय । इत्वम् । ईत्वम्, पीत्वा । प्र-पाय । ईत्वम् । दीर्घत्वम्, शान्त्वा । प्रशम्य । दीर्घत्वम् । शत्वम्, पृष्ट्वा । आ-पृच्छ्य । शत्वम् । ऊठ्, द्यूत्वा । प्रदीव्य । ऊठ् । इट् । देवित्वा । प्रदीव्य इट् । किं पुनः कारणमादेशास्त्वावद्भवन्ति न पुनर्ल्यप् । न परत्वाल्ल्यपा भवितव्यम् । सन्ति चैवात्र केचित्परे आदेशाः । अपि च बहिरङ्गलक्षणत्वात् । बहिरङ्गा ल्यप् । अन्तरङ्गा आदेशाः । असिद्धं बहिरङ्गमन्तरङ्गे । स तर्ह्युपदेशिव-द्भावो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधत इति । यदयमदो जग्धिर्ल्यप्ति किति ति किती सिद्धे ल्यब्ग्रहणं करोति । स्नात्वाकालकादिषु प्रतिषेधः * । स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वासुहितक इति । तदन्तनिर्देशात्सिद्धम् * । तदन्तनिर्देशात्सिद्धमेतत् । क्त्वान्तस्य ल्यपा भवित-

---

आदेशा आदिष्टं तस्याभावानादिष्टमित्यव्ययीभावः । प्रखन्येति । ये विभाषेति वि-कल्पेनात्वमिष्यते । जनसनखनां सञ्झलोरित्यनेन तु ल्यबादेशात्पूर्वं नित्यं प्राप्नोति । प्रदीव्येति । पूर्वमिटि कृते निर्दिश्यमानस्यादेशा भवन्तीति केवलस्य क्त्वो ल्यपि सति इटः श्रवणं प्राप्नोति । अथापि कथं चित्संइट्कस्य ल्यप् स्यात्तथापि स्था-निवद्भावात् क्त्वासेडिति किस्वप्रतिषेधाद् गुणः प्रसज्येत दीर्घत्वस्यासिद्धत्वात् । परत्वादिति । इष्टत्वादित्यर्थः । इतरस्त्विष्टानिष्टत्वविभागो न ज्ञायते इति व्यव-शब्द एवानेन परशब्दः प्रयुक्त इति मत्वाह सन्ति चेति । बहिरङ्गलक्षणत्वादिति । समासापेक्षया बहिरङ्गं शास्त्रमस्येति समासः । अथ वा बहिरङ्गः समासो लक्षणं निमित्तमस्येत्यर्थः । यदयमिति । ति कितीत्येव जग्धिभावस्य ल्यबादेशात्प्रागेव सिद्धत्वात् । ल्यब्ग्रहणं यथोक्तमर्थं ज्ञापयति । स्थानिवत्सूत्रे युष्मदस्मदोरनादेश इत्यनादेशग्रहणं तत्स्थानापत्त्या तद्धर्मलाभस्य स्वरूपविधिना निरस्तस्य ज्ञापक-मुक्तम् । ल्यब्ग्रहणं त्वलाश्रयेषु कार्येषु तद्धर्मलाभाभावस्य । यं यमर्थमन्तरेण य-स्यानुपपत्तिस्तस्य सर्वस्य ज्ञापकं तद्भवतीत्यनेकोऽप्यर्थो ल्यब्ग्रहणे ज्ञाप्यत इति विरोधाभावः । स्नात्वाकालकादिष्विति । मयूरव्यंसकादिषु समासप्रकरणात्समा-सार्थं एवैषां पाठः । तत्र समासे नञ् पूर्वे यो व्यवस्थितः क्त्वाप्रत्ययस्तस्य ल्याब्वि-धीयमानोऽत्रापि प्राप्नोति । तदन्तनिर्देशादिति । क्त्वान्तः समासः इह निर्दिश्यत-इत्यर्थः । समासे इति । निर्धारणे सप्तमी सामान्यापेक्षं चैकवचनम् । अथ वा छा-न्दसं बहुवचनस्य स्थाने निर्धारणञ्च समानजातीयस्य भवतीति क्त्वान्तः समासो गृह्यते निर्धार्यमाणस्य क्त्वाग्रहणेन विशेषणात्तदन्तविधौ सत्ययमर्थो भवति समा-सेष्वनञ्पूर्वेषु क्त्वान्तस्य समासस्य ल्यप् भवति स च निर्दिश्यमानस्यादेशा आ

व्यम् । न चैतत् । क्त्वान्तम् । समासनिपातनाद्वा । अथ वाक्यमत्र समासार्थं निपातनं कर्तव्यम् । तेनैव यत्नेन ल्यबपि न भविष्यति । अनञो वा परस्य । अथ वा अनञः परस्य ल्यपा भवितव्यम् । न चात्रानञं पश्यामः । ननु च धातुरेवानञ् । न धातोः परस्य भवितव्यम् । किं कारणम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्तमिव युक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञास्यते । कुत एतत् । तथा ह्यर्थो गम्यते । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यनञिति नञ् प्रतिषेधादन्यस्मादनञः नञ्सदृशात्कार्यं विज्ञास्यते । किञ्चान्यदनञ् नञ्सदृशम् । पदमित्याह । अथ वा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति । एवं धातुरपि क्त्वाग्रहणेन ग्राहिष्यते । ननु चेयमपि परिभाषास्ति । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति । सापीहोपतिष्ठते । तत्र को दोषः । इह न स्यात् । प्रकृत्य । प्रहृत्य । इह तर्हि स्यात् । परमकृत्वा । न वा अत्रेष्यते । अनिष्टं च प्राप्नोति इष्टं च न सिध्यति । गतिकारकपूर्वस्यैव इष्यते । कुतो नु खल्वेतत् ।

---

यन्तीति क्त एव भवति । समासनिपातनाद्वेति। समुदायानां साधुत्वमभ्यनुज्ञायते- प्राकरणिकाप्राकरणिककार्यभावाभावविधानद्वारेणेत्यर्थः । येषु चात्र स्नात्वाकालकादिषूत्तरपदानुपात्तक्रियापेक्षः क्त्वाप्रत्ययः तेषां सापेक्षत्वेपि निपातनात्समासः । अनञो वा परस्येति । अनञ् चासौ पूर्वश्चेति समासो निपातनात्पूर्वशब्दस्य परनिपातः । विशेष्यत्वेन विवक्षितत्वाद्वा। अनञिति वा लुप्तसप्तमीकं पृथक्पदम् । सत्सप्तमी चेयम् । अनञि पूर्वे सति क्त्वो ल्यप् भवति । अर्थादनञः परस्येत्यर्थोऽवतिष्ठते । तदन्तविधिश्चात्र नाश्रीयते क्त्वाप्रत्ययस्य प्राधान्येन प्रक्रमाद् विशेषणत्वाभावाद्येन विधिस्तदन्तस्येति । प्रत्ययग्रहणपरिभाषाश्रयस्तु तदन्तविधिः परस्ताद्वक्ष्यते । येन नाव्यवधानमिति च धातुना व्यवधानमाश्रीयते । ननु चेति । असत्त्वभूतार्थवाचित्वादिना धर्मेण धातुरपि नञ्सदृशो भवति। न धातोः परस्येति । पदत्वनिबन्धनं सादृश्यमाश्रीयते न तु धर्मान्तरनिबन्धनम् । नास्त्यत्र प्रमाणमित्याशङ्क्याह अथ वेति । क्त्वाग्रहणेन धातुप्रत्ययसमुदायस्य परिग्रहात्तदवयवत्वाद्धातोः स्वावयवेन पौर्वापर्यासम्भवाद्धातुरनञ्ग्रहणेन न गृह्यते । प्रकृत्येति। गतेः क्त्वान्ते समुदाये ऽनुप्रवेशात्पौर्वापर्याभावात्तद्व्यतिरिक्तनञ्सदृशशब्दान्तराभावात् ल्यपोप्राप्तिः । परमकृत्वेति । परमशब्दो न गतिर्न च कारकमिति क्त्वान्ते अनन्तर्भूतः पूर्व इति ततः परस्य क्त्वान्तस्य ल्यप्प्रसङ्गः । गतिकारकपूर्वस्यापीत्यपिशब्दात्केवलस्यापि कृत्वेत्यादेः क्त्वान्तस्य ग्रहणात्। आचार्य आह न वा अत्रेष्यत इति । तस्मात् कृद्ग्रहणपरिभाषात्र नाश्रीयते । चोदक आह अनिष्टं चेति । आचार्य आह गतिकारकपूर्वस्यैवेष्यत इति । प्रकृत्य पार्श्वतः कृत्वेत्यादौ ल्यबादेश इष्यते । कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यति इति नासौ परिभाषाश्रीयते । चोदक आह कुतो

Indira Gandhi National Centre for the Arts

द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवति । कृद्ग्रहणे गतिकारकपूर्वस्येति । इयमिह परिभाषा भवति प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति । इयं न भवति । कृद्ग्रहणे गतिकारकपूर्वस्यापीति । आचार्यप्रवृत्तिर्ज्ञापयति इयमिह परिभाषा भवति प्रत्ययग्रहण इति, इयं न भवति कृद्ग्रहण इति । यदयमनञिति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । अयं हि नञ् न गतिर्न च कारकम् । तत्र कः प्रसङ्गो यन्नञ्पूर्वस्य स्यात् । पश्यति त्वाचार्य इयमिह परिभाषा भवति प्रत्ययग्रहण इति, इयं न भवति कृद्ग्रहण इति । ततोऽनञिति प्रतिषेधं शास्ति । किं नञः प्रतिषेधेन न गतिर्न च कारकम् । यावता नञ्पूर्वे तु ल्यबभावो न भविष्यति । प्रतिषेधात्तु जानीमस्तत्पूर्वं नेह गृह्यते । प्रत्ययग्रहणे यावत्तावद्भवितुमर्हति ॥

---

न्विति । प्रत्ययग्रहणपरिभाषाया अवकाशः उपगोरपत्यमौपगव इत्यत्र तद्धितान्तस्य प्रातिपदिकत्वात्सुब्लुक् भवति । कृद्ग्रहणपरिभाषाया अवकाशः व्यावलेखी व्याघ्रचर्चीति णचः स्त्रियामञिति गतिपूर्वस्य णजन्तत्वादञि सति वृद्धिस्वरौ भवतः । अत्र हि प्रत्ययग्रहणपरिभाषायाः स्त्रीप्रत्यये चानुपसर्जनेनेति प्रतिषेधात्तदुपस्थानाभावः । एवं सावकाशयोः परिभाषयोर्भिन्नफलयोर्विरोधात्पर्यायोप्रतिपत्तिर्वा प्राप्नोति । प्रत्ययग्रहणपरिभाषायामाश्रीयमाणायां प्रकृत्येति गतेः क्त्वान्ते ऽनन्तर्भावात्पौर्वापर्योपपत्तौ ल्यप् सिद्ध्यति न तु कृद्ग्रहणपरिभाषाश्रयेण इति फलभेदः । कार्यकालं संज्ञापरिभाषमित्यत्र दर्शने समानदेशत्वात्परिभाषयोः परत्वेनापि व्यवस्था नास्ति । साङ्कूटिनत्वेवमव्यवस्थाप्रसङ्गाद् यथोद्देशपक्ष आश्रयितव्यः । तत्र हि परत्वेन व्यवस्थासिद्धिः । प्रत्ययग्रहणपरिभाषाङ्गसंज्ञासूत्रे योगविभागेन व्यवस्थापिता । कृद्ग्रहणपरिभाषा तु गतिरनन्तर इत्यत्र अनन्तरग्रहणेन ज्ञापनात्परा भवति । यदयमिति । कथं पुनरेतज्ज्ञापकं यावता सत्यामपि कृद्ग्रहणपरिभाषायामपिशब्दात्केवलस्यापि क्त्वान्तस्य ग्रहणादकृत्वेत्यादौ नञोगतित्वादकारकत्वाच्च क्त्वान्ते ऽनन्तर्भावादसत्यनञ्ग्रहणे ल्यप्प्रसङ्गः । अप्रकृत्येत्यादौ च प्रतिषेधार्थमनञ्पूर्वस्य ग्रहणं स्यात् । उच्यते । अपिग्रहणेन प्रत्ययग्रहणपरिभाषा समुच्चीयते न त्वन्यपूर्वम् । तत्र समास इति वचनात् केवलस्य कृत्वादेर्ग्रहणाभावादपिशब्दसमुच्चेतव्यस्याभावाद् गतिकारकपूर्वस्यैव समासस्य ग्रहणं भविष्यति इति किमनञ्पूर्व इत्यनेन तत् क्रियमाणं कृद्ग्रहणपरिभाषाया अनुपस्थानं ज्ञापयति । तदुपस्थाने तु तूष्णींभूय नानाभूय द्विधाभूयेत्यादौ ल्यन्न स्यात् । तदेवं कृद्ग्रहणपरिभाषानुपस्थाने नञ्सदृशादव्ययात्पदात्प्रत्यासत्तिन्यायात्समासावयवात्परस्य धात्वादेः क्त्वान्तस्य समासे क्त्वो ल्यब्विधीयमानः स्नात्वाकालकः परमकृत्वेत्यादौ न भवति। परमकृत्वेति सन्महदिति समासः। परमत्वस्य क्रियाविशेषणत्वात्सामानाधिकरण्यात्। तत्पूर्वमिति । गतिकारकपूर्वमित्यर्थः । प्रत्ययग्रहणइति प्रत्ययग्रहणपरिभाषया यावद् ग्राह्यं तावद्गृह्यते ॥

Indira Gandhi National Centre for the Arts

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ३९ ॥ सुपां च सुपो भवन्तीति वक्तव्यम् * । युक्ता मातासीद्धुरि दक्षिणायाः । दक्षिणाया मिति प्राप्ते । तिङां च तिङो भवन्तीति वक्तव्यम् * । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । लुकि किमुदाहरणम् । आर्द्रेचर्मन् । लोहिते चर्मन् । नैतदस्ति । पूर्वसवर्णेनाप्येतत्सिद्धम् । इदं तर्हि । यत्सुवीयस आवसन्नुत सप्त ऋषयः सप्तसाकम् । ननु चैतदपि पूर्वसवर्णेनैव सिद्धम् । न सिध्यति । यद्यत्र पूर्वसवर्णः स्यात् । त्यदाद्यत्वं प्रसज्येत । इदं चापि उदाहरणम् । आर्द्रे चर्मन् । लोहिते चर्मन् । ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धम् । न सिध्यति । यद्यत्र पूर्वसवर्णः स्याद् आन्तर्यतो दकारः प्रसज्येत । अस्तु । संयोगान्तलोपेन सिद्धम् । इयाडियाजीकाराणामुपसंख्यानं कर्तव्यम् * । दार्विया परिज्मन् । इया । डियाच्, सुक्षेत्रिया । सुगात्रिया । ईकार, दृतिं न शुष्कं सरसी शयानम् । आङ्याजयारां चोपसंख्यानं कर्तव्यम् * । आङ् । प्रबाहवा । अयाच् । स्वप्नया वाचसेचनम् । अयाच् । अयार् । सनः सिन्धुमिव नावया ॥

---

सुपां सुलुक्पूर्वसवर्ण ॥ सुशब्दे आदेश उच्यमाने ऽन्ये सुपो न प्राप्नुवन्तीत्याह सुपां चेति । एतच्च सर्वं व्यत्ययो बहुलमिति व्यत्ययेन सिद्ध्यति । पूर्वसवर्णेनापीति । चर्मन्इ इति स्थिते इकारस्य पूर्वसवर्णो नकारः । तस्मिन् पूर्वस्य नकारस्य स्वादिष्विति पदसंज्ञायां सत्यां लोपः । एवं च नङिसम्बुद्ध्योरित्यत्र ङिग्रहणमपि न कर्तव्यं भवति । प्रातिपदिकान्तत्वाभावाद्विभक्तिनकारस्य नलोपाप्रसङ्गात्। पूर्वस्य च नकारस्य लोपस्येष्टत्वात् । यदिति । यच्छब्दात्परस्य सुपो लुक् । प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाभावः । येष्विति प्राप्ते । त्यदाद्यत्वमिति । सुशब्दस्य पूर्वसवर्णो भवन्नलोन्त्यस्येत्युकारस्य दकारः प्राप्नोति ततस्तदाद्यत्वे बहुवचने झल्येदित्येत्वे स्कोः संयोगाद्योरिति सकारलोपे च यदिति स्यात् । अथाप्येकवचनस्य स्थाने पूर्वसवर्णो दकारः क्रियते तथापि स्थानिवद्भावात् स्मिन्भावः प्राप्नोति । आन्तर्यत इति । निरनुनासिकस्येकारस्य सदृशो दकारः । संयोगान्तलोपेनेति । न ङिसम्बुद्ध्योरिति नलोपप्रतिषेधात्संयोगान्तलोपः । अन्यथा नलोपे कर्तव्ये संयोगान्तलोपोऽसिद्धः स्यात् । एवं च नलोपप्रतिषेधे ङिद्ग्रहणं कर्तव्यमेवेति प्रक्रियालाघवाय चर्मन्नित्यत्र लुगेव विधेय इत्याहुः । दार्वियेति । दारुशब्दादियादेशः । सुक्षेत्रियेति । सुक्षेत्रेणेति प्राप्ते । सरसी इति । सरः शब्दात्परस्य ङिशब्दस्येकारः । प्रबाहवेति । प्रबाहुशब्दात्परस्य टाप्रत्ययस्याङादेशः । घेर्ङितीति गुणः । ननु ङित्त्वे विद्यात् वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादावित्युक्तम् । ततश्च गुणो न प्राप्नोति । ङित्करणसामर्थ्याद्भविष्यतीत्यदोषः । अथ वा ङितीति बहुव्रीहिराश्रीयते । तत्र परिहारान्तरमाश्रयणीयम् । वर्णश्चायन्तेन ङित्त्वेन दोषो निर्देशोयं पूर्वसूत्रेण वा स्यादिति । स्वप्नयेति । अयाचोऽकारोच्चारणं सुपि चेति दीर्घनिवृत्त्यर्थम् । नावयेति । उपोत्तमं रितीति मध्योदात्तं पदं भवति ॥ ३९ ॥

Indira Gandhi National Centre for the Arts

अमो मश् ॥ ४० ॥ किमर्थः शकारः । शित्सर्वस्येति सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारे ऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत । अत उत्तरं पठति । अमो मश् न मकारस्य । मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वा तत्रान्तरेण शकारं सर्वादेशो भविष्यति । वचनादन्यबाधनम् ॥ अस्त्यन्यन्मकारस्य मकारवचने प्रयोजनम् । ये ऽन्ये मकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम् । तद्यथा । मो राजि समः क्वाविति । मकारस्य मकारवचनसामर्थ्यादनुस्वारादयो बाध्यन्ते । एवं तर्हि द्विमकारको निर्देशः करिष्यते । द्विमकार ईडपृक्ते । यदि द्विमकारकः । अपृक्ताश्रय ईड् न प्राप्नोति । वर्धी वृत्रं मरुत इन्द्रियेण । यकारादौ न दुष्यति ॥ किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकारः । अमो मश् न मकारस्य वचनादन्यबाधनम् । द्विमकार ईडपृक्ते यकारादौ न दुष्यति ॥ १ ॥

आज्जसेरसुक् ॥ ५० ॥ इह, ये पूर्वासोय उपरासः । आज्जसेरसुगिति असुकि कृते जसोग्रहणेन ग्रहणाद् शीभावः प्राप्नोति । एवं तर्हि जसि पूर्वान्तः करिष्यते । यदि पूर्वान्तः क्रियते । का रूपसिद्धिः । ब्राह्मणासः पितरः सोम्यासः । सवर्णदीर्घत्वेन सिद्धम् । न सिद्ध्यति । अतो गुण इति पररूपं प्राप्नोति । अकारोच्चारणसामर्थ्याद्भविष्यति । न भविष्यति । यदि तर्हि प्राप्नुवन् विधिरुच्चारणसामर्थ्याद् बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । नैष दोषः । यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । पररूपं च प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव । अथ वा असुट् करिष्यते । एवमपि ये पूर्वासोय उपरास इति असुटि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति । नैष दोषः । निर्दिश्यमानस्यादेशा भवन्तीत्येवमस्य न भवि-

---

अमो मश् ॥ अमो मश् न मकारस्येति । मकारस्य मकारः प्रयोजनाभावान्न भविष्यति इति शकारो न वक्तव्य इत्यर्थः । वचनादिति । वर्धी वृत्रमित्यादौ मकारस्यानुस्वारनिवृत्त्यर्थो मकारः स्यादित्यर्थः। द्विमकारक इति । अमाम्मिति करिष्यते भिन्नजातीयवर्णद्वयोच्चारणे प्रयत्नस्य गौरवं भवति समानजातीयवर्णद्वये तु लाघवं तत्रैकस्य मकारस्य संयोगान्तलोपः करिष्यते । ईण् न प्राप्नोतीति । ईटि कर्तव्ये संयोगान्तलोपस्यासिद्धत्वादपृक्तत्वाभावात् । यकारादाविति । अमोय्मिति सूत्रं कर्तव्यं तत्र यकारस्य लुप्तनिर्दिष्टत्वादनेकाल्त्वात्सर्वादेशोयं मो भविष्यतीति प्रत्याख्यातं शित्वम् ॥ ४० ॥

आज्जसेरसुक् ॥ जसोग्रहणेनेति । तद्भक्तस्तद्ग्रहणेन गृह्यत इति सागमकस्य शीभावप्रसङ्गः । पूर्वान्त इति । अस्य जस्य सुगिति सूत्रन्यासेन पूर्वान्ते सुक्यका-

Indira Gandhi National Centre for the Arts

ष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । असुटा व्यवहितत्वात् । सिद्ध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं ये पूर्वासो य उपरासः । असुकि कृते जसोग्रहणेन ग्रहणाच्छीभावः प्राप्नोति । नैष दोषः । इदमिह सम्प्रधार्यं शीभावः क्रियतामसुगिति । किमत्र कर्तव्यम् । परत्वादसुक् । अथेदानीमसुकि कृते पुनः प्रसङ्गविज्ञानाच्छीभावः कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

**अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ५१ ॥** अश्ववृषयोर्मैथुनेच्छायाम् * । अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् । अश्वस्यति वडवा । वृषस्यति गौः । मैथुनेच्छायामिति किमर्थम् । अश्वीयति वृषीयति । क्षीरलवणयोर्लालसायाम् * । क्षीरलवणयोर्लालसायामिति वक्तव्यम् । क्षीरस्यति माणवकः । लवणस्यत्युष्ट्र इति । अपर आह । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् । अपर आह । सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ॥

**आमि सर्वनाम्नः सुट् ॥ ५२ ॥ त्रेस्त्रयः ॥ ५३ ॥ ह्रस्वनद्यापो नुट् ॥ ५४ ॥** इमे बहव आम्शब्दाः पठ्यन्ते । कास्प्रत्ययादाममन्त्रे लिटि । ङ्स् ओस् आम् । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे, ङेराम्नद्याम्नीभ्य इति । कस्येदं ग्रहणम् । षष्ठीबहुवचनस्य ग्रहणम् । अथास्य कस्मान्न भवति । कास्प्रत्ययादाममन्त्रे लिटीति । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति स तर्ह्यस्यैवमर्थोनुबन्धः कर्तव्यः । इहास्य ग्रहणं मा भूदिति । ननु चावश्यं मकारस्येत्संज्ञा-

———————

रान्तात्परो जस् न भवतीति शीभावाप्रसङ्गः । अथ वा ऽसुडिति । असुड्यकारोच्चारणं दध्यस्यतीत्याद्यर्थमिति पररूपं स्यादिति पक्षान्तरोपन्यासः । असुटि प्रथमयोः पूर्वसवर्ण इति दीर्घः सिद्ध्यति । परत्वादिति । असुकोवकाशः ब्राह्मणास इति । शीभावस्य भाषाविषयोवकाशः ॥ ५० ॥

अश्वक्षीर ॥ अश्वस्यतीति । मैथुनेच्छाप्रतिपादनपरत्वाद्योगस्याश्ववृषोपादानमतन्त्रमिति मनुष्यादावपि कवयः प्रयुञ्जते । लालसा अतिशयेनाभ्यवजिहीर्षा । यस्तु लवणमैश्वर्यार्थमिच्छति तत्र लवणीयतीत्येव भवति ॥ ५१ ॥

आमि सर्वनाम्नः ॥ कस्येदमिति । किमिदं सर्वेषामामां ग्रहणमपि कस्य चिदेवेति प्रश्नः । ननु च सर्वनाम्न इत्युपादानाद् घादामो लिट्यामश्च ग्रहणशङ्कैव न युक्ता । उच्यते । इह तयोरसम्भवेपि ह्रस्वनद्यापो नुडित्यत्र ह्रस्वात्परयोः सम्भवादिह विचारः क्रियते । तत्र हि सामान्यग्रहणे सति यथासम्भवं प्रकरणे कार्ये प्रतिपत्तिः । अथ वा पूर्वोपात्तसदृशशब्दान्तरानुमानपक्षे उत्तरसूत्रे तयोः सम्भवादिह विचारः । ननूत्तरसूत्रे ऽपि यस्यैवाम्नद्वीभ्यां परस्य सम्भवः स एव ह्रस्वादपि

Indira Gandhi National Centre for the Arts

परित्राणार्थोऽनुबन्धः कर्तव्यः। नार्थ इत्संज्ञापरित्राणार्थेन । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति । इदमस्तीत्कार्यं मिदचोऽन्त्यात्पर इति । अचामन्त्यात्परो यथा स्यात्। प्रत्ययान्तादयं विधीयते । तत्र नास्ति विशेषः । मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा परत्वे । यस्तर्हि न प्रत्ययान्तादिजादेश्च गुरुमतोऽनृच्छ इति । अत्रापि आस्कासोराम्वचनं ज्ञापकं नायमन्त्यात्परो भवतीति । कथं कृत्वा ज्ञापकम् । न ह्यस्ति विशेषः । आम्यचामन्त्यात्परे सत्यसति वा । अयमस्ति विशेषोऽसति आमि द्विर्वचनेन भवितव्यम् । सति न भवितव्यम् । सत्यपि भवितव्यम् । कथम् । आमस्तन्मध्यपतितत्वाद्धातुग्रहणेन ग्रहणात् । तदेतत्कासास्योराम्वचनं ज्ञापकमेव नायमचामन्त्यात्परो भवतीति । अथापि कथं चिदित्कार्यं स्यात् । एवमपि न दोषः । क्रियते न्यास एव । आममन्त्रे इति । यद्येवमामामन्त्र इति प्राप्नोति । शकन्धुन्यायेन निर्देशः । अथ वाऽस्त्वस्य ग्रहणं को दोषः । इह कारयाञ्चकार । हारयाञ्चकार, चिकीर्षाञ्चकार । जिहीर्षाञ्चकार । ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । लोपायादेशयोः कृतयोर्न भविष्यति । इदमिह सम्प्रधार्यं लोपायादेशौ क्रियेतां नुडिति । किमत्र कर्तव्यम् । परत्वान्नुट् । नित्यौ लोपायादेशौ । कृतेपि नुटि प्राप्नुतः अकृतेपि । तत्र नित्यत्वाल्लोपायादेशयोः कृतयोर्विहतनिमित्तत्वान्नुट् न भविष्यति । अथास्य कस्मान्न भवति । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्ष इति । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति। स तर्ह्येवमर्थोऽनुबन्धः कर्तव्यः। ननु चावश्यमुगित्कार्यार्थोऽनुबन्धः कर्तव्यः । नार्थ उगित्कार्यार्थेनानुबन्धेन । लिङ्गविभक्तिप्रकरणे सर्वमुगित्कार्यम् । न चामो लिङ्गविभक्ती स्तः । अव्ययमेषः ।

---

परस्तत्साहचर्याद् ग्रहीष्यते । नैतदस्ति । व्याप्तिन्यायाश्रयेण सर्वस्य ग्रहणप्रसङ्गात्। प्रत्ययान्तादिति । ते चाजन्ताः । ननु हलन्तेभ्य आचारक्विबन्तेभ्य आमस्त्येव । नैतदस्ति । एकीयमतमेतत् । तत्रापि हलन्तेभ्योऽनभिधानादाचारक्विबभावः । यस्तर्हीति । ईहेरूहेश्च मध्ये आमि कृते यणादेशप्रसङ्गः । आस्कासोरिति । अन्त्यादचः परे आमि सवर्णदीर्घत्वे सति विशेषाभावः । सति न भवितव्यमिति । रूपान्तराद्धातुत्वाभावात् । अपि इति । अकृतएकादेशे इदमुच्यते कृते त्वेकादेशे रूपान्तराभावः। अथापीति । प्रतिधातुभेदादामो यत्रेत्कार्यं न सम्भवति तत्र मा भूदित्संज्ञा । आसिकासिचकासिषु प्रत्ययान्तेषु च धातुषु । ईहादौ त्वित्कार्यसम्भवात् स्यादेवेत्संज्ञा । अथ वा आसादिषु विधानसामर्थ्यात्सवर्णदीर्घत्वं न स्यादित्संज्ञा तु स्यादेव । व्यञ्जनान्तेषु चाचारक्विबन्तेषु इत्कार्यसम्भवादित्संज्ञा प्राप्नोति । नहि व्यञ्जनान्तेभ्य आचारे क्विब्न भवतीत्यत्र किञ्चित्प्रमाणमस्ति । कारयाञ्चकारेति । नुटि कृतेऽयादेशप्रसङ्गः । अव्ययमेष इति । अव्ययत्वात् स्त्रीत्वेन योगाभावादुगितश्चेति ङीब् नास्ति । तदभावादुगितश्चेति घादिषु ह्रस्वविकल्पोपि नास्ति । विभक्तेर्लुकि प्र-



Indira Gandhi National Centre for the Arts

मकारस्य तर्हीत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति । इदमस्तीत्कार्यं मिदचोऽन्त्यात्पर इति अचामन्त्यात्परो यथा स्यात् । नैतदस्ति । घान्तादयं विधीयते । तत्र नास्ति विशेषः । मिदचोऽन्त्यात्पर इति परत्वे प्रत्ययः पर इति वा परत्वे । अथापि कथं चिदित्कार्यं स्यादेवमपि न दोषः । क्रियते न्यास एव । अथ वाऽस्त्वस्य ग्रहणं को दोषः । इह पचतितराम् । जल्पतितराम् । ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । लोपे कृते न भविष्यति । इदमिह सम्प्रधार्यं लोपः क्रियतां नुडिति । किमत्र कर्तव्यम् । परत्वान्नुट् । एवं तर्हि ह्रस्वनद्यापो नुडित्यत्र यस्येति लोपोनुवर्तिष्यते । अथास्य कस्मान्न भवति । ङेराम्नद्याम्नीभ्य इति । किञ्च स्यात् । कुमार्याम् । किशोर्याम् । खट्वायाम् । मालायाम् । तस्याम् । यस्यामिति ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । आड्याट्स्याटो ऽत्र बाधका भविष्यन्ति । इदमिह सम्प्रधार्यम् । आड्याट्स्याटः क्रियन्तां नुडिति किमत्र कर्तव्यम् । परत्वादाड्याट्स्याटः । अथेदानीमाड्याट्स्याट्सु कृतेषु पुनः प्रसङ्गान्नुट् कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवेति ॥

श्रीग्रामण्योश्छन्दसि ॥ ५६ ॥ अयं योगः शक्योऽवक्तुम् । कथम् । श्रीणामुदारो धरुणी रयीणाम् । अपि तत्र सूतग्रामणीनाम् । इह तावत् श्रीणामुदारो धरुणी रयीणाम् । विभाषा आमि नदीसंज्ञा सा छन्दसि व्यवस्थितविभाषा भविष्यति । आपि तत्र सूतग्रामणीनामिति । सूताश्च ग्रामण्यश्च सूतग्रामणि तत्र ह्रस्वनद्यापो नुडित्येव सिद्धम् ॥ ॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

---

स्ययलक्षणप्रतिषेधान्नुमागम उगित्कार्यं नास्ति । इत्संज्ञापरित्राणार्थं इति । इत्संज्ञायाः परित्राणमिति साधनं कृतेति पञ्चमीसमासः । समुदायविशेषणं च मकार इति सापेक्षत्वात्समासाभावो न चोदनीयः । परित्राणं वा प्रधानं मकारमपेक्षते । भवति च प्रधानस्य सापेक्षस्यापि समासः । अथापीति । मित्वमेव ज्ञापकं स्यादन्यतोप्ययं भवतीति । ततश्च स्यादेवेत्संज्ञा । एवं तर्हीति । उभयोरनित्ययोः परत्वान्नुटि प्राप्ते ह्रस्वनद्यापोनुडित्यत्र यस्य लोपस्तद्धितइति चानुवर्तते तेन तद्धित आमि ह्रस्वस्य लोपो भवति पचतितरामिति । अन्यस्य चामो नुट् भवति वृक्षाणामिति ॥५२॥५३॥५४॥

श्रीग्रामण्योः ॥ विभाषेति । वामीत्यनेन । तत्र इष्टानुविधिश्छन्दसीति श्रीणामित्येव छन्दसि भविष्यति न तु श्रियामिति । सूताश्च ग्रामण्यश्च सूतग्रामणीति । समाहारद्वन्द्वं कृत्वैकशेषः क्रियतइति बोद्धव्यं न त्वेकशेषे कृते समाहारद्वन्द्वः क्रियते । एवं हि बहुवचनं स्यात् । भाष्ये त्वत्रोभयं कार्यमित्येतावत्प्रदर्शितम् । क्रमस्तु स्वयमभ्यूह्य इष्टस्यार्थस्य सिद्धये ॥ ५६ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

Indira Gandhi National Centre for the Arts

इदितो नुम् धातोः॥ ५८॥ अथ धातोरिति किमर्थम्। अभैत्सीत्। अच्छैत्सीत्। नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम्॥*। नुम्विधावुपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायां नुम् भवतीति वक्तव्यम्। किम्प्रयोजनम्। प्रत्ययविध्यर्थम्। उपदेशावस्थायां नुमि कृते इष्टः प्रत्ययविधिर्यथा स्यात्। कुण्डा हुण्डेति। इतरथा ह्यनकारे प्रत्ययः*। अक्रियमाणे हि उपदेशिवद्भावे ऽनकारे यः प्रत्ययः प्राप्नोति स तावत्स्यात् तस्मिन्नवस्थिते नुम्। तत्र को दोषः। तत्रायथेष्टप्रसङ्गः*। तत्रायथेष्टं प्रसज्येत। अनिष्टे प्रत्यये ऽवस्थिते नुम्। अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत। धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम्*। धातुग्रहणसामर्थ्याद्वा तदुपदेशे धातूपदेशे नुम् भविष्यति। ननु च अन्यद्धातुग्रहणस्य प्रयोजनमुक्तम्। किं तत्। अभैत्सीत्। अच्छैत्सीत्। नैतदस्ति प्रयोजनम्। प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात्। यच्चात्रेकारेण क्रियते अकारेणापि तच्छक्यं कर्तुम्॥

---

इदितो नुम् धातोः॥ धातोरिति किमर्थमिति। किमधातुनिवृत्त्यर्थं धातुग्रहणमथ धातुसंज्ञाप्रवृत्त्यवस्थायामेव प्राक् प्रत्ययोत्पत्तेर्नुम्विधानार्थमिति प्रश्नः। आचार्यदेशीयस्त्वधातुनिवृत्त्यर्थं धातुग्रहणं मत्वाह अभैत्सीदिति। सिच इदितो नुम् न भवति। उपदेशिवद्भाव इति। यथोन्द्यादीनामुपदेशावस्थायां नकारः प्रत्ययविधिकाले सन्निहितस्तथा नुमपीत्यर्थः। किम्प्रयोजनमिति। नन्दिता नन्दक इत्यादि प्रत्यये परतो नुमि क्रियमाणे ऽपि सिद्ध्यतीति मत्वा प्रश्नः। प्रत्ययविध्यर्थमिति। इष्टप्रत्ययविध्यर्थमित्यर्थः। अनकार इति। असति नकारे यः प्रत्ययः प्राप्नोति स स्यादित्यर्थः। साम्प्रतिकेषु शिक्षादिषु गुरुमत्सु सम्भवत्सु भाविगुरुमत्ताश्रयेण प्रत्ययविधानस्यायुक्तत्वात्। तत्र को दोष इति। नुमि कृते ऽपवादः प्रवर्तमान उत्सर्गं निवर्तयिष्यतीति भावः। तत्रायथेष्टप्रसङ्ग इति। उत्पन्न उत्सर्गे नुमि कृते सत्यामपि गुरुसंज्ञायामुत्सर्गेणैव प्रत्ययार्थस्य प्रत्ययोत्पत्तिनिमित्तस्याभिधानान्निमित्तवैकल्यादपवादाप्रवृत्तावुत्सर्गस्यैव श्रवणप्रसङ्गः। धातुग्रहणेति। अधातोरिदितोऽसम्भवाद्धातुग्रहणं न भवतीति धातुसंज्ञा प्रवृत्त्यवस्थोपलक्षणार्थं विज्ञायते तेन सत्यप्यङ्गाधिकारो भाव्यङ्गत्वाश्रयः पूर्वमेव नुम् भवति ततः प्रत्यय इत्यर्थः सम्पद्यते। प्रयोजनं नामेति। नियमेनावश्यम्भावेन यदन्यथा साधयितुमशक्यं तत्प्रयोजनम्। सिचश्च नुमागमो धातुग्रहणमन्तरेणापि शक्यो निराकर्तुमित्यर्थः। यच्चात्रेति। सकारस्योच्चारणार्थं इकारः क्रियते इत्यकारेणापि सजित्येवं सकारः शक्य उच्चारयितुम्। तदेतदुक्तं भवति। निरनुनासिक उच्चारणार्थः सिच इकार इतीदित्वाभावान्नुमभावः। अमंस्तेत्यादौ हनः सिजिति नलोपार्थात् कित्त्वविधानाज्ज्ञापकादसत्यपीदित्वेन लोपाप्रसङ्गः। नन्वन्यत्कित्त्वविधानस्य प्रयोजनमस्ति सिजाश्रयो नलोपो यथा स्यात्सार्वधातुकाश्रयो मा भूत्। सिजाश्रयो हि नलोपो

शे मुचादीनाम् ॥ ५९ ॥ शे तृम्पादिनाम् * । शे तृम्पादीनामुपसंख्यानं कर्तव्यम् । तृम्पति । तृम्फति । किमर्थमिदम् । न नुमनुषक्ता एवैते पठ्यन्ते । लुप्तनकारत्वात् । लुप्यते ऽत्र नकारः । अनिदितां हल उपधायाः क्ङितीति । यदि पुनरिमे इदितः पठ्येरन् । न एवं शक्यम् । इह हि लोपो न स्यात् तृपितो दृपित इति । यदि पुनरिमे मुचादिष्वेव पठ्येरन्न दोषः स्यात् । अथ वा नैवं विज्ञायते । इदितो नुम्धातोरिति । कथं तर्हि।इदितो नुम् । ततो धातोरिति॥

नेट्यलिटि रधेः ॥ ६२ ॥ इमौ प्रतिषेधावुच्येते । उभौ शक्यावक्तुम् । कथम् । एवं वक्ष्यामि । इटि लिटि रधेर्नुम् भवतीति । तन्नियमार्थं भविष्यति । लिट्येवेडादौ नान्यस्मिन्निडादाविति ॥

———————

ऽतोलोपे ऽसिद्धो न सार्वधातुकाश्रयः समानाश्रयं ह्यसिद्धं न तु व्याश्रयम् । नैतदस्ति । असिद्धं बहिरङ्गमन्तरङ्ग इति सार्वधातुकाश्रयस्य नलोपस्य बहिरङ्गस्यान्तरङ्गे अतो लोपे कर्तव्ये ऽसिद्धत्वादतोलोपाप्रसङ्गादुपदेशग्रहणानुवृत्त्या आर्धधातुकोपदेशे यदकारान्तं तस्य लोपविधानाद्वा । तासेरपीकार उच्चारणार्थ इति नुमोऽप्रसङ्गः।मन्ता आहन्ता इत्यादौ असिद्धवदत्राभादिति टिलोपस्यासिद्धत्वादनिदित्वेपि नलोपाप्रसङ्गः ॥ ५८ ॥

शे मुचादीनाम् ॥ शे तृम्पादीनामिति । आदिशब्दः प्रकारे । तेन नोपधा गृह्यन्ते तेषां नलोपे कृते नुमागमः । तस्य विधानसामर्थ्यादसिद्धवदत्राभादिति वा नलोपस्यासिद्धत्वादुपधात्वाभावाल्लोपाभावः । किमर्थमिति । य एवोपदेशे नकारः पठ्यते तस्यैव श्रवणं भविष्यतीति प्रश्नः । न नुमनुषक्ता इति । नुमग्रहणं नकारोपलक्षणार्थम् । यदीति । इदित्वेन नुमः सिद्धिर्न च लोपः प्रसज्यते । यदि पुनरिति। नोपधानां मुचादिषु पाठान्नः सिद्धिरित्यर्थः । अथवेति । मुचादिषु तावन्न पठिताः गौरवप्रसङ्गश्च । नोपधानां मुचादिषु पाठे ऽर्थनिर्देशः कर्तव्यः । अनोपधानामन्यत्र पाठेऽर्थो निर्दिष्टव्य इति मत्वा परिहारान्तरोपन्यासः । इदितां नुमिति । नन्वेवं धातूपदेशावस्थायां नुम्न लभ्यते । नैष दोषः । धिन्विकृण्व्योरचेति ज्ञापकाद्धातूपदेशावस्थायामेव नुम् यथा स्यादिति । यदि धातोरिति योगविभागः क्रियते तदा सर्वत्र नुम्प्रसङ्गः । नैष दोषः । शे मुचादीनामिति शेग्रहणस्य धातोरित्यत्र सिंहावलोकितन्यायेनापेक्षणाद् योगविभागस्येष्टसिद्ध्यर्थत्वाद्वा । अन्ये तु भाष्ये योगविभागो दिक्प्रदर्शनमित्याहुः । तेन शे मुचादीनामित्यत्र शे इति योगविभागः क्रियते। तत्र च धातोरिति वर्तते । ततो मुचादीनामिति । पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थम् । तेनेष्टविषये नुमः सिद्धिः ॥ ५९ ॥

नेट्यलिटि रधेः ॥ लिट्येवेति । इट्येव लिटीत्येव तु नियमो न भविष्यति । शास्त्रस्येष्टसिद्ध्यर्थत्वात् । कसौ रेधिवानिति भवति । द्विर्वचने एत्वाभ्यासलोपयोः कृतयोरिटि नुमागमस्तस्यौपदेशिककित्त्वाश्रयो लोपः । ये तु क्वसुं छान्दसमेव मन्यन्ते तेषां विचार एवायं नास्ति छन्दसि दृष्टानुविधानात् ॥ ६२ ॥

Indira Gandhi National Centre for the Arts

आङो यि ॥ ६५ ॥ इह कस्मान्न भवत्यालभ्यते। अस्तु। अनिदितां हल उपधायाः क्ङितीति लोपो भविष्यति। इह तर्ह्यालम्भ्या गौः। पोरदुपधादिति यत्यवास्थिते नुम्। तत्र को दोषः। आलम्भ्या इत्येष स्वरः प्रसज्येत। आलम्भ्या इति चेष्यते। नैष दोषः। उक्तमेतद्धातुग्रहणसामर्थ्यादुपदेशे नुम्विधानमिति॥

न सुदुर्भ्यां केवलाभ्याम् ॥६८॥ अथ केवलग्रहणं किमर्थम्। न सुदुर्भ्यामित्येवोच्येत। सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् *। सुदुरोः केवलग्रहणं क्रियते। अन्योपसृष्टान्मा भूदिति। प्रसुलम्भम्। नैषोस्ति प्रयोगः। इदं तर्हि सुप्रलम्भम्। प्रेण व्यवहितत्वान्न भविष्यति। इदं तर्हि। अतिसुलम्भम्। कर्मप्रवचनीयसंज्ञात्र बाधिका भविष्यति। सुः पूजायामतिरतिक्रमणे चेति। यदा तर्हि नातिक्रमणं न पूजा। इदं चाप्युदाहरणम्। सुप्रलम्भम्। ननु चोक्तं प्रेण व्यवहितत्वान्न भविष्यतीति। नैष दोषः। सुदुर्भ्यामिति नैषा पञ्चमी। का तर्हि

---

आङो यि॥ यत्यवस्थित इति। यकारादेः प्रत्ययस्य निमित्तत्वेनोपादानात् पूर्वमेव तेनोत्पत्तव्यमिति भावः। एष स्वर इति। कृदुत्तरपदप्रकृतिस्वरेण यतो नाव इत्याद्युदात्तत्वप्रसङ्गः। अन्तस्वरितत्वं चेष्यत इत्यर्थः। धातुग्रहणसामर्थ्यादिति। यीति विषयसप्तमी तेन धातूपदेशावस्थायामेव यकारादौ प्रत्यये विषयभूते नुमागमस्ततोऽदुपधत्वस्य विघातात् ण्यत्प्रत्यये सतीष्टस्वरः सिध्यति॥ ६५॥

नसुदुर्भ्यां केवलाभ्याम्। उपसर्गात् खल्घञोरिति प्राप्तो नुम् प्रतिषिध्यते। केवलग्रहणमिति। इह केवलग्रहणात्समानजातीय उपसर्ग एव निवर्तयितव्य इष्यते। स च सुदुर्भ्यां पूर्वो नास्त्यनभिधानात् प्रत्ययाभावात्सुदुर्भ्यां परे तु तस्मिन् पञ्चमीनिर्देशादेव व्यवधाने प्रतिषेधो न भविष्यतीति प्रश्नः। नैषोस्ति प्रयोग इति। प्रयुक्तानामिदमन्वाख्यानं न त्वनेनापूर्वः शब्दोपजनः क्रियते। अपि च प्रारम्भादिविशिष्टायाः क्रियायाः सुकरत्वं दुष्करत्वं च प्रतिपाद्यमिति पूर्वं प्रेण धातोः सम्बन्धः पश्चात्तद्विशिष्टस्य सुदुर्भ्याम्। अतिसुलम्भमिति। सौकर्यादिविशिष्टधात्वर्थस्य अतिर्विशेषणमिति पूर्वं सुदुर्भ्यां सम्बन्धः पश्चादतिना। इतरस्तु पूजाया अतिक्रमणस्य वा द्योतकोऽतिशब्द इति मत्वाह कर्मप्रवचनीयसंज्ञेति। ततश्चोपसर्गत्वाभावादतेः केवलावेवात्र सुदुराविति नुम्प्रतिषेधेन भाव्यम्। न हि विजातीयः केवलत्वं विहन्ति। यथा देवदत्तयज्ञदत्ताभ्यां केवलाभ्यां प्रवेष्टव्यमित्युक्ते पुरुषान्तरस्य प्रतिषिध्यते प्रवेशः। न तु शुकादेरेवं सुदुरौ परस्परसहितौ विजातीयसहितावेकाकिनौ च केवलावेव भवतः। सुदुर्लभमतिसुलभं सुलभं दुर्लभमिति। कृच्छ्राकृच्छ्रार्थौ च सुदुरौ क्रियाया विशेषकत्वादुपसर्गावेव खल्निमित्ततां प्रतिपद्येते। यदा तर्हीति। पूजातिक्रमणयोरतेः कर्मप्रवचनीयसंज्ञाविधानादन्यत्रोपसर्गत्वात्तत्सहितयोः सुदुरोः केवलत्वाभावान्नुम् भवत्येव। का तर्हीति। पञ्चमीपक्षेऽपि केवलग्रहणमतिसुलभमित्येवमर्थं कर्तव्यमिति क्रमानुल्लङ्घनाय तृतीयैवाश्रयितव्येति भावः। वाक्यकारेण पठितं सुदुरोः प्रतिषेधो नुम्विधितत्त्वषत्वणत्वेष्विति

Indira Gandhi National Centre for the Arts

तृतीया । सुदुर्भ्यामुपसृष्टस्येति । व्यवहितश्चाप्युपसृष्टो भवति ॥

**विभाषा चिण्णमुलोः** ॥ ६९ ॥ चिण्णमुलोरनुपसर्गस्य * । चिण्णमुलोरनुपसर्गस्येति वक्तव्यम् । इह मा भूत् । प्रालम्भि । प्रलम्भं प्रलम्भम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इहोपसर्गादित्यपि प्रकृतं नेत्यपि । तत्राभिसम्बन्धमात्रं कर्तव्यम् । विभाषा चिण्णमुलोः उपसर्गान्नेति ॥

**उगिदचां सर्वनामस्थानेऽधातोः** ॥ ७० ॥ अधातोरिति किमर्थम् । उखास्रत् । पर्णध्वत् । अधातोरिति शक्यमवक्तुम् । कस्मान्न भवति उखास्रत् पर्णध्वत् । उगित्स्वञ्चतिग्रहणात्सिद्धमधातोः * । उगित्स्वञ्चतिग्रहणादधातोः सिद्धम् । अञ्चतिग्रहणं नियमार्थं भविष्यति । अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति । इदं तर्हि प्रयोजनम् । अधातुभूतपूर्वादपि यथा स्यात् । गोमन्तमिच्छति गोमत्यतिगोमत्यतेरप्रत्ययः गोमान् ॥

**नपुंसकस्य झलचः** ॥ ७२ ॥ झलचोर्नुम्विधावुगित्प्रतिषेधः * । झलचोर्नुम्विधावुगिल्लक्षणस्य प्रतिषेधो वक्तव्यः । गोमन्ति ब्राह्मणकुलानि श्रेयांसि भूयांसि । ननु च झल्लक्षण उगिल्लक्षणं बाधिष्यते । कथमन्यस्योच्यमानमन्यस्य

---

अतस्तन्मतेनातिसुलभमिति सोरुपसर्गत्वाभावान्नुम् न प्राप्नोति । भाष्यकारेण च अत्र नुमागमोऽभ्युपगतस्तस्माद्वाक्यकारस्यापि केवलसुदुःशब्दविषय एव नुम्विधावुपसर्गसंज्ञानिषेधोऽभिमतः षत्वेपि पूजायामेव । तथा च सुषिक्तं नाम किं तवात्रेति षत्वं च क्षेपे भवत्येव ॥ ६८ ॥

विभाषा चिण्णमुलोः ॥ लभेश्चेति नित्ये नुमि प्राप्ते विभाषा आरभ्यते चिण्णमुलोरिति । सोपसर्गस्य तु नित्यमेव नुम्भवति उपसर्गान्नेति । वाक्यभेदेन विकल्प एव प्रतिषिध्यतइति नित्यमेव नुम् भवति ॥ ६९ ॥

उगिदचाम् ॥ अधातोरिति किमर्थमिति । अञ्चतिग्रहणान्नियमार्थाद्धातो निवृत्तिः सिद्धेति भावः । गोमानिति । क्विबन्ता धातुत्वं न जहतीति धातुरयमित्यञ्चतिग्रहणान्नियमार्थान्न स्यात् । अधातुग्रहणात्तु भवति । तस्य ह्येतत्प्रयोजनमवस्थान्तरेऽपि यस्याधातुत्वं दृष्टं तस्य सम्प्रति धातुत्वेऽपि नुम् यथा स्यादिति । अथात्र कथं दीर्घत्वं यावतात्वसन्तस्य चाधातोरित्यधातोस्तद्विधीयते । उच्यते । अधातोरिति तत्र योगविभागः क्रियते तत्र चासन्तस्येत्यनुवृत्त्याऽत्वन्तस्य पर्युदासाभावः ७०

नपुंसकस्य ॥ गोमन्तीति । परत्वाज्झल्लक्षणे नुमि कृते पुनः प्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोतीति तस्य प्रतिषेधो वक्तव्यः । ननु चेति । व्यक्तौ पदार्थे सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति भावः । इतर आकृतिपक्षमाश्रित्याह कथमन्यस्येति । उभयोर्नुमोः प्रसङ्गे परस्परप्रतिबन्धादप्रतिपत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमिति वचनेन परो नुम्विधीयमान उत्तरकालप्राप्तनिमित्तवन्तं पूर्वनुमं नैव शक्नोति बाधितुम् । तथा चोच्यते पुनः प्रसङ्गविज्ञानात्सिद्धमिति । अस्त्यतीय ।

Indira Gandhi National Centre for the Arts

बाधकं स्यात् । असति खल्वपि सम्भवे बाधकं भवति । अस्ति च सम्भवो यदुभयं स्यात् । किञ्च स्यात् । यद्यत्रोगिल्लक्षणोपि स्याद् द्वयोर्नकारयोः श्रवणं प्रसज्येत । न ह्यञ्जनपरस्यानेकस्यैकस्य वा श्रवणं प्रति विशेषोस्ति । ननु च प्रतिज्ञाभेदो भवति । श्रुतिभेदे ऽसति किम्प्रतिज्ञाभेदः करिष्यति । श्रुतिकृतोपि भेदो ऽस्ति । इहं तावत् । श्रेयांसि भूयांसि । परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्राप्नोति । यथा कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोति । अथैकस्मिन्नपि नुमि णत्वं कस्मान्न भवति । अनुस्वारीभूतो णत्वमतिक्रामति । कृते तर्हि परसवर्णे कस्मान्न भवति । असिद्धे च परसवर्णः । विप्रतिषेधात्सिद्धम् * । विप्रतिषेधात्सिद्धमेतत् । झल्लक्षणः क्रियतामुगिल्लक्षण इति । झल्लक्षणो भविष्यति विप्रतिषेधेन । झल्लक्षणस्यावकाशः, सर्पींषि । धनूंषि । उगिल्लक्षणस्यावकाशः, गोमान् यवमान् । इहोभयं प्राप्नोति । गोमन्ति ब्राह्मणकुलानि यवमन्ति ब्राह्मणकुलानि । श्रेयांसि भूयांसि । झल्लक्षणो भविष्यति विप्रतिषेधेन । ननु च पुनः प्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोति । पुनः प्रसङ्ग इति चेदमादिभिस्तुल्यम् * । पुनः प्रसङ्गादिति चेद् अमादिभिस्तुल्यमेतद्भवति । तद्यथा । युष्मदस्मदोरमादिषु कृतेषु पुनः प्रसङ्गाच्छिशीलुङ्नुमो न

---

सनुम इत्यर्थः । स्यादेतत् । अन्यस्याप्युच्यमानं कार्यमन्यस्य बाधकं भवति यथोक्तमग्नेरीत्वाद्वरुणस्य वृद्धिविप्रतिषेधेनेत्यत आह असति खल्वपीति । क्रमेण च नुमो विधानादन्त्यादचः परत्वं सम्भवति यथा पचतीति धात्वपेक्षं लट्शपोः । प्रतिज्ञाभेद इति । एकस्य प्रतिज्ञा एको नकार इति । अपरस्य द्वौ नकाराविति । श्रुतिभेदे ऽसतीति कथं पुनः श्रुतिभेदाभावो यावतानेकहलुच्चारणेनाधिकः कालो व्याप्यते एकहलुच्चारणे स्वल्पः । उच्यते । अच्कालव्यतिरेकेण व्यञ्जनानि कालान्तरं नाक्षिपन्तीति दर्शनाश्रयेणैतदुक्तम् । यत्तु शास्त्रे व्यञ्जनानां कालः परिगण्यते तद् गुरुलाघवनिरूपणायानेकोच्चारणे हि प्रयत्नस्य गौरवं भवति लौकिके तु प्रयोगे गुरुलाघवानादरात् श्रुत्यभेद उच्यते । अन्ये तु व्यञ्जनानां कालभेदमिच्छन्त्येव । परस्यानुस्वार इति । अयोगवाहानामट्सूपदेशाज्झल्त्वाभावात्पूर्वस्य नकारस्यानुस्वारो नास्ति । ननु च वर्णग्रहणे जातिग्रहणाद् द्वयोर्नकारयोरेकोनुस्वार आदेशो विधास्यते । नैतदस्ति । स्थानिभेदादनुस्वारादेशद्वयप्रसङ्गात् । न इति वा गुणत्वादेकत्वसंख्याया विवक्षितत्वादेकस्यैव नकारस्यानुस्वारः स्यान्न तु द्वयोः । णत्वमतिक्रामतीति । न प्राप्नोतीत्यर्थः । अनुस्वारे कर्तव्ये पूर्वत्रासिद्धमिति णत्वस्यासिद्धत्वादनुस्वारो नकारस्य भवति न तु णत्वं णत्वे च कर्तव्ये सिद्ध एवानुस्वार इति णत्वाभावः । असिद्धे च परसवर्ण इति । असिद्धप्रकरणे परसवर्णस्य विधानाद् णत्वे कर्तव्ये तस्यासिद्धत्वाण्णत्वाभावः । विप्रतिषेधादिति । व्यक्तिपदार्थाश्रयसहितात् । तद्यथा दधीति । यद्यपि दृष्टान्ते सामान्यविशेषभावो

Indira Gandhi National Centre for the Arts

भवन्ति। एवं झल्लक्षणे कृते पुनः प्रसङ्गादुगिल्लक्षणो न भविष्यति। यदप्युच्यते ऽसति खल्वपि सम्भवे बाधनं भवति। अस्ति च सम्भवो यदुभयं स्यादिति। सत्यपि सम्भवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि सम्भवे झल्लक्षण उगिल्लक्षणम्बाधिष्यते। अथवास्त्वत्र उगिल्लक्षणोपि। ननु चोक्तं द्वयोर्नकारयोः श्रवणम्प्रसज्येतेति। परिहृतमेतद्, न व्यञ्जनपरस्यैकस्यानेकस्य वा श्रवणं प्रति विशेषोस्तीति। ननु चोक्तं प्रतिज्ञाभेदो भवतीति। श्रुतिभेदे ऽसति प्रतिज्ञाभेदः किङ्करिष्यति। ननु च श्रुतिकृतोपि भेद उक्तः। इह तावत् श्रेयांसि भूयांसीति। परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत। कुर्वन्ति कृषन्तीति। परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोतीति। नैष दोषः। अयोगवाहानामविशेषेणोपदेशश्चोदितः। तत्रेह तावत्। श्रेयांसि यभ्रांसीति। परस्यानुस्वारे कृते तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारो भविष्यति। कुर्वन्ति कृषन्तीति। परस्यानुस्वारे परसवर्णे च कृते तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारपरसवर्णौ भविष्यतः। नैव वा पुनरत्रोगिल्लक्षणः प्राप्नोति। किङ्कारणम्। मिदचोन्त्यात्पर इत्युच्यते। न च द्वयोर्मितोरचामन्त्यात्परत्वे सम्भवोस्ति। कथं तर्हि। इमौ द्वौ मितौ अचामन्त्यात्परौ स्तः। बहूनड्वांहि ब्राह्मणकुलानीति। विनिमित्तावेतौ। तत्र बहूर्जि प्रतिषेधः *। तत्र बहूर्जि प्रतिषेधो वक्तव्यः। बहूर्जि ब्राह्मणकुलानि। अन्त्यात्पूर्वं नुममेके॥ अन्त्यात्पूर्वं नुममेके इच्छन्ति। किमविशेषेण आहो स्विद्बहूर्जावेव। किञ्चातः। यद्यविशेषेण, काष्ठतक्षीति भवितव्यम्। अथ बहूर्जावेव काष्ठतङ्क्षीति भवितव्यम्। एवं तर्हि

---

बाधकहेतुर्दार्ष्टान्तिके तु विप्रतिषेधे परमेवेति नियमस्तथापि विनापि विरोधेन दृष्टं बाधकत्वमिति प्रदर्शनाय दृष्टान्तोपन्यासः। परस्येति। अयोगवाहानामविशेषेणोपदेशाश्रयणादनुस्वारस्य झल्त्वात्पूर्वस्याप्यनुस्वारो भवति ततो द्वयोरनुस्वारयोः श्रुतिं प्रति विशेषाभावः। कुर्वन्तीत्यत्रापि पूर्वस्य नकारस्य अनुस्वारपरसवर्णयोः कृतयोः परसवर्णस्यासिद्धत्वाण्णत्वस्यातिक्रमः। न च द्वयोरिति। ननु च यद्यपि प्रयोगे पूर्वेण नुमा परस्य नुमोन्त्याजपेक्षमानन्तर्यं विहन्यते तथापि क्रमेण विधाने द्वयोः सम्भवत्येव परत्वमित्युक्तम्। नैष दोषः। प्रयोगाश्रयेणैतदुक्तम्। प्राधान्यात्प्रयोगस्यान्त्यादचः परो मित्प्रयोक्तव्य इत्यानन्तर्यमेवात्र संश्रितम्। न च द्वयोर्नुमोरेकाजपेक्षमानन्तर्यं सम्भवति। पचतीत्यत्र तु सार्वधातुके परतः शब्विधानाद्विकरणव्यवधानमाश्रितमेव। विनिमित्ताविति। भिन्ननिमित्तावित्यर्थः। उकारात्पर आम् आमः परो नुम्। तत्रेति। झलच इति द्वन्द्वाश्रयणे दोषः। बहव ऊर्जो येषामिति बहुव्रीहिः। यद्यविशेषेणेति। काष्ठं तक्ष्णुवन्तीति क्विपि कृते जसः

बहूर्जीव । बहूर्जि स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । अच इत्येषा पञ्चमी । अच उत्तरो यो झल् तदन्तस्य नपुंसकस्य नुमा भवितव्यम् । यश्चात्र अचं उत्तरो नासौ झल् नापि तदन्तं नपुंसकम् । यदन्तं च नपुंसकं नासावच उत्तरः । इहापि तर्हि न प्राप्नोति । काष्ठतक्ष्णीति । अत्र यः अच उत्तरो झल् न तदन्तं नपुंसकं यदन्तं च नपुंसकं नासावच उत्तरः । नैतदस्ति । झल्जातिः प्रतिनिर्दिश्यते । अच उत्तरा या झल्जातिरिति । यदि पञ्चमी, कुण्डानि वनानि इत्यत्र न प्राप्नोति । एवं तर्हि इकोचि विभक्तावित्यत्राचः सर्वनामस्थाने इत्येतदनुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति । सर्वनामस्थाने इत्येषा सप्तमी अच इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति । तस्मिन्निति निर्दिष्टे पूर्वस्येति ॥

इकोचि विभक्तौ ॥ ७२ ॥ अज्ग्रहणं किमर्थम् । इकोचि व्यञ्जने मा भूत् ॥ इकः अचीत्युच्यते व्यञ्जनादौ मा भूत् । त्रपुभ्यां त्रपुभिः । अस्तु लोपः ॥ अस्त्वत्र नुम् । न लोपः प्रातिपदिकान्तस्येति नलोपो भविष्यति । स्वरः कथम् ॥ पञ्चत्रपुभ्याम् । पञ्चत्रपुभ्यः । इगन्ते द्विगाविति एष स्वरो न प्राप्नोति । स्वरो वै श्रूयमाणे ऽपि ॥ श्रूयमाणे ऽपि नुमि स्वरो भवति । पञ्चत्रपुणा पञ्चत्रपुणे इति । लुप्ते किं न भविष्यति ॥ लुप्ते इदानीं किं न भविष्यति । किं पुनः कारणं श्रूयमाणे ऽपि नुमि स्वरो भवति । सङ्घातभक्तोसौ नोत्सहते ऽवयवस्येगन्ततां विहन्तुमिति कृत्वा । ततः श्रूयमाणे ऽपि नुमि स्वरो भवति । इदं तर्हि अतिराभ्याम् । अतिराभिः । नुमि कृते रायो हलीत्यात्वं न प्राप्नोति । इद-

---

श्भावे ककारषकारयोर्मध्ये नुम्प्राप्नोति तस्य झल्परत्वादनुस्वारप्रसङ्गः । अच इत्येषेति । झलच इति न द्वन्द्वः किं तर्हि झलिति लुप्तषष्ठीकं पदम् । अच इति तु पञ्चम्यन्तम् । कुण्डानीति । इगन्तस्योत्तरसूत्रेण सिध्यतीत्यकारान्तस्यैव नुमोप्राप्तिरुच्यते । एवं तर्हीति । वाक्यभेदेनाजन्तस्य सर्वनामस्थाने नुम् विधीयते सर्वनामस्थाने इत्येषेति । ननु पञ्चमीसप्तम्योरपि सावकाशत्वात्परत्वात्पञ्चम्यैव प्रकल्पिकया भाव्यम् । एवं तर्हीष्टवाची परशब्दः अतः सप्तम्यपि क चित्प्रकल्पिका भवतीत्यदोषः ॥ ७० ॥

इकोचि ॥ अज्ग्रहणमिति । हलादौ नुमो लोपविधानात्तन्निवृत्त्यर्थमज्ग्रहणं नोपयुज्यते इति प्रश्नः । स्वरो न प्राप्नोतीति । नुमेगन्ततायाः विघातात् । लुप्ते किमेति । स्वरे कर्तव्ये नलोपस्य शास्त्रेणैवासिद्धत्वं प्रतिपाद्यते न तु प्रयोगे नकारस्य सद्भावः । ततश्च नुमः सद्भावेपि यत्र स्वरो भवति तत्रासद्भावे कथं न स्यादित्यर्थः । संघातभक्त इति । अङ्गस्य विधानाद्बहिरङ्गत्वाच्च नुमोन्तरङ्गः स्वरः पूर्वमेव प्रवर्तते । अतिराभ्यामिति । अतिरिभ्याम् इति स्थिते नुमि कृते तेन व्यवधानाद्रैशब्दस्या-



Indira Gandhi National Centre for the Arts

मिह सम्प्रधार्य नुम् क्रियतामात्वमिति । किमत्र कर्तव्यम् । परत्वादात्वम् । इह तर्हि प्रियतिसृभ्यां प्रियतिसृभिः । नुमि कृते तिसृभावो न प्राप्नोति । इदमिह सम्प्रधार्य नुम् क्रियतां तिसृभाव इति । किमत्र कर्तव्यम् । परत्वात्तिसृभावः । अथेदानीं तिसृभावे कृते पुनः प्रसङ्गविज्ञानान्नुम् कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवेति । अत उत्तरं पठति । इकोचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् * । इकोचि विभक्तौ अज्ग्रहणं क्रियते नुमो नुट् विप्रतिषेधेन यथा स्यात् । त्रपूणां जतूनाम् । इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः * । अक्रियमाणे ह्यज्ग्रहणे नित्यनिमित्तो नुम् कृतेपि नुटि प्राप्नोत्यकृतेपि । नित्यनिमित्तत्वान्नुमि कृते नुटोभावः स्यात् । एतदपि नास्ति प्रयोजनम् । अक्रियमाणे ऽपि वै अज्ग्रहणे ऽवश्यमत्र नुडर्थो यत्नः कर्तव्यः । पूर्वविप्रतिषेधो वक्तव्यः । इदं तर्हि प्रयोजनम् । नुटि कृते नुम्मा भूदिति । किञ्च स्यात् । त्रपूणां जतूनां नामीति दीर्घत्वं न स्यात् । मा भूदेवं नोपधाया इत्येवं भविष्यति । इह तर्हि शुचीनाम् । इन्हन्पूषार्यम्णां शौ । सौ चेत्यस्मान्नियमान्न प्राप्नोति दीर्घत्वम् । अर्थवद्ग्रहणे नानर्थकस्येत्येवं न भविष्यति । नैषा परिभाषा इह शक्या विज्ञातुम् । इह हि दोषः स्याद्राज्ञीति । एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिप-

---

त्वं न प्राप्नोति । सुब्विधौ नलोपस्यासिद्धत्वाच्च । अथापि पदाङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति रैशब्दान्तस्याङ्गस्यात्वं विधीयते इति नास्ति नुमाङ्गस्य व्यवधानं तथापि नकारस्यात्वं प्राप्नोति तस्मिन् पूर्वस्य यणि सति अतियाभ्यामिति प्राप्नोति । परत्वादात्वमिति । आत्वमनित्यं नुमि कृते तेन व्यवधानाद-प्रसङ्गादथ वा शब्दान्तरप्राप्त्या नुमि कृते नकारस्य प्रसङ्गात् । अकृते त्विकारस्य । नुमप्यनित्यः । कृते आत्वे प्राप्त्यभावात् । परत्वात्तिसृभाव इति । शब्दान्तरप्राप्त्या नुमनित्यः । तिसृभावस्तु नुमि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः । स हि यद्यपि त्रिशब्दान्तस्याङ्गस्य विधीयते तद्भक्तत्वाच्च नुमव्यवधायकस्तथापि निर्दिश्यमानस्यादेशा भवन्तीति त्रेरेव तिसृभावेन भाव्यं स च नुमा व्यवहित इति तिसृभावस्याप्राप्तिस्तदेवमुभयोरनित्ययोः परत्वात्तिसृभावः । त्रपूणामिति । सत्यजग्रहणे द्वयोरपि नुम्नुटोरनित्यत्वाद्विप्रतिषेधे सति नुमचिरतृज्वद्भावेभ्यां नुडिति पूर्वविप्रतिषेधान्नुट् भवति । तस्मिंश्च नामीति दीर्घत्वम् । असति त्वज्ग्रहणे कृताकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात् । नुडर्थो यत्न इति । अज्ग्रहणं च कर्त्तव्यं पूर्वविप्रतिषेधश्च वक्तव्य इति यत्नद्वयमाश्रयणीयं तत्राज्ग्रहणमकृत्वैव एक एव नुडर्थो यत्नः कर्तव्य इत्यर्थः । नुटि कृते इति । यत्नान्तरेण नुटि कृते नुम् प्राप्नोतीत्यर्थः । किं च स्यादिति । नलोपे कृते दोषाभावं मन्यते । नामीति । नलोपस्य सुब्विधावसिद्धत्वादजन्तत्वाभावात् । इह तर्हीति । इन्हन्निति नियमः सर्वस्योपधालक्षणस्य दीर्घत्वस्येति व्याख्यातम् । नैषेति । अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेनेति वच-

Indira Gandhi National Centre for the Arts

दोक्तस्यैवेति । उत्तरार्थं च * । उत्तरार्थं तर्ह्यज्ग्रहणं कर्तव्यम् । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । अजादौ यथा स्यात् । इह मा भूत् । अस्थिभ्यामस्थिभिः । यद्युत्तरार्थं स्यात्तत्रैवायमज्ग्रहणं कुर्वीत । इह हि क्रियमाणे यदि किञ्चित्प्रयोजनमस्ति तदुच्यताम् । इहापि क्रियमाणे प्रयोजनमस्ति । किम् । अजादौ यथा स्यात् । इह मा भूत् । त्रपु जतु । एतदपि नास्ति प्रयोजनम् । विभक्तावित्युच्यते । न चात्र विभक्तिं पश्यामः । प्रत्ययलक्षणेन । नलुमताङ्गस्येति प्रत्ययलक्षणस्य प्रतिषेधः । एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवतीह कश्चिदन्योपि मकारः प्रत्ययलक्षणं नामेति । किमेतस्य ज्ञापने प्रयोजनम् । हे त्रपु । हे त्रपो । अत्र गुणः सिद्धो भवति । इकोचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् । स्वरो वै श्रूयमाणे ऽपि लुप्ते किं न भविष्यति ॥ १॥ रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि । नुड्वाच्य उत्तरार्थं तु इह किञ्चित् त्रपो इति ॥ २ ॥

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७३ ॥ किमिह पुंवद्भावेनातिदिश्यते । नुम्प्रतिषेधः । कथं पुनः पुंवदित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुम् । वतिनिर्देशोयम् । कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा। उशीनरवन्मद्रेषु यवाः सन्ति न सन्तीति । मातृवदस्याः कलाः सन्ति न सन्तीति। एवमिहापि पुंवद्भवति पुंवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे । यथा पुंसो न नुम्भवति एवं तृतीयादिषु भाषितपुंस्कस्यापि न भवतीति । किमुच्यते नुम्प्रतिषेध इति । न पुनरन्यदपि पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु त्रि-

---

नात् । तथा च वाग्मिन इत्यादावपि नियमाद्दीर्घाभावः । तत्रैवायमिति । एवं हि स्वरितत्वं न प्रतिज्ञेयं भवति । प्रत्यक्षश्रुतिसम्भवे चानुमानं नाश्रयितव्यं भवति । हे त्रपु हे त्रपो इति । हे त्रपु इति प्राप्ते हे त्रपो इति भवतीत्यर्थः । केचित्तु रूपद्वयमिष्यत इत्याहुः । क्वचित्प्रत्ययलक्षणं लुमता लुप्तायामपि संबुद्धौ भवतीत्येतदज्ग्रहणेन ज्ञाप्यते न तु सर्वत्रेति ते वदन्ति ॥ ७२ ॥

तृतीयादिषु ॥ किमिहेति । अन्यत्र पराश्रयाणि कार्याणि अतिदिश्यन्ते न तु स्वाश्रयकार्याभावः । इह तु विपर्ययो दृश्यत इति मत्वा प्रश्नः । कथं पुनरिति । पुंवदित्यनेन नुम्प्रतिषेधोऽशक्योतिदेष्टुं न हि पुंसि नुम्प्रतिषेधो विहितः । कामचारश्चेति । यत्र क्रिया शब्देन नोपात्ता तत्र कामचारः न तु ब्राह्मणवत् क्षत्रिये वर्तितव्यमित्यादावुपात्तक्रियेतिदेशे प्रतिपत्तौ चोपमाने भावाभावयोरन्यतरमवगत्य वाक्यशेषं कल्पयति । तत्र पुंसि नुमभावदर्शनान्नपुंसके पुंवदतिदेशान्नुमभावः प्रतीयते । तदेह शास्त्रे यथालक्ष्यं क्वचिद्भवतीत्यस्याध्याहारः । क्वचिन्न भवतीत्यस्य । क्वचिदुभयस्य । यथा स्थानिवदतिदेशे । तथा च वाय्वोरित्यादौ स्वाश्रयलोपाभाव

Indira Gandhi National Centre for the Arts

भक्तिषु भाषितपुंस्कस्यातिदिश्येत । अनारम्भात्पुंसि । न हि किञ्चित्पुंसि प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येत । नुम्प्रकृतस्तत्र किमन्यच्छक्यं विज्ञातुम् । अन्यदतो नुम्प्रतिषेधात् । पुंवदिति नुम्प्रतिषेधश्चेद् गुणनाभावनुडौत्वप्रतिषेधः * । पुंवदिति नुम्प्रतिषेधश्चेद् गुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः । गुण, ग्रामण्ये ब्राह्मणकुलाय । गुणः । नाभावः । ग्रामण्या ब्राह्मणकुलेन । नाभावः । नुट् । ग्रामण्यां ब्राह्मणकुलानाम् । नुट् । औत्वम् । ग्रामण्यां ब्राह्मणकुले । ह्रस्वत्वमप्रतिषिद्धम् । ह्रस्वाश्रयाश्चैते विधयः प्राप्नुवन्ति । ह्रस्वाभावार्थं च । किञ्च । नुम्प्रतिषेधार्थं च । कथं पुनरत्राप्रकृतस्य असंशब्दितस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुम् । अर्थातिदेशात्सिद्धम् । नैवं विज्ञायते । भाष्यते पुमाननेन सोयं भाषितपुंस्कः भाषितपुंस्कस्य । शब्दस्य पुंशब्दो भवतीति । कथं तर्हि भाष्यते पुमानस्मिन्नर्थे सोयं भाषितपुंस्कः भाषितपुंस्कस्यार्थस्य पुंवदर्थो भवतीति । तद्धितलुक्प्रतिषेधश्च * । तद्धितलुकश्च प्रतिषेधो वक्तव्यः । पीलुर्वृक्षः । पीलु फलम् । पीलुना पीलुने इति । न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् * । न वा वक्तव्यम् । किङ्कारणम् । समानायामाकृतौ भाषितपुंस्कविज्ञानात् । समानायामाकृतौ यद्भाषितपुंस्कम् । आकृत्य-

---

वः । नहि किंचिदिति । तस्माच्छसो नः पुंसीति नत्वातिदेशस्तृतीयादिषु पुंवद्भावातिदेशात् पूर्वसवर्णदीर्घाभावाच्चेह न सम्भवति । नुम्प्रकृत इति । अनेन प्रत्यासत्तिमाश्रयति । ह्रस्वत्वमप्रतिषिद्धमिति । तस्याप्रकृतत्वात् । अर्थातिदेशात्सिद्धमिति । यद्यपि प्रकरणमनपेक्ष्य व्याप्त्याश्रयेणापि ह्रस्वाभावः सिध्यति तथापि सम्भवात्परिहारान्तरमाश्रितम् । यदि कार्यातिदेशः स्यात्तदा प्रकृतत्वाप्रकृतत्वलक्षणो भेदः स्यादर्थे त्वतिदिश्यमाने नास्त्ययं भेदः । नैवं विज्ञायत इति । यदा शब्देऽन्यपदार्थे कार्यातिदेशः स्यात्तदा प्रकृतस्यैव नुमः प्रतिषेधः स्यान्न ह्रस्वस्य । भाष्यते पुमानस्मिन्नर्थे इति । अर्थोन्यपदार्थ आश्रीयते स चार्थो नपुंसकलक्षणो विरोधान्नाश्रीयते । न हि नपुंसके ऽर्थे पुंसो भाषणमुपपद्यते । तस्माच्छब्दप्रवृत्तिनिमित्तलक्षणोर्थोन्यपदार्थत्वेनाश्रीयते । तद्योगाच्चाभिधेयं नपुंसके तदपि भाषितपुंस्कमुच्यते तस्यार्थस्य पुंस्त्वातिदेशाद् द्वावपि नुमह्रस्वौ न भवतः । पुंसि द्वयोरप्यभावात् । अर्थस्य चापौरुषेयत्वादतिदेशासम्भवात्तदतिदेशद्वारेणानेककार्यातिदेश एवायं सम्पद्यते । तत्र यद्यप्यन्तरङ्गो ह्रस्वस्तथाप्यपवादविषयं प्रकल्प्योत्सर्गाणां प्रवर्तनान्नात्र प्रवर्तते । ह्रस्वाभावाच्च गुणादीनां निमित्ताभावादप्रवृत्तिः सिद्धा । तद्धितलुगिति । अर्थातिदेशस्यैव प्रयोजनान्तरं चोद्यमुखेनोपन्यस्यते । फले लुगित्योरञो लुकि कृते पीलुशब्दो वृक्षाकृतौ पुंलिङ्गः । फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावान्नुमोऽप्रसङ्गः । न वेति । नन्वाकृतिरेवान्यपदार्थत्वेनाश्रिता भाषितपुंस्कशब्दस्य तु भाषितपुंस्कशब्दव्यपदेशो नैवाश्रितः । सत्यम् । साक्षाच्छ-

Indira Gandhi National Centre for the Arts

न्तरे चैतद्भाषितपुंस्कम् । किं वक्तव्यमेतत् । नहि । कथमनुच्यमानं गंस्यते । एतदप्यर्थनिर्देशात्सिद्धम् ॥

ई च द्विवचने ॥ ७७ ॥ किमुदाहरणम् । अक्षी ते इन्द्रपिङ्गले । नैतदस्ति । पूर्वसवर्णेनाप्येतत्सिद्धम् । इदं तर्हि अक्षीभ्यां ते नासिकाभ्याम् । इदं चाप्युदाहरणम् । अक्षी ते इन्द्रपिङ्गले । ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति । नुमा व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति । छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः। मधोर्गृभ्णामि मधोस्तृप्ता इवासते इत्येवमर्थम् । पुंवद्भावेन नुमो निवृत्तिः । नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम् । स्वरार्थस्तर्हीकारो वक्तव्यः । उदात्तस्वरो यथा स्यात् । नपुंसकस्वरो मा भूत् । ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति । अशक्यः पुंवद्भावातिदेशस्तत्राश्रयितुम् । इह हि दोषः स्यात् । मध्वस्मिन्नस्ति । मधुर्मास इति । स तर्हि पुंवद्भावो वक्तव्यः।न वक्तव्यः । प्रकृतं पुंवदिति वर्तते॥

नाभ्यस्ताच्छतुः ॥ ७८ ॥ कस्यायं प्रतिषेधः । नुम इत्याह। तन्नुमो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । इदितो नुम्धातोरिति । तद्वै अनेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् । एवं तर्हि सर्वनामस्थान

---

ब्दस्य भाषितपुंस्कव्यपदेशो नास्त्यभिधेयद्वारकस्तु केन निवार्यते । तत्र पीलुशब्दो वृक्षाकृतौ पुंल्लिङ्गः फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावाप्रसङ्गः ॥ ७३ ॥

ई च द्विवचने ॥ पूर्वसवर्णेनेति । अक्षि औ इति स्थिते छान्दसात् पुंवद्भावाच्छीभावे नुमि चासति प्रथमयोः पूर्वसवर्ण इत्यनेन । नुमा व्यवहितत्वादिति । प्रथमयोः पूर्वसवर्ण इत्यत्राक इति वर्तते । तेनागचोः स्थाने पूर्वसवर्णदीर्घ उच्यमानो नुमव्यवधाने नास्तीत्यक्षिणी इति प्राप्नोति। परत्वाच्च नुम् प्राप्नोति । ईकारस्तु विधीयमानः परत्वान्नुमं बाधते तेन शीभावे कृते पूर्वसवर्णे नाक्षी इति सिध्यति । नुमि निवृत्ते इति । अप्रवृत्तिरेव निवृत्तिः शीभावोपि पुंवद्भावान्न भवति । स्वरार्थे इति । उदात्तग्रहणानुवर्तनादीकार उदात्तः । नपुंसकस्वर इति । नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वम् । ननु चेति । अव्युत्पत्तिपक्षे चोद्यते । व्युत्पत्तिपक्षे त्वशोर्निदिति नित्वादाद्युदात्तत्वेन भाव्यम् । मधुर्मास इति । मत्वर्थे मासतन्वोर्मधोर्जं चेति यत उत्पन्नस्य लुगकारेकाररेफाश्च वक्तव्या इति । लुकि कृते मासे पुंसि मधुशब्दो वर्तते इत्याद्युदात्तत्वं न स्यात् । तस्माद्यस्यान्यत्र नपुंसकत्वं दृष्टं तस्यासत्यपि नपुंसकत्वआद्युदात्तत्वमिष्यते इति पुंवद्भावे ऽपि स्वरानिवर्तनात्स्वरार्थ ईकारो विधेयः । स तर्हीति । मधोर्गृभ्णातीत्येवमाद्यर्थः । प्रकृतमिति । वाक्यभेदेन सम्बन्धः क्रियते । छन्दसि नपुंसकं पुवदित्येकं वाक्यम् । अस्थ्यादीनां छन्दसि द्विवचन ईकारो भवतीति द्वितीयं वाक्यम् ॥ ७७ ॥

नाभ्यस्ताच्छतुः ॥ कस्यायमिति । आच्छीनद्योर्नुमिति नुम्ग्रहणाद्व्यवहितस्यानुवृत्तिर्नाश्रिता नचानन्तरः प्रतिषेधार्ह इति प्रश्नः । एवं तर्हीति । उगिदचां

Indira Gandhi National Centre for the Arts

इति वर्तते । सर्वनामस्थाने यत्प्राप्नोति तस्य प्रतिषेधः । तद्वै बहुतरकेण ग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् । अथेदानीं व्यवहितमपि शक्यते ऽनुवर्तयितुम् । नुमेवानुवर्त्यं इहार्थमुत्तरार्थं च । इह चैव प्रतिषेधः सिद्धो भवति । इह च आच्छीनद्योर्नुमिति नुम्ग्रहणं न कर्त्तव्यं भवति ॥

आच्छीनद्योर्नुम् ॥ ८० ॥ इह कस्मान्न भवति । अदती घ्नती लुनती पुनतीति । लोपे कृते ऽवर्णाभावात् । किं तर्ह्यस्मिन् योगे उदाहरणम् । याती यान्ती । अत्राप्येकादेशे व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवद्भावः । नोभयत आश्रयः करिष्यते । नैवं विज्ञायते अवर्णान्ताच्छतुर्नुम्भवतीति । कथं तर्हि अवर्णान्नुम्भवति । तच्चेदवर्णं शतुरनन्तरमिति ॥

शप्श्यनोर्नित्यम् ॥ ८१ ॥ नित्यग्रहणं किमर्थम् । विभाषा मा भूत् । नैतदस्ति प्रयोजनम् । सिद्धोऽत्र पूर्वेणैव । तत्रारम्भसामर्थ्यान्नित्यो विधिर्भविष्यति। तदेतन्नित्यग्रहणं सान्यासिकं तिष्ठतु तावत् ॥

सावनडुहः ॥ ८२ ॥ अनडुहः सावाम्प्रतिषेधो नुमो ऽनवकाशत्वात् *। अनडुहः सावाम्प्रतिषेधः प्राप्नोति । किङ्कारणम् । नुमोऽनवकाशत्वात् । अनवकाशो नुम् आमं बाधते । न वावर्णोपधस्य नुम्वचनात् * । न वा एष दोषः ।

---

सर्वनामस्थानेधातोरित्यतः सर्वनामस्थाने निषेध्य लक्षणार्थं विज्ञायते । सर्वनामस्थाने यत्प्राप्नोति तदञ्चस्ताच्छतुर्न भवति इति नुम एव प्रतिषेधः सम्पद्यते । बहुतरकेणेति । नुमागमश्चतुर्भिर्योगैर्विच्छिन्नः । सर्वनामस्थानं तु पञ्चभिरिति प्रकर्षप्रत्ययनिर्देशः ॥ ७८ ॥

आच्छीनद्योर्नुम् ॥ इह कस्मादिति । सर्वत्र एवावर्णस्य निवृत्त्या भाव्यम् । क चिल्लुका, क्व चित् श्लुना, क्व चिदेकादेशेन, क्वचित्तु श्नाभ्यस्तयोरात इति लोपेन । तत्रावश्यं भूतपूर्वगतिराश्रयितव्या । अवर्णनिवृत्तिशास्त्रस्य वा नुमागमविधानात्पूर्वं प्रतिबन्धादप्रवृत्तिस्ततश्चात्रापि प्रसङ्ग इति भावः । लोपे कृते इति । नित्यत्वादन्तरङ्गत्वाच्च । पूर्वोक्तेनैवाभिप्रायेण चोदयति किं तर्हीति । इतरः सांप्रतिकमवर्णान्तं दर्शयितुमाह यान्तीति । नैवं विज्ञायत इति । एवं विज्ञायमाने ऽवर्णं शता चोभयमाश्रितं स्यात् । अवर्णान्नुम् भवतीति । अवर्णात्परइत्यर्थः । शत्रवयवव्यतिरिक्तश्चावर्णो गृह्यते । आदित्युपादानसामर्थ्यात् । तच्चेदवर्णमिति । शत्रवयवस्तकारः शतृशब्देनोच्यते । नह्यन्यथा एकादेशे कृते शतुरनन्तरमवर्णं भवति । उभयत आश्रये च नान्तादिवदित्युक्तम् । तस्माच्छत्रवयवस्तकारः शतृशब्देनोच्यते शत्रवयवाकारव्यतिरिक्तं चावर्णमेकादेशात्मकमाश्रियते इति न कश्चिद्दोषः ॥ ८० ॥

सावनडुहः ॥ आमागमः सर्वनामस्थानमात्रे विधीयमानः सोऽन्यत्र सावका-

Indira Gandhi National Centre for the Arts

किङ्कारणम् । अवर्णोपधस्य नुम्वचनात् । अवर्णोपधस्य नुमं वक्ष्यामि । तद्वर्णग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क प्रकृतम् । आच्छीनद्योर्नुमिति । यदि तदनुवर्तते । अनडुहि यावन्त्यवर्णानि सर्वेभ्यः परो नुम्प्राप्नोति । मिदचोऽन्त्यात्पर इत्यनेन यत्सर्वान्त्यमवर्णं तस्मात्परो भविष्यति । पुनः प्रसङ्गविज्ञानाद्वा सिद्धम् * । अथ वा पुनः प्रसङ्गाद् नुमि कृते आम्भविष्यति । यथा आत्वादिषु द्विर्वचनम् । तद्यथा । जग्ले मम्ले ईजतुरीजुरिति । आत्वादिषु कृतेषु पुनः प्रसङ्गाद् द्विर्वचनं भवति, एवमत्रापि नुमि कृते आम्भविष्यति ॥ नैष युक्तः परिहारः । विप्रतिषेधे पुनः प्रसङ्गः । विप्रतिषेधश्च द्वयोः सावकाशयोर्भवति । इह पुनरनवकाशो नुमामं बाधते । एवं तर्हि वृत्तान्तादेव परिहारः प्रस्थितः । कस्माद् वृत्तान्तात् । इदमयं चोद्यो भवति । अनडुहः सावाम्प्रतिषेधो नुमोनवकाशत्वादिति तस्य परिहारो न वावर्णोपधस्य नुम्वचनादिति । ततोऽयं चोद्यो भवति । यत्र तर्ह्यवर्णप्रकरणं नास्ति तत्र ते आमा नुमो बाधनं प्राप्नोति । बहुनड्वांहि ब्राह्मणकुलानि ॥ तत उत्तरकालमिदं पठितं पुनः प्रसङ्गविज्ञानाद्वा सिद्धमिति ॥

दिव औत् ॥ ८४ ॥ दिव औत्वे धातोः प्रतिषेधः * । दिव औत्वे धा-

---

शो निरवकाशेन नुमा बाध्येतेति मत्वाह अनडुहः साविति । अवर्णोपधस्येति । नचामा विनावर्णोपधत्वसम्भव इति निमित्तमेव नुम आमिति बाध्यबाधकभावाभावः । अनडुहि यावन्तीति । अनडुहोकारान्त्यासम्भवादनडुहावर्णो विशेष्यते नत्ववर्णेनानडुच्छब्दस्ततः सर्वावर्णानां नुम्प्रसङ्गः । यद्येवं सत्यामप्यादित्यस्यानुवृत्तौ यदेवं सन्निहितमवर्णं तस्यैव नुम् स्यात्तथा च नुमा आम् बाध्येत । नैष दोषः । आगमिभेदात् । आमनडुहो नुम् त्ववर्णस्य तस्मात्सर्वावर्णानां नुम्प्रसङ्ग एव दोषः । मिदचोन्त्यादिति । मित्त्वलिङ्गाच्च मित्परिभाषोपतिष्ठते तदुपस्थानादुकारात्परो नुम्प्रसक्त आदित्यधिकारादवर्णादन्त्यात्परः क्रियते । न चाम्यकृते वर्णोन्त्यो भवतीति सामर्थ्यादामि कृते नुम्विधीयते । अथ वोकारात्पर एव विधीयते । तत्रादित्यधिकारादयमर्थो भवति यथाऽवर्णात्परो नुम्भवति तथा कर्तव्यमेवं चावर्णात्परो भवति । यदि कृते नुम्याम् क्रियते एवं च सत्यादित्यधिकारोनुगृहीतो भवति । परिभाषा च न त्यक्ता भवति । पुनः प्रसङ्गविज्ञानाद्वेति । चार्थे वाशब्दः । बह्वनड्वांहीति । परत्वादामि कृते पुनः प्रसङ्गविज्ञानान्नपुंसकस्य झलच इति नुम् क्रियते इति वाक्यार्थः । भाष्यकारस्तु न्यायव्युत्पादनार्थं विकल्पार्थं वाशब्दं व्याख्याय दूषयित्वा समुच्चयार्थमेव व्याचष्टे वृत्तान्तादिति । प्रसङ्गो वृत्तान्तश्चोद्यप्रसङ्गादित्यर्थः । अथ वा वृत्तोऽतिक्रान्तो यः प्रबन्धश्चोद्यसमाधानलक्षणः तदन्ते व्यवस्थितं यच्चोद्यं तदुपचाराद्वृत्तान्तशब्दवाच्यं तस्मादित्यर्थः ॥ ८२ ॥

दिवः औत् ॥ दिव औत्व इति । विशेषानुपादानाद्धातोरपि प्राप्नोति । अक्ष-

Indira Gandhi National Centre for the Arts

तोः प्रतिषेधो वक्तव्यः । अक्षद्यूरिति । अधात्वधिकारात्सिद्धम् *। अधातोरिति वर्तते । क्व प्रकृतम् । उगिदचां सर्वनामस्थानेधातोरिति । अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः * । अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषो भवति । काष्ठतङ्क्षि कूटतङ्क्षि । नपुंसकस्य झलचः अधातोरिति प्रतिषेधः प्राप्नोति । उक्तं वा * । किमुक्तम् । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति । अथ वा सम्बन्धमनुवर्तिष्यते ॥

इतोत्सर्वनामस्थाने ॥ ८५ ॥ इतोद्वचनमनर्थकमाकारप्रकरणात् * । इतोद्वचनमनर्थकम् । किङ्कारणम् । आकारप्रकरणात् । आदिति वर्तते । षपूर्वार्थं तु *। षपूर्वार्थं तर्ह्यद्वक्तव्यः । ऋभुक्षणमिन्द्रम् । ऋभुक्षाणमिन्द्रम् ॥

पुंसोसुङ् ॥ ८९ ॥ असुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात् * । असुङ्युपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामेवासुङ् भवतीति वक्तव्यम् । किम्प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामसुङि कृते इष्टः स्वरो यथा स्यात् । परमपुमानिति । अक्रियमाणे ह्युपदेशिवद्भावे समासान्तोदात्तत्वे ऽसुङ् आन्तर्यतः अस्वरकस्यास्वरकः स्यात् । किं पुनः कारणं समासान्तोदात्तत्वं तावद्भवति । न पुनरसुङ् । न परत्वादसुङा भवितव्यम् । बहिरङ्ग-

---

द्यूरिति । ऊठि कृते एकदेशविकृतस्यानन्यत्वादीत्वप्रसङ्गः । अननुबन्धग्रहण इति । अव्युत्पन्नं दिविति प्रातिपदिकमननुबन्धकम् । व्युत्पत्तिपक्षेप्यवयवानां प्रत्ययादीनां सानुबन्धकत्वं न प्रातिपदिकस्य । सम्बन्धमिति । उगिदचामित्यनेन । दिव औदित्यत्र त्वधातोरिति वर्तते । उगिदचामिति निवृत्तम् ॥ ८४ ॥

इतोऽत्सर्वनामस्थाने ॥ इतोद्वचनमिति । क्व चिदेकादेशविधानात्क चिद्दीर्घविधानाच्च ह्रस्वस्य श्रवणेन न भाव्यमित्याकार एव प्रकृते इतो विधेय इत्यर्थः । षपूर्वार्थमिति । वा षपूर्वस्य निगम इति दीर्घविकल्पेन रूपद्वयसिद्धिराकारविधौ त्वेकमेव रूपं स्याद् दीर्घविकल्पस्तु तक्षणं तक्षाणमित्याद्यर्थं स्यात् ॥ ८६ ॥

पुंसोसुङ् ॥ असुङीति । पातेर्डुम्सुन्नित्याद्युदात्तस्य पुंसः सकारस्याविद्यमानोदात्तत्वादनुदात्तस्य स्थाने ऽसुङि क्रियमाणे आन्तरतम्यादनुदात्तं पदमेकवर्जमिति वचनाद्वा अनुदात्त एव भवतीति पुमानित्यादौ दोषाभावः । परमपुमानित्यत्र त्वन्तरङ्गत्वात्समासान्तोदात्तत्वे कृते सर्वनामस्थाने उत्पन्ने ऽसुङ्क्रियमाणो ऽनुदात्तः प्राप्नोति उदात्तश्चेष्येत । ननु चोकारस्य कृतमपि समासान्तोदात्तत्वमसुङि कृते ऽनन्त्यत्वान्न व्यवतिष्ठते । नैतदस्ति । अन्तरङ्गे स्वरे कर्तव्ये बहिरङ्गस्यासुङोऽसिद्धत्वान्निवृत्तस्य वा निवर्तनादुपदेशिवद्वचनात्तु पूर्वमसुङ् भवति । पश्चात्समासान्तोदात्तत्वम् । अस्वरकः स्यादिति । प्रवृत्तिकाले स्वरविशेषस्यानुपादानादनभिमतानुदात्तत्वप्रसङ्गाच्चास्वरक इत्युच्यते । न त्वस्वरकस्याच उच्चारणं

Indira Gandhi National Centre for the Arts

लक्षणत्वात् । बहिरङ्गलक्षणोऽसुङ् अन्तरङ्गः स्वरः । असिद्धं बहिरङ्गमन्तरङ्गे । स तर्हि उपदेशिवद्भावो वक्तव्यो न वक्तव्यः । असुङ आद्युदात्तनिपातनं करिष्यते । स निपातनः स्वरः समासस्वरस्य बाधको भविष्यति । एतदप्युपदेशिवद्भावो वक्तव्यः । यथैव हि निपातनस्वरः समासस्वरं बाधते । एवं प्रकृतिस्वरमपि बाधेत । पुमान् । तस्मात्सुष्ठूच्यते । असुङि उपदेशिवद्वचनं स्वरसिद्धयर्थं बहिरङ्गलक्षणत्वादिति ॥

गोतो णित् ॥ ९० ॥ किमिदं गोतः परस्य सर्वनामस्थानस्य णित्त्वमुच्यते आहो स्वित्सर्वनामस्थाने परतो णित्कार्यमतिदिश्यते । कश्चात्र विशेषः । गोतः सर्वनामस्थाने णित्कार्यातिदेशः * । गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते । सर्वनामस्थाने णिद्वचने ह्यसम्प्रत्ययः * । षष्ठयनिर्देशात्सर्वनामस्थानस्य णिद्वचने ह्यसम्प्रत्ययः स्यात् । किङ्कारणम् । षष्ठयनिर्देशात्षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते । न चात्र षष्ठीं पश्यामः । एवं तर्हि वतिनिर्देशोयं गोतो णिद्भवतीति । स तर्हि वतिनिर्देशः कर्तव्यः, नह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह, तेन मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते । अथ वा पुनरस्तु गतिः परस्य सर्वनामस्थानस्य णित्त्वम् । ननु चोक्तं सर्वनामस्थाने णिद्वचने ह्यसम्प्रत्ययः षष्ठ्यनिर्देशादिति । नैष दोषः । गोत इत्येषा पञ्चमी सर्वनामस्थान इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति । अथ तपरकरणं किमर्थम् । इह मा भूत् । चित्रगुः शबलगुरिति । नैतदस्ति । द्व-

---

सम्भवति । अथ वोदात्तत्वाभावादस्वरक इत्युच्यते । एवमपीति । यस्मादुदात्तनिपातने दोषस्तस्मात्तत्परित्यागेनेत्यर्थः । प्रकृतिस्वरमिति । पुमानित्यादौ आद्युदात्तत्वमित्यर्थः । प्रकृतिस्वरस्य कोऽवकाश इति चेत्पर्यायः स्यात् ॥ ८८ ॥

गोतो णित् ॥ गाङ्कुटादिसूत्रे यावन्तः पक्षा उक्तास्ते सर्वे इह सम्भवन्ति । तत्र णकारस्येतःसर्वनामस्थाने अभावाद्भावे वा तदनुवादे प्रयोजनाभावाण्णित्वव्यपदेशाभावः । संज्ञाकरणे ऽपि ञ्णिद्ग्रहणे संज्ञिनोऽसंप्रत्ययः शब्दभेदाद्भावनापक्षे णकार आदेशः प्राप्नोति । ण्वुलादि वा प्रसिद्धणित्वं प्राप्नोति । तद्वदतिदेशस्तु निर्दोषत्वादाश्रीयते । भाष्ये तु भावनापक्ष एवाशङ्क्य निराकृतः परस्तात् स्थापितश्च । किमिदमिति । ण् इद्यस्य तण्णित् तस्य भावो णित्वम् । तेनायमर्थः । अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानमादेशो भवति ण्वुलादयस्तु तदर्थाभिधाने ऽसमर्थत्वान्न भवन्ति । एतद्न्यायाश्रये गाङ्कुटादिसूत्रेपि भावनापक्षे तु न कश्चिद्दोषः । गोत इत्येषेति । भावनापक्षे गोत इति पञ्चमी । तद्वदतिदेशपक्षे तु



Indira Gandhi National Centre for the Arts

स्त्वे कृते न भविष्यति । स्थानिवद्भावात्प्राप्नोति । अत उत्तरं पठति । तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात् * । तपरकरणमनर्थकम् । किङ्कारणम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यते ऽत्र स्थानिवद्भावः । गोः पूर्वत्वणित्त्वात्वस्वरेषु स्थानिवन्न भवतीति । स चावश्यं प्रतिषेध आश्रयितव्यः । इतरथा हि सम्बुद्धिजसोः प्रतिषेधः । यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति सम्बुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात् । हे चित्रगो चित्रगव इति । अथेदानीं सत्यपि स्थानिवत्प्रतिषेधे गुणे कृते कस्मादेवात्र न भविष्यति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह । नहीदानीं क्व चिदपि स्थानिवत्स्यात् ॥

तृज्वत्क्रोष्टुः ॥ ९५ ॥ स्त्रियां च ॥ ९६ ॥ अथात्र विभक्तावित्यनुवर्तते उताहो न । किञ्चातः । तृज्वत् स्त्रियां विभक्तौ चेत्क्रोष्ट्री भक्तिर्न सिध्यति॥ तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्री भक्तिरिति न सिध्यति । एवं तर्हीकार एव तृज्वद्भावं वक्ष्यामि । तदीकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । प्रश्लिष्टनिर्देशोयं स्त्री ई स्त्री स्त्रियामिति । ईकारे तन्निमित्तः सः । ईकारे चेत् । तत्र । किङ्कारणम् । तन्निमित्तः सः ॥ तृज्वद्भावनिमित्तः स ईकारः । नाकृते तृज्वद्भावे ईकारः प्राप्नोति । किङ्कारणम् । ऋन्नेभ्यो ङीबित्युच्यते । ईकारे च

---

षष्ठी । तपरकरणमिति । स्थानिवत्त्वनिषेधादानर्थक्यमिति प्रश्नः । चित्रगुरिति । तपरस्तत्कालस्येत्यत्राणिति नानुवर्तते इति अनणोपि तत्कालस्य ग्रहणम् । इतरथा हीति । यदि स्थानिवत्त्वनिषेधो नाश्रीयते तदा सत्यपि तपरकरणे संबुद्धौ जसि च गुणे कृते स्थानिवत्त्वात्तत्कालत्वाच्च णित्त्वं स्यादित्यर्थः । प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते गोरूपस्य लाक्षणिकत्वाण्णित्त्वाप्रसङ्गः । अव्युत्पत्तिपक्षाश्रयेणैतदुच्यते । व्युत्पत्तिपक्षे तु सर्व एव लाक्षणिकः । न हीदानीमिति । स्वाश्रया या प्राप्तिः । सा लक्षणप्रतिपदोक्तपरिभाषावशान्मा भूत् । स्थानिवत्त्वनिमित्तातु स्यादेव प्राप्तिः । न हि सा पूर्वोक्तया परिभाषया निवार्यते । स्थानिवत्त्वस्य निर्विषयत्वप्रसङ्गात् ९०

तृज्वत् ॥ तृज्वत्क्रोष्टुरित्यत्र सर्वनामस्थानाधिकाराद्विभक्त्यधिकारस्य न दोषो न प्रयोजनम् । विभाषा तृतीयादिष्वचीत्यत्राप्यादिशब्दस्य व्यवस्थावाचित्वाद्विभक्तय एव गृह्यन्त इति तत्रापि न विचार इति स्त्रियां चेत्यत्रैवायं विचारः क्रियते इष्टतोऽधिकाराणां प्रवृत्तिनिवृत्तिभावात् । क्रोष्ट्रीभक्तिरिति।क्रोष्ट्री भक्तिरस्येति बहुव्रीहिः। भक्तिशब्दस्य प्रियादिषु पाठात्पुंवद्भावाभावः । अत्रान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति लुकि कृते विभक्त्यभावान्नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाच्च तृज्वद्भावो न प्राप्नोति तदभावादृकारान्तत्वनिमित्तो ङीबपि न प्राप्नोति । एवं तर्हीति। विभक्तिनिमित्तत्वेन नाश्रीयते किं तर्हि ईकारः । स्त्री ई स्त्रीति । स्त्रिया ई स्त्रीत्वस्य द्योतक ईकारे इत्यर्थः।षष्ठीसमासः । अर्थगतं च स्त्रीत्वम् ईकारे आरोप्य नदीसंज्ञा-

Indira Gandhi National Centre for the Arts

तृज्वद्भावः। तदितरेतराश्रयं भवति इतरेतराश्रयाणि च न प्रकल्पन्ते। एवं तर्हि गौरादि पाठादीकारो भविष्यति। गौरादिषु न पठ्यते। नहि किञ्चित्तृन्नन्तं गौरादिषु पठ्यते। एवं तर्हि एतज्ज्ञापयत्याचार्यः भवत्यत्र ईकार इति। यदयमीकारे तृज्वद्भावं शास्ति। तेनैव भावनं चेत् स्यादनिष्टोपि प्रसज्यते। यद्यपि नास्ति विशेषो ङीपो ङीषो वा ङीनापि तु प्राप्नोति। इह च न प्राप्नोति। पञ्चभिः क्रोष्ट्रीभिः क्रीतैरथैः पञ्चक्रोष्टृभीरथैरिति। एवं तर्हि नचापरं निमित्तं संज्ञा च प्रत्ययलक्षणा *। न चापरं निमित्तमाश्रीयते अस्मिन् परतः क्रोष्टुस्तृज्वद्भवतीति। किं तर्हि अङ्गस्य क्रोष्टुस्तृज्वद्भवति। अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन। किं पुनः, अयं शास्त्रातिदेशः तृचो यच्छास्त्रं तदतिदिश्यते आहो स्विद्रूपातिदेशः तृचो यद्रूपं तदतिदिश्यते इति। कश्चात्र विशेषः। तृज्वदिति शा-

---

निमित्ताभावादाटौ क्रियेते। गौरादिपाठादिति। पृथिवीक्रोष्टुपिप्पल्यादयश्चेति च्छेदाध्यायिनः पठन्ति। न हि किंचिदिति। संहिताध्यायिनो न पठन्ति। सर्वात्मना पाठं प्रतिपादयितुमेतदुच्यते। ङीपो ङीषो वेति। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वविधानात्। ङीनपीति। ततश्चाद्युदात्तत्वप्रसङ्गः। ननु ईकारे तृज्वद्भावविधानात्सति शिष्टश्चित् स्वरो नित्स्वरं बाधिष्यते ततश्चोदात्तयणो हल्पूर्वादित्युदात्तविधानान्नास्ति विशेषः। नैतदस्ति। क्रोष्टुशब्द आद्युदात्त एव। तत्र ङीनि कृते प्रयोजनाभावादकृते तृज्वद्भावे नित्स्वरो न प्रवर्तेत इति पूर्वं तृज्वद्भावः परत्वाद्वा तत्र कृते नित्स्वरः सति शिष्टंश्चित्स्वरं बाधेत। यदि तु ज्ञापकेन पिप्पल्याद्यन्तर्भावः क्रोष्टुशब्दस्यानुमनुमीयते तदा न कश्चिद्दोषः अपूर्वस्य त्वीकारस्यानुमानमाश्रित्य श्लोकवार्तिककारेण दोष उपात्तः शार्ङ्गरवाद्यन्तर्भावानुमानमपि स्यादिति तदाशयः। पञ्चभिरिति। तद्धितार्थेति समासः। आर्हादिति ठक उत्पन्नस्याध्यर्धपूर्वेति लुक्। लुक् तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादीकारनिमित्तस्तृज्वद्भावो न प्राप्नोति अन्तरङ्गाणां च विधीनां लुका बाधनात्पूर्वमेव तृज्वद्भावो न लभ्यते तस्माद्येन सर्वनामस्थाने तृज्वद्भावोस्येन त्वजादिषु विकल्पेनेति हलादौ मध्यमेनाप्राप्तिरुच्यते। पञ्चक्रोष्टुभिरिति। केचिदाहुः। भस्याढे इति ठक्छसोश्चेति वा प्राप्तः पुंवद्भावो जातेश्चेति निषिध्यते। तदयुक्तम्। भत्वाभावाच्छसहचरितस्य ठको ग्रहणादप्राप्तिरेव पुंवद्भावस्य नास्तिः जातेश्चेति प्रतिषेधः औपसंख्यानिकस्य पुंवद्भावस्य नास्त्येव। यथा हस्तिनीनां समूहो हास्तिकमिति। अङ्गसंज्ञा चेति। लब्धाङ्गसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणं तन्न लुमताङ्गस्येत्यनेन निषिध्यते। न चाङ्गसंज्ञा अङ्गस्य कार्यमिति प्रत्ययलक्षणेन भवत्येव। तत्र स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य लब्धाङ्गसंज्ञकस्य तृज्वद्भावे सति ङीप्प्रत्ययः कार्यः कार्यकालत्वे तु संज्ञापरिभाषस्याङ्ग आश्रिते प्रत्ययोप्याश्रितो भवति यथा वव्रश्चेति तदाङ्गस्यैवैतदत्र नापेक्ष्यम्। किं पुनरिति। शास्त्रस्य शास्त्रं प्रत्यासन्नमिति प्रत्यासत्त्या शास्त्रातिदेशः प्राप्नोति। प्राधान्यात्तु रूपातिदेशप्रसङ्ग

Indira Gandhi National Centre for the Arts

स्त्रातिदेशश्चेद् यथा चिणि * । तृज्वदिति शास्त्रातिदेशश्चेद् यथा चिणि तद्वत्प्राप्नोति । कथं चिणि । उक्तं तत्राङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धमिति । आङ्गं यत्कार्यं तदतिदिश्यते । एवमिहाप्यनङ्गुणदीर्घत्वान्यतिदिष्टानि । रपरत्वमनतिदिष्टम् । तत्र को दोषः । तत्र रपरवचनम् * । तत्र रपरत्वं न सिध्यति तद्वक्तव्यम् । नैष दोषः । गुणेऽतिदिष्टे रपरत्वमपि अतिदिष्टं भवति । कथम् । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । ऋतो ङिसर्वनामस्थानयोर्गुणो भवति उपस्थितमिदं भवति उरण्रपर इति । एवं तर्हि अयमन्यो दोषो जायते । आहत्य तृचो यच्छास्त्रं तदतिदिश्यते । अनाहत्य वेति । किञ्चातः । यद्याहत्य दीर्घत्वमतिदिष्टम् । अनङ्गुणरपरत्वान्यनतिदिष्टानि । अथानाहत्यानङ्गुणपरत्वान्यतिदिष्टानि । दीर्घत्वमनतिदिष्टम् । अस्त्वाहत्य । ननु चोक्तं दीर्घत्वमतिदिष्टमनङ्गुणपरत्वान्यनतिदिष्टानीति । नैष दोषः । दीर्घत्वेऽतिदिष्टेऽनङ्गुणपरत्वान्यप्यतिदिष्टानि भवन्ति । कथम् । उपधाया इति वर्तते । न चाकृतेष्वेतेषु दीर्घत्वभाविन्युपधा भवति । कुतो नु खल्वेतत् । एतेषु त्रिषु कृतेषु या उपधा तस्या उपधाया दीर्घत्वं भविष्यति । न पुनः क्रोष्टुर्योऽन्तरतमो गुणस्तस्मिन् कृतेऽवादेशे च या उपधा तस्या दीर्घत्वं भविष्यति । नैकमुदाहरणं योगा-

---

रूपार्थत्वात् शास्त्रप्रवृत्तेः । कार्यातिदेशस्तु शास्त्रातिदेशादभिन्नत्वात् पृथक् नोपन्यस्तः । तृज्वदित्यादौ रूपे ऽतिदिश्यमाने सूत्रसन्निवेशस्यानपेक्षणात् प्रकरणकृतव्यवस्थाभावः । शास्त्रातिदेशे तु प्रत्यासत्त्याङ्गप्रकरणात्सन्निकृष्टस्यैव शास्त्रस्यातिदेशः स्यात् । न विप्रकृष्टस्य यथा चिण्वद्भावेन वृद्ध्यादीन्येव भवन्ति न हनिणिङादेशाः । रपरत्वमिति । यथोद्देशपक्षे प्रकरणान्तरे संनिवेशादिति भावः । कार्यकालमिति । प्रधानदेशत्वाद्गुणानामङ्गाधिकारएव रपरपरिभाषायाः संनिधानमित्यर्थः । आहत्येति । उच्चार्योद्घोष्येत्यर्थः । शास्त्रशब्दे या शासनक्रिया शास्त्रकरणिका तदपेक्ष्यपौर्वकाल्याश्रयः क्त्वाप्रत्ययः तत्र यदि तृच्छब्दवच्छास्त्रमतिदिश्यते तदाहत्य यच्छास्त्रमिति पक्षो ऽथ तु ऋकार एव तृच्छब्दे विवक्ष्यते, चकारः स्वरार्थस्त्वप्रसिद्धशङ्कानिवृत्त्यर्थः । ऋज्वदित्युच्यमानेऽप्रसिद्धातिदेशः सम्भाव्यते ऋच्छब्दनिबन्धनसमासान्तशास्त्रातिदेशविषयः संदेहो वा स्यात् । तस्मादृकारमात्रप्रतिबद्धशास्त्रातिदेशेनाहत्येत्येष पक्ष उद्भवति । अनङ्गुणरपत्वानीति । ऋदुशनस्पुरुदंसोऽनेहसां चेत्यनङ्, ऋतो ङिसर्वनामस्थानयोरिति गुणः, उरणिति रपरत्वम्, दीर्घत्वमनतिदिष्टमिति । नाहि तदत्र इत्युच्यते किं तर्हि अप्तृन्तृच् इति तृच्छब्दोच्चारणेन । न चावयवसमुदाययोर्युगपद्विवक्षा । यतस्तृच्प्रतिबद्धमृकारप्रतिबद्धं च शास्त्रमतिदिश्यते । न चाकृतेष्विति । अचो दीर्घेण भाव्यम् । न च क्रोष्टुशब्दस्योकारान्तस्याज्युपधा सम्भवति । तत्र क्रोष्ट्रेत्यत्रानङि कृतेऽज्युपधा भवति । क्रोष्टारौ इत्यादौ तु गुणरपरत्वयोः कृतयोः । न पुनरिति । क्रोष्टुशब्दस्य जसि चेत्युकारस्य

Indira Gandhi National Centre for the Arts

रम्भं प्रयोजयति । तत्र तृज्वद्वचनसामर्थ्यादेतेषु विधिषु कृतेषु या उपधा तस्या दीर्घत्वं भविष्यति । अथ वा किं न एतेनाहत्यानाहत्य वेति । आहत्य अनाहत्य च तृचो यच्छास्त्रं तदतिदिश्यते । अथ वा पुनरस्तु रूपातिदेशः । अथैतस्मिन् रूपातिदेशे सति किं प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते आहो स्वित् कृतेष्वादेशेषु । किञ्चातः । यदि प्रागादेशेभ्यो यद् रूपं तदतिदिश्यते ऋकार एकोतिदिष्टः । अनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानि । अथ कृतेष्वादेशेषु ऋकारोनतिदिष्टः ।

———————

गुणोस्त्वेव तस्यावादेशे कृतेऽकारस्य दीर्घः स्यात् । ततश्च क्रोष्टाव इति स्यात् । नैकमिति । अन्यथा दीर्घविधावेव क्रोष्टुशब्दं निर्दिशेत् । ननु दीर्घविधौ क्रोष्टुशब्दे उपादीयमाने स्त्रियां च विभाषा तृतीयादिष्वचीत्येवमर्थं तृज्वत् क्रोष्टुरिति वक्तव्यमिति गौरवं स्यात् । नैष दोषः । अचि र ऋत इति रादेशे प्रकृते क्रोष्टोः स्त्रियां च विभाषा तृतीयादिष्वचीत्येव रादेशविधानाद्गौरवाभावात् । ननु रादेशे क्रोष्टुः क्रोष्टरीति न सिध्यति । नाप्युदात्तयणो हल्पूर्वादिति स्वरः । एवं तर्हि ङिः क्रोष्टुग्रहणं योगविभागाल्लघु । तदुक्तम् । अक्षराधिक्यादपि योगविभागो गरीयानिति । तदेवं तृज्वद्भावविधानसामर्थ्याद्यादृशी तृच उपधा यादृशान्यनिमित्ता तादृश्या एव तादृशान्यनिमित्तायाः क्रोष्टुशब्दस्योपधाया दीर्घो भवतीत्यनङ्गुणरपरत्वेषु कृतेषु दीर्घो भवति । अस्मिन् परिहारे पूर्वोक्तगौरवप्रसङ्गात् असमाश्वसन् परिहारान्तरमाह अथ वेति । तृज्वदिति समुदाय एवाश्रीयते तत्र व्याप्तिन्यायाश्रयात्किञ्चित्तृचो दृष्टं शास्त्रं तत्सर्वमतिदिश्यते । एवं भूयो लक्ष्यं लक्षणं चानुगृहीतं भवति । नन्वङ्गप्रकरणोपात्त एव शास्त्रेतिदिश्यमाने क्रोष्ट्रीति यणादेशशास्त्रस्यानाङ्गत्वादतिदेशो न स्यात् । एवं तर्हि स्त्रियाम् आङ्गशास्त्रातिदेशासम्भवादनाङ्गस्याप्यतिदेशः । विभाषातृतीयादिष्वचीत्यत्र तर्हि क्रोष्टरीत्यत्र गुणविधावतिदेशस्य चरितार्थत्वात् क्रोष्ट्रीरिति यणादेशाप्रसङ्गः । क्रोष्टुरित्यत्र ऋत उदिति शास्त्रं न प्रवर्तेत । तत्रापि तृतीयादिग्रहणसामर्थ्यादनाङ्गस्याप्यतिदेशोन्यथा विभाषाङावित्येव ब्रूयात् । स्यादेतत् । अभावातिदेशार्थं तृतीयादिग्रहणं स्यात् । ततश्च विलक्षणौ गुणनाभावौ न स्यातां क्रोष्टवे क्रोष्टुनेति तत्र वक्तुरधीने वाक्यशेषे भावातिदेशस्यैवाश्रयणात् । एवं तर्हि क्रोष्ट्रीति स्त्रियामीकारो न प्राप्नोति । अनाङ्गमपि ईकारशास्त्रमतिदेशसामर्थ्यादतिदेक्ष्यत इति एषोप्यदोषः । अथ वोत्तरयोर्योगयोरारम्भसामर्थ्याद् रूपातिदेश एव आश्रीयते पूर्वसूत्रे तु पक्षभेदविचारः । अथ वेति । सूत्रत्रये एकरसप्रवृत्तिर्भवति सर्वरूपसंग्रहश्चेति भावः । प्रागादेशेभ्य इति । क्रोष्टृइत्येतदृकारान्तम् । कृतेष्विति । क्रोष्टाराविति रेफान्तम्, तत्र प्रागादेशेभ्यो यद्रूपं तत्प्रत्यक्षं तृज्वदित्युच्चारणाद् व्यापकं लघु च तस्मिन्नतिदिष्टे तन्निमित्तानाम् अनङादीनां सर्वेषां स्वशास्त्रेण प्रवर्त्तनात् कृतेषु चादेशेषु यद्रूपं लौकिकं तत्प्रधानं तदर्थत्वादितरस्य प्रक्रियालाघवं च भवतीति पक्षद्वयसम्भवः । ऋकार एक इति - तदतिदेशसामर्थ्याच्च कार्यान्तराणामप्रसङ्गः स्याद् इति मन्यते । ऋकारोऽनतिदिष्ट इति । किं पुनः ऋकारातिदेशस्य प्रयोजनं प्रयोगसमवायिरूपातिदेशेन गत-

Indira Gandhi National
Centre for the Arts

अनङ्गुणरपरत्वदीर्घत्वान्यतिदिष्टानि । उभयथा च स्वरोनतिदिष्टः । किङ्कारणम् । नहि स्वरो रूपवान् । अस्तु प्रागादेशेभ्यो यद् रूपं तदतिदिश्यते । ननु चोक्तम् । ऋकारोतिदिष्टः । अनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानीति । नैष दोषः । ऋकारे अतिदिष्टे स्वाश्रया अत्र एते विधयो भविष्यन्ति । यदप्युच्यते । उभयथा स्वरोऽनतिदिष्टः । नहि स्वरो रूपवानिति । स चकारग्रहणसामर्थ्यात्स्वरो भविष्यति । रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः * । रूपातिदेश इति चेत् सर्वादेशः प्राप्नोति । सर्वस्य तुन्नन्तस्य तृशब्द आदेशः प्राप्नोति । सिद्धं तु रूपातिदेशात् * । सिद्धमेतत् । कथम् । रूपातिदेशात् । रूपातिदेशोयम् । ननु चैवमेव कृत्वा चोद्यते रूपातिदेश इति चेत्सर्वादेशप्रसङ्ग इति । सिद्धं तु प्रत्यय-

---

स्वात् । अत्र केचिदाहुः । यत्र ऋकारस्य विकाराभावः पञ्चक्रोष्टुभीरथैरिति तत्र ऋकारो ऽनतिदिष्टः स्याद् इति । तदयुक्तम् । नहीदं वचनं कृतेष्वादेशेषु इति लौकिकप्रयोगरूपोपलक्षणं त्वेतद्यथा च क चित्कृतेष्वादेशेषु लौकिकं रूपं तथा च क चिदकृतेष्विति नास्ति विशेषः । अत्रोच्यते । यदि ऋकारमतिदिश्य कृतेष्वादेशेषु यद्रूपं तदतिदिश्यते तदा क्रोष्ट्रेत्यादावुदात्तयणो हल्पूर्वादिति स्वरो न स्याद् उदात्तयणोऽभावात् । सति हि ऋकारातिदेशे तत्स्थानिकस्य यण उदात्तत्वात् स्वरः सिध्यति । ननु स्वरदोषमनन्तरमेव वक्ष्यति तत्किमर्थमत्राभिधीयते अत्रैकतरपक्षाश्रयणे स्वरदोष उच्यते परस्तात्तु पक्षद्वये ऽपि वक्ष्यते । नहि स्वरो रूपवानिति । ननु शब्दस्य श्रोत्रेन्द्रियग्राह्यस्वभावो रूपम् । स्वरोपि श्रोत्रेन्द्रियग्राह्यत्वाद्रूपमेवाथास्य व्यतिरिक्तं रूपं नास्तीति नहि स्वरो रूपवानित्युच्यते तदा तृज्वद्रूपस्यापि रूपं नास्तीति तदपि न रूपवदिति नातिदिश्यते । रूपातिदेशश्च प्रक्रान्तो न रूपवदतिदेशः । अत्रोच्यते । प्रागादेशेभ्यो यद्रूपमित्यत्र तावत्पक्षे स्वरोऽशक्योऽतिदेष्टुं नहि रूपं शास्त्रीयम् । न च स्वरो रूपत्वेनाश्रितः शास्त्रे ण्वुल्तृचावित्यस्मिन्नुच्चारणे स्वरस्य भेदहेतुत्वेनानाश्रयणात् । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यादौ उदात्तादिग्रहणात् । यापि चितोन्त उदात्त इति स्वरप्रतिपत्तिरसावप्यनुमानान्न तूच्चारणात्कृतेष्वादेशेष्वित्यत्र तु पक्षे यद्यप्युच्चारणे उदात्तादिगुणानामभेदकत्वं ज्ञापितं तथापि यथा आन्तरतम्यात् स्वर आश्रीयमाणो भेदकः । तथातिदेशादपि किं तूदात्तयणव्यपदेशाभावात् स्वरासिद्धिः । यद्ययं रूपवानिति किमुच्यते । रूपमिति हि वक्तव्यम् । तत्र केचिदाहुः । भाष्यकारवचनात् स्वार्थिको मतुप् । अथ वा स्वरवानेव स्वरः अर्शआदित्वादच् । नहि स्वरवानुकार उदात्तादिना रूपेण रूपवान् शास्त्र आश्रीयते तस्याभेदकत्वात् । ऋकारे ऽतिदिष्ट इति । तदर्थत्वादृकारातिदेशस्येति भावः । स्वाश्रय इति । स्वं निमित्तं शास्त्रं वा आश्रयो येषामिति समासः । सचकारेति । अन्यथा तृवदिति ब्रूयात् । न च तृन्तृज्भ्यामन्योर्थवान् तृच्छब्दोस्ति यस्य ग्रहणे दोषः स्यात् तस्मादनुमेयोपि स्वर उच्चारणे ऽनाश्रीयमाणोपि चकारोच्चारणाद्भवति । सर्वादेशप्रसङ्ग इति । रूपातिदेशशब्दात् स्थान्यादेश-

Indira Gandhi National Centre for the Arts

ग्रहणे यस्मात्स तदादितदन्तविज्ञानात् * । सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणं भवतीत्येवं तुन्नन्तस्य तृजन्त आदेशो भविष्यति । एवमपि किञ्चिदेव तृजन्तं प्राप्नोति इदमपि प्राप्नोति पक्तेति । आन्तरतम्यात्तु सिद्धम् । क्रोष्टुर्यदन्तरतमं तद्भविष्यति । किं पुनस्तत् । क्रुशेर्यस्तृज्विहितस्तदन्तम् । तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात् * । तृज्विषय एतत्तृजन्तं मृगवाचि । तुनो निवृत्त्यर्थं तर्हीदं वक्तव्यम् । तुनः सर्वनामस्थाने निवृत्तिर्यथा स्यात् । तुनो निवृत्त्यर्थमिति चेत्तत्सिद्धं यथान्यत्रापि *। तुनो निवृत्त्यर्थमिति चेत्तदन्तरेण वचनात् सिद्धं यथान्यत्राप्यविशेषविहिताः शब्दा नियतविषया दृश्यन्ते । क्वान्यत्र । तद्यथा । घरतिरस्मायविशेषेणोपदिष्टः स घृतं घृणा घर्म इत्येवं विषयः । रशिरस्मायविशेषेणोपदिष्टः स राशिः रश्मिः रशना इत्येवं विषयः । लुशिरस्मायविशेषेणोपदिष्टः स लोष्ट इत्येवं विषयः । इदं तर्हि प्रयोजनम् । विभाषां वक्ष्यामीति । विभाषा तृतीयादिष्वचीति । वावचनानर्थक्यं च स्वभावसिद्धत्वात् * । वावचनं चानर्थकम् । किङ्कारणम् । स्वभावसिद्धत्वात्। स्वभाव एव तृतीयादिषु अजादिषु विभक्तिषु तृजन्तं तुन्नन्तं च मृगवाचि इति । गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम् * । गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्भवति पूर्वविप्रतिषेधेन । तत्र गुणस्यावकाशः, अग्नये वायवे । नुमोऽवकाशः, त्रपुणी । जतुनी । इहोभयं प्राप्नोति । त्रपुणे । जतुने । वृद्धेरवकाशः । सखायौ सखायः । नुमः स एव । इहोभयं प्राप्नोति । अतिसखीनि ब्राह्मणकुलानीति । औत्वस्यावकाशः, अग्नौ वायौ । नुमः स एव । इहोभयं प्राप्नोति । त्रपुणि जतुनीति । तृज्वद्भावस्यावकाशः, क्रोष्ट्रा । क्रोष्टुना । नुमः स एव । इहोभयं प्राप्नोति । कुशक्रोष्टुने अरण्याय । हितक्रोष्टुने वृषलकुलाय । नुम भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः । इष्टवाची परशब्दो

---

भावोऽभ्युपगतो भवतीत्यनेकाल्त्वात्सर्वादेशः तृशब्दः प्राप्नोति । सिद्धमिति । तृजन्तरूपातिदेशादित्यर्थः । आन्तरतम्यादिति । अर्थेन स्वरूपेण चेत्यर्थः । तृज्विषय इति । तृज्वद्भावविषय इत्यर्थः । घरतिरिति । गृघृसेचने इति भौवादिकः । जिघर्तीत्येतत्तु घृक्षरणदीप्त्योरित्यस्य बहुलं छन्दसीत्यभ्यासस्येत्वे कृते रूपम् । रशिलुशी अपठितावपि भाष्यकारवचनाद्धातू बोद्धव्यौ प्रयुक्तानामिदमन्वाख्यानं न त्वस्मादपूर्वशब्दप्रतिपत्तिरिति नियतविषयत्वमुच्यते । अनेनैव न्यायेन अरतेर्भूरित्यादीन्यपि प्रत्याख्येयानि । अबुधबोधनार्थं तु किं चिद्वचनेन प्रतिपाद्यते । न्यायव्युत्पादनार्थं च आचार्यः किं चित्प्रत्याचष्टे न ह्यत्रैकः पन्थाः समाश्रीयते । अतिसखीनीति । अतिक्रान्तः सखा यैरिति बहुव्रीहिः । कुशक्रोष्टुने इति । क्रोष्टुशब्दः

Indira Gandhi National Centre for the Arts

विप्रतिषेधे परं यदिष्टं तद्भवतीति । नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन२* वक्तव्यः । नुमोवकाशः, त्रपूणि । जतूनि । नुटोवकाशः, अग्नीनां वायूनाम् । इहोभयं प्राप्नोति । त्रपूणां जतुनाम् । अचिरादेशस्यावकाशः, तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति । नुटः स एव । इहोभयं प्राप्नोति । तिसृणां चतसृणाम् । तृज्वद्भावस्यावकाशः, क्रोष्ट्रा । क्रोष्टुना । नुटः स एव । इहोभयं प्राप्नोति । क्रोष्टूनाम् । नुड्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः। न वा नुड्विषये रप्रतिषेधात् * । न वैतद्विप्रतिषेधेनापि सिध्यति तिसृणां चतसृणामिति । कथं तर्हि सिध्यति नुड्विषये रप्रतिषेधात् । नुड्विषये रप्रतिषेधो वक्तव्यः । इतरथा हि सर्वापवादः।इतरथा हि सर्वापवादो रादेशः स यथैव गुणपूर्वसवर्णौ बाधते एवं नुटमपि बाधेत । तस्मान्नुड्विषये रप्रतिषेधः * । तस्मान्नुड्विषये रादेशस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति न रादेशो नुटं बाधत इति । यदयं न तिसृचतसृ इति प्रतिषेधं शास्ति नामि दीर्घत्वस्य ॥

चतुरनडुहोरामुदात्तः ॥ ९८ ॥ आमनडुहः स्त्रियां वा * । आमनडुहः स्त्रियां वेति वक्तव्यम् । अनडुही । अनड्वाही ॥

ऋत इद्धातोः ॥ १०० ॥ उपधायाश्च ॥ १०१ ॥ उदोष्ठ्यपूर्वस्य ॥ १०२ ॥ इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन * । इत्वोत्वयोरवकाशः, आस्तीर्णा निपूर्ताः पिण्डाः । गुणवृद्ध्योरवकाशः, चयनं चायकः । लवनं लावकः । इहोभयं प्राप्नोति । आस्तरणमास्तारकः । निपरणं निपारकः । गुणवृद्धी भवतो विप्रतिषेधेन । अयुक्तोयं विप्रतिषेधः । योयं गुणस्येत्वोत्वयोश्च । कथम्।

———————

स्त्रीपुंलिङ्ग इत्यन्यपदार्थस्य नपुंसकत्वं प्रदर्श्यते। क्रोष्टूनामिति । तृज्वद्भावः कृते नुट्यनजादित्वान्न प्राप्नोतीत्यनित्यो नुडागमोपि कृते तृज्वद्भावे सन्निपातपरिभाषया न प्राप्नोतीत्यनित्यः । न वेति । नुड्रेफयोर्विप्रतिषेध उक्तस्तेनेत्यर्थः । स यथैवेति । मध्ये ऽपवादा इत्येतदनाश्रित्यैतदुक्तं, तत्र ह्याश्रीयमाणे गुणं न बाधेत गुणपूर्वसवर्णग्रहणमुपलक्षणम् । ऋतउदित्युत्वस्यापि बाधनात्प्रियतिस्रः स्वमित्यादौ । यदयमिति । न हि रादेशे कृते दीर्घस्य प्राप्तिः । अनजन्तत्वान्नुडभावाच्च । एवं च विप्रतिषेधोऽपि न वक्तव्यः । ज्ञापकादेव नुड्भावात् ॥ ९६ ॥

चतुरनडुहोरामुदात्तः ॥ गौरादिष्वनडुही अनड्वाहीति पाठोऽपौराणिकः । अनडुह्शब्द एव ङीषर्थः पठित इति मत्वा वार्तिकमारब्धमनडुहः स्त्रियां वेति९८

ऋत इद्धातोः ॥ नित्यो गुण इति। कृताकृतप्रसङ्गित्वाल्लक्षणान्तरेण प्राप्नुवन् विधिरनित्य इत्यनाश्रित्य कार्यप्राप्तिमात्रमङ्गीकृत्येदमुक्तम् । लक्षणभेदापेक्षायां तु लक्षणान्तरस्य प्रवृत्तावपि विप्रतिषेधविषयस्य लक्षणस्याप्रवृत्तरया अनित्यत्वमेव१००

Indira Gandhi National
Centre for the Arts

नित्यो गुणः। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥ सिचि वृद्धावोकारप्रतिषेधः * । सिचि वृद्धौ ओकारस्य प्रतिषेधो वक्तव्यः । उदवोढाम् । उदवोढम् । उदवोढेति। स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । ओकाराद्वृद्धिर्विप्रतिषेधेन * । ओत्वं क्रियतां वृद्धिरिति । वृद्धिर्भविष्यति विप्रतिषेधेन । ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वाभावः * । ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वस्याभावः । उदवोढामुदवोढमुदवोढेति । नैष दोषः । उक्तं तत्र वर्णग्रहणस्य प्रयोजनं वृद्धावपि कृतायामोत्वं यथा स्यात् । पुनः प्रसङ्गविज्ञानाद्वा सिद्धम् * । अथ वा पुनः प्रसङ्गादत्र वृद्धौ कृतायामोत्वं भविष्यति । यथा प्रसारणादिषु द्विर्वचनम्। तद्यथा। जग्ले । मम्ले । ईजतुः । ईजुरिति । प्रसारणादिषु पुनः प्रसङ्गविज्ञानाद् द्विर्वचनं भवति । इहापि तर्हि पुनः प्रसङ्गविज्ञानादोत्वं स्यात् । सौढामित्रिरिति । सौढा-

---

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

सिचि वृद्धिः परस्मैपदेषु ॥ सिचि वृद्धाविति । इहानिर्दिष्टस्थानिकत्वाद् इक्परिभाषोपस्थानादोकारस्य नास्ति प्राप्तिः। वदव्रजेत्यत्र त्वच इति स्थानिनिर्देशादिक्परिभाषानुपस्थानादोकारस्य वृद्धिप्रसङ्गे वचनम् । तत्र सिचि वृद्धावित्यनेन प्रकरणं प्रदर्श्यते । अथ वा सिचि या वृद्धिर्वदव्रजहलन्तस्याच इत्यनेन तस्यामित्यर्थः । ननु च वृद्धौ कर्तव्यायां पूर्वत्रासिद्धमिति सिज्लोपादीनामसिद्धत्वात्पूर्वं वृद्ध्या भाव्यम् । ततः सिज्लोपेन ततो ढत्वधत्वष्टुत्वढलोपेषु कृतेष्वोत्वेनेति वृद्धिविधानकाले ओकारस्याभावान्नार्थः प्रतिषेधेन । उच्यते । वृद्धिरङ्गापेक्षत्वात्प्रत्ययविशेषापेक्षत्वाच्च बहिरङ्गा सिज्लोपादयस्तु वर्णनिमित्तत्वादन्तरङ्गा इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति वृद्धेरसिद्धत्वात्पूर्वत्रेतिनिर्दिष्टस्याभावात् सलोपादीनामसिद्धत्वान्नास्ति। पूर्वत्रासिद्धमित्यनेन सलोपादीनामसिद्धत्वादन्तरङ्गलक्षणस्य विषयस्याभावात्तदपेक्षबहिरङ्गत्वस्यापि बहिरङ्गस्याभावादसिद्धं बहिरङ्गमन्तरङ्ग इत्येषा परिभाषा न प्रवर्तते । तदेव परस्परप्रतिबद्धस्य परिभाषाद्वयस्यावृत्तौ परत्वात्सलोपादीन् कृत्वा अन्तरङ्गत्वात् पूर्वमोत्वप्रवृत्तिमभ्युपगम्य चोदयति । वदव्रजेत्यत्र चान्तरङ्गेणान्तग्रहणं तदन्तविधौ सिद्धेन्तग्रहणमौपदेशिकहलन्तप्रतिपत्त्यर्थं मन्यते । प्रत्ययलक्षणेन च सिच्परत्वम् । ओकारादिति । न च अन्तरङ्ग ओकारः बह्वपेक्षत्वात् । उक्तं तत्रेति । ओदस्येत्युच्यमाने तादपि परस्तपर इत्यकारस्य तपरत्वाद्भिन्नकालस्य ग्रहणं न स्यादिति तस्यापि ग्रहणार्थं वर्णग्रहणं कृतमिति तत्सामर्थ्यात्कृतायामपि वृद्धावोत्वं प्रवर्तने प्रवृत्तत्वाच्च लक्षणस्य पुनर्वृद्धेः प्रवृत्तिर्न भवति। सौढामित्रिरिति । सोढा अमित्रो येनेति बहुव्रीहिः । विभज्यान्वाख्याने सढ अमित्र



Indira Gandhi National Centre for the Arts

मित्रौ बहिरङ्गलक्षणत्वात्सिद्धम् * । बहिरङ्गलक्षणा वृद्धिरन्तरङ्गमोत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥

अतो ल्रान्तस्य ॥ २ ॥ अन्तग्रहणं किमर्थम् । न अतो ल्र इत्येवोच्येत । केनेदानीं तदन्तस्य भविष्यति । तदन्तविधिना । इदं तर्हि प्रयोजनम् । अयमन्तशब्दोऽस्त्येवावयववाची । तद्यथा । वस्त्रान्तो वसनान्तः । अस्ति सामीप्ये वर्तते । तद्यथा । उदकान्तं गतः । उदकसमीपं गत इति गम्यते । तद्यः सामिप्ये वर्तते तस्येदं ग्रहणं यथा विज्ञायेत । अङ्गान्तौ यौ रेफलकारौ तयोः समीपे योकारस्तस्य यथा स्यात् । इह मा भूत् । अश्वल्लीत् । अवभ्रीत् ॥

वदव्रजहलन्तस्याचः ॥ ३ ॥ हल्ग्रहणं किमर्थम् । समुच्चयो यथा विज्ञायेत । वदिव्रज्योर्हलन्तस्य चाच इति । नैतदस्ति प्रयोजनम् । अज्ग्रहणादेवात्र समुच्चयो भविष्यति । वदिव्रज्योश्चाचश्चेति । अस्त्यन्यदज्ग्रहणे प्रयोजनम् । वदिव्रजिविशेषणं यथा विज्ञायेत । वदिव्रज्योरच इति । यद्येतावत्प्रयोजनं स्यात् । वदिव्रज्योरत इत्येव ब्रूयात् । अथ वा एतदपि न ब्रूयात् । अत इति वर्तते । इदं तर्हि प्रयोजनम् । हलन्तस्य यथा स्यात् । अजन्तस्य मा भूत् । कस्य पुनरजन्तस्य प्राप्नोति । अकारस्य अचिकीर्षीत् । लोपोऽत्र बाधको भविष्यति । आकारस्य

---

इ इति स्थिते परत्वाद्वृद्धिं मन्यते । बहिरङ्गलक्षणत्वादिति । यत्र विप्रतिषेधस्तत्र पुनः प्रसङ्गविज्ञानम् । इह तु वृद्धिनिमित्ते तद्धिते ऽनुपजाते एव अन्तरङ्गमोत्वं प्रवर्तते ततोऽर्थान्तराश्रयतद्धितनिमित्ता वृद्धिः ॥ १ ॥

अतो अन्तग्रहणमिति । अवयववचनोन्तशब्दस्तदन्तविधिनैव च तदर्थो लब्ध इति मत्वा प्रश्नः । तद्यः सामीप्य इति । अन्तशब्दोपादानादेव सामीप्यार्थस्य ग्रहणम् । अङ्गान्ताविति । लश्च रश्च ल्रूः ततः सुपां सुलुगिति लुक् । तत्र ल्रूणाङ्गस्य विशेषणात्तदन्तविधौ ल्रान्तस्याङ्गस्य योकारस्तस्य वृद्धिर्भवति। ततोन्तस्येत्यकारो विशेष्यते । सन्निधानाच्च ल्रापेक्षं सामीप्यमकारस्य विज्ञायत इति सामर्थ्यादङ्गान्तरेफलकारसमीपस्याकारस्य वृद्धिरित्यर्थः संपद्यते। अश्वल्लीदवभ्रीदिति। अत्राङ्गान्त्यो यो रेफलकारयोः समीपे अकारो नेत्यनेन वृद्धिर्न भवति।हलन्तलक्षणा नेटीति प्रतिषिद्धा ॥ २ ॥

वदव्रजहलन्तस्याचः ॥ हल्ग्रहणं किमर्थमिति । अज्ग्रहणादेव हलन्तस्य सिद्धा वृद्धिरिति प्रश्नः । अङ्गेन चाचो विशेषणाद्यत्र तत्र स्थितस्याचो वृद्धिर्विधीयमाना हलन्तस्य प्रवर्तते । अजन्तस्य मा भूदिति । असति हल्ग्रहणेऽचाङ्गस्य तदन्तविधिर्विज्ञायेत । ततश्चाल्लोपादीन् बाधित्वा वृद्धिः स्यात् । लोपोऽत्रेति। विशेषणविशेष्यभावं कामचारादङ्गेन अज्विशेष्यते । तत्रापाक्षीदित्यादौ सावकाशा वृद्धिरतो लोपेन पूर्वविप्रतिषेधेन बाध्यते ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्य इति । अचा तु अङ्गे विशेष्यमाणे वृद्धिरनवकाशाऽतो लोपं बाधेत । आकारस्य तर्हीति ।

Indira Gandhi National Centre for the Arts

तर्हि प्राप्नोति। अयासीद्वासीत्। नास्त्यत्र विशेषः। सत्यां वा वृद्धावसत्यां वा। सन्ध्यक्षरस्य तर्हि प्राप्नोति। नैव सन्ध्यक्षरमन्त्यमस्ति। ननु चेदमस्ति ढलोपे कृते उदवोढामुदवोढमुदवोढेति। असिद्धो ढलोपः। तस्यासिद्धत्वान्नैतदन्त्यं भवति। अत उत्तरं पठति। हल्ग्रहणमिटि प्रतिषेधार्थम् *। हल्ग्रहणं क्रियते। इटि प्रतिषेधार्थम्। नेटीति प्रतिषेधं वक्ष्यति स हलन्तस्य यथा स्यात्। अजन्तस्य मा भूत्। अलावीदयावीत्। न वानन्तरप्रतिषेधात् *। न वैतत्प्रयोजनमस्ति। किङ्कारणम्। अनन्तरस्य प्रतिषेधात्। अनन्तरं यद्वृद्धिविधानं तत्प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। तच्चानन्त्यार्थम् *। तच्चानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते। कथं पुनर्ज्ञायतेऽनन्तरं वृद्धिविधानमनन्त्यार्थमिति। अन्त्यस्य वचनानर्थक्यात्। अन्त्यस्य वृद्धिविधाने प्रयोजनं नास्तीति कृत्वानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते। अतो विभाषार्थं तर्हीदं वक्तव्यम्। अतो हलादेर्लघोरिति विभाषा वृद्धिं वक्ष्यति सा हलन्तस्य यथा स्यादजन्तस्य मा भूत्। अचिकीर्षीदजिहीर्षीदिति। अतो विभाषार्थमिति चेत्तत्सिद्धं वृद्धेर्लोपबलीयस्त्वात् *। अतो विभाषार्थमिति चेत्तदन्तरेणापि हल्ग्रहणं सिद्धम्। कथम्। वृद्धेर्लोपबलीयस्त्वात्। वृद्धेर्लोपो बलीयान् भवतीति। इदमिह सम्प्रधार्यं वृद्धिः क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाद् वृद्धिः। नित्यो लोपः। कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। अनित्यो लोपः। न हि कृतायां वृद्धौ

---

स्थानेऽन्तरतमपरिभाषाया अत्राप्रवृत्तिं मन्यते। तत्प्रवृत्तौ हि प्रधानं वृद्धिविधानं विफलत्वादुपरुध्यते। नास्त्यत्र विशेष इति। विशिष्टविषयव्यवस्थापनं प्रधानस्य गुणेन कर्तव्यमिति प्रवृत्त्याप्रवृत्त्योर्वृद्धेर्विशेषाभावेऽपि नास्ति प्रधानोपरोध इति प्रवर्तते एवान्तरतमपरिभाषेति भावः। संध्यक्षरस्येति। ओकारस्य औकारः प्राप्नोतीत्यस्ति विशेषः। तस्यासिद्धत्वान्नैतदन्त्यमिति। ननु मा भूदन्त्यमनन्त्यस्याप्यविशेषविधानात्प्राप्नोति। एवं तर्हि पराभ्युपगमनिवृत्तिपरमेतत्। परेण संध्यक्षरस्यान्त्यत्वमभ्युपगतं निवार्यते अनन्त्यत्वेत्वोकारस्य यथा वृद्धिर्न भवति तथाद्य सूत्रे प्रतिपादितम्। हल्ग्रहणमिति। असतीह हल्ग्रहणे नेटीत्यत्राज्ग्रहणानुवृत्तावपि या काचिदचो वृद्धिः प्रतिषिध्यते। यदि त्वज्ग्रहणानुवृत्तिसामर्थ्यादच इत्येवं विहिता या वृद्धिस्तस्याः प्रतिषेधो विज्ञायते तदा न स्याद्दोषः। परिहारान्तरसद्भावात्तु नेदमुक्तं तदाह न वेति। अन्त्यस्य वचनानर्थक्यादिति। क्वचिदन्त्यो विधिभाग् न सम्भवति। अयासीदित्यादौ तु विशेषाभावः। तदेवमिहार्थो हल्ग्रहणस्य नास्तीति मत्वाह अतो विभाषार्थमिति। असति हल्ग्रहणेऽकणीदकाणीदित्यादौ सावकाशा वृद्धिरचिकीर्षीदित्यादौ परत्वाल्लोपं बाधेत। अथ वा अतोऽङ्गस्य विशेषणात्तदन्तस्यैव स्यात्तत्वकाणीदित्यादौ। कृतायामपीति। अतो

Indira Gandhi National Centre for the Arts

प्राप्नोति। परत्वात्सगिड्भ्यां भवितव्यम्। नात्र सगिटौ प्राप्नुतः। किङ्कारणम्। एकाचस्तौ वलीति वा। एकाचः सगिटावुच्येते। अथ वा वलीति तत्रानुवर्तते। किं पुनः कारणमेकाचस्तौ वलीति वा। दरिद्रातेर्मा भूदिति। दरिद्रातेर्न सगिड्भ्यां भवितव्यम्। उक्तमेतत्। दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति। यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसौ सगिड्विधौ। एवमर्थमेव तर्ह्येकाज्ग्रहणमनुवर्त्यमत्र सगिटौ मा भूतामिति। स एष नित्यो लोपः वृद्धिं बाधिष्यते। कं पुनर्भवान् वृद्धेरवकाशं मत्वाह नित्यो लोप इति। अनवकाशा वृद्धिर्लोपं बाधिष्यते। सावकाशा वृद्धिः। कोऽवकाशः। अनन्त्यः। अकणीत्। अकाणीत्। कथं पुनः सत्यन्त्ये ऽनन्त्यस्य वृद्धिः स्यात्। भवेद्योताङ्गं विशेषयेत्। तस्यानन्त्यस्य न स्यात्। वयं तु खल्वङ्गेनाकारं विशेषयिष्यामः। तत्रानन्त्यो वृद्धेरवकाशः। अन्त्यस्य लोपो बाधको भविष्यति। एवं वृद्धेर्लोपबलीयस्त्वम्। एवं वृद्धेर्लोपो बलीयान्। अथ वा आरभ्यते पूर्वविप्रतिषेधः। ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धमिति। सा तर्ह्येषा ऽनन्त्यार्था वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य मा भूत्। आपिपठिषीत्। एतदपि नास्ति प्रयोजनम्। कथम्। हलादेरिति नैषा बहुव्रीहेः षष्ठी हल् आदिर्यस्य सोयं हलादिः हलादेरिति। का तर्हीयं कर्मधारयात्पञ्चमी हल्

———————

लोपे इटि चेत्यनेनेति भावः। अत्र शब्दान्तरप्राप्तिर्लक्षणान्तरप्राप्तिश्च नाश्रिता। कृताकृतप्रसङ्गित्वात्तु लोपाख्यस्य कार्यस्यानाश्रितोपाधिभेदस्य नित्यत्वमाश्रितम्। परत्वादिति। यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति नाश्रितम्। लोपेनात्र वृद्धौ कृतायां न भाव्यमिति तस्यानित्यत्वमित्येतावदाश्रित्योच्यते। वृद्धिरेवापवादनिमित्ततामुपयान्ती लोपं विहन्तीति तदपेक्षया भवत्येव लोपस्यानित्यत्वम्। एकाचस्तौ वलीति। एकीयमतमेतत्। तथा च वाचायतन्यामिति यदाकारलोपो दरिद्रातेर्नास्ति तदाऽदरिद्रासीदिति सगिटावुदाहृतावेव। सिद्धश्चेति। आर्धधातुके विषयभूत एव लोपविज्ञानात्। एवमर्थमिति। अचिकीर्षीदित्यादौ वृद्धौ कृतायां सगिटौ मा भूतामतो लोपस्य नित्यत्वं यथा स्यादित्येवमर्थम्। तत्र नित्यत्वाल्लोपे कृते पारिशेष्याद्धलन्त एव वृद्धेरवस्थानान्नार्थो हल्ग्रहणेन। अताङ्गस्य तदन्तविधिं मत्वाह कं पुनरिति। नित्यादप्यनवकाशं बलवदिति लोपं बाधित्वा वृद्धिः स्याद् इत्यजन्तनिवृत्त्यर्थं हल्ग्रहणं कर्तव्यम्। इतरस्त्विष्टसिद्धये विशेषणविशेष्यभावे कामचाराल्लघुग्रहणसामर्थ्याच्चाङ्गेनाऽज्विशेष्यते इति प्रतिपादयितुमाह भवेदिति। अदरिद्रासीदित्यादिसिद्धये सगिड्विधावेकाच इति यदा नानुवर्त्यते तदा उभयोरनित्ययोः पूर्वविप्रतिषेधे नलोपे कृते हलन्त एव वृद्धिरवतिष्ठते। अथ वा लक्षणभेदाच्छब्दान्तरप्राप्त्या वा लोपस्यानित्यत्वं यो मन्यते तं प्रत्युच्यते। अथ वारभ्यत इति। अपिपठिषीदिति। अल्लोपस्य स्थानिवद्भावादजन्तमेतदङ्गं तत्र

Indira Gandhi National Centre for the Arts

आदिर्हलादिः हलादेः परस्येति । यदि कर्मधारयात्पञ्चमी । अचकासीदत्र प्राप्नोति । सिचा आनन्तर्यं विशेषयिष्यामः । हलादेः परस्य सिच्यनन्तरस्येति । यदि सिचा आनन्तर्यं विशेष्यते । अकणीदकाणीदत्र न प्राप्नोति । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति । अचकासीत् । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेनैकेन । सङ्घातेन पुनर्व्यवधानं भवति । न च भवति । यदि सिचा आनन्तर्यं विशेष्यते । अस्तु बहुव्रीहेः षष्ठी । कस्मान्न भवति । अपिपठिषीदिति । व्यवहितत्वात् । एवं तर्हि अतिदूरमेवेदं हल्ग्रहणमनुसृतम् । हल्ग्रहणमनन्त्यार्थम् । अज्ग्रहणमनिगर्थम् ॥

ह्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ५ ॥ किमर्थं जागर्तेर्वृद्धिप्रतिषेध उच्यते । सिचि वृद्धिर्मा भूदिति । नैतदस्ति प्रयोजनम् । जागर्तेर्गुण उच्यते-

---

यशब्दाकारस्य वृद्धिः प्राप्नोति । हल्ग्रहणान्न भवति । अचकासीदिति । चकारात्हल आदेः परोकारो भवतीति वृद्धिप्रसङ्गः । बहुव्रीहावप्ययं दोषः । ननु चाटिकृते हल आदित्वन्नास्ति । नैष दोषः । सिजन्तस्याडागमः क्रियमाणस्तस्यैव हलादित्वं निवर्तयति । न तु सिचि यदङ्गं तस्य येन नाव्यवधानमिति । ननु वचनादतो लोपो बाध्यते सिचाह्यानन्तर्ये आश्रिते ऽनन्त्यो नैव वृद्धेरवकाशः स्यात् । नैतदस्ति । लघुग्रहणमेवमनर्थकं स्याद् व्यवच्छेद्याभावात् । ततश्चानन्त्यस्य वृध्यवकाशत्वादन्त्यस्य नित्यत्वपूर्वविप्रतिषेधाभ्यां लोपाद्व्यवधान एव वृध्या भवितव्यमिति निर्दिष्टग्रहणादधिकव्यवधाननिवृत्त्यर्थो येननाव्यवधानमित्याश्रीयते । तदेवमुक्तार्थे हल्ग्रहणं न कर्त्तव्यमिति स्थिते इदमुच्यते । एवं तर्हीति । प्रसक्तानुप्रक्त्या प्रयोजनकथनं प्रसङ्गेन हल्ग्रहणमतिसृतं दूरमपगतमित्यर्थः । क्वचिदनुसृतमिति पाठः । तत्रायमर्थो दूरं यातं सदनुसृतं न परित्यक्तम् । एतदुक्तं भवति । अत्रैव सूत्रे हल्ग्रहणस्य प्रयोजनमस्ति तद्दर्शयति हल्ग्रहणमनन्त्यार्थमिति । केचिदाहुः । सति हल्ग्रहणे भवति । अगवीदिति । केचिद्ब्रूत इद्धातोरित्यतो धातुग्रहणानुवृत्त्या अगवीदित्यत्र अतो हलादेर्लघोरिति वृद्धिर्न भवतीत्याहुः । सिचा धातावाक्षिप्ते पुनर्धातुग्रहणाद्यस्य नित्यं धातुत्वं स गृह्यते । तस्मादयमर्थो येन नाव्यधानमित्येकेन हला व्यवधाने सिजचोर्वृद्धिः स्यात् । न तु संयोगेनाराङ्क्षीदित्यादौ । हल्ग्रहणे तु सति वर्णग्रहणे जातिग्रहणात् संयोगान्तस्यापि हल्ग्रहणसामर्थ्याद्भवति। अनन्त्यार्थमित्यस्यायमर्थो ऽनन्त्योपि हल् कथं नाम गृह्येत।अन्तग्रहणन्तु विस्पष्टार्थम् । तदन्तरेणापि तदन्तविधिलाभात् । किन्तु हलोऽच इत्युच्यमानेजन्तस्याङ्गस्य हल्स्थाने वृद्धिरित्ययमप्यर्थ आशङ्क्येत । अज्ग्रहणमनिगर्थमिति । अन्यथेक्परिभाषोपस्थानादभैत्सीदित्यादावेव स्यान्नत्वपाक्षीदित्यादौ ॥ ३ ॥

ह्यन्त ॥ किमर्थमिति । गुणेन बाधिता वृद्धिर्न प्राप्नोतीति मन्यते सिचि वृद्धिर्मा भूदिति । अतोल्रान्तस्येत्यनेनेति भावः । इतरस्तु सिचि वृद्धिरिति प्राप्तिरने-

Indira Gandhi National Centre for the Arts

वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति । गुणे तर्हि कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति । नेटीति तस्याः प्रतिषेधो भविष्यति । इयं तर्हि प्रतिषेधोत्तरकाला वृद्धिरारभ्यते अतो ल्रान्तस्येति। अपर आह । कक्ष्यया कक्ष्या निमातव्या सिचि वृद्धिश्च प्राप्नोति गुणश्च । गुणो भवति। गुणे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति। नेटीति च तस्याः प्रतिषेधोत्तरकालमतो हलादेर्लघोरिति विभाषा वृद्धिः प्राप्नोति । न च किञ्चित् । अतो ल्रान्तस्येति च वृद्धिः प्राप्नोति । न च किञ्चित् ॥

नेड् वशि कृति ॥ ८ ॥ किमर्थं पुरस्तात्प्रतिषेध उच्यते । न विध्युत्तरकालः प्रतिषेधः क्रियते । तद्यथा । अन्यत्रापि विध्युत्तरकालाः प्रतिषेधा भव-

---

नोक्ता सा चायुक्तेति मत्वाह नैतदस्तीति । वृद्धिप्रतिषेधविषयादन्यत्र सामान्यलक्षणेन गुणस्य सिद्धत्वाज्जाग्रोऽविचिण्णल्ङित्स्विति गुणविधानं वृद्धिप्रतिषेधविषयार्थं सम्पद्यते । गुणं तर्हीति । अङ्गवृत्त इत्येतत्तु निष्ठितत्वदुर्ज्ञानत्वादनाश्रितम्। यदि तर्हि गुणे रपरत्वे च कृते लक्षणान्तरेण वृद्धिर्भवति तदा जागरकइत्यादावजन्तलक्षणां वृद्धिं बाधित्वा गुणे प्रवृत्ते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोति । नैष दोषः । चिण्णलोर्गुणप्रतिषेधाल्लिङ्गादुपधालक्षणा वृद्धिर्न भवतीत्यवसीयते । अन्यथा चिण्णलोर्गुणरपरत्वयोः कृतयोरुपधालक्षणया वृद्ध्या सिध्यति रूपमिति प्रतिषेधं न विदध्यात् । यदि च गुणे कृते वृद्धिमात्राप्रवृत्तं लिङ्गं चिण्णलोः प्रतिषेध आश्रीयते तदा जागृग्रहणं शक्यमकर्तुम् । इयं तर्हीति । आर्थोयमुत्सर्गापवादयोः क्रमः, नेटीति प्रतिषेधे प्राप्ते ऽतो ल्रान्तस्येति वृद्धेरारम्भात् प्रतिषेधोत्तरकालेत्युच्यते । पाठक्रमेण पूर्वकालापि । अपर आहेति । पूर्वोक्त एवार्थो वाचा युक्त्यन्तरेणोच्यते । कक्ष्ययेति । कक्ष्यां विशिष्टदेशस्थं तुलासूत्रं वणिजो व्यवहरन्ति । अत्र तु कक्षेव कक्ष्या । यथा कक्ष्या द्रव्याणां गुरुत्वं परिच्छिनत्ति तथा शास्त्रं कार्याणां सामान्यविशेषावस्थाभावेन बलाबलं व्यवस्थापयति । हर्म्यावस्थावचनो वा कक्ष्याशब्द उपचारादिहावस्थानवचनस्तत्र किं कार्यं सामान्यावस्थं किं विशेषावस्थमित्येवं कक्ष्या कक्ष्या न मातव्येत्यर्थः। बलं वा कक्ष्या यथा तुल्यकक्ष्याविति । तत्र जागृ इस् इत् इति स्थिते वार्णादाङ्गं विधिर्बलीयानिति यणादेशं बाधित्वा सार्वधातुकार्धधातुकयोरिति गुणः प्राप्तस्तमपवादत्वाद्बाधित्वा सिचि वृद्धिरिति वृद्धिः प्राप्ता तामपवादत्वाद्बाधित्वा जाग्र इति गुणः प्राप्नोति। भाष्यकारस्तु दुर्बलत्वादुत्सर्गं परिहृत्य वृद्धेरारभ्य गणयति । न च किं चिदिति । तस्याः पाक्षिक्या वृद्धेरपवादभूतं न किंचिद्गुणविधानमस्ति यतो जागृग्रहणमकर्तव्यं स्यात् । गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् । पुनर्वृद्धिनिषेधश्च यथापूर्वाः प्राप्तयो न वेति संग्रहः श्लोकः ॥ ५ ॥

नेड्वशि ॥ प्राप्तिपूर्वकत्वात्प्रतिषेधस्यार्थात् पूर्वं विधिप्रकरणं पठितव्यं पश्चात्प्रातिषेधप्रकरणं क्रमव्यतिक्रमे प्रयोजनाभावादिति मत्वा पृच्छति किमर्थमिति । त-

न्ति। क्रान्यत्र। कर्तरि कर्मव्यतिहारे, न गतिहिंसार्थेभ्य इति। देवताद्वन्द्वे च, नेन्द्रस्य परस्य। तत्रायमप्यर्थः। द्विरिड्ग्रहणं न कर्तव्यं भवति। प्रकृतमनुवर्तते। नैवं शक्यमिडर्थं सार्वधातुकग्रहणं लिङः सलोपे सन्निहितं तद्विच्छिद्येत। यदि पुनर्न वृद्भ्यश्चतुर्भ्य इत्यत्रैवोच्येत। किं कृतं भवति। विध्युत्तरकालश्चैव प्रतिषेधः कृतो भवति द्विश्चेड्ग्रहणं न कर्तव्यम्। इडर्थं च सार्वधातुकग्रहणं लिङः सलोपे सन्निहितं भवति। तत्रायमप्यर्थः। द्विःप्रतिषेधो न कर्तव्यो भवति। नैवं शक्यमिह हि तुष्टोथ दुद्रोथेति। ऋतो भारद्वाजस्येत्येतस्मान्नियमादिट् प्रसज्येत। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्येष योगः प्रतिषेधार्थो भविष्यति। यद्येष योगः प्रतिषेधार्थः। य एतस्माद्योगादिट् परिप्राप्यते नियमात्स न सिध्यति। पेचिव पेचिम। शेकिव। शेकिम। एवं तर्हि कृसृभृ इत्येषां ग्रहणं नियमार्थं भविष्यति। स्तुद्रुस्रुश्रुवां प्रतिषेधार्थम्। वृङ्वृञोर्ज्ञापकार्थम्। एवमपि सामान्यविहितस्यैवेटः प्रतिषेधो विज्ञायेत। विशेष-

---

त्रायमप्यर्थ इति। न्याय्यक्रमाश्रयणादुपचयोऽप्यस्तीत्यर्थः। इडर्थमिति। रुदादिभ्यः सार्वधातुक इत्यत्र यत्सार्वधातुकग्रहणमिड्विधावुपात्तं तदानन्तर्यात् लिङः सलोपोऽनन्त्यस्येत्यत्र शक्यते अनुवर्तयितुम्। यदि त्विड्विधेः परस्तादीडजनोर्ध्वे चेत्यस्यानन्तरं नेड्वशिकृतीत्यादि प्रतिषेधप्रकरणं क्रियेत तदा तेन विच्छिन्नत्वात्सार्वधातुकग्रहणं सलोपविधौ नानुवर्तेत। तुष्टोथेति। यथा पपिथ ययिथेत्यादौ आर्धधातुकस्येतीट् प्राप्त एकाच इति प्रतिषिद्धः क्रादिनियमात्पुनः प्राप्तोऽचस्तास्वत्थलीति प्रतिषिद्धस्तत्र ऋत एव भारद्वाजस्य प्रतिषेधो नान्येभ्य इति नियमात् पक्षे इड् भवति। एवं स्तुद्रुस्रुश्रुभ्योऽपि प्राप्नोतीत्यर्थः। तथाहि। क्रादिनियमस्य बाधकमचस्तास्वदिति प्रतिषेधमृतो भारद्वाजस्येति नियमो बाधते स कथं क्रादिप्रतिषेधं न बाधते। ननु च मध्येऽपवादा इति न्यायेन भारद्वाजनियमोऽचस्तास्वदिति प्रतिषेधं बाधिष्यते न तु क्रादिप्रतिषेधम्। नैतदस्ति। पाक्षिक एष परिहारो भेदेन लक्षणापेक्षयाम्। कार्यमात्रे तु बाध्यत्वेनापेक्षिते नैष परिहारः। किं च न वृद्भ्यश्चतुर्भ्य इत्यस्मादूर्ध्वमिदं प्रकरणं पठितव्यमिति प्रक्रान्तं न तु ऋतो भारद्वाजस्येत्यस्मात्परमिति। ततो भारद्वाजनियमात् पूर्वमिदं न तु परमिति कुतो मध्येऽपवादा इति न्यायावतारः। व्याप्तिन्यायाश्रये च सर्वप्रतिषेधबाधेन भाव्यम्। यद्येष इति। थलि भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधे विधेये सम्भवति सति नियमार्थत्वस्यानुपपत्तिः। एवं तर्हीति। योगैकदेशः पूर्वं योगशब्देनोक्तश्चोदकेन तु समस्त एव योगः प्रतिषेधार्थोऽनेनोक्त इति मत्वा चोदितं यद्येष इति। तत्र क्रादीनामृकारान्तत्वान्नास्ति भारद्वाजनियमादिट्प्राप्तिरिति तेषां नियमार्थं ग्रहणम्। स्तुद्रुश्रुस्रुवां तु भारद्वाजनियमात् क्रादिनियमाच्च प्राप्तस्येटः प्रतिषेधार्थम्। वृङ्वृञोरिति। एकयोगस्था अपि नावश्यमेकधर्माणः तत्र प्रत्ययाश्रयोऽपीट्प्रतिषेधो नियम्यत इति वृङ्वृञ्ग्रहणेन ज्ञाप्यते। एवमपीति। स्तुद्रुस्रुश्रुभ्यः प्रतिषेधो येननाप्राप्तिन्यायेन

Indira Gandhi National Centre for the Arts

विहितश्चायं थलीति। पुरस्तात्पुनः प्रतिषेधे सति अनारभ्यापवादोयं भवति। तेन यावानिण् नाम तस्य सर्वस्य प्रतिषेधः सिद्धो भवति। यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियत इति। पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते। कथम्। इदमस्ति नेड्वशि कृतीति। ततो वक्ष्यामि आर्धधातुकस्य वलादेरिति। इडित्यनुवर्तते नेति निवृत्तम्। अथ कृद्ग्रहणं किमर्थम्। इह मा भूत्। बिभिदिव बिभिदिमेति। नैतदस्ति प्रयोजनम्। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्येतस्मान्नियमादत्रेड् भविष्यति। नात्र तेन परिप्रापणं प्राप्नोति। किङ्कारणम्। प्रकृतिलक्षणस्य प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः। उभयोः स प्रत्यारम्भः। कथं ज्ञायते। वृङ्वृञोर्ग्रहणात्। कथं कृत्वा ज्ञापकम्। इमौ वृङ्वृञौ उदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति। पश्यति त्वाचार्य उभयोः स प्रत्यारम्भ इति ततो वृङ्वृञोर्ग्रहणं करोति। किञ्च। न खल्वपि कश्चिदुभयवान् प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च। ततः किम्। तुल्यजातीये असति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति। इदं तर्हि

---

क्रादिनियमप्राप्तमेवेटं निवर्तयेत् न तु भारद्वाजनियमप्राप्तमित्यर्थः। स हि थल्येव प्राप्तः ततश्चासौ स्यादेव। पुरस्तादिति। इड्मात्रमनाश्रितविषयविशेषमनारभ्याधीतेन प्रतिषेधेन बाध्यत इत्यर्थः। यदि तु भारद्वाजनियमात्परः प्रतिषेधः क्रियते। मध्येपवादा इति चाश्रीयते। तदा विप्रतिषेधेन सिध्येदेव प्रतिषेधः। अथ कृद्ग्रहणमिति। अकृति क्रादिनियमात् इट् भविष्यतीति मत्वा प्रश्नः। नात्रेति। भिन्नजातीयत्वादिति भावः। क्रादिनियमो हि प्रकृत्याश्रयप्रतिषेधविषयमेवेटं प्रापयेत्। बिभेदिथेति। नेड्वशि कृतीति तु प्रत्ययाश्रयः प्रतिषेधः तद्विषये क्रादिनियमाभावात् इड् न भवेत्। बिभिदिवेति कृद्ग्रहणमकृति प्रतिषेधनिवृत्त्यर्थम्। वृङ्वृञोर्ग्रहणादिति। सामान्यग्रहणं विशेषनिष्ठं सम्पद्यते इति प्रदर्शनार्थं वृङ्वृञोरिति भेदेनोपादानम्। वृग्रहणस्य प्रयोजनं ववृवहे इत्यादाविड् मा भूदिति। यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत न प्रत्ययाश्रयं तदा नेड्वशि, श्रुचक्रः कितीति योगद्वयेन यथायोगं सिद्धत्वात्प्रतिषेधस्य नार्थो वृग्रहणेन तत् क्रियमाणं प्रत्ययाश्रयस्यापि प्रतिषेधस्य निवृत्तिं ज्ञापयति। ननु थलर्थं वृग्रहणं स्यात् तस्य ह्यकित्त्वादवशादित्वाच्चेट्प्रतिषेधाप्राप्तिः। नैतदस्ति। ववर्थेति निगम इति निपातनं क्रियमाणं भाषायां ववरिथेति इटमभ्यनुजानाति। स्यादेतत्। तुल्यजातीय एव प्रतिषेधो नियमेन बाध्यताम्। एकैकाश्रयस्तु कथं बाध्येत इत्याशङ्क्याह न खल्वपीति। कृसृभृभ्यो लिटि प्रकृत्याश्रय एकाच उपदेशेऽनुदात्तादितीट् प्रतिषेधः प्राप्नोति। केवलायाः प्रकृतेः शब्देनोपादानात्। अथोच्येत चकृषे इत्यादौ श्रुचकः कितीतीट्प्रतिषेधः प्राप्नोति स चोभयवान् प्रकृतिप्रत्ययविशेषाश्रयणादिति। तत्र। अत्राप्यन्तरङ्गत्वात्प्रकृत्याश्रय एव प्रतिषेधः। तस्यैव नियमे विज्ञायमाने वृग्रहणम्-

Indira Gandhi National Centre for the Arts

प्रयोजनम् । इह मा भूत् । रुदिवः रुदिमः । एतदपि नास्ति प्रयोजनम् । उपरिष्टाद्योगविभागः करिष्यते । आर्धधातुकस्य । यदेतदनुक्रान्तं तदार्धधातुकस्य द्रष्टव्यम् । तत इड् वलादेरिति। तत्र त्वेतावद् द्रष्टव्यम् । यदि किञ्चित्तत्रान्यदपि आर्धधातुकग्रहणस्य प्रयोजनमस्ति। अथ न किञ्चिद् । इह वा कृद्ग्रहणं क्रियते तत्र वार्धधातुकग्रहणम् । कोन्वत्र विशेषः । नेड्वरमनादौ कृति * । वरमनादौ कृति इट्प्रतिषेधं प्रयोजयति । ईशिता ईशितुम् । ईश्वरः । व । र, दीपिता दीपितुम् । दीप्रम् । र । म, भसिता भसितुम् । भस्म । न, यतिता । यतितुम् । यत्नः । अथान्ये ये वशादयः तत्र कथमुणादयो ऽव्युत्पन्नानि प्रातिपदिकानि॥

**तितुत्रतथसिसुसरकसेषु च ॥ ९ ॥** तितुत्रेष्वग्रहादीनामिति वक्तव्यम् । इह मा भूत् । निगृहीतिः । उपस्निहितिः । निकुचितिः ।निपठितिरिति॥

**एकाच उपदेशेनुदात्तात् ॥ १० ॥** एकाज्ग्रहणं किमर्थम् । एकाज्ग्रहणं जागर्त्यर्थम् । एकाज्ग्रहणं क्रियते । जागर्तेरिट्प्रतिषेधो मा भूत् । जागरिता जागरितुम् । नैतदस्ति प्रयोजनम् । उपदेशे ऽनुदात्तादित्युच्यते । जागर्तिश्चोपदेशे उदात्तः।न ब्रूमः, इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्तव्यमिति। किं तर्ह्युत्तरार्थम्। श्र्युकः कितीतीट्प्रतिषेधं वक्ष्यति स जागर्तेर्मा भूदिति । जागरितः जागरितवानिति । एतदपि नास्ति प्रयोजनम् । जागर्तेर्गुण इत्युच्यते । वृद्धिविषये प्रतिषे-

---

नर्थकं स्यात्तस्मात्प्रत्ययाश्रयोपि प्रतिषेधो नियम्यत इत्यत्र वृग्रहणं लिङ्गम् । प्रकृतकृत्सुप्रेक्षया च न खल्वपीत्युच्यते न तूभयवाप्यास्ति प्रतिषेधः । रुदिवः रुदिम इति । असति कृद्ग्रहणे रुदादिभ्यः सार्वधातुक इत्यस्येटोत्र प्रतिषेधः स्यात्तस्य त्ववशादिरवकाशो रोदित्यादौ । यदेतदिति । प्रतिषेधप्रकरणमित्यर्थः । ततः सार्वधातुक इट्प्रतिषेधाभावः । यद्यन्यार्थमार्धधातुकग्रहणं कर्तव्यं तदा योगविभागेनेष्टं साध्यते । यदा त्वस्यान्यप्रयोजनाभावः । तदा लाघवार्थं कृद्ग्रहणमेव कर्तव्यम् । प्रत्याख्यास्यते च तत्रार्धधातुकग्रहणम् । भस्मेति । नन्वत्रैव वक्ष्यत्युणादय इति। ततश्चाव्युत्पत्त्याश्रयणादेवेड् न भविष्यति । अन्येभ्योपि दृश्यत इत्यनेनात्र मनिन् प्रत्यय इत्यदोषः ॥ ८ ॥

तितुत्र ॥ निकुचितिरिति । कुञ्चे क्तिच्नावादिभ्य इति क्तिन् । कुच शब्दे तार इत्यस्माद्वा स्त्रियां क्तिन् ॥ ९ ॥

एकाच उप ॥ एकाज्ग्रहणमिति । एकाचामेवानुदात्तत्वप्रतिज्ञानादनुदात्तग्रहणेनैवातिप्रसङ्गनिवारणात्प्रश्नः । इतर उत्तरार्थत्वमभिप्रेत्याह एकाज्ग्रहणं जागर्त्यर्थमिति । स जागर्तेर्मा भूदिति । जागर्तिरेवोगन्तो ऽनेकाच् सम्भतीति तन्निवृत्त्यर्थमेकाज्ग्रहणम् । ऊर्णोतेस्तु नुवद्भावात्प्रतिषेधो भवत्येव । चोदकः प्रतिषेधाप्राप्तिकारणमन्यद्दर्शयति एतदपीति । स बाधक इति । इट्प्रतिषेधस्येत्यर्थः ।

Indira Gandhi National Centre for the Arts

धविषये च स बाधको भविष्यति । तत्र गुणे कृते रपरत्वे ऽनुगन्तत्वादिट्प्रतिषेधो न भविष्यति । ननु च उपदेशाधिकारात्प्राप्नोति । उपदेशग्रहणं निवर्तयिष्यते । यदि निवर्तते । स्तीर्त्वा पूर्त्वा इत्वोत्वयोः कृतयोः रपरत्वे च ानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । नैष दोषः आनुपूर्व्यात्सिद्धमेतत् ॥ नात्राकृत इट्प्रतिषेधे इत्वोत्वे प्राप्नुतः । किङ्कारणम् । नक्त्वासेडिति कित्त्वप्रतिषेधात् । इदं तर्हि आतिस्तीर्षति । निपुपूर्षति । इत्त्वोत्त्वयोः कृतयोरपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवं श्रुयकः कितीतीट्सनि वेत्येवं भविष्यति । इदं तर्हि प्रयोजनम् । आस्तीर्णं निपूर्ताः पिण्डाः । इत्वोत्वयोः रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवम् । इट्सनि वेति सनि विभाषा यस्यविभाषे-

---

उपदेशाधिकारादिति । अन्यार्थमुपदेशग्रहणमनुवर्त्यमुपदेशे च जागर्तिरुगन्तो भवतीति प्रतिषेधप्रसङ्गः । इतर उपदेशाधिकारस्य प्रयोजनान्तरमपश्यन्नाह उपदेशग्रहणं निवर्तिष्यत इति । स्तीर्त्वा पूर्त्वेति । इत्वादिषु कृतेष्वनुगन्तत्वात् स्तृत्वेत्यादौ च सांप्रतिकोगन्तसम्भवं भूतपूर्वगत्याश्रयणस्यायुक्तत्वादिट् प्रतिषेधो न स्यादुपदेशाधिकारात्तूपदेशउगन्तत्वात्संप्रत्यनुगन्तत्वे अपि प्रतिषेधः प्रवर्तते । आनुपूर्व्यादिति । स्तृत्वा इति स्थिते कित्त्वनिषेधाश्रय इडिडाश्रयश्च कित्त्वनिषेध इति प्रागेव संनिहितं कित्त्वमाश्रित्येट्प्रतिषेधः प्रवर्तते तत इत्वादीनीत्यर्थः । अत्र चोद्यते । कृतेष्वित्वादिषु प्रतिषेधनिमित्तागन्तत्वोपगमात्पुनरिट् प्राप्नोति तस्मिंश्च सति न क्त्वासेडिति कित्त्वप्रतिषेधाद् गुणे सति स्तेरित्वेति प्राप्नोति । नैष दोषः । पूर्वमेव प्रसक्तस्येड्उलक्षणप्रतिषेधेन बाधितत्वाल्लक्ष्यस्य संस्कृतत्वाद्भ्रष्टावसरत्वात्पुनः प्रवृत्त्यभावात् । आतिस्तीर्षतीति । श्रुयकः कितीत्यत्र विशिष्टानुबन्धोपलक्षितः प्रत्यय आश्रितः सनिग्रहगुहोश्चेत्यत्र तु साक्षादिति विशेषमाश्रित्यास्योपन्यासः । अत्रेत्वरपरत्वयोः कृतयोरनुगन्तत्वादिट्प्रतिषेधो न स्यादुपदेशाधिकारात्त्वनुगन्तावस्थायामपि भवति । सनिग्रहगुहोश्चेत्यत्र चशब्देनोगनुकृष्यते श्रुयकः कितीत्यनेन तत्र प्रतिषेधो नास्ति । इट्प्रतिषेधाश्रयत्वाज्झलादित्वस्य झलादित्वाश्रयत्वात्कित्त्वस्य कित्त्वाश्रयत्वादिट्प्रतिषेधस्येति इतरेतराश्रयप्रसङ्गात् । इट्सनिवेति । स्तृस इति स्थिते ऋकारान्तावस्थायामेव पक्षइडभावः । तथाहि इड्विकल्पस्य निरवकाशत्वात् सांप्रतिकाभावे भूतपूर्वगत्याश्रयणादनित्यत्वाद्वा न तावद् गुणस्य प्रवृत्तिः । तत्र इट्पक्षे वृतो वेति दीर्घविकल्पे रूपद्वयम् । आतिस्तरीषतीति इडभावपक्षे तु आतिस्तीर्षतीति । अत्र चोद्यते । इडभावपक्षे कित्त्वाद् गुणे निषिद्धे इत्वरपरत्वयोः कृतयोः पुनरिट्प्राप्नोति । न चेट्सनि वेति विकल्पविधानमनर्थकम् । ऋकारान्तावस्थायां पक्षे इडभावे कित्त्वे सति इत्वरपरत्वयोः कृतयोरिटि सति गुणे च सति आतिस्तेरिषतीति रूपसम्भवादनार्थत्वाद्विकल्पस्य । अत्र समाधिः । नित्यमिटि प्राप्ते विकल्पस्य विधानाद्भ्रष्टावसरत्वाल्लक्ष्यस्य सिद्धत्वात्पुनरिड्लक्षणं न प्रवर्तते । आस्तीर्णमिति । कृतेऽकृते चेटि किदेव निष्ठेत्यनेन विशेषणास्योपन्यासः । यस्य विभाषेति । ननुऋ-

Indira Gandhi National Centre for the Arts

तिप्रतिषेधौ भविष्यति । इहार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणम् । वध इट्प्रतिषेधो मा भूत् । वधिषीष्टेति । एतदपि नास्ति प्रयोजनम् । क्रियमाणेपि वै एकाज्ग्रहणे वध इट्प्रतिषेधः प्राप्नोति वधिषीष्टेति । किङ्कारणं वध इट्प्रतिषेधः । सन्निपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् । सन्निपाते चैव हि वधिरेकाच् श्रूयते प्रकृतिश्चास्यानुदात्ता । किं पुनः कारणमेवं विज्ञायते उपदेशे ऽनुदात्तादेकाचः श्रूयमाणादिति । यङ्लोपार्थम् । यङ्लोपे मा भूदिति । बेभिदिता । बेभिदितुम् । चेच्छिदिता । चेच्छिदितुम् । एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्र्यादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य * । एकाच उपदेशे ऽनुदात्तादिति उपदेशवचनमनुदात्तविशेषणं चेत्क्र्यादिभ्यो लिटि नियमानुपपत्तिः । किङ्कारणम् । अप्राप्तत्वात्प्रतिषेधस्य । द्विर्वचने कृते उपदेशे ऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति । असतीट्प्रतिषेधे नियमो नोपपद्यते। असति नियमे को दोषः । तत्र पचादिभ्य इड्वचनम् *। तत्र पचादिभ्य इड् वक्तव्यः । पेचिव । शेकिम । सनश्चेट्प्रतिषेधः * । सनश्चेट्प्रतिषेधो वक्तव्यः ।

---

कारान्तस्य सति विकल्पविधानान्नित्यत्वादित्वोत्वयोः कृतयोरनृकारान्तत्वाद्यस्य विभाषेति प्रतिषेधाप्रसङ्गः।नैष दोषः। सति विकल्पविधाने ऋकारान्तत्वस्यापेक्षणेऽपि यस्य विभाषेत्यत्र यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते न तु विकल्पकारणमृकारान्तत्वम् । भवति चेत्वोत्वयोः कृतयोरपि स एव धातुरिति प्रवर्त्तते प्रतिषेधः।तदेवमुपदेशग्रहणस्य उत्तरत्रानुपयोगादनुवर्तनाज्जागरित इत्यत्र गुणरपरत्वयोः कृतयोरनुगन्तत्वाच्छ्रयुकः किताति प्रतिषेधाभावादुत्तरार्थमेकाज्ग्रहणं न कर्तव्यम् । वध्यर्थमिति । वधशब्दोऽकारान्तोऽनेकाजादेशग्रहणमनुदात्तस्यैव विशेषणं नत्वेकाच इति मन्यमान आह एतदपीति । वधिषीष्टेति । आशिषि लिङ् कर्मण्यात्मनेपदमतोलोप इत्यकारलोपे कृते वधेरेकाजकारोच्चारणं त्ववधीदित्यादौ हलन्तलक्षणवृद्धिनिवृत्त्यर्थं स्यात् । प्रकृतेश्चानुदात्तत्वादिति । यस्मात्प्रकृतिर्हन्तिरनुदात्ता तस्याश्चोपदेशावस्था गृह्यते । सैव चानेन रूपेणावस्थितेति संप्रत्ययस्ततः प्रतिषेधः प्राप्नोति। ततश्च कृतमप्येकाज्ग्रहणमनर्थकम् । किं पुनरिति । उभयविशेषणमुपदेशग्रहणमस्तु । ततो वधेरुपदेशे ऽनेकाच्त्वात्प्रतिषेधाप्रसङ्गः । बेभिदितेति । ङ्कि प्रयोगे द्विर्वचने भवति भिदिरुपदेशे ऽनुदात्त उपदेशे एकाजित्यतो लोपे कृते संप्रत्यनेकाच्त्वे ऽपि प्रतिषेधप्रसङ्गः । श्रूयमाणे त्वेकाच्याश्रीयमाणे आवृत्तिसंख्ययैकत्वसंख्याया बाधनात्प्रतिषेधाभावः। समुदायस्य चैकाङ्गसंज्ञा न तु प्रत्येकमित्येकाचोङ्गादित्याश्रयणात्परभिद्रूपाश्रयोऽपि प्रतिषेधो न भवति । अनुदात्तविशेषणं चेदिति । उभयविशेषणेपि अनुदात्तविशेषणं भवतीति सामर्थ्यादनुदात्तस्यैव यदि विशेषणमित्यवधारणं द्रष्टव्यम् । असति नियम इति । क्रादिसूत्रं प्रतिषेधार्थमस्तु । एवमपि चकृव इत्यादि सिध्यति बिभिद्विवेत्यादौ च एकाच्त्वाभावात्प्रतिषेधा-

Indira Gandhi National Centre for the Arts

बिभित्सति । चिच्छित्सति ।' द्विर्वचने कृते उपदेशे ऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति। इह च नीतः। तत्वे ऽनच्कत्वादिट्प्रतिषेधो न प्राप्नोति। नैष दोषः। आनुपूर्व्या सिद्धमेतत्। नात्र कृते इट्प्रतिषेधे तत्वं प्राप्नोति। किङ्कारणम्। ति कितीत्युच्यते। यदप्युच्यते एकाच उपदेशे ऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृसादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति। मा भून्नियमः। ननु चोक्तं तत्र पचादिभ्य इड्वचनमिति। नैष दोषः। उक्तं तत्र थल्ग्रहणस्य प्रयोजनम्। समुच्चयो यथा विज्ञायेत। थलि च सेटि क्ङिति च सेटीति। यदप्युच्यते सतश्चेट्प्रतिषेध इति। उभयविशेषणत्वात्सिद्धम्। उभयमुपदेशग्रहणेन विशेषयिष्यामः। उपदेशे ऽनुदात्तादुपदेशे एकाच इति। यङ्लोपे कथम्। यङ्लोपे च तदन्तद्विर्वचनात्। सन्यङन्तस्य स्थाने द्विर्वचनं तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स भवति यः स एकाच् उपदेशे अनुदात्तः। अथापि द्विःप्रयोगो द्विर्वचनमेवमपि न दोषः। न ह्यस्य भिद्युपदेश उप-

---

भावादिट् सिध्यतीति भावः। पेचिवेति। एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादितीट्प्रतिषेधप्रसङ्गः। नीत्त इति। ददातेः क्तप्रत्ययेऽच उपसर्गात्त इति तत्वे कृतेऽनच्कत्वादेकाच्त्वाभावादिट्प्रतिषेधाप्रसङ्गः। तत्वस्य द्विपदाश्रयत्वाद् बहिरङ्गत्वादन्तरङ्ग इट्प्रतिषेधेऽसिद्धत्वादिति परिहारान्तरस्य सङ्क्षावान्नाश्रितः। तदेव दर्शयति। आनुपूर्व्या सिद्धमिति। थल्ग्रहणस्येति। आरम्भसामर्थ्यादत एकहल्मध्ये ऽनादेशादेर्लिटीत्यनुवर्तनाच्चान्तरेणापि थल्ग्रहणं थल्येव सेट्येत्वाभ्यासलोपयोः सिद्धत्वात् थल्ग्रहणं क्ङिता समुच्चयार्थम्। ततश्चेटि कृते एत्वाभ्यासलोपयोर्विधाने पेचिवेत्यादीनि रूपाणि सिध्यन्तीति नार्थः क्रादिनियमेन। उभयविशेषणत्वादिति। एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुगृहीतं भवति। एतदर्थं चोपदेश इति मध्ये पठितम्। उभयविशेषणे च क्रादिनियमात्पचादिभ्य इटः सिद्धत्वात्थलि च सेटीत्यत्र थल्ग्रहणं विस्पष्टार्थम्। सन्यङन्तस्येति। सन्यङोरिति षष्ठी। तत्र भिद्यशब्दस्य प्रकृतिप्रत्ययसमुदायस्य सर्वे सर्वपदादेशा इति शब्दान्तर आदेशे कृते ऽयं धातुरयं प्रत्यय इति विभागाभावादिट्प्रतिषेधाभावः। नन्वेवं बिभित्सतीत्यत्रापि प्रतिषेधाप्रसङ्गः। इडप्यस्मिन् पक्षे न प्राप्नोतीत्यदोषः। अथ वात्रासमाश्वासात्पक्षान्तराश्रयेणाह अथापीति। न ह्यस्येति। आचार्यस्य। भिद्युपदेशाश्रये ह्येकाच्त्वादनुदात्तत्वाच्चेट्प्रतिषेधः स्यात् यङन्तस्य तूपदेशे गृह्यमाणे तस्यानेकाच्त्वादुदात्तत्वाच्च प्रतिषेधाप्रसङ्गः। ननु च प्रत्यक्षमाख्यानमुपदेश इत्युक्तम्। यङादीनां च प्रत्ययानामुपदेशोऽस्ति न तु तदन्तानां शब्दातामनुमेयरूपाणाम्। नैष दोषः। सङ्कीर्णावुद्देशोपदेशावित्यपि तत्रोक्तमत एव चेत्संज्ञायां करणसाधनउपदेशशब्दः शास्त्रवाच्याश्रितः। इह तु भावसाधन आश्रीयते। तेन प्रतिपादनमात्रं गुणैर्वा प्रत्यक्षेण वोपदेश उच्यते। यङ्विधानद्वारेण च बेभिद्य

देशः। किं तर्हि बेभिद्युपदेश उपदेशः। अथापि भिद्युपदेश उपदेश एवमपि न दोषः। अकारेण व्यवहितत्वान्न भविष्यति। ननु च लोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। न सिध्यति। पूर्वविधौ स्थानिवद्भावः। न चायं पूर्वस्मादपि विधिः पूर्वविधिः। कः पुनरुपदेशो न्याय्यः। यः कृत्स्नः। कश्च कृत्स्नः। य उभयोः। यदि तर्हि य उभयोः स कृत्स्नः स च न्याय्यः। वध इट्प्रतिषेधः प्राप्नोति वधिषीष्टेति। नैष दोषः। आद्युदात्तनिपातनं करिष्यते। स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति। एवमपि उपदेशिवद्भावो वक्तव्यः। यथैव हि स निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत। आवधिषीष्टेति। नैष दोषः। आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु। तत्रार्धधातुकसामान्ये वधिभावे कृते सतिशिष्टत्वात्प्रत्ययस्वरो भविष्यति। अथ के पुनरनुदात्ताः। आदन्ताः। अदरिद्राः। इवर्णान्ताश्चाश्रिश्विडीशीदीधीवेवीङः। उकारान्ताः। पुरुणुक्षुक्ष्णुस्नूर्णुवर्जम्। ऋदन्ताश्चाजागृवृङ्वृञः। शकिः कवर्गान्तानाम्। पचिवचिसिचिमुचिरिचिविचिप्रच्छियाजिभाजिसृजित्यजिभुजिभ्रस्जिमस्जिरुजियुजिणिजिविजिसञ्जिस्वञ्जयश्च चवर्गान्तानाम्। सदिशदिहदिछिदितुदिनुदिस्विदिभिदिस्कन्दिक्षुदिखिद्यतिविन्दतिविन्तिविद्यति-

---

इत्यस्य समुदायस्य क्रियाविशेषवचनस्याद्य प्रतिपत्तिरस्तीति बेभिद्युपदेश इत्युक्तम्। बेभिद्यशब्दादिकृश्तिपाविति इक्प्रत्यये ऽल्लोपयलोपयोर्बेभिदि इति भवति। अथ चेत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते तदुक्तमुद्देशश्च प्रातिपदिकानां नोपदेश इति। इह तु प्रतिपादनवचन इति विरोधाभावः। अथापि भिद्युपदेश इति। उच्चारणवचनेऽप्युपदिशौ गृह्यमाणे प्रत्यक्षमाख्यानवचने वा न दोष इत्यर्थः। द्विःप्रकार उपदेश उक्ते पृच्छति कः पुनरिति। किं भिद्युपदेशो ऽथ बेभिद्युपदेश इत्यर्थः। यः कृत्स्न इति। कृत्स्नकारित्वात् कृत्स्नः स च भिद्युपदेश एव। स हि सर्वसाधारणो भेत्ता बेभिद्यते इत्येवमादीनां प्रतिपत्तिहेतुत्वात्। उभयोरिति। केवलस्य भिदेर्बेभिद्यादेश्च तदवयवसमुदायस्य धातोर्ग्राहक इत्यर्थः। एतदुक्तं भवति। भिदादीनामेवोपदेशोऽस्ति न तु सनाद्यन्तानामवयवसमुदायानामुपदेशशब्दस्य साक्षात्प्रतिपत्तिहेतुशास्त्रवाचिन आश्रयणात्। वध इट्प्रतिषेध इति। भिद्युपदेशस्थानीयो हन्त्युपदेशस्तत्र हन्तिरेकाजनुदात्तश्चेति सत्यपि वधेरुपदेशे ऽनेकाच्त्वे हन्त्युपदेशधर्माश्रय इट्प्रतिषेधप्रसङ्गः। न चाकारलोपस्य यङन्त इवात्रापि स्थानिवद्भावेन व्यवधानम्। सत्यपि स्थानिवत्त्वे प्रकृतिप्रत्यययोरानन्तर्याद्यङन्ते तु स्थानिवत्त्वादकारेण भिदिप्रत्यययोरानन्तर्यविच्छेदात्। आद्युदात्तनिपातनमिति। तत्सामर्थ्यादुपदेशविषयानुदात्तत्वाश्रय इट्प्रतिषेधो न भवति। नह्येतदाद्युदात्तत्वं प्रयोगसमवायि। प्रत्ययस्वरेण तस्य बाधनात्। आर्धधातुकीया इति। आर्धधातुके भवा इति वृद्धाच्छः। यदि तर्ह्यार्धधातुकविशेषनिमित्ता अप्यनवस्थितेषु प्रत्ययेषु भवन्ति।

Indira Gandhi National Centre for the Arts

राधियुधिबुधिशुधिक्रुधिरुधिमाधिव्यधिबन्धिसिध्यतिहनिमन्यतयस्तवर्गान्तानाम् । तिपितापिवपिशपिछुपिलुपिलिपिस्वप्यापिक्षिपिस्रपितृपिदृपियभिरभिलभियमिरमिनमिगमयः पवर्गान्तानाम् । रुशिरिशिदिशिविशिलिशिस्पृशिदंशिक्रुशिमृशिदंशित्विषिमृषिक्रुषिश्लिषिविषिपिषितुषिदुषिद्विषिघसिवसिदहिदिहिवंहिदुहिनहिरुहिवहिलिहिमिहयश्चोष्मान्तानाम् । वसिः प्रसारणी ॥

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥ कृञो ऽसुटः * । कृञो ऽसुट इति वक्तव्यम् । इह मा भूत् । संचस्करिव । सञ्चस्करिम। तर्हि वक्तव्यम् । न वक्तव्यम् । गुणे कृते रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न भविष्यति । एवमप्युपदेशाधिकारात्प्राप्नोति । तस्मादसुट इति वक्तव्यम् ॥

श्वीदितो निष्ठायाम् ॥ १४ ॥ श्विग्रहणं किमर्थम् । न प्रसारणे कृते प्रसारणपूर्वत्वं च उगन्तादित्येव सिद्धम् । अत उत्तरम्पठति। श्विग्रहणमिदन्तत्वादुपदे-

---

तदा यदुक्तं वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति तद्विरुध्यते । अन्तरङ्गत्वाद्वधर्बहिरङ्गत्वाच्चिण्वद्भावस्य विप्रतिषेधायोगादिति चिन्त्योऽत्र समाधिः ॥१०॥

कृसृभृवृ ॥ कृञो ऽसुट इति । कृतेऽपि सुटि करोतिर्भवत्येवेति प्रतिषेधप्रसङ्गः।गुणे कृते इति । ऋतश्च संयोगादेर्गुण इत्यत्र संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यमिति वचनेन । अनुगन्तत्वादिति । श्रुचकः कितीत्यत उग्ग्रहणमिहानुवर्तत इति मन्यते एवमपीति । यद्यपि सम्प्रति नोगन्तस्तथाप्युपदेश उगन्त इति स्यात्प्रतिषेधः। किमर्थमुपदेश इत्यनुवर्तत इति चेत् तुष्टोथेत्यादौ कृते ऽपि गुणे इट्प्रतिषेधार्थम् । यद्यत्रमुक इत्यपि नानुवर्त्यम् । एवं तर्ह्येतदनेनोक्तं भवति । सत्यसति वोगधिकारे कृञो ऽसुट इत्यवश्यं वाच्यमिति नार्थ उगधिकारेण ॥ १३ ॥

श्वीदितो निष्ठायाम् ॥ स्तीर्त्वास्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमन्तरेण सिद्धेरभिधानादुपदेशाधिकारोऽत्र नास्तीति मत्वाह श्विग्रहणं किमर्थमिति । ननु च श्वित इति श्विते सम्प्रसारणात्परत्वादिट् प्राप्नोति । नित्यत्वात् सम्प्रसारणं भविष्यतीति मन्यते । यस्य लक्षणान्तरेणेति क चिन्नाश्रीयत इति पूर्वमेवोक्तम् । सम्प्रसारणनिमित्तत्वादिडभावस्य तस्मिन् कृते इटोऽप्रवर्तनादनित्यत्वम् । सम्प्रसारणस्य तु कृताकृतप्रसङ्गित्वान्नित्यत्वम् । श्विग्रहणमिदन्तत्वादिति । एकाज्ग्रहणोत्तरार्थताप्रत्याख्यानायानुपूर्व्या सिद्धमित्यादि तत्रोक्तम् । तत्त्वेकाज्ग्रहणमन्यार्थे स्थितं सदुत्तरत्रापि प्रतिपत्तिगौरवपरिहारायानुवर्त्यम् । ततश्च जागरित इत्यत्र श्रुचकः कितीतीट्प्रतिषेधो न भवति । ननु वध्यर्थमप्येकाज्ग्रहणं प्रत्याख्यातमेवाद्युदात्तनिपातनाश्रयेण हन्त्युपदेशे गृह्यमाणे तदुक्तम् । वध्युपदेशे त्वाश्रीयमाणे एकाज्ग्रहणेनैव वधेरिट् साध्यते । आद्युदात्तनिपातनेत्याश्रीयमाणे वधिषीष्टेत्याद्युदात्तत्वप्रसङ्गनिवारणाय लिङीति विषयसप्तम्याश्रयणीया । तथा च घानिषीष्टेति विप्रतिषेधाच्चिण्वद्भावानुपपत्तिरन्तरङ्गत्वाद्वधिभावप्रसङ्गात् । यङ्लुङ्निवृत्त्यर्थं चैकाज्ग्रहणं कर्तव्यम् । तस्मिन् हि

Indira Gandhi National Centre for the Arts

शस्य * । श्विग्रहणं क्रियते इदन्तत्वादुपदेशस्य । उपदेशे उगन्तादित्युच्यते । श्वयतिश्च उपदेशे इदन्तः ॥

यस्य विभाषा ॥ १५ ॥ यस्य विभाषाऽविदेः *। यस्य विभाषाऽविदेरिति वक्तव्यम् । इह मा भूत् । विदितः । विदितवानिति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः । शब्विकरणस्य विभाषा लुग्विकरणश्चायम् ॥

आदितश्च ॥ १६ ॥ विभाषा भावादिकर्मणोः ॥ १७ ॥ किमर्थो योगविभागः । न आदितो विभाषा भावादिकर्मणोरित्येवोच्येत । केनेदानीं कर्तरि प्रतिषेधो भविष्यति । यस्य विभाषेत्यनेन । एवं तर्हि सिद्धे सति यद्योगविभागं करोति तज्ज्ञापयत्याचार्यः यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति । किमेतस्य ज्ञापने प्रयोजनम् । यस्य विभाषा अविदेरित्युक्तं तन्न वक्तव्यं भवति ॥

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु ॥ १८ ॥ क्षुब्धं मन्थाभिधाने इति

---

क्रियमाणे यत्रैकाज्ग्रहणं किञ्चित्पश्चैतानि न यङ्लुकीति वचनादूर्वेभिरितित्यादावपीट् सिध्यति । उपदेशग्रहणमपि श्रुचकः कितीत्यत्रानुवर्त्यम् । अन्यथा स्तीर्त्वेत्यादिसिद्धये ऽनन्तप्रकारपरिहाराश्रयणे प्रतिपत्तिगौरवानुषङ्गः । इदमेव श्विग्रहणमुपदेशाधिकारस्य तत्र ज्ञापकम् । अन्ये त्विह श्विग्रहणं सर्वविधिभ्य इड्विधिर्बलवानित्यस्य ज्ञापकमाहुः ॥ १४ ॥

यस्य वि ॥ विभाषागमहनविदविशामिति क्वसौ विकल्पविधानाद्वेत्तेर्निष्ठायां प्रतिषेधः प्राप्नोतीति मत्वाह यस्य विभाषा ऽविदेरिति । वेत्तिरत्र विवक्षितः विद्लृलाभे इत्यस्य तु प्रतिषेधो भवत्येव विन्न इति । विद्यतिविनत्त्योस्त्वनुदात्तत्वादिट्प्रतिषेधः । यदुपाधेरिति । उपाधिरभिधेयादिर्भेदकः । शब्विकरणस्य विभाषेति। विशिना तौदादिकेन साहचर्यात्तौदादिकस्यैव लाभार्थस्य विभाषेति ज्ञानार्थस्य सत्यपि विदिरूपत्वे अर्थस्य भेदकत्वेन रूपवदाश्रयणात्प्रतिषेधाभावः । यद्यपि हन्तिना साहचर्यं विदेरस्ति तथापि शब्दपरविप्रतिषेधाश्रिशिर्व्यवस्थाहेतुर्न हन्तिः १५

आदितश्च ॥ एवं तर्हीति । रूपाभेदेपि यद्युपाधीनां भेदकत्वं न स्याद् योगविभागोनर्थकः स्यात् । भेदकत्वे तु तेषां भावादिकर्मणोर्विकल्पविधानात्कर्तरि निष्ठायां प्रतिषेधो न स्याद्भावादिकर्मणोरपि विकल्पप्रतिषेधयोर्विरोधात्प्रतिषेधो न स्यादिति कर्तृकर्मनिष्ठार्थो योगविभागः । यदि तर्ह्युपाधिर्भेदकस्तत उदितो वेति क्त्वाप्रत्यये भाववाचिनि विकल्पविधानाद्भाववाचिन्यामेव निष्ठायां प्रतिषेधः स्यान्न कर्तृकर्मवाचिन्याम् । नैष दोषः । तेन निर्वृत्तं, निर्वृत्तेक्षद्यूतादिभ्य इति लिङ्गात् प्रत्ययार्थो भेदकत्वेन नाश्रीयते ॥ १६ ॥

क्षुब्धः ॥ क्षुब्धमिति । यदि धात्वर्थोपाधित्वेन मन्थादय आश्रीयेरन् मन्थादिसाधने धात्वर्थे क्षुब्धादयो निपात्यन्ते इति तदा क्षुभितं मन्थेनेत्यत्रापि भावे क्तस्ये-

Indira Gandhi National Centre for the Arts

वक्तव्यम् । क्षुभितं मन्थेनेत्येवान्यत्र । क्षुब्ध । स्वान्तं मनोभिधान इति वक्तव्यम् । स्वनितं मनसेत्येवान्यत्र । स्वान्त । ध्वान्तं तमो विधान इति वक्तव्यम् । ध्वनितं तमसेत्येवान्यत्र ॥

धृषिशसी वैयात्ये ॥१९॥ किमिदं वैयात्यइति । वियातभावो वैयात्यम् ॥

दृढः स्थूलबलयोः ॥ २० ॥ दृढनिपातनं किमर्थम् । न दृहेर्नेड्भवतीत्येवोच्येत । दृढनिपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थम् * । दृढनिपातनं क्रियते नकारहकारलोपार्थम् । नकारहकारलोपो यथा स्यात् । परस्य च ढत्वं यथा स्यात् । अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात् * । अनिड्वचने हि रभावस्याप्रसिद्धिः । द्रढीयान् । किङ्कारणम् । अलघुत्वात् । नलोपवचनं च * । नलोपश्च वक्तव्यः । इह च परिद्रढय्य गतः । ल्यपि लघुपूर्वस्येत्ययादेशो न स्यात् । इह च पारिदृढी कन्या इति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत ॥

प्रभौ परिवृढः ॥ २१ ॥ परिवृढ इति किमर्थं निपात्यते । न परिपूर्वाद्वृहे नेड्भवतीत्येवोच्येत । परिवृढनिपातनं च । किम् । नकारहकारलोपार्थम् । परस्य च ढत्वार्थम् । अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात् । नलोपवचनं

---

ड्प्रतिषेधः स्यादिति समुदायानामभिधेयभावेन मन्थादय इहोपात्ता इति प्रदर्श्यते । द्रवद्रव्यसम्पृक्ताः सक्तवो मन्थः । क्षुब्धां गिरिनदीमित्यादयस्तु प्रयोगा असाधव इत्याहुः । अन्ये तूपमानमाश्रित्य समर्थयन्ते । स्वान्तशब्देन बाह्येषु विषयेष्वविक्षिप्तमनाकुलं मन उच्यते ॥ १८ ॥

धृषिशसी ॥ वियातभाव इति । विरूपं यातं गमनं चेष्टनं यस्य स वियातोऽविनीतः ॥ १९ ॥

दृढस्थूल ॥ न दृहेरिति । दृह दृहि बृह बृहि वृद्धाविति धातुषु पठ्यते तत्र दृहः स्थूलबलयोरिति इट एव प्रतिषेधो विधेय इति मत्वा प्रश्नः । दृढनिपातनमिति । दादेर्धातोर्घ इति घत्वस्य प्रतिषेधो वक्तव्यः स्यात् । अनिड्वचने हीति । यदीटो घत्वस्य च प्रतिषेधो विज्ञायेत ततो ढत्वष्टुत्वढलोपेषु यद्यपि दृढ इति रूपं सिध्यति तथापि पूर्वत्रासिद्धमिति ढलोपस्यासिद्धत्वात्संयोगे गुर्विति गुरुसंज्ञायां तन्निबन्धनकार्यप्रसङ्गो लघुसंज्ञाहेतुकार्याप्रसङ्गश्च । द्रढीयानिति । रविधौ पृथुमृद्वित्यादिपरिगणनमनपेक्ष्योच्यते । परिगणने हि विशेषणानां प्रत्याख्यानाद्रभावः सिध्यति । नलोपवचनं चेति । दृंहेरिदित्वान्नलोपो न प्राप्नोति । दृहेस्तु स्थूलबलयोरपि दृहितमितीष्यते । दृहि बृहि वृद्धाविति द्वावेव धातू पठ्येते इति वार्तिककाराभिप्रायं केचिदाहुः । तथा च बृंहेरच्यनिटीति नलोपमुक्तवान् । भाष्यकारस्त्वेतद्वचनप्रत्याख्यानाद्धातुचतुष्टयमिच्छति । पारिदृढीति । इतो मनुष्यजातेरिति ङीष् २०

प्रभौ परि ॥ परिव्रढय्येति । कथं पुनरत्र ल्यबादेशो यावता परिदृढमाचष्टइति णिचि कृते क्तप्रत्यये च क्तान्तस्य कृदन्तत्वात्तत्रैव परेरन्तर्भावात्समासाभावः ।

चेत्येव । परिवृढीयानिति । रऋतो हलादेर्लघोरिति रभावो न स्यात् । इह च परिव्रढय्य गत इति ल्यपि लघुपूर्वस्येत्ययादेशो न स्यात् । इह च पारिवृढीकन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत ॥

घुषिरविशब्दने ॥ २३ ॥ किमर्थमविशब्दन इत्युच्यते । न विशब्दने चुरादिणिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदविशब्दन इत्याह तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज् भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः । एष प्रयोग उपपन्नो भवति ॥

णेरध्ययने वृत्तम् ॥ २६ ॥ किं पुनरिदमध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते आहोस्विदध्ययने चेद् वृतिर्वर्त्तत इति । किञ्चातः । यद्यध्ययनाभिधायिकायां निष्ठायां क्रियते । सिद्धं वृत्तो गुणः वृत्तं परायणम् । वृत्तं गुणस्य वृत्तं पारायणस्येति न सिध्यति । अथ विज्ञायते अध्ययने चेद् वृतिर्वर्त्तत इति न दोषो भवति । यथा न दोषस्तथास्तु । अध्ययने चेद्वृतिर्वर्त्तत इत्यपि वै विज्ञायमाने न सिध्यति । किङ्कारणम् । वृत्तिरयमकर्मकः अकर्मकाश्चापि ण्यन्ताः

---

नैष दोषः । संग्रामयतेरेव सोपसर्गात्प्रत्ययोत्पत्तिर्नान्यस्मादिति नियमात्परिशब्दं पृथक् कृत्वा वृढशब्दादेव णिच् क्रियते ततो वृढिशब्दस्य धातुत्वात् क्त्वाप्रत्यये कृते परेः क्त्वान्तेन समास इति सिद्धो ल्यबादेशः । णाविष्ठवद्भावाद्रभावः ॥ २१ ॥

घुषिरवि ॥ किमर्थमिति । घुषिरविशब्दार्थ इति भूवादौ पठ्यते सविशब्दने नैव वर्तते । यस्तु घुषिर्विशब्दने इति चुरादौ पठ्यते तस्माण्णिचा भवितव्यम् । केवलश्चेह घुषिरुपात्त इति नार्थो विशब्दनप्रतिषेधेन । विशब्दनं स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते । एवं तर्हीति । अविशब्दन एवेडभावे सिद्धे इत्यर्थः । किमेतस्येति । किंनिष्ठायामेव घुषितं घोषितमिति रूपद्वयसिद्धिः प्रयोजनमथान्यदपीति प्रश्नः । जुघुषुरिति । घोषयाञ्चक्रुरित्यपि भवति । अन्ये त्वनित्यण्यन्ताश्चुरादय इति सामान्येन ज्ञाप्यत इत्याहुः । के चिच्चिति स्मृत्यामिति इदित्वे चुरादिणिचोऽनित्यत्वस्य ज्ञापकमाहुः । इदित्वेन नुम्विधाने प्रयोजनं चिति इत्यादौ नलोपाभावः । यदि च चुरादिणिच् नित्यः स्यात् तदा चिन्त स्मृत्यामित्येव पठ्येत णिचि सति नलोपाप्रसङ्गात् ॥ २३ ॥

णेर ॥ किं पुनरिति । किमभिधेयत्वेन क्तान्तस्याध्ययनमाश्रीयते अथ धात्वर्थसाधनत्वेनेति प्रश्नः । अध्ययने चेदिति । अध्ययनविषये धात्वर्थ इत्यर्थः । वृत्तो गुण इति । अध्ययनसामान्यं वृत्तशब्दस्याविधेयं न तु तद्विशेष इति विशेषवाचिशब्दप्रयोगाविरोधः । गुणः पदक्रमसंहितारूपोऽध्ययनविशेषो वृत्तो निष्पादित इत्यर्थः । वृत्तं गुणस्येति । भावे निष्ठा तस्या अध्ययनं नाभिधेयमिति वृत्तशब्दप्रयोगाप्रसङ्गः । न सिध्यतीति । ण्यन्तस्येति भावः । ण्यन्तस्य सकर्मकत्वाद् वृत्तं गुणस्येति भावे निष्ठाया अप्रसङ्गात्तयोरेव कृत्यक्तखलर्थां इत्यत्र भावेऽकर्मकेभ्य इत्यनु



Indira Gandhi National Centre for the Arts

सकर्मका भवन्ति । अकर्मकश्चात्र वृतिः । कथं पुनर्ज्ञायते अकर्मकोत्र वृतिरिति । अकर्मकाणां भावे क्तो भवतीत्येवमत्र भावे क्तो भवति । तत्र उदितः क्त्विा विभाषा यस्य विभाषेति इट्प्रतिषेधो भवति । अथ णिग्रहणं किमर्थम् । वृत्तनिपातेन णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् * । वृत्तनिपातने णिग्रहणं क्रियते । अण्यन्तस्यावधारणं मा भूदिति । कैमर्थक्यान्नियमो भवति, विधेयं नास्तीति कृत्वा । इह चास्ति विधेयं ण्यधिकाद् वृतेरिट्प्रतिषेधो विधेयः । तत्रापूर्वो विधिरस्तु नियमोस्त्विति । अपूर्व एव विधिर्भविष्यति । न नियमः । कुतो नु खल्वेतदधिकार्थ आरम्भे सति ण्यधिकस्य भविष्यति न पुनः सनाधिकस्य वा स्याद् यङधिकस्य वेति । तस्माण्णिग्रहणं कर्तव्यम् । अथ किमर्थं निपातनं क्रियते । निपातनं णिलोपेड्गुणप्रतिषेधार्थम् * । निपातनं क्रियते णिलोपार्थमिड्गुणप्रतिषेधार्थं च ॥

**वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥२७ ॥** दान्तशान्तयोः किं निपात्यते । दान्तशान्तयोरुपधादीर्घत्वं च । किञ्च । णिलोपेट्प्रतिषेधौ च । उ-

---

नुवर्तनात् । वृतिरयमिति । केवलस्य सकर्मकत्वाशङ्कां निराकृत्य ण्यन्तस्य सकर्मकत्वं प्रतिपादयति । प्रयोज्यमन्तरेण णिचोभावात्तेनास्य सकर्मकत्वम् । तत्रैतत् स्याद्भवतु सकर्मकत्वं कर्मण्येवात्र निष्ठा भवत्वित्याह अकर्मकश्चात्रेति । वृत्तं गुणस्येत्यादावित्यर्थः । अकर्मकाणामिति । भावे क्तविधानादकर्मकत्वं प्रतीयत इत्यर्थः । कर्मणि क्ते वृत्तो गुण इति सामानाधिकरण्येन भाव्यं भावे तु क्ते शेषविवक्षायां षष्ठी भवति । तस्मान्नैतद् ण्यन्तस्य वृतेरूपमपि तु केवलस्य तस्य च यस्य विभाषेतीट्प्रतिषेधोस्त्येव । एवं चाध्ययनमभिधेयं भवतु विषयो वेति न कश्चिद्दोषः । अत्राहुः । वृत्तं गुणस्येति सकर्मकादपि ण्यन्तान्नपुंसके भावे क्त इति भावे क्तोस्त्येव यस्तु निष्ठेति भूते क्तः स एवाकर्मकेभ्यो भावे भवति वृत्तं गुणस्येत्यत्र च वर्तमानत्वं प्रतीयते न भूतत्वम् । अत्रोच्यते । नपुंसके भावे क्त इत्ययमपि क्तः सकर्मकेभ्यो न भवति तयोरेव कृत्यक्तखलर्था इत्यत्र क्तमात्रस्य ग्रहणात्तत्र च भावे चाकर्मकेभ्य इत्यनुवर्तनावश्यं चैतद् बोद्धव्यमन्यथा नपुंसके भावे उपसंख्यानमित्यस्मिन् शेषविज्ञानात्सिद्धमिति प्रत्याख्याते सकर्मकाद्भावे क्ते विधीयमाने कर्मणो द्वितीया प्रसज्येत । ग्रामं गतमोदनं भुक्तमिति । अथ णिग्रहणमिति । केवलस्य यस्य विभाषेति प्रतिषेधस्य सिद्धत्वात् सामर्थ्याद् ण्यन्तस्य निपातनं विज्ञास्यते । वृत्तनिपातन इति । असति णिग्रहणे ण्यन्तस्यैवेदं निपातनं न तु सनन्तस्य यङन्तस्य वेति निश्चयाभावाद्विधिरशक्योभ्युपगन्तुमिति नियमो विज्ञायेत । णिलोपार्थमिति । निष्ठायां सेटीति वचनादनिटि निष्ठायां णिलोपो न प्राप्नोति । णेरनिटीत्यनेनापि तक्रकौण्डिन्यन्यायेन सेटि निष्ठायां विधीयमानेन णिलोपेनानिटि निष्ठायां णिलोपस्य बाधनात् प्रत्ययलक्षणेन प्राप्तस्य गुणस्येटश्चाभावो निपात्यते ॥ २६ ॥

वा दान्त ॥ उपधादीर्घत्वमिति । पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यम् । त-

पधादीर्घत्वमनिपात्यं वृद्धया सिद्धम्। न सिध्यति। मितां ह्रस्व इति ह्रस्वत्वेन भवितव्यम्। एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङितीत्येवात्र दीर्घत्वं भविष्यति। न सिध्यति। किङ्कारणम्। णिचा व्यवहितत्वात्। णिलोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यते ऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति। अथ स्पष्टच्छन्नयोः किं निपात्यते। स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च। किञ्च। णिलोपेट्प्रतिषेधौ च॥

**रुष्यमत्वरसंघुषास्वनाम्** ॥ २८ ॥ घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन *। घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्भवति विप्रतिषेधेन। घुषेरिट्प्रतिषेधस्यावकाशः, असम्पूर्वादविशब्दनम्। घुष्टा रज्जुः। घुष्टो मार्गः। वावचनस्यावकाशः, सम्पूर्वाद्विशब्दनम्। संघुष्टं वाक्यं संघुषितं वाक्यम्। सम्पूर्वादविशब्दने उभयं प्राप्नोति। संघुष्टा रज्जुः। संघुषिता रज्जुः। वावचनं भवति विप्रतिषेधेन। स्वन इट्प्रतिषेधस्यावकाशः, अनाङ्पूर्वान्मनोऽभिधानम्। स्वान्तं मनः। वावचनस्यावकाशः, आङ्पूर्वादमनोभिधानम्। आस्वान्तो देवदत्तः आस्वनितो देवदत्तः। आङ्पूर्वान्मनोभिधान उभयं प्राप्नोति। आस्वान्तं मनः आस्वनितं मनः। वावचनं भवति विप्रतिषेधेन॥

**हृषेर्लोमसु** ॥ २९ ॥ हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् *। हृष्टानि लोमानि। हृषितानि लोमानि। हृष्टं लोमभिः। हृषितं लोमभिः। हृष्टाः केशाः हृषिताः केशाः। हृष्टं केशैः। हृषितं केशैः। विस्मितप्रतिघातयोरिति वक्तव्यम्*। हृष्टो देवदत्तः। हृषितो देवदत्तः। हृष्टा दन्ताः। हृषिता दन्ताः॥

**अपचितश्च** ॥ ३० ॥ अपचित इति किं निपात्यते। चायश्चिभावो निपात्यते। अपचितः। क्तिनि नित्यमिति वक्तव्यम् *। अपचितिः॥

**आर्धधातुकस्येड्वलादेः** ॥ ३५ ॥ आर्धधातुकग्रहणं किमर्थम्। वला-

---

स्मिश्चोच्यमाने द्विर्वचनादीनि वर्ण्यलोपस्वरवर्जं न वक्तव्यानीति दीर्घविधौ स्थानिवत्त्वनिषेधाभावादनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वाप्रसङ्गः। सूत्रारम्भाश्रयेण तु दीर्घसिद्धिं भाष्यकृन्मन्यते॥ २०॥

हृषेर्लोमसु॥ सूत्रकारो लोमशब्दं सामान्यशब्दं मत्वा केशग्रहणं न कृतवान्। तथा च लोमनखं स्पृष्ट्वा शौचं कर्तव्यमित्युक्ते केशस्पर्शे ऽपि शौचं क्रियते। वार्तिककारस्तु मूर्ध्वजाः केशाः। अङ्गान्तरे जातानि लोमानीति भेदं मत्वा आह हृषेर्लोमकेशकर्तृकस्येति॥ २९॥

अपचित॥ चिभाव इति। एतच्चोपलक्षणमिट्प्रतिषेधस्यापि निपातनात्। क्तिनीति। क्तिन्नावादिभ्य इति क्तिन् प्रत्ययोयमन्यथा गुरोश्च हल इत्यकारः स्यात्॥३०॥

दिग्रहणमार्धधातुकविशेषणं यथा विज्ञायेत । वलादेरार्धधातुकस्येति । अथाक्रियमाणे आर्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात् । अङ्गस्येति वर्तते । अङ्गविशेषणम् । तत्र को दोषः । अङ्गस्य वलादेरादित इट् प्रसज्येत । अडाड्वत् । तद्यथा । अडाटावङ्गस्यादितो भवतस्तद्वत् । क्रियमाणेऽपि आर्धधातुकग्रहणे ऽनिष्टः शक्यो विज्ञातुम् । वलादेरार्धधातुकस्य यदङ्गमिति । अक्रियमाणे चेष्टमङ्गस्य यो वलादिरिति । किञ्चाङ्गस्य वलादिर्निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति, प्रत्यये । यावता क्रियमाणेपि चानिष्टं विज्ञायते अक्रियमाणे चेष्टं तत्राक्रियमाणे एवेष्टं विज्ञास्यामः । इदं तर्हि प्रयोजनम् । इह मा भूत् । आस्ते शेते । एतदपि नास्ति प्रयोजनम् । रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति । रुदादिभ्य एव सार्वधातुक इड् भवति नान्येभ्य इति । एवमपि वृक्षत्वं वृक्षता अत्र प्राप्नोति । धातोरिति वर्तते । एवमपि लूभ्यां पूभ्यामत्र प्राप्नोति । एवं तर्हि विहितविशेषणं धातुग्रहणम् । धातोर्यो विहितः । ननु च धातोरेवायं विहितः । न चायं धातोरित्येवं विहितः । क्व पुनर्धातुग्रहणं प्रकृतम् । ऋत इद्धातोरिति । तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुम् । अथेदानीं षष्ठीनिर्दिष्टेनापि विहितं शक्यते विशेषयितुम् । शक्यमार्धधातुकग्रहणमकर्तुमिति । इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥ स्नुक्रमोरनात्मनेपदनिमित्ते

---

आर्धधातु ॥ रुदादिभ्य एवेति । सार्वधातुक एवेति नियमो रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यत्यनिटः सनो रुदादेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात् कोप्यनिट औपदेशिककित्त्वसद्भावात् । लूभ्यामिति । क्विबन्ता धातुत्वं न जहति रूपार्थावैकल्यात् । विहितविशेषणमिति । यद्यपि ऋत इद्धातोरित्यत्र धातुशब्दोर्थपदार्थकस्तथापि सदृशशब्दान्तरानुमानादिह धातोरित्येतत्स्वरूपपदार्थकमाश्रीयते । धातोरित्येवं विहितस्येति । पञ्चमीनिर्दिष्टेनेति । पञ्चम्यन्तानुकरणं धातोरित्यस्मिन् धातोरित्येवं विहितस्येति लभ्यते नान्यथा । अथेदानीमिति । धातुशब्दोत्र धातुशब्दस्यानुकरणं तेन धातुशब्दस्य यः सम्बन्धी प्रत्ययस्तस्येड् भवति । यश्च धातुशब्दव्यापारोत्पन्नः स तत्सम्बन्धी भवतीत्यर्थः ॥ ३५ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

स्नुक्रमोरना ॥ स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनमनात्मनेपदनिमित्तत्वे एवेड् यथा स्यात् । आत्मनेपदनिमित्तत्वे मा भूत् । किति सनि च प्रस्नुतः प्रसुस्नूषतीति क्रमेश्च निष्ठायां क्रान्त इति श्र्युकः किति सनि ग्रहगुहोश्च यस्य विभाषेति प्रतिषेध एव भवति । पुरस्तात्प्रतिषेधस्य ह्येतदेव प्रयोजनमिड्मात्रस्य

Indira Gandhi National Centre for the Arts

चेत् कृत्युपसंख्यानम् * । स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानं कर्तव्यम् । प्रस्नविता । प्रस्नवितुम् । प्रस्नवितव्यम् । प्रक्रमिता । प्रक्रमितुम् । प्रक्रमितव्यम् । तर्त्तार्हि वक्तव्यम् । न वक्तव्यम् । अविशेषेण स्नुक्रमोरिडागममुक्त्वा आत्मनेपदपरे नेति वक्ष्यामि । आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः * । आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः । तत्परपरे तावत्, प्रसुस्नूषिष्यते । प्रचिक्रंसिष्यते । सीयुटि, प्रस्नोषीष्ट प्रक्रंसीष्ट । एकादेशे, प्रस्नोष्यन्ते । प्रक्रंस्यन्ते । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवद् । एवं तर्ह्येकादेशः पूर्वविधिं प्रति स्थानिवद् भवतीति स्थानिवद्भावाद्व्यपवर्गः । तत्परपरसीयुटोस्तर्हि प्रतिषेधो वक्तव्यः । सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् * । सिद्धमेतत् । कथम् । स्नोरात्मनेपदेन समानपदस्थस्य नेड् भवतीति

---

प्रतिषेधो यथा स्यादिति । तेन प्रतिषेधबाधनार्थमेतन्न भवति । अथ वा आर्धधातुकस्येड्वलादेरित्यस्यानुवर्तनादयमर्थो भवति यत्र पूर्वेण इड् विहितस्तत्रैवानेन भवति । पूर्वसूत्रेण च प्रतिषेधविषयपरिहारेण इड्विधानात्तत्रैवायं विधिः प्रवर्तमानो नियमाय सम्पद्यते । अथ वा आत्मनेपदनिमित्तत्वेन भवतीति प्रसज्यप्रतिषेध आश्रीयते इति किदादौ न दोषः । प्रस्नवितेति । य एवात्मनेपदविषयः स्नौतिः स एवात्रापि योग्यताश्रयणेन निमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीति इण्न प्राप्नोतीति वचनम् । कर्मकर्तृविषयश्चात्र स्नौतिरिति कर्मकर्तर्यात्मनेपददर्शनाद्भवति तद्योग्यः।एवं प्रस्नवितुं प्रस्नवितव्यमिति भावकर्मविषयत्वाद्भावकर्मणोरात्मनेपदोपलम्भादात्मनेपदनिमित्तं स्नौतिः ।प्रक्रमितेति । आदिकर्मणोऽन्यत्र प्रशब्दो विज्ञेयः।आदिकर्मणि तु कर्तरि चात्मनेपदविषयात् कृतीति प्रतिषेधेन भाव्यम् । प्रक्रमितुं प्रक्रमितव्यमिति । भावकर्मविषयत्वात्प्रारम्भविषयत्वाद्वा आत्मनेपदनिमित्तत्वम् । प्रसुस्नूषिष्यत इति । आत्मनेपदपरः स्यस्तत्परः सन्निति स्येन व्यवधानात्सन इट्प्रतिषेधो न प्राप्नोति । ननु च व्यवहितेऽपि परशब्दस्य वर्तनात्प्रतिषेधो भविष्यति । नैतदस्ति । आत्मनेपदपरे नेति न सूत्रन्यासः किं तर्ह्यर्थप्रदर्शनपरमेतत् । स्नुक्रमोर्नात्मनेपद इति तु सूत्रन्यासः तत्र तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्व्यवहितस्य प्रतिषेधाप्रसङ्गः । ननु च सनिग्रहगुहोश्चेति प्रतिषेधो भविष्यति । नह्ययमिड्विधिः पूर्वप्रतिषेधविषय इति प्रागेवोक्तम् । यद्यप्युक्तमविशेषेणेति तस्यायमर्थः । पूर्वसूत्रेण यः स्नुक्रमोरविशेषेणेडुक्तस्तमनूद्यात्मनेपदपरे प्रतिषेधो विधेयः एवं तर्हि प्रचिक्रंसिष्यते इत्येतदेवात्रोदाहरणं स्नौतिस्तु साहचर्यादुदाहृतः । प्रस्नोषीष्टेति । आत्मनेपदमेवात्र सीयुडाद्यार्धधातुके सीयुटस्तद्भक्तत्वान्न त्वात्मनेपदपरमिति प्रतिषेधाप्रसङ्गः । प्रस्नोस्यन्त इति । अत्रान्तरङ्गत्वान्नित्यत्वाच्च पूर्वमेकादेशेन भाव्यमिट्प्रतिषेधस्तु बहिरङ्गो नित्यश्च । वार्णादाङ्गं बलीयइत्यनेन त्वेकनिमित्ताप्रवृत्तिर्वार्णस्य प्रतिषिध्यते न तु भि-

Indira Gandhi National Centre for the Arts

वक्तव्यम्। यदि स्नोरात्मनेपदेन समानपदस्थस्य इड् न भवतीत्युच्यते प्रस्नवितेवाचरति प्रस्नवित्रीयते ऽत्र न प्राप्नोति। बहिरङ्गत्वाच्च। बहिरङ्गलक्षणमत्रात्मनेपदम्। क्रमेश्च *। क्रमेश्चात्मनेपदेन समानपदस्थस्येड् न भवतीति वक्तव्यम्। अथ किमर्थं क्रमेः पृथग् ग्रहणं क्रियते। न स्नुक्रमिभ्यामित्येवोच्येत। कर्तरि चात्मनेपदविषयात् कृति नेति वक्ष्यति तत् क्रमेरेव यथा स्यात्। स्नोर्मा भूत्। व्यतिप्रस्नविता। व्यतिप्रस्नवितारौ। व्यतिप्रस्नवितारः। कर्तरि चात्मनेपदविषयात् कृति प्रतिषेधः *। कर्तरि चात्मनेपदविषयात् कृति प्रतिषेधो वक्तव्यः। प्रक्रन्ता। उपक्रन्ता। तर्हि इदं बहु वक्तव्यम्। स्नोरात्मनेपदेन समानपदस्थस्येड् न भवतीति वक्तव्यम्। क्रमेश्चेति वक्तव्यम्। कर्तरि चात्मनेपदविषयात्। कृतीति वक्तव्यम्। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्नुक्रमोरनात्मनेपदनिमित्ते चेत् कृत्युपसंख्यानमिति। नैष दोषः। स्नुक्रमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः। न चेत् स्नुक्रमी आत्मनेपदस्य निमित्ते इति। कथं पुनर्धातुर्नामात्मनेपदस्य निमित्तं स्यात्। धातुरेव निमित्तम्। आह हि भगवाननुदात्तङित आत्मनेपदम्। शेषात्कर्त्तरि परस्मैपदमिति। यत्र तर्हि धातुर्नाश्रीयते भावकर्मणोरिति। अत्रापि धातुरेवाश्रीयते। भावकर्मवृत्ताद्धातोरिति। कथं प्र-

---

त्निमित्तेति स्यादेवेडागमः। अत एवेट्यपि कर्तव्ये वार्णादाङ्गमित्यस्यानुपस्थानम्। एकादेशः पूर्वविधाविति। ननु चार्धधातुकस्येट्प्रतिषेध उच्यते। न चार्धधातुकमेकादेशात्पूर्वं व्यपवर्गाभावात्। अत्राहुः। पूर्वस्मादपि विधिः पूर्वविधिरिति समासाश्रयणाददोषः। प्रस्नवित्रीयत इति। तृजन्तात् क्यङ् रीङ् ऋत इति रीङादेशः। बहिरङ्गलक्षणमिति। तृजन्तादाचारलक्षणे क्रियान्तरे क्यङ्। तत आत्मनेपदमिडागमस्तु पूर्वमेव तृजन्तावस्थायामुत्पन्नो न शक्यो निवर्तयितुमित्यर्थः। यद्येवं प्रचिक्रंसिष्यते इत्यत्राप्यात्मनेपदस्य बहिरङ्गत्वात्प्रतिषेधो न प्राप्नोति। नैष दोष। समानपदस्थस्येति वचनादिडागमेन पदावस्थापेक्षणीया। तत्र तृचि विभक्तावुत्पन्नायां लब्धेऽपि पदत्वे आत्मनेपदस्यासन्निधानादिडागमः प्रवर्तते। प्रचिक्रंसिष्यत इत्यत्र तु पदस्य पदावस्थायामेवात्मनेपदसंनिधानात्प्रतिषेधप्रवृत्तिः। आत्मनेपदविषयादिति। तद्योग्यादित्यर्थः। प्रक्रन्तेति। प्रारम्भविषयत्वात् क्रमेः प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदविषयत्वम्। स्नुक्रमी एवेति। आत्मनेपदनिमित्ते इति प्रथमाद्विवचनं न सप्तमी। सप्तम्यां हि भावादेरात्मनेपदनिमित्तस्याश्रयणात्प्रस्नवितव्यमित्यादावपि प्रतिषेधः स्यात्। कथं पुनरिति। वृत्त्यादिरर्थ आत्मनेपदस्य निमित्तं न धातुरिति भावः। धातुरेवेति। वृत्त्याद्यर्थविशिष्टः। भावकर्मवृत्तादिति। भावकर्मणी धातोरेव विषयभावेन विशेषणे इत्यर्थः। सत्यात्मनेपदे इति। न योग्यतामात्राश्रयमिह निमित्तत्वमाश्रीयते किं तु कार्यं कुर्वतः। यद्येवमर्थेऽपि निमित्तत्वेनाश्रीयमाणे दोषाभावात्कस्मात् स्नुक्रमी एवेत्युक्तम्। उच्यते। अर्थे नि-

क्रमितव्यम् । सत्यात्मनेपदे निमित्तशब्दो वर्तते । कथं प्रक्रन्ता उपक्रन्ता । तस्मादसत्यपि । कथं प्रक्रमितव्यम् । उपक्रमितव्यम् । तस्मात् सत्येव । कथं प्रक्रन्ता उपक्रन्ता । वक्तव्यमेवैतत् । कर्त्तरि चात्मनेपदविषयात्कृतीति । अथ वा कृतीति वर्तते ॥

ग्रहो ऽलिटि दीर्घः ॥ ३७ ॥ ग्रहेर्दीर्घत्वे इड्ग्रहणम् * । ग्रहेर्दीर्घत्वे इड्ग्रहणं कर्तव्यम् । इटो दीर्घ इति वक्तव्यम् । न वक्तव्यम् । प्रकृतमनुवर्तते । क प्रकृतम् । आर्धधातुकस्येड्वलादेरिति । एवमपि कर्त्तव्यमेव । अकरणे ह्यसंप्रत्ययः षष्ठ्यभावात् * । अक्रियमाणे हि इड्ग्रहणे असम्प्रत्ययः स्यात् । किङ्कारणम् । षष्ठ्यभावात् । षष्ठीनिर्दिष्टस्य आदेशा उच्यन्ते । न चात्र षष्ठीं पश्यामः । क्रियमाणे चापीड्ग्रहणे चिण्वदिटः प्रतिषेधो वक्तव्यः । ग्राहिष्यते । यङ्लोपे च प्रतिषेधो वक्तव्यः । जरीगृहिता । जरीगृहितुम् । जरीगृहितव्यम् । यदि पुनरिड्दीर्घ आगमान्तरं विज्ञायेत । इड्दीर्घ इति चेद्विप्रतिषिद्धम् * । इड्दीर्घ इति चेद्विप्रतिषिद्धं भवति । यदि इण्न दीर्घः । अथ दीर्घो नेट् । इड् दीर्घश्चेति

---

मित्तत्वेनाश्रीयमाणे ऽनुपसर्गाद्वेत्यात्मनेपदमर्थनिरपेक्षत्वादसंगृहीतं स्यादिति धातुरेव निमित्तत्वेनाश्रितः । यदि सति कार्ये निमित्तमाश्रीयते तदा निमित्तग्रहणं न कर्तव्यमनात्मनेपद इति सप्तम्याश्रयणात् । नैतदस्ति । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषायां सत्यां सत्सप्तम्याश्रयणस्याशक्यत्वात् । अथ वा कृतीति वर्तत इति । तत्र कृद्ग्रहणं वाक्यभेदेन क्रमिणैव सम्बध्यते न स्नौतिना । अनात्मनेपदनिमित्त इति च प्रसज्यप्रतिषेधस्तेनायमर्थो यदाप्यात्मनेपदयोग्यः क्रमिस्तदा ततः परस्य कृते इड् न भवति ॥ ३६ ॥

ग्रहोलि ॥ इड्ग्रहणमिति । आदेशस्य स्थानिनिर्देशार्थमिड्ग्रहणं कर्तव्यम् । एवमपीति । सत्येव प्रथमान्तइड्ग्रहणे षष्ठ्यन्तमन्यत्कर्तव्यमित्यर्थः । अक्रियमाणे हीति । प्रथमान्तमिड्ग्रहणमयोग्यत्वान्न सम्बध्यते अचपरिभाषोपस्थानाच्चाजन्तस्य ग्रहेः परस्य दीर्घप्रसङ्गः । असम्प्रत्यय इति । ग्रहेः परस्य इटो दीर्घ इत्ययमिष्टः संप्रत्ययो न स्यात् । क्रियमाण इति । प्राकरणिकमिटमनपेक्ष्यट इत्युच्यमाने सर्वस्येटो विशेषाभावाद्दीर्घप्रसङ्गाच्चिण्वदिटो दीर्घः प्रतिषेध्यः । जरीगृहीतेति । जरीगृह्यशब्दात् तृच इट् अल्लोपयलोपयोः कृतयोर्द्विप्रयोगे द्विर्वचने स एव ग्रहिरिति इटो दीर्घप्रसङ्गः । दीर्घविधौ स्थानिवत्त्वनिषेधादकारेण व्यवधानाभावः । यदि पुनरिति । इडिति वर्तते दीर्घ इति च निर्दिश्यते तत्र दीर्घ इड् भवतीति सामर्थ्याद्व्यक्तिपरित्यागेनेकारजातिराश्रीयते दीर्घग्रहणाच्च दीर्घव्यक्तिसमवेता सा विधीयते टकारो देशविध्यर्थ इति सामर्थ्यादीडागमविधिः । एवं च षष्ठीनिर्दिष्टमिड्ग्रहणं न कर्तव्यम् । चिण्वदिट्चास्यापवाद इति तत्र दोषाभावः । न च कस्यचित्स्थानिनो दीर्घत्वं विधीयते इति स्थानिवत्त्वनिषेधात्पूर्वस्मादपि विधौ स्था-

विप्रतिषिद्धम्। प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वस्याभावः * । प्रतिषिद्धस्य पुनर्विधाने दीर्घत्वस्याभावः। वुवूर्षते। विवरिषते । विवरीषते। अत्रापीड् दीर्घ इत्यनुवर्तिष्यते। यत्तर्हि विदेशस्थं प्रतिषिध्य पुनर्विधानं तन्न सिध्यति। जॄव्रश्च्योः क्त्वि श्रयुकः कितीत्यनेन प्रतिषिद्धे दीर्घत्वं न प्राप्नोति। जरीत्वा। ईटो विधिरिटः प्रतिषेधो यथा प्राप्त इड् दीर्घो भविष्यति । यदि तर्हीटो ग्रहणे ईटो ग्रहणं न भवति। जरीत्वा। न क्त्वा सेडिति कित्त्वप्रतिषेधो न प्राप्नोति। इह चाग्रहीदिति इट ईटीति सिज्लोपो न प्राप्नोति। इह चाग्रहीत् । नेटीति वृद्धिप्रतिषेधो न प्राप्नोति। मा भूदेवं ह्मयन्तानामित्येवं भविष्यति। अत्रापि नेटीत्येवानुवर्तते। तच्चावश्यमिड्ग्रहणमनुवर्त्यमवधीदित्येवमर्थम् । तथा ऽग्रहीध्वमग्रहीढ्वं विभाषेट इति मूर्धन्यो न प्राप्नोति । तस्मान्नैतच्छक्यं वक्तुमिटो ग्रहणे ईटो ग्रहणं न भवतीति। भवति चेत्प्रतिषिद्धस्य पुनर्विधाने दीर्घाभाव इत्येव। तस्मादशक्य इड् दीर्घ आगमान्तरं विज्ञातुम् । न चेद्विज्ञायते इटो ग्रहणं कर्तव्यम्। न कर्तव्यम्। आर्धधातुकस्येति वर्तते। ग्रहः परस्यार्धधातुकस्य दीर्घत्वं वक्ष्यामि। इहापि तर्हि प्राप्नोति। ग्रहणम्। ग्रहणीयम्। वलादेरिति वर्तते। एवमपि

---

निवरवादकारेण व्यवधानाच्च यङ्लोपे इटो ऽप्रसङ्गः । अथ त्वागमान्तरेऽपि दीर्घत्वमस्तीत्येवायं दीर्घविधिस्तदा यङ्लोपे दोषो न परिहृतः । इतरो व्यक्तिपदार्थाश्रयेणाह इड्दीर्घ इति चेदिति । विवरीषत इति। सनीटि प्राप्ते वृतो वेत्यनेन पक्षे ईट च प्रसक्ते सनिग्रहगुहोश्चेत्यनेनोभयस्मिन्नपि प्रतिषिद्धे इट् सनि वेति पक्षे इट् विधीयते ततः पुनरीटो विधानाभावाद्दीर्घ ईकारः पक्षे न श्रूयते। इटस्तु पक्षे दीर्घविधौ दोषाभावः। अत्रापीति। इट्सनि वेत्यत्र दीर्घ इति वृत इति सिद्धं त्रैरूप्यम् । विदेशस्थमिति । दीर्घग्रहणानुवृत्तेरत्रासम्भवः। जरीत्वेति। उदात्तत्वादिट् प्राप्तो वृतो वेत्यनेन पक्षे इट् च श्रयुकः कितीति प्रतिषिद्धः। इकारजात्याश्रयणादीटोऽपि प्रतिषेधः प्रवर्तते । ततो जॄव्रश्च्योः क्त्वीत्यनेनेटि विधीयमाने पक्षे दीर्घो न स्यात्। एतत्परिहरति। ईटो विधिरिटः प्रतिषेध इति । वृतो वेत्यनेन पक्षे इडागमो विधीयते । श्रयुकः कितीत्यनेनेडित्यधिकाराद्व्यक्तिपक्षाश्रयणाच्च निषेध इटो न त्वीटः पाठान्तरं तु प्रकृतेऽर्थे दुर्योजत्वादस्माभिर्नोपन्यस्तम्। सन्मार्गसम्भवे को हि विमार्गे मतिमान् भजेत् । यदि तर्हीति । इट्प्रतिषेध ईटो यथा न भवत्येवं कार्यान्तरस्याप्यप्रसङ्गः। तस्मान्नैतदिति। इड्ग्रहणे इकाराकृतिराश्रयणीया न तु व्यक्तिः। भवति चेदिति। जॄव्रश्च्योः क्त्वीतीड्विधौ दोष एवेत्यर्थः। नन्वनुवादइव विधावपि इकाराकृत्याश्रयणाज्जरित्वा जरीत्वेति रूपद्वयं भविष्यति। नैतदस्ति। विधौ जात्याश्रये लवितेत्यादावपि दीर्घः स्यात् । तस्माद्विहितस्य दीर्घस्येड्ग्रहणेन ग्रहणं न तु विधेयस्य । ग्रहइति । इडागमे कृते तदादेरार्धधातुकस्यादेः परस्येतीट एव दीर्घः। वलादेरिति। वलादि यद् दृष्टमित्याश्री

ग्रहीता ग्रहीतुमत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति । एवमपि ग्राहकः । अत्र प्राप्नोति । किश्च, इट्प्रतिघातेन खल्वपि दीर्घत्वमुच्यमानमिदं बाधेत । तस्मादिटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । आर्धधातुकस्येड्वलादेरिति । ननु चोक्तमेवमपि कर्तव्यमग्रहणे ह्यसम्प्रत्ययः षष्ठ्यनिर्देशादिति । नैष दोषः । ग्रह इत्येषा पञ्चमी इडिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति । तस्मादित्युत्तरस्येति । एवञ्च कृत्वा सोप्यदोषो भवति यदुक्तं चिण्वदिटः प्रतिषेध इति । कथम् । प्रकृतस्येट इदं दीर्घत्वम् । न च चिण्वदिट् प्रकृतः । यङ्लोपे कथम् । यङ्लोपे चोक्तमिटि सर्वत्र । क्व सर्वत्र । यद्येवं प्रकृतस्येटो दीर्घत्वमथापीड् दीर्घ आगमान्तरं विज्ञायते । यङ्लोपे चोक्तम् । किमुक्तम् । तदन्तद्विर्वचनादिति ॥

स्वरतिसूतिसूयतिधूञूदितो वा ॥४४॥ अथ; वेति वर्तमाने पुनर्वावचनं किमर्थम् । पुनर्वावचनं लिङ्सिचोर्निवृत्त्यर्थम् । पुनर्वावचनं क्रियते । लिङ्सिचोर्निवृत्त्यर्थम् । अथ किमर्थं सूतिसूयत्योः पृथग्ग्रहणं क्रियते । सुवतेर्मा भूत । अथ किमर्थं धूञः सानुबन्धकस्य ग्रहणं क्रियते । धुवतेर्मा भूदिति । किं पुनर्-

---

यते । इतरः सांप्रमिकं वलादित्वमाश्रितमिति मत्वाह एवमपीति । भूतपूर्वगत्येति । साम्प्रतिकाभावाद्लिटीतिनिषेधाच्च । इट्प्रतिघातेनेति । येननाप्राप्तिन्यायेनेटं बाधित्वा ऽकृतेट्कस्यैवार्धधातुकस्य दीर्घत्वमच्परिभाषोपस्थानाद्यत्र तत्र स्थितस्याचः स्यात् । नचेति । जृव्रश्चोः क्त्वीत्यनेन तु वलादिलक्षण एवेट् प्रतिप्रसूयत इति अप्राकरणिकत्वाभावाद्दीर्घः सिध्यति । यङ्लोपे चेति । सन्यङन्तस्य स्थाने द्विर्वचनमित्यत्र पक्षे प्रकृतिप्रत्ययसम्मोहान्नष्टः स ग्रहिः । ननु च द्विः प्रयोगो द्विर्वचनमिति पक्षस्तत्र स्थितस्तत्कथमस्थितपक्षाश्रयेण परिहारः । अत्राहुः । यङ्लोपे चोक्तमित्यत्राप्ययमभिप्रायो वार्तिककारस्य द्विः प्रयोगे द्विर्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाभावः । नपदान्तेत्यत्र पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यम् । तस्मिन्नुच्यमाने पदान्तवरेयलोपस्वरवर्ज द्विर्वचनादीनि न वक्तव्यानीति साप्तमिकं दीर्घविधौ स्थानिवत्त्वं भवत्येव । सूत्रकारमते ऽपि ग्रहेर्विहितस्येत्येवं विहितविशेषणाश्रयणाद्यङ्लोपे दीर्घाभावसिद्धिः । भाष्यकारेण त्वस्थितमपि पक्षमाश्रित्य तदन्तद्विर्वचनादिति विवृतम् । अन्यत्राप्यस्य दोषस्य सम्यक्परिहाराभिधानादनादरात् ॥ ४२ ॥

स्वरा ॥ अथ वेति । इट् सनिवेत्यतः । लिङ्सिचोर्निवृत्त्यर्थमिति । ननु स्वरतिग्रहणाल्लिङ्सिचोरनुवृत्तिर्न भविष्यति ऋतश्च संयोगादेरितीड्विकल्पस्य सिद्धत्वात् । नैतदस्ति । नित्यार्थं स्वरतिग्रहणमित्यज्ञापकं लिङ्सिज्निवृत्तेः । अथ किमर्थमिति । सूग्रहणमेव क्रियतामिति भावः । सुवतेरिति । अननुबन्धकग्रहणे न सानुबन्धकस्येति सुवतेरेव ग्रहणं स्यात् सूङ्ग्रहणे तु क्रियमाणे लुग्विकरणालुग्वि-

रियं प्राप्ते विभाषा आहो स्विदप्राप्ते । कथञ्च प्राप्ते कथञ्चाप्राप्ते । यदि स्वरतिरुदात्तस्ततः प्राप्ते । अथानुदात्तस्ततोऽप्राप्ते । स्वरतिरुदात्तः पठ्यते । किमर्थं तर्हि वावचनम् । वावचनं निवृत्त्यर्थम् । वावचनं क्रियते निवृत्त्यर्थम् । अनुदात्ते हि किति वा प्रसङ्गः प्रतिषिध्य पुनर्विधानात् । अनुदात्ते हि सति किति विभाषा प्रसज्येत । स्वृत्वा । किङ्कारणम् । प्रतिषिध्य पुनर्विधानात् । प्रतिषिध्य किलायं पुनर्विधीयते । स यथैवैकाज्लक्षणं बाधते एवं श्र्युकः कितीत्येतमपि बाधेत । यदि तर्ह्युदात्तः । पठिष्यति विप्रतिषेधं स्वरतेर्वेदूत्वाद्दतः स्ये विप्रतिषेधेनेति तन्नोपपद्यते । किङ्कारणम् । स विधिरयं प्रतिषेधः । विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः । सोपि विधिर्न मृदूनामिव कार्पासानां कृतः प्रतिषेधविषय आरभ्यते । स यथैवैकाज्लक्षणं प्रतिषेधं बाधत एवमिममपि बाधिष्यते । अथ वा येन नाप्राप्ते तस्य बाधनं भवति । न चाप्राप्ते वलादिलक्षणे इयं विभाषा आरभ्यते स्यलक्षणे पुनः प्राप्ते चाप्राप्ते च। अथ वा मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्ते इत्येवमियं विभाषा वलादिलक्षणमिटं बाधिष्यते स्यलक्षणं न बाधिष्यते । अथ वा पुनर-

---

करणयोरलुग्विकरणस्यैव ग्रहणमिति स्यात् । अस्याश्च परिभाषायाः सूङ्ग्रहणे कर्तव्ये सूतिसूयतीति भेदेनोपादानमेव ज्ञापकम् । धूञ् इति । धूञ् कम्पन इति स्वादिषु क्र्यादिषु च पठ्यते इति द्वयोरपि सामान्येन ग्रहणम् । धू विधूनन इत्यस्मात्तु नित्यमिड् भवति । किं पुनरिति । स्वरत्युद्देशनायं विचारोऽन्येषां तूदात्तत्वात्प्राप्तविभाषाया निश्चयाद्दोषाभावाच्च । स्वरतेस्तूदात्तानुदात्तप्रतिज्ञाने दोषदर्शनाद्विचारः । ऋतां च वृङ्वृञाविति परिगणनादस्योदात्तत्वं न प्रतिज्ञातम् । तत्र किमुदात्तत्वप्रतिज्ञाने न दोषः परिह्रियते अथानुदात्तत्वप्रतिज्ञाने न्यायेनेति प्रश्नः । यदि स्वरतिरुदात्त इति । ननु किति प्रत्यये श्र्युकः कितीति प्रतिषेधात्तत्राप्राप्तविभाषेयं स्यात् । नैतदस्ति । अल्पविषयत्वप्रसङ्गात् स्वरतेः प्राप्तविभाषायां तु महाविषयत्वं भवति । किमर्थमिति । यदि पक्ष इण्निवृत्त्यर्थं तदा ऋद्धनोः स्ये इतीममपीटं पक्षे निवर्तयेदिति प्रश्नः । निवृत्त्यर्थमिति । निवृत्तिः किंचिदेव विधिं बाधते न सर्वमिति भावः । सर्वविधिरिति । ऋद्धनोः स्ये इत्येषः । अयं प्रतिषेध इति । प्राप्तविभाषापक्षे यथा वलादिलक्षण इट् प्रतिषिध्यते तथा स्यलक्षणोऽपि प्रतिषिध्येत । अनुदात्तप्रतिज्ञाने तु द्वयोरपि विधित्वाद्विप्रतिषेधोपपत्तिः । सोऽपीति । वैधर्म्येण दृष्टान्तो यथा मृदुकार्पासकृतो रज्ज्वादिर्दुर्बलो नैवं ऋद्धनोः स्य इत्ययं विधिः । स यथैवेति । करिष्यतीत्यादौ । एवमिममपीति । न च स्वरतेरुदात्तत्वं येन नाप्राप्तिन्यायोऽस्ति येनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणम् । यद्येवं विप्रतिषेधानुपपत्तिः स्यलक्षणस्य विधेरपवादत्वात् । अन्यथापीट्स्य सिद्धत्वाद् नोपपादि विप्रतिषेधः । अथ वा स विधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निराकृतम् । तत्र द्वयोस्तुल्यबलत्वादुपपद्यते विप्रतिषेधः । अथ वेति । परिभाषाश्रय

Indira Gandhi National Centre for the Arts

स्त्वनुदात्तः । ननु चोक्तमनुदात्ते हि किति वा प्रसङ्गः प्रतिषिध्य पुनर्विधानादिति । नैष दोषः । येन नाप्राप्ते तस्य बाधनं भवति । न चाप्राप्ते एकाज्लक्षणे प्रतिषेधे इयं विभाषा आरभ्यते । श्रुयुकः कितीत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च। अथ वा श्रुयुकः कितीत्येष योगः उदात्तार्थश्च येभ्यश्चानुदात्तेभ्य इट् प्राप्यते तद्बाधनार्थश्च । अथ वा श्रुयुकः कितीतीहानुवर्तिष्यते । अथ वा आचार्यप्रवृत्तिर्ज्ञापयति नेयं विभाषा उगन्तलक्षणस्य प्रतिषेधस्य विषये भवतीति । यदयं सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति स्वृग्रहणं करोति ॥

इण्निष्ठायाम् ॥ ४७ ॥ इडिति वर्तमाने पुनरिड्ग्रहणं किमर्थम् । नियमार्थोयमारम्भः । नैतदस्ति प्रयोजनम् । सिद्धात्र विभाषा पूर्वेणैव । तत्रारम्भसामर्थ्यान्नियो विधिर्भविष्यति । नात्र पूर्वेण विभाषा प्राप्नोति । किङ्कारणम् । यस्य विभाषेति प्रतिषेधात् । तत्रारम्भसामर्थ्याद्विभाषा लभ्येत पुनरिड्ग्रहणादिडेवेति ॥

तीषसहलुभरुषरिषः ॥ ४८ ॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः * । इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधो वक्तव्यः । इह मा भूत् । प्रेषिता । प्रेषितुम् । प्रेषितव्यम् ॥

वसतिक्षुधोरिट् ॥ ५२ ॥ इडिति वर्तमाने पुनरिड्ग्रहणं किमर्थम् ।

---

णादुत्सर्गापवादभावेऽपनीते द्वयोर्विप्रतिषेधोपपत्तौ परत्वेन व्यवस्था । उदात्तत्वे दोषं प्रतिविधायाऽनुदात्तत्वे प्रतिविधत्ते । अथ वेति । न चाप्राप्त एकाज्लक्षण इति । अयमेव पाठो युक्तः । केचित्तु वलादिलक्षण इति पठन्ति । वलादिमात्रविषयत्वाद्वलादिलक्षणमिति व्याचक्षते । श्रुयुकः कितीत्येतस्मिन्निति । तत्र स्वृत्वेत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधो भवतीति वक्तव्यम् । येभ्यश्चानुदात्तेभ्य इति । प्रतिषेधकाण्डस्य पुरस्तात्करणस्य सर्वेट्प्रतिषेधार्थत्वात् । यदयमिति । यद्युगन्तलक्षणं प्रतिषेधमयं विकल्पो बाधेत ततः सनिग्रहगुहो चेत्यस्य प्रतिषेधस्याभावादनेनैव सनि विकल्पस्य सिद्धत्वात् पुनस्तत्र विदध्यात् ॥ ४६ ॥

इण्नि ॥ सिद्धेति । निरः कुष इत्यनेन ॥ ४७ ॥

तीष ॥ इषु इच्छायामिति केचित्तौदादिकमुदितमधीयते । अन्येतूदित्त्वस्य प्रयोजनमपश्यन्त इष इच्छायामिति पठन्ति । येत्विह तीषु सहेति पठन्ति तन्मतेनेह विशेषणार्थ उकारस्तत्र वार्तिककारमतेन द्वयोऽपीषयोऽननुबन्धका इह च तीषसहेति पाठस्तदाह इषेरिति । इष आभीक्ष्ण्ये इत्यस्य क्रैयादिकस्य तु विकल्पमिच्छति वार्तिककारः । तौदादिकस्य तु उदित्त्वेऽभ्युपगम्यमाने तीषसहेति पाठेऽननुबन्धकपरिभाषया क्रैयादिकस्यैव ग्रहणं स्यात् । इह मा भूदिति । विकल्पः । तेन इषगताविन्यस्मात्तकारादौ नित्यमिड् भवति ॥ ५७ ॥

Indira Gandhi National Centre for the Arts

पुनरिड्ग्रहणं नित्यार्थम् *। इडिति वर्तमाने पुनरिड्ग्रहणं क्रियते नित्यार्थम्। नित्यार्थोयमारम्भः ॥

गमेरिट् परस्मैपदेषु ॥ ५८ ॥ गमेरिट् परस्मैपदेषु चेत् कृत्युपसंख्यानम् *। गमेरिट् परस्मैपदेषु चेत्कृत्युपसंख्यानं कर्तव्यम्। जिगमिषिता। जिगमिषितुम्। जिगमिषितव्यम्। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। अविशेषेण गमेरिडागममुक्त्वा आत्मनेपदपरे नेति वक्ष्यामि। आत्मनेपदपरप्रतिषेधे उक्तम् *। किमुक्तम्। आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेध इति। इहाप्यात्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः। तत्परपरे तावत्, सञ्जिगंसिष्यते। सीयुटि, सङ्गंसीष्ट। एकादेशे, सङ्गंस्यन्ते। एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति। सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् *। सिद्धमेतत्। कथम्। गमेरात्मनेपदेन समानपदस्थस्य इट् न भवतीति वक्तव्यम् ॥

न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥ वृतादिप्रतिषेधे च *। किम्। कृत्युपसंख्यानं कर्तव्यम्। विवृत्सिता। विवृत्सितुम्। विवृत्सितव्यम्। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। अविशेषेण वृतादिभ्य इट्प्रतिषेधमुक्त्वा आत्मनेपदपर इड् भवतीति वक्ष्यामि। आत्मनेपदपरवचने तत्परपरसीयुडेकादेशेषु इड्वचनम् *। आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड् वक्तव्यः। तत्परपरे तावत्, विवर्तिषिष्यते। सीयुटि, वर्तिषीष्ट। एकादेशे, वर्तिष्यन्ते। सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात् *। सिद्धमेतत्। कथम्। वृतादीनामात्मनेपदेन समानपदस्थस्येड् भवतीति वक्तव्यम्। चतुस्तासिक्लृपिग्रहणानर्थक्यं च *। चतुर्ग्रहणं चानर्थकम्। सर्वे-

---

गमेः ॥ सिद्धं त्विति। इह तु जिगमिषितेवाचरति जिगमिषित्रीयत इति बहिरङ्गत्वादात्मनेपदस्य प्रतिषेधाभावः। केचित्तु योगविभागेनेष्टसिद्धिमाहुः। गमेः सकारादाविड् भवतीत्येको योगः ततः परस्मैपदेष्विति द्वितीयो योगो नियमार्थः। तुल्यजातीयापेक्षत्वाच्च नियमस्यात्मनेपदविषय एवेण्निवर्त्यत इति कृति परस्मैपदलुकि चेड् भवत्येव। जिगमिषितुम्। जिगमिषितव्यम्। जिगमिषत्वमिति ॥५८॥

न वृद्भ्यः॥सिद्धं त्विति। तेन परस्मैपदलुक्यपि प्रतिषेधो भवति। विवृत्सत्वमिति। अन्यथा न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधः स्यात्। विवृत्सित्रीयत इत्यत्र तु पूर्ववदात्मनेपदस्य बहिरङ्गत्वादिडभावः। चतुर्ग्रहणं चेति। कृपूसामर्थ्ये इत्यस्यानन्तरं वृत्करणं पठ्यते तद् द्युतादीनां वृतादीनां च समाप्त्यर्थं भविष्यति। एकस्यानेकप्रयोजनाविरोधात्। सर्वेभ्य इति। सङ्कल्पतीत्यादौ कृपेरपीत्यर्थः। भवे-

Indira Gandhi National Centre for the Arts

भ्यो वृतादिभ्यः प्रतिषेध इष्यते। तासिग्रहणं चानर्थकम् । किङ्कारणम्। निवृत्तत्वात्सकारस्य। निवृत्तं सकारादाविति । तास्ग्रहणे चेदानीमक्रियमाणे क्लृपिग्रहणेनापि नार्थः। एषोऽपि हि वृतादिः पञ्चमः। भवेत् क्लृपिग्रहणं न कर्तव्यम्। तास्ग्रहणं तु कर्तव्यम्। यद्धि तत्सकारादाविति न तच्छक्यं निवर्तयितुम्। तृच्यपि हि प्रसज्येत । वर्तिता वर्धिता। तास्ग्रहणे चेदानीं क्रियमाणे क्लृपिग्रहणमपि कर्तव्यम्। अन्येभ्योपि वृतादिभ्यस्तासौ मा भूदिति। भवेत्तासिग्रहणं कर्तव्यम्। क्लृपिग्रहणं तु नैव कर्तव्यम्। अन्येभ्योपि वृतादिभ्यः तासौ कस्मान्न भवति। परस्मैपदेष्विति वर्तते। क्लृपेरेव च तास्परस्मैपदपरः नान्येभ्यो वृतादिभ्यः। यद्येवं, तास्ग्रहणेनापि नार्थः। तृचि कस्मान्न भवति। परस्मैपदेष्विति वर्तते ॥

उपदेशे ऽत्वतः ॥ ६२ ॥ तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् *। तासावत्वत्प्रतिषेधे घसेः प्रतिषेधः प्राप्नोति । जघसिथ। किङ्कारणम्। अकारवत्त्वात्। सोऽपि ह्यकारवान्। सिद्धं तु हलादिग्रहणात् *। सिद्धमेतत्। कथम्। हलादिग्रहणं कर्तव्यम्। तच्चावश्यं कर्तव्यम् । अद्यशी प्रयोजयतः। अद्यशी तावन्न प्रयोजयतः। किङ्कारणम् । तासावनिडित्युच्यते। सेटौ चेमौ तासौ। अञ्ज्यशू तर्हि प्रयोजयतः। अञ्ज्यशू चापि न प्रयोजयतः। तासौनिसानिट इत्युच्यते। विभाषितेटावेतौ। अदिस्तर्हि प्रयोजयति। आदिथ। क्रियमाणे ऽपि वै हलादिग्रहणे अत्र प्राप्नोति । जघसिथ। एषोपि हलादिस्तस्य चाभावात्तासौ। तासावनिट इत्युच्यते। न च घसिस्तासावस्ति। ननु च यस्तासौ

---

स्तासिग्रहणमिति। क्लृपिग्रहणाकरणपरमेतन्न तु तासिग्रहणकरणपरम् । तथा चास्यापि प्रत्याख्यानं करिष्यते। परस्मैपदेष्विति वर्तत इति । वृतादीनामनुदात्तेत्वात्स्यसनौ विहाय क्लृपेस्तासिं चार्धधातुकं वलादिपरस्मैपदं परं नास्ति। एतच्च यथान्यासाश्रयेणोच्यते। यदा त्वात्मनेपदेन समानपदस्थस्येड् भवतीत्युच्यते तदा परस्मैपदेष्विति नानुवर्त्यमिति । स इत्येतदवश्यमनुवर्त्यं तस्मिन्ननुवर्तमाने तासि चेत्यपि कर्तव्यम्। क्लृप इत्येतत्तु न कर्तव्यं क्लृपेरन्येभ्यो वृतादिभ्यस्तासेरात्मनेपदपरत्वादिटोभावात् ॥ ६२ ॥

उपदे॥ तासाविति। तासाविड्भावे सत्यत्वतस्थलि प्रतिषेधो विधीयमान इत्यर्थः।सिद्धं त्विति। उपदेशग्रहणेन द्वयं सम्बध्यते। उपदेशे योऽत्वान् हलादिश्चेति। न च घसिरायुपदेशे हलादिः। अञ्ज्यशू तर्हीति । अशूव्यासावित्यस्यानुदात्तेत्वात् वलभावादुपन्यासोऽयुक्तः। क्रियमाणे ऽपीति । यद्यपि स्थान्युपदेशे घसिर्हलादिर्न भवति तथापि स्वोपदेशे हलादिरेव। तस्य चाभावादिति । उपमाने दृष्टानां धर्माणामुपमेये भूतानां भाविनां वा सम्प्रत्ययः । तत्र तास्वत्थलि नेड् भवतीत्युच्यमाने

Indira Gandhi National Centre for the Arts

नास्ति। अनिडप्यसौ तासौ भवति। नैवं विज्ञायते यस्तासावनिडिति। कथं त-र्हि। यस्तासावस्ति अनिट् चेति। किं वक्तव्यमेतत्। न हि कथमनुच्यमानं गं-स्यते। सप्तम्यर्थे ऽपि वै वतिर्भवति। तद्यथा। मथुरायामिव मथुरावत्। पाट-लिपुत्र इव पाटलिपुत्रवत्। एवं तासाविव तास्वत्॥

ऋतो भारद्वाजस्य॥ ६३॥ किमर्थमिदमुच्यते। न अचस्तास्वत्थल्य-निटो नित्यमित्येव सिद्धम्। एवं तर्हि नियमार्थोयमारम्भः। अत एव भारद्वाजस्य नान्यतो भारद्वाजस्येति। क्व मा भूत्। पपिथ वविथेति। ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य *। ऋतो भारद्वाजस्येति नियमानुपपत्तिः। किङ्कारणम्। अप्राप्तत्वात्प्रतिषेधस्य। गुणे कृते रपरत्वे चानजन्तत्वात्प्रतिषेधो न प्राप्नोति। असति नियमे को दोषः। तत्र पचादिभ्य इड्वचनम्। तत्र प-चादिभ्य इड् वक्तव्यः। पेचिथ शेकिथेति। यदि पुनरेवं भारद्वाजः पुरस्तादप-कृष्येत अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य। उपदेशे ऽत्वतः। भारद्वाजस्ये-ति निवृत्तम्। सिध्यत्येवमयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति। एवं

---

यदि थसिस्तासौ स्यात्ततः थलि निषेधोऽतिदिश्येत। यतस्तु तासौ नास्ति ततोस्य तासावनिट्त्वमशक्यं प्रतिपत्तुमिति थल्यतिदेशो न प्रवर्तते। अनिडप्यसाविति। असत्त्वादेवेड्भावात्। सप्तम्यर्थे इति। तासाविव तास्वदित्यौपश्लेषिकमधिकरण-म श्रीयते। तासौ परतः पूर्वस्य यथेण्न भवति तथा थल्यपीत्यर्थः। ननु चास्य स्या-स्यदिस्तासावस्ति स चानिट् चेति तदादेशस्यापि स्थानिवद्भावात्सत्त्वानिट्त्वे स्या-ताम्। नैतदस्ति। स्थानिवद्भावः शास्त्रीयेष्वेव कार्येषु प्रवर्तते। न च तासौ सत्त्वं शास्त्रीयं कार्यम्। अत एव ययेस्थल्युवयिथेति प्रतिषेधाभावः। क्रमेरपि च क्रमि-थेति भाष्यम्। न हि तासौ नित्यानिट् क्रमिः। आत्मनेपद इडभावात् परस्मैपदे सेट्त्वात्॥ ६२॥

ऋतो॥ गुणे कृते इति। जहर्थेत्यादौ न ह्ययमजन्तो नाप्युपदेशेऽत्वान्। अस-ति नियम इति। जहर्थेत्यादाविट्प्रतिषेधार्थ एव योगोऽस्त्विति भावः। तत्र पचा-दिभ्य इति। पूर्वयोगाभ्यां पचादिभ्यः थलि नित्ये प्रतिषेधे प्राप्ते पक्षे इड्विधेयः। जहर्थेत्यादौ च नित्यः प्रतिषेध इष्यते। तत्र भारद्वाजस्येति वचनात् स्मृत्यन्तरा-नुसन्धानाद्विकल्पः प्राप्नोति। नियमफलमन्यथोपपादयितुमाह यदि पुनरिति। पूर्वयोगे भारद्वाजग्रहणं कृत्वा तदेव द्वितीये योगे ऽनुवर्त्यते। स्वस्मान्मतादिति। भारद्वाजस्य मतं पेचिथ पपिथेति इट् भवत्येव। अन्येषां तु मतम्, पपक्थ पपाथे-तीडभावः। न्यासविपर्यये तु मतविपर्ययः प्रदर्शितः स्यात्। ननु च नित्येषु शब्देषु विकल्पिते विधौ विकल्पमात्रं प्रदर्शयितव्यम्। तत्र कस्य किं मतं यत्प्रच्यावितं स्यात्। उच्यते। विकल्पप्रतिपादनाय वाग्रहणे एव कर्तव्ये पूजार्थमाचार्या उपा-दीयन्ते। सा चैवं पूजा भवति। यदि येनाचार्येण यः शब्दः स्मृतः स तेनैव स्मृत-

Indira Gandhi National Centre for the Arts

र्हि, योगविभागात्सिद्धम् * । योगविभागः करिष्यते । अचस्तास्वत्थल्यनिटो नित्यमुपदेशे । ततः, अत्वतः । अत्वतश्चोपदेश इति ॥

बभूथाततन्थजगृभ्मववर्थेति निगमे ॥ ६४ ॥ वृग्रहणं किमर्थम् । न कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्येव सिद्धम् । एवं तर्हि नियमार्थोयमारम्भः।निगम एव यथा स्यात् । क मा भूत् । ववरिथ ॥

वस्वेकाजाद्घसाम् ॥ ६७ ॥ किमर्थमिदमुच्यते । वस्वेकाजाद्घसां वचनं नियमार्थम् * । नियमार्थोयमारम्भः । वसौ एकाजाद्घसामेव । क मा भूत् । बिभिद्वान् । किमुच्यते नियमार्थमिति । न पुनर्विध्यर्थमपि स्यात् । प्रतिषेधोऽपि ह्यत्र प्राप्नोति नेड्वशि कृतीति । कृच्चैवायं वशादिश्च । एवं तर्हि कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्येतस्मान्नियमादत्रेड् भविष्यति । नात्र तेन परिप्रापणं प्राप्नोति । किङ्कारणम् । प्रकृतिलक्षणस्य प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः । उभयोः स प्रत्यारम्भः । कथं ज्ञायते । वृङ्वृञोर्ग्रहणात् । कथं कृत्वा ज्ञापकम् । इमौ वृङ्वृञौ उदात्तौ । तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य उभयोः स प्रत्यारम्भ इति । ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान् प्रतिषेधः । प्रकृतिलक्षणः प्रत्ययलक्षणश्च । तुल्यजातीये असति यथैव प्रकृतिलक्षणस्य नियामको भवति एवं प्रत्ययलक्षणस्यापि नियामको भविष्यति । अथ यावता वसावेकाजाद्घसिभ्य इटा भवितव्यम् । कोन्वत्र विशेषः । नियमार्थे वा सति विध्यर्थे वा । न खलु कश्चिद्विशेषः । आहोपुरुषि-

---

त्वेनोपदिश्यते । एवं हि तस्य स्मर्तृत्वेन प्रमाणत्वेन स्तुतिः कृता भवत्येव चाङ्गार्ग्यगालवयोरित्यादावनेकाचार्योपादानमर्थवद्भवति । विकल्पस्यैकाचार्योपादानेनापि सिद्धत्वात् । योगविभाग इति । ततश्च ह्वरत्यादीनां गुणरपरत्वयोरनजन्तत्वेऽप्युपदेशे ऽजन्तत्वात्सिद्धे प्रतिषेधे अस्य नियमार्थत्वोपपत्तिः । आदेशोपदेशोऽप्याश्रीयते न तु स्थान्युपदेश एवेति अजत्यादेशस्य वीशब्दस्य चक्षिङादेशस्य च ख्यो विकल्पः स्थलि भवति । विवेथ विवयिथ । आचख्याथ आचख्यिथ ॥ ६३ ॥

बभू । वृग्रहणमिति । एकदेशाक्षेपद्वारेण ववर्थशब्दसमुदाय एवाक्षिप्यते ॥६६

वस्वे ॥ किमर्थमिति । यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रत्ययाश्रयस्य च प्रतिषेधस्य निवर्तकः तत इदं नियमार्थम् । अथ प्रकृत्याश्रयस्यैव ततो नेड्वशि कृतीति प्रतिषेधे प्राप्ते विध्यर्थमित्युभयसम्भवात्प्रश्नः । न खलु कश्चिदिति।उभयथैकाजाद्घसिभ्य इटो वसोर्भाव्यं नान्येभ्यो बिभिद्वानित्यादावित्यर्थः । आहोपुरुषिकामात्रमिति । अहोऽहं पुरुष इति यस्याभिमानः सोऽहोपुरुष उच्यते । यथा यर्वाणस्तर्वाणो नामर्षयो बभूवुरित्युक्तम् । तस्य भावो मनोज्ञादित्वाद्वुञ् । कस्याभिप्रायेणैतदुच्यते न खलु कश्चिद्विशेष इति । अन्यत्र विशेषोस्त्येव । यदि क्रादिनियमः प्रकृत्याश्रय-

Indira Gandhi National Centre for the Arts

कामात्रं तु भवानाह विध्यर्थमिति । वयं तु ब्रूमो नियमार्थमिति । अथैकाज्ग्रहणं किमर्थम् । इह मा भूत् विभिद्वान् । चिच्छिद्वानिति । क्रियमाणेऽपि वै एकाज्ग्रहणे अत्र प्राप्नोत्येषोपि ह्येकाच् । एवं तर्हि कृते द्विर्वचने य एकाच् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते एकाज्ग्रहणसामर्थ्यात् । न हि । कश्चिदकृते द्विर्वचने अनेकाजस्ति । यदर्थमेकाज्ग्रहणं क्रियते । ननु चायमस्ति जागर्ति । जागृवांसोऽनुग्मन् । यत्तर्ह्याकारग्रहणं करोति । न हि कश्चिदकृते द्विर्वचने आकारान्तोनेकाजस्ति । ननु चायमस्ति दरिद्रातिः । न दरिद्रातेरिटा भवितव्यम् । किङ्कारणम् । उक्तमेतत् । दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति । यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोसाविड्विधौ । एवमपि भूतपूर्वगतिर्विज्ञायेत । आकारान्ता यो भूतपूर्व इति । एकाज्ग्रहणमेव तर्हि ज्ञापकम् । ननु चोक्तं जागर्त्यर्थमेतत्स्यात् नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति यद्येतावत्प्रयोजनं स्याज्जागर्तेर्नेत्येव ब्रूयात् । अथ घसिग्रहणं किमर्थम् । न एकाच् इत्येव सिद्धम् ।

---

स्य प्रतिषेधस्य स्यात् । ततो युयुविवेत्यादौ श्र्युकः कितीति प्रतिषेधः स्यात् श्रुग्रहणं च क्रादिसूत्रेऽनर्थकं स्यादिति प्रत्ययाश्रयोऽपि प्रतिषेधः क्रादिनियमेन निवर्त्यतइति सूत्रमिदं नियमार्थमेव । अथैकाज्ग्रहणमिति । क्रियमाणमप्येकाज्ग्रहणमनिष्टनिवृत्तये नालमिति मत्वा प्रश्नः । बिभिद्वानिति । कृतद्विर्वचनानामनेकाचां निवृत्त्यर्थमित्यभिप्रायः । एकाज्ग्रहणसामर्थ्यादिति । यद्यपि नित्यत्वाद् द्विर्वचने कृतेऽनेकाच्त्वादिण् न भवतीति परिहारोऽस्ति तथापि परिहारान्तरसद्भावान्नोक्तः । तथाहि । द्विर्वचनस्यावकाशः, पपाचेति । इटोवकाशो, यत्र कृते द्विर्वचने एकाच्त्वं पेचिवानादिवानिति । बिभिद्वानित्यादौ तु नित्यत्वाद् द्विर्वचनं पूर्वम् । जागर्तिरिति । उषविदजागृभ्योन्यतरस्यामिति विकल्पितत्वादामो जागर्तेः परः क्वसुः। चिरिजिरिचकास्यादिभ्यस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति आमा भाव्यमिति क्वसोः परस्यासम्भवः। जागृवांस इति । द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः।न दरिद्रातेरिति।दरिद्रातेरनित्य आमित्यात औ णल इति ओकारे विधातव्ये औकारविधानेन ज्ञापितमोकारस्य प्रश्लिष्टावर्णत्वादुच्चारणे लाघवं भवत्यौकारस्य तु विश्लिष्टावर्णत्वादोकाराद्विवृततरत्वाच्च गौरवमित्योकार एव विधेयः।तत्र वृद्धिरेचीति वृद्धौ कृतायां ययावित्यादि सिध्यति । ददरिद्राविति त्वाकारलोपेन सिध्यति । तदर्थमौकारविधानमनित्यमस्मादामो ज्ञापयति । सिद्धोऽसाविड्विधाविति । क्वचित्तु सिद्धसिद्ध इति पाठः । सिद्धश्चासौ सिद्ध इति विशेषणसमासोत्यन्तसिद्ध इत्यर्थः । एकेन सिद्धशब्देन सामान्यसिद्धिः प्रतिपाद्यते द्वितीयेन तु विशेषसिद्धिः । एवमपीति । साम्प्रतिकस्याकृतद्विर्वचनस्यानेकाच आकारान्तस्याभावाद् दरिद्राग्रहणे कर्तव्ये लाघवार्थमाद्ग्रहणं स्यादिति नैकमुदाहरणमाद्ग्रहणं प्रयोजयतीति नोक्तम् । नैकमुदाहरणमिति । ऊर्णोतेर्णुवद्भावादेकाच्त्वादेकाज्ग्रहणे-

Indira Gandhi National Centre for the Arts

घसिग्रहणमनच्कत्वात् । घसिग्रहणं क्रियते । लोपे कृते ऽनच्कत्वादिण्न प्राप्नो-
ति । इदमिह सम्प्रधार्यमिट् क्रियतां लोप इति । किमत्र कर्तव्यम् । परत्वादि-
डागमः । नित्यो लोपः । कृतेऽपीटि प्राप्नोत्यकृतेऽपि । इडपि नित्यः । कृते
ऽपि लोपे प्राप्नोत्यकृतेऽपि । अनित्य इट् । न हि कृते लोपे प्राप्नोति । किङ्कार-
णम् । अनच्कत्वात् । एवं तर्हि द्विर्वचने कृते अभ्यासे योऽकारस्तदाश्रय इड् भ-
विष्यति । न सिध्यति । किङ्कारणम् । द्वित्वाल्लोपस्य परत्वाद् द्विर्वचनं क्रियतां
लोप इति । किमत्र कर्तव्यम् । परत्वाल्लोपः । लोपे कृतेऽनच्कत्वाद् द्विर्वचनं न
प्राप्नोति । घसिग्रहणे पुनः क्रियमाणे न दोषो भवति । कथम् । वचनादिड् भ-
विष्यति । इटि कृते द्विर्वचनं क्रियतां लोप इति । यद्यपि परत्वाल्लोपः । स्था-
निवद्भावाद् द्विर्वचनं भविष्यति ॥

विभाषा गमहनविदविशाम् ॥ ६८ ॥ दृशेश्चेति वक्तव्यम् * । द-

---

नानिवृत्तिः । जागर्तेर्नेति । सूत्रमिदं नियमार्थम् । तत्र यद्यस्य जागर्तिरेव निवर्त्यः
स्यात्तस्यैव साक्षात् प्रतिषेधं कुर्यात् । लघीयसी हि साक्षात्प्रतिपत्तिः । न च द-
रिद्रातिर्द्वितीयो निवर्त्योऽस्यां ह्यवस्थायामाद्ग्रहस्याकृतद्विर्वचनानेकाजकारान्ता-
श्रयात्स्यादेव तत इडागमः । यदा त्वेकाज्ग्रहणेन कृतद्विर्वचना एकाचो गृह्यन्ते
तदाद्ग्रहणे कृतद्विर्वचनानेकाजाकारान्तार्थं पपिवानिति।साम्प्रतिकाकारान्तसद्भावे
भूतपूर्वगतिरयुक्ताश्रयितुम् । अथ घसिग्रहणमिति । द्विर्वचने चेति स्थानिवद्भावः
पूर्वविप्रतिषेधाश्रयेण प्रत्याख्यायते । द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपाणि-
लोपकिकिनोरुत्वेभ्य इति । तत्र घस्लस् इति स्थिते घसिभसोर्हलि चेति परमप्युप-
धालोपं पूर्वविप्रतिषेधेन बाधित्वा द्विर्वचनं भवति । तत्र कृते पुनः प्रसङ्गविज्ञाना-
दुपधालोपस्ततः कृतद्विर्वचन एकाज्भवतीति सिद्ध इडागम इति मत्वा प्रश्नः । इ-
तरस्तु स्थानिवद्भावारम्भात्पूर्वविप्रतिषेधो नाश्रितस्ततः परत्वान्नित्यत्वाल्लोपधा-
लोपे कृत एकाच्त्वाभावाच्च द्विर्वचनं स्यान्नापीडागम इति मत्वाह घसिग्रहणम-
नच्कत्वादिति । नित्यो लोप इति । हल्यचि च विधानादिट् तु लोपे कृते ऽन-
च्कत्वान्न प्राप्नोतीत्यनित्यः । पूर्वविप्रतिषेधबाधयाह इडपि नित्य इति । कृते
द्विर्वचने उपधालोपे चाभ्यासाकाराश्रयेणैकाच्त्वात् । स्थानिवद्भावबाधयाह अनित्य
इडिति । पूर्वविप्रतिषेधबाधयाह एवं तर्हीति । पूर्वस्मादपि विधौ स्थानिवदिति स-
र्वत्र नाश्रीयत इति स्थानिवद्भावादनेकाच्त्वमिति न चोदनीयम् । स्थानिवद्भा-
वबाधयाह न सिध्यतीति । परत्वादिति । नित्यत्वादित्यपि बोद्धव्यम् । वचनादि-
ति । अपवादत्वादिति न बोद्धव्यम् । सत्यपि सम्भवे बाधनं भवतीति लोपद्विर्व-
चनयोरिष्टा बाधप्रसङ्गात् । किं तु क्रमः प्रदर्श्यते घसिग्रहणे क्रियमाणे कृताकृतप्रस-
ङ्गित्वादिडागमो नित्यः, कृतयोरपि लोपद्विर्वचनयोः प्रवर्तनात्सावकाशश्च । लो-
पोऽपि नित्यः तत्र परत्वादिडागमः ततो लोपः ततो द्विर्वचनमिति सिद्धं जक्षिवा-
निति ॥ ६६ ॥



Indira Gandhi National Centre for the Arts

इश्वान्। ददृशिवान्। तर्हि वक्तव्यम्। न वक्तव्यम्। इशोरिति वर्तते॥

ऋद्धनोः स्ये॥ ७० ॥ स्वरतेर्वेड्वादतः स्ये विप्रतिषेधेन *। स्वरतिलक्षणाद्वावचनाद् ऋतः स्य इत्येतद्भवति विप्रतिषेधेन। स्वरतिलक्षणस्य वावचनस्यावकाशः, स्वर्ता स्वरिता। ऋतः स्य इत्यस्यावकाशः, करिष्यते। हरिष्यते। इहोभयं प्राप्नोति। अस्वरिष्यत्। ऋतः स्ये इत्येतद्भवति विप्रतिषेधेन॥

यमरमनमातां सक् च॥ ७३ ॥ किमुदाहरणम्। अयंसीत्। व्यरंसीत्। अनंसीत्। अयासीत्। अवासीत्। नैतदस्ति। नास्त्यत्र विशेषः सति वा इट्यसति वा। इदं तर्ह्ययंसिष्टामयंसिषुः, व्यरंसिष्टां व्यरंसिषुः। अनंसिष्टामनंसिषुः। अयासिष्टामयासिषुः। अवासिष्टामवासिषुः। इदं चाप्युदाहरणम्। अयंसीत्। व्यरंसीत्। अनंसीत्। अयासीत्। अवासीत्। ननु चोक्तं नास्त्यत्र विशेषः सति वा इट्यसति वेति। अयमस्ति विशेषः। यद्यत्रेण् न स्याद् वृद्धिः प्रसज्येत। इटि पुनः सति नेटीति प्रतिषेधः सिद्धो भवति। मा भूदेवं ह्मयन्तानामित्येतं भविष्यति। अत्रापि नेटीत्यनुवर्तते। तचावश्यमिड्ग्रहणमनुवर्त्यम्। अयाक्षीदित्येवमर्थम्। आकारान्तश्चापि पदपूर्व एकवचनउदाहरणम्। मा हि यासीत्। यद्यत्रेण्न स्यादनुदात्तस्य इटः श्रवणं प्रसज्येत। इटि पुनः सत्युक्तमेतत् अर्थवत्तु सिचश्चित्करणसामर्थ्यादिट उदात्तत्वमिति। तत्रैकादेश उदात्तेनोदात्त इत्युदात्तत्वं सिद्धं भवति॥

ईशः से॥ ७७ ॥ ईडजनोर्ध्वे च॥ ७८ ॥ किमर्थो योगविभागः।

---

विभाषा॥ इशोरिति वर्तते इति। विभाषा स्तुजिहशोरित्यतः। इडत्यर्तिव्ययतीनामिति योगं प्रयोजनाभावादुल्लङ्घ्य वस्वेकाजाद्घसामित्यत्र विभाषाग्रहणसंबद्धं हशिग्रहणमनुवर्तते॥ ६८॥

यमरमनमातां सक्च॥ किमुदाहरणमिति। वृत्तिकारैरेकवचनान्तान्युदाहरणान्युपन्यस्तानि। तत्र विशेषं सगिटोरबुध्वा पृच्छति। इतरस्तु वृद्ध्यभावं स्वरे च विशेषं मत्वैकवचनमेवोदाहरति। अयंसीदिति। अयंसिष्टामिति। न केवलमत्र वृद्ध्यभावो विशेषो यावत्सगिटोः श्रवणमपि। माहियासीदिति। अयासीदित्यत्राट्स्वरो भवतीति तन्निवृत्त्यर्थो माङ्प्रयोगः हिशब्दप्रयोगो हि चेति निघातप्रतिषेधार्थः। इट्यसत्याद्युदात्तं पदं स्यात्। सति तु तस्य सिउभक्तत्वादुदात्तत्वादेकादेश उदात्तेनोदात्त इत्यन्तोदात्तं पदं भवति तत्रादि सिचोऽन्यतरस्यामिति पक्ष आद्युदात्तं पदं पक्षे अन्तोदात्तम्। एतच्चानिटः पित उपसंख्यानमित्युपसंख्यानमनपेक्ष्य प्रयोजनमुक्तम्। तेन यथा मा हि कार्षमित्यत्र पर्यायेणाद्यन्तयोरुदात्तत्वं भवत्येवं मा हि यासीदित्यत्रासत्यपीटि भविष्यतीतीटो भावाभावयोः स्वरे भेदाभावः॥ ७५

ईशः स॥ इष्यत ईशिध्वे इति। एतदर्थमेव चकारेणेशिरनुकृष्यते। ईडज-

Indira Gandhi National Centre for the Arts

न इशीडजनां स्ध्वे इसेवोच्येत । ईशो ध्वे मा भूदिति । इष्यते ईशिध्वे इति । ईडजनोस्तर्हि से मा भूदिति । इष्यते । ईडिषे । जनिषे । ईशस्तर्हि स्वे मा भूदिति । इष्यते । ईडिषे । जनिषे । ईशस्तर्हि स्वे मा भूदिति । इष्यते । ईशिष्वेति । से तर्हि यः स्वशब्दः तत्र यथा स्यात् क्रियासमभिहारे यः स्वशब्दः तत्र मा भूदिति । अत्रापीष्यते स भवानीशिष्वेशिष्वेसेवायमीष्टइति । आतश्चेष्यते । एवं ह्याह सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनादिति ॥

अतो येयः ॥ ८० ॥ किंसार्वधातुकग्रहणमनुवर्तते उताहो न । किंश्चार्थोनुवृत्त्या । बाढमर्थः । यद्यकारात्परो याशब्दः आर्धधातुकमस्ति । ननु चायमस्ति चिकीर्ष्याज्जिहीर्ष्यात् । लोपोत्र बाधको भविष्यति । किं तर्ह्यस्मिन् योग उदाहर-

---

णोस्तर्हीति । कथं पुनरीडजनोरध्वे चेति सूत्रपाठे योगविभागेनेडजनोः से शब्दे इट् शक्यते निवर्तयितुम् । उच्यते । चकारेणेशेरनुकर्षणात्सकारादौ सेशब्द इति इटि सिद्धे ईशः स इति नियमार्थं विज्ञायते । ईशेरेव सेशब्द इण् न त्वीडजनोरिति । स इति । थासः स इत्यस्यानुकरणं सुपां सुलुगिति सप्तमीलुका निर्दिष्टम् । इष्यत इति । न चानिष्टार्थो योगविभागः । जनिष इति । जनिष इति । व्यत्ययेन शप् तस्य बहुलं छन्दसीति लुक् छान्दसत्वादुपधालोपाभावः।जायस इत्यत्र तु नित्यत्वाद्विकरणे कृते तेन व्यवधानादिडभावः । ईशस्तर्हि स्वे मा भूदिति । चकारेणेशेरनुकर्षणात् सकारादौ स्वशब्दे चेटः सिद्धे ईशः स इति नियमः क्रियते । ईशः सेशब्द एव सकारादाविण्नान्यस्मिन् सकारादाविति । यद्यप्येकदेशविकृतमनन्यवदिति स्वशब्दः सशब्द एव भवति तथाप्यन्यस्य सकारादेर्व्यावर्त्यस्याभावादन्यत्वमाश्रित्य स्वशब्दो व्यावर्त्यते । से तर्हीति । ईडजनोर्ध्वे चेत्यनेन सर्वसकारादेरिटि विहिते ईशः स इत्यनेन नियमः क्रियते सेशब्द एव सकारादाविति तेनेशिष इत्यत्र भवति । ईशिष्वेत्यत्रापि, स्थानिवद्भावाद्यस्तु लोट एव स्थाने स्वशब्दो नासौ सेशब्द इति व्यावर्त्यते । अत्रापीति । लोड्धर्माणौ हिस्वौ लोटो भवत इत्युक्तम् । तेन यथान्यलोडादेशस्य स्वशब्दस्य सेग्रहणेन ग्रहणादिट् भवत्येवं क्रियासमभिहारे समुच्चये च लोडादेशस्य स्वस्य । अत्रैवार्थे वार्तिककारवचनं साक्षित्वेनाह । आतश्चेष्यत इति तदेवं दोषवान् गुरुश्च योगविभाग इत्येक एव योगः कर्तव्यः ईडीशिजनीनां सेध्वयोरिति ॥ ७६ ॥

अतो ॥ केषां चिदतो यो इति सकारान्तानुकरणत्वात्पाठोऽन्येषां तु सौत्रत्वान्निर्देशस्य यलोपस्यासिद्धत्वाश्रयणादतो येय इति । किंश्चार्थ इति। आचार्यदेशीय आह । प्रयोजनाधीना ह्यधिकारानुवृत्तिरिति मन्यते । आचार्य आह बाढमर्थ इति । चोदक आह यद्यकारादिति । किं तु नास्तीति भावः । चिकीर्ष्यादिति । लिङाशिषीत्यार्धधातुकसंज्ञा । लोपोत्रेति । कृताकृतप्रसङ्गित्वान्नित्यो लोपः इयादेशस्तु लोपे कृते ऽनकारान्तत्वान्न प्राप्नोतीत्यनित्यः । इतरांस्त्वयादेशस्य

Indira Gandhi National Centre for the Arts

णम् । पचेत् । यजेत् । अत्राप्यतो दीर्घो यञीति दीर्घत्वं प्राप्नोति । स यथैवेयादेशो दीर्घत्वं बाधते एवं लोपमपि बाधेत । तस्मात्सार्वधातुकग्रहणमनुवर्त्यम् ॥

आने मुक् ॥८२॥ मुकि स्वरे दोषः * । मुकि सति स्वरे दोषो भवति । पचमानो यजमानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति । ननु चायं मुग् अदुपदेशभक्तः अदुपदेशग्रहणेन ग्राहिष्यते । न सिद्ध्यत्यङ्गस्य मुग् उच्यते विकरणान्तं चाङ्गम् । सोयं सङ्घातभक्तो ऽशक्यो ऽदुपदेशग्रहणेन ग्रहीतुम् । एवं तर्ह्यभक्तः करिष्यते । अभक्ते च किं, स्वरे दोषो भवति । पचमानो यजमानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति । एवं तर्हि परादिः करिष्यते । परादौ दीर्घप्रसङ्गः * । यदि परादिः क्रियते अतो दीर्घो यञीति दीर्घत्वं प्राप्नोति । नैष दोषः । तिङीत्येवं तद् । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं मुकि स्वरे दोष इति । परिहृतमेतत् । अदुपदेशभक्तः अदुपदेशग्रहणेन ग्राहिष्यते । ननु चोक्तमङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोयं सङ्घातभक्तः अशक्यः अदुपदेशग्रहणेन ग्रहीतुमिति । अथायमदुभक्तः स्याद् गृह्येत अदुपदेशग्रहणेन । बाढं गृह्येत । अद्भक्तस्तर्हि भविष्यति । तत्कथम् । अतो येय इत्यत्र अकारग्रहणं पञ्चमीनिर्दिष्टम् । अङ्गस्येति च षष्ठीनिर्दिष्टं तत्राशक्यं विविभक्तित्वादत

---

सावकाशत्वे लोपस्य नित्यत्वं वक्तुं शक्यं नान्यथेति मत्वाह किं तर्ह्यस्मिन्निति । स यथैवेति । न च येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधक इति शक्यं वक्तुम् । यस्मात्स सार्वधातुके विधीयत इति सिद्धान्तः । तथा च ज्ञाजनोर्जा इत्यत्र वक्ष्यते । जानातीत्यत्राप्यतो दीर्घो यञीत्येव दीर्घो भविष्यतीति । यदि तिङि दीर्घो विधीयेत कथं जानातीत्येवं स्यात् । यत्तु वक्ष्यते तिङीत्येवं तदिति नासौ सिद्धान्तः मध्ये ऽपवादा इत्यनाश्रित्यैतदुक्तं तस्मिन्नाश्रीयमाणे लोपमेवेयादेशो बाधेत न दीर्घम् । दीर्घस्तु परत्वात्स्यादिति सर्वथा सार्वधातुकानुवृत्तिः सप्रयोजना ॥ ८० ॥

आने ॥ मुकीति । पूर्वान्तकरणं दोष इत्यर्थः । अदुपदेशादिति स्वरो न सिध्यति । अग्निचित्वानित्यादौ ह्रस्वनुड्भ्यां मतुबित्याद्युदात्तत्वं प्राप्नोतीति स्वरविधौ व्यञ्जनमविद्यमानवदिति दूषयित्वाह हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति परिभाषा भाष्यकारेण व्यवस्थापितेति व्यवधातैव मुमागमः । ननु चायमिति । अकार उपदेश इत्याश्रीयते न त्वाकारान्त उपदेश इति मुक्चाकारमात्रभक्त इति व्यवधानाभावः । अङ्गस्येति । अङ्गाधिकारादङ्गस्य मुग्विधीयमानोऽङ्गमेव न व्यवदधाति अवयवान्तरन्तु व्यवदधात्येव । एवं तर्हीति । ककारमनुबन्धमकृत्वा विकरणवदकारान्तादङ्गात्पर आने परतो मध्ये मः करिष्यते । मुकेति । यथान्यासाश्रयेणोक्तमभक्तत्वात्तु मकारेणेति युक्तं वक्तुम् । एवं तर्हीति । आनस्य मुडिति सूत्रन्यासेन । तिङि इत्येवं तदिति । मुटि क्रियमाणे सार्वधातुकमननुवर्त्य तिङीत्यनुवर्त्यमेवेति भावः । पञ्चमीनिर्दिष्टमिति । पूर्वसूत्र एवात इत्यनेनाङ्गं न विशेषितमिति

Indira Gandhi National Centre for the Arts

इति पञ्चम्या अङ्गं विशेषयितुं तत्प्रकृतमिहानुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति। आने इत्येषा सप्तम्यत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति॥

अष्टन आ विभक्तौ॥ ८३॥ अष्टन्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः * । अष्टन्जनादिपथिमथ्यात्वेषु आन्तरतम्यादनुनासिकः प्राप्नोति। अष्टाभिः अष्टाभ्यः।जातः जातवान्।पन्थाः मन्थाः। सिद्धमनण्त्वात्*। सिद्धमेतत्। कथम्। अनण्त्वात्। कथमनण्त्वम्। अण्सवर्णान् गृह्णातीत्युच्यते न च आकारः अण्। उच्चारणसामर्थ्याद्वा। अथ वा शुद्धोच्चारणसामर्थ्याद्भविष्यति। नैतौ स्तः परिहारौ, यत्तावदुच्यते ऽनण्त्वादिति न ब्रूमः अण्सवर्णान् गृह्णातीति। कथं तर्हि तपरस्तत्कालस्येति। यदप्युच्यते। उच्चारणसामर्थ्याद्वेति।

---

तदन्तविध्यभाव इत्युक्तं भवति । तेनाङ्गस्य योकारस्तस्मात्परस्य यास इय् इत्यङ्गं यथा पूर्वसूत्रे विशेषणं तथेहापीत्यङ्गस्यावयवस्याने मुग् भवति। तत्प्रकृतमिति। विशेष्यं तत्प्रधानमेवेत्यर्थः । आनइत्येषेति । अकृतार्था सप्तमी पूर्वत्र कृतार्थायाः पञ्चम्याः षष्ठीं प्रकल्पयति न तु पञ्चमी सप्तम्याः। यद्येवमङ्गस्यात इति समानविभक्तित्वात्तदन्तविधिप्रसङ्गः। नैष दोषः। विशेषणविशेष्यभावे कामचारादङ्गेनातो विशेषणात्ततो मुगकारमात्रभक्तत्वान्न व्यवधायकः । यद्यपि मुकि कृते ऽध्यर्धमात्रोकारस्तथाप्युपदेशग्रहणादुपदेशे मात्रिकत्वाश्रयः स्वरः प्रवर्तते। तथा च पचामहत्यादौ दीर्घेऽपि कृते भवति पचमान इत्यादौ स्वातो ङित इति इयादेशाभावोऽत इति तपरकरणात्॥ ८१॥

अष्टन॥ सौत्रत्वान्निर्देशस्याल्लोपोऽन इत्यकारलोपो न कृतः । समानविचारत्वात्प्रकरणान्तरविहितमपि अनुनासिकस्थानिकमाकारमिहैवोपन्यस्यति । अष्टन्निति। यत्र तपरत्वमस्ति तत्र तपरस्तत्कालस्येति वचनाद्गुणान्तरयुक्तस्य तत्कालस्य ग्रहणात् स्थानेऽन्तरतम इति वचनाच्चानुनासिकस्थाने ऽनुनासिक एवाकारः प्राप्नोति। यत्रापि तपरत्वाभावः तत्राप्याकृतिनिर्देशाद्दीर्घोच्चारणसामर्थ्याच्च ह्रस्वप्लुताग्रहणात्सर्वदीर्घव्यक्तिप्रसङ्गे ऽन्तरतमपरिभाषोपस्थानादनुनासिकप्रसङ्गः । सिद्धमनण्त्वादिति । अणुदित्सवर्णस्येत्यत्राण्ग्रहणेन प्रत्याहारसन्निविष्टा अकारादयो गृह्यन्ते न त्वाकारादयोऽसन्निविष्टत्वान्न च प्रत्याहारे ऽकारादिभिराकारादयो गृह्यन्ते। नाप्यणुदित्सूत्रेऽङ्गेषु स्वात्मनि च ग्रहणकशास्त्रस्यानभिनिर्वर्तनात् स्वात्मनि क्रियाविरोधाच्च ग्रहणकशास्त्रान्तराभावाच्च। कथमनण्त्वमिति। अकारेण गृह्यमाण आकारोऽण् भवतीति मत्वा प्रश्नः । पूर्वोक्तेनाभिप्रायेणाह अण् सवर्णानिति। अनण्त्वादेव भाव्यमानोऽण् सवर्णान् न गृह्णातीति परिहारो नोक्तः ग्राह्यासद्भावाच्चान्तरतमपरिभाषा नोपतिष्ठते । उच्चारणसामर्थ्याद्वेति। यद्यनुनासिकोऽभविष्यत्स एवोदचारयिष्यत इति निरनुनासिक एवोच्चारणसामर्थ्यात्प्रवर्तते। तत्र पूर्वः परिहारोऽष्टन्शब्दाकाराभिप्रायेणोक्तः उत्तरस्तु जना-

Indira Gandhi National Centre for the Arts

अस्त्यन्यदुच्चारणे प्रयोजनम् । किम् । उत्तरार्थं रायो हलीति । एवं तर्हि नेमौ पृथक्परिहारौ । एकपरिहारः । एकपरिहारोयं सिद्धमनण्त्वाद् उच्चारणसामर्थ्याद्वेति । इह तावदष्टाभिः अष्टाभ्य इति । अनण्त्वात्सिद्धम् । जातः जातवान् । पन्थाः मन्थाः, उच्चारणसामर्थ्यात्सिद्धम् । यद्येवं पृथक्परिहारयोरपि न दोषः । यो यत्र परिहारः स तत्र भविष्यति ॥

युष्मदस्मदोरनादेशे ॥ ८६ ॥ अनादेशग्रहणं शक्यमकर्तुम् । कथम् । हलीत्यनुवर्तते । न चादेशो हलादिरस्ति । तदेतदनादेशग्रहणं तिष्ठतु तावत्सान्यासिकम् ॥

योऽचि ॥८९॥ अज्ग्रहणं शक्यमकर्तुम् । कथम् । अविशेषेण यत्वमुत्सर्गस्तस्य हलादावात्वमपवादः ॥

शेषे लोपः ॥ ९० ॥ शेषग्रहणं शक्यमकर्तुम् । कथमविशेषेण लोपः उत्सर्गस्तस्य अजादौ यत्वमपवादः हलादावात्वम् ॥

---

वाकाराभिप्रायेण । चोदकस्तु विषयविभागमबुध्वाह नैतौ स्त इति । कथं तर्हीति । अणिति च तत्र नानुवर्तते । उत्तरार्थमिति । इहानुनासिक उच्चार्यमाणे ऽनुनासिक उत्तरत्र कर्तव्य इति लाघवायाननुनासिकोच्चारणं स्यादित्यर्थः । इतरः स्वाभिप्रायमाह एवं तर्हीति । अयन आत्वे न द्वौ परिहारौ नापि जनाद्यात्वे किं तु विषयविभागेन । एक इति । यद्यपि द्वावेतौ परिहारौ वाशब्दस्य समुच्चयार्थत्वात्तथापि समुदायापेक्षया सम्भवापेक्षया चैवमुक्तम् । अथ चैकोसहायः क्व चित्कश्चिदन्यनिरपेक्षः परिहार इत्यर्थः । स एवाह यद्येवमिति । यदि भवान् सम्मन्यते परिहारसमुदाये यथासम्भवमवयवौ परिहारत्वेन तदा समुदायकल्पनया नार्थः । पृथगेवैतौ परिहारौ यथाविषयमवतिष्ठेते ॥ ८३ ॥

युष्म ॥ हलीति वर्तत इति । रायो हलीत्यतः । न चादेशो हलादिरिति । भ्यसो भ्यमित्यभ्यमादेशो न तु भ्यमिति भावः । तदेतदिति । उत्तरत्रोपयुज्यते । योचीति यत्वमादेशो ऽजादौ मा भूत् त्वमहमित्यादौ शेषे लोप इति शेषव्यवस्थार्थं च ॥ ८६ ॥

योऽचि ॥ यत्वमुत्सर्ग इति । अनादिष्टायां विभक्तौ विधीयमानं यत्वमुत्सर्गो हलादौ त्वात्वमपवाद आदेशे तु लोप इत्यसंकरेणात्वयत्वलोपाः सिध्यन्ति अज्ग्रहणे क्रियमाणे ऽप्यनादेशग्रहणं यत्वलोपयोर्विषयाविभागार्थं कर्तव्यमित्यनादेशग्रहणाश्रयेणाज्ग्रहणमुत्तरत्र च शेषग्रहणं प्रत्याख्यातम् ॥ ८९ ॥

शेषे ॥ अविशेषेणेति । विभक्तावित्यधिकाराद्विभक्तिमात्रे लोपो विधीयमान उत्सर्गो भवति । तस्यानादेशे विभक्तौ यत्वमपवादो यत्वस्यापि हलादावात्वमिति शेषग्रहणं पूर्वत्र चाज्ग्रहणमन्तरेण विषयविभागेन कार्यत्रयसिद्धिः । तस्याजादाविति । हलादावात्वविधानात्सामर्थ्यलभ्यमेतत् ॥ ९० ॥

Indira Gandhi National Centre for the Arts

मपर्यन्तस्य ॥ ९१ ॥ परिग्रहणं शक्यमकर्तुं मान्तस्येत्येव सिद्धम्। न सिध्यति। किङ्कारणम्। अन्तशब्दस्योभयार्थत्वात्। कथम्। अयमन्तशब्दः अस्त्येव सह तेन वर्तते। तद्यथा, मर्यादान्तं देवदत्तस्य क्षेत्रं सह मर्यादयेति गम्यते। अस्ति प्राक् तस्माद्वर्तते। तद्यथा, नद्यन्तं देवदत्तस्य क्षेत्रमिति प्राग् नद्या इति गम्यते। तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत। नैतदस्ति प्रयोजनम्। सर्वत्रैवान्तशब्दः सह तेन वर्तते। अथ कथं नद्यन्तं देवदत्तस्य क्षेत्रमिति। नद्याः क्षेत्रत्वे सम्भवो नास्तीति कृत्वा प्राङ्नद्या इति गम्यते। अवधिद्योतनार्थं तर्हि परिग्रहणं कर्तव्यं मान्तस्येत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः। क्व च मान्ते युष्मदस्मदी। युष्मानाचष्टे अस्मानाचष्टे इति। णिचि युष्मयतेरस्मयतेश्चाप्रत्यये ॥

---

मप ॥ अयमन्तशब्द इति। अन्यपदार्थविषयस्यान्तशब्दस्येदं व्याख्यानम्। क चिदन्तर्भूतान्तार्थोऽन्यपदार्थो बहुव्रीहेरभिधेयः। क्व चिदनन्तर्भूतान्तार्थ इत्यर्थः। मर्यादान्तमिति। मर्यादायाः क्षेत्रावयवत्वात्क्षेत्रे ऽन्यपदार्थे ऽनुप्रवेशः। नद्यन्तमिति। नद्याः क्षेत्रानवयवत्वादन्यपदार्थे ऽनुप्रवेशाभावः। पर्यन्तशब्दस्त्वन्यपदार्थविषयः सह तेन वर्तत इति परिग्रहणं कृतं तेन युष्म् अस्म् इत्येतयोरादेशा भवन्ति। न युष् अस् इत्येतयोः। सर्वत्रेति। अन्तशब्दोऽवयववाचीत्यवयवेन विग्रहः समुदायः समासार्थ इत्यवयवस्यावश्यमन्यपदार्थेऽन्तर्भावः। नद्यन्तं क्षेत्रमित्यत्र त्वन्तशब्दः सामीप्यवाचीत्यन्यपदार्थे नद्या अनन्तर्भावः। यत्तूच्यते सर्वत्रैवान्तशब्दः सह तेनेति वर्तत इति तत्सम्भवापेक्षम्। यस्यावयवत्वं सामीप्यं च सम्भवति तस्यावयवत्वमेवाश्रीयते। अन्तशब्दस्यावयववाचित्वेन प्रसिद्धतरत्वाद्यस्य त्ववयवत्वासम्भवस्तस्य सामीप्यमेवान्तशब्देन प्रतिपाद्यते यथा नद्यन्तं क्षेत्रमिति - अन्ये त्वाहुः। सर्वत्रैवान्तशब्दोऽवयववाची कस्य चिन्मुख्यमवयवत्वं कस्य चित्सामीप्यादुपचरितमित्यभिप्रायेणेदं भाष्यम्। ततश्चान्तशब्दस्यावयववाचित्वान्मपर्यन्तस्यादेशलाभान्नार्थः परिग्रहणेन। अवधिद्योतनार्थमिति। यदि युष्मदस्मदी मान्ते अथाप्यमान्ते सर्वथा आदेशा यथा स्युरेवमर्थं परिग्रहणम्। यत्रैवेति। सामानाधिकरण्येन विशेषणविशेष्यभावः स्यात्। अथापि वैयधिकरण्यमाश्रीयते युष्मदस्मदोरवयवस्य मान्तस्येति तथापि यत्र मान्ते युष्मदस्मदी तत्र भेदाभावाादादेशा न स्युः। न च व्यपदेशिवद्भावोऽस्त्यप्रातिपदिकेनेति निषेधात्परिग्रहणे तु तदुपादानसामर्थ्याद्युष्मदस्मदवयवे ऽपि युष्मदस्मच्छब्दो वर्तते इति सर्वत्रैवादेशसिद्धिर्वैयधिकरण्येन वा सम्बन्धे परिग्रहणोपादानसामर्थ्यादप्रातिपदिकेनेति प्रतिषेधाप्रवृत्त्या मान्तयोरपि युष्मदस्मदोरादेशसिद्धिः। युष्मयतेरिति। प्रत्ययोत्तरपदयोश्चेत्यत्रैकवचनाधिकारात्त्वमौ न भवतः। इष्ठवद्भावाट्टिलोपः क्विपि णिलोपः क्वौ लुप्तं न स्थानिवदिति मान्ते युष्मदस्मदी ततः कृदन्तत्वात् स्वादयः- एकदेशविकृतस्यानन्यत्वाद् युष्मदस्मदाश्रयकार्यप्रवृत्तिः। तत्र सौ त्वमह-

Indira Gandhi National Centre for the Arts

प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥ किमर्थमिदमुच्यते । न त्वमावेकवचन इत्येव सिद्धम् । न सिध्यति । किङ्कारणम् । एकवचनाभावात् । एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः । प्रत्ययलक्षणेन । न लुमताङ्गस्येति प्रत्ययलक्षणस्य प्रतिषेधः । एवं तर्हि इदमिह सम्प्रधार्यं लुक् क्रियतामादेशा इति । किमत्र कर्तव्यम् । परत्वादादेशाः । नित्यो लुक् कृतेष्वादेशेषु प्राप्नोत्यकृतेष्वपि । अन्तरङ्गा आदेशाः । एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञापयत्याचार्यः अन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग् भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । गोमान् प्रियो यस्य गोमत्प्रियः । यवमत्प्रियः । गोमानिवाचरति गोमत्यते यवमत्यते अन्तरङ्गानपि नुमादीन् बहिरङ्गो लुग्बाधत इति । नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । येऽन्ये एकवचनादेशाः प्राप्नुवन्ति तद्बाधनार्थमेतत्स्यात् । तद्यथा । तव पुत्रः त्वत्पुत्रः मम पुत्रो मत्पुत्रः । तुभ्यं हितं त्वद्धितं मह्यं हितं मद्धितमिति । यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति । यद्य-

---

मिति भवति द्विवचने प्रथमायाश्च द्विवचने भाषायामिति मकारस्यात्वे प्राप्ते परत्वाद्युवावयोः कृतयोः पुनः प्रसङ्गविज्ञानादात्वे कृते युवामावामिति।तृतीयाद्विवचने युवाभ्यामावाभ्यामिति । भिसि युष्माभिरस्माभिरिति । ङेप्रत्यये तुभ्यं मह्यम् । भ्यसि युष्मभ्यमस्मभ्यमिपि शेषे लोप इति लोपः। पञ्चमीभ्यसि युष्मदस्मदिति मपर्यन्तापेक्षे तु शेषे आश्रीयमाणे मात्परस्यान्यस्याभावाद् लोपाभावाद् युष्मदस्मदिति भवति । इह त्वामाचष्टे मामाचष्टे इति णिचि प्रत्ययोत्तरपदयोरिति त्वमयोः प्रकृत्यैकाजिति प्रकृतिभावादसिति टिलोपे अत उपधाया इति वृद्ध्या भाव्यम् । अथ त्वङ्गवृत्त इत्याश्रीयते तदा वृद्ध्यभावः । तत्र त्वद् स् मद् स् इति स्थिते मपर्यन्ताभावात्त्वाहौ सावित्यस्याप्रवर्तनाद्वृद्धिपक्षे त्वादम् मा दमिति भवति तदभावे त्वदं मदमिति । केचितु मान्तयोर्युष्मदस्मदोरादेशानिच्छन्ति । मपर्यन्तग्रहणं हि यत्र परिशिष्टसद्भावस्तत्रादेशार्थमिति परिशिष्टाभावेन भाव्यमादेशैरिति ब्रुवन्ति ॥९१॥

प्रत्ययोत्तर ॥ अन्तरङ्गानिति। नित्यादप्यन्तरङ्गो बलीयांस्तथा चोक्तम् । परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति । गोमत्प्रिय इति । अत्रान्तरङ्गा एकपदाश्रयत्वात्सुलोपादयः स्युः । पदद्वयाश्रयत्वाद् बहिरङ्गो लुगिति गोमान् प्रिय इति स्यात् । अस्मिंस्तु ज्ञापके सत्यन्तरङ्गाण्यपि कार्याणि बाधित्वा लुग्भवति । ततो न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्नुम्दीर्घाभावे गोमत्प्रिय इति सिध्यति । सुपो धातुप्रातिपदिकयोरित्यस्यैव बाधकत्वमनेन ज्ञाप्यते तस्यैवेह सम्भवात् । केचित्तु सामान्यापेक्षया ज्ञापकत्वाश्रयाल्लुङ्मात्रस्य बलवत्त्वाश्रयेण व्यवहारदर्शनाल्लुङ्मात्रं बाधकं ज्ञाप्यत इत्याहुः । येऽन्य इति । एकवचनाधिकारादेकवचननिमित्तानामादेशान्तराणां त्वमौ बाधकौ स्यातां न तु ज्ञापकावित्यर्थः । यत्तर्हीति । केचिद्व्याचक्षते । यद्यादेशान्तराणां

Indira Gandhi National Centre for the Arts

त्रान्ये एकवचनादेशाः स्युः। मपर्यन्तानुवृत्तिरनर्थिका स्यात् । त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम् * । त्रिचतुर्युष्मदस्मद्ग्रहणेषु अर्थग्रहणं शब्दविशेषणं द्रष्टव्यम् । त्रिचतुरोः स्त्रियां तिसृचतसृ । यद्यपि समासः पुंसि नपुंसके वा वर्तते त्रिचतुरौ च स्त्रियां वर्तेते भवत्येव तिसृचतसृभावः । प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा प्रियतिस्रौ प्रियतिस्रः । प्रियचतसा प्रियचतस्रौ प्रियचतस्रः । प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणकुलस्य प्रियतिसृ प्रियतिसृणी प्रियतिसृणि । प्रियचतसृ प्रियचतसृणी प्रियचतसृणि । यदा हि समासः स्त्रियां वर्तते । त्रिचतुरौ च पुंसि नपुंसके वा तदा मा भूतामिति । प्रियास्त्रयो ब्राह्मणा अस्या ब्राह्मण्याः प्रियत्रिः प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । प्रियाणि त्रीणि ब्राह्मणकुलानि अस्या ब्राह्मण्याः प्रियत्रिः प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । युवावौ द्विवचने । यद्यपि समासः एकार्थो वा भवति बह्वर्थो वा भवति द्व्यर्थे च युष्मदस्मदी, भवत एव

---

त्वमौ बाधकौ स्यातां तदा मपर्यन्तग्रहणानुवृत्तिमन्तरेणोत्सर्गसमानदेशत्वादपवादानां मपर्यन्तस्य त्वमौ सिद्धाविति किं तदनुवृत्त्या । अनुवृत्त्या तु ज्ञाप्यते प्रागेव लुकि कृते विभक्त्यभावादसत्स्वादेशान्तरेषु त्वमौ विधीयेते इति । एतच्चायुक्तम् । नायं नियोग उत्सर्गसमानदेशोपवाद इति । इनङ्बहुजकचां भिन्नदेशानामप्यपवादत्वदर्शनात् । ततश्चासत्यां मपर्यन्तानुवृत्तौ आदेशान्तराणामपि बाधकौ त्वमौ सर्वादेशौ स्याताम् । अनेकाल्त्वादिति । सप्रयोजना मपर्यन्तानुवृत्तिः तस्मादन्यथा व्याख्यायते । त्वममादय आदेशाः स्थानिप्रक्लृप्त्यर्थमिहानुवर्तन्ते । तत्र त्वादीनां प्रसङ्गे सिद्धयोस्त्वमयोर्मपर्यन्तानुवृत्तिस्त्वया कृतं त्वत्कृतमित्याद्यर्था भवन्ती लुको बाधकत्वं ज्ञापयति । ततश्च त्वाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्ज्ञापनाय भवति । केवला हि मपर्यन्तानुवृत्तिर्लाघवाय स्यात् । गरीयसी हि त्वाद्यनुवृत्त्या स्थानिप्रतीतिः । ततो ज्ञापनाय न प्रभवेत् तस्मात्त्वाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्यथोक्तार्थज्ञापनायालम् । त्रिचतुरिति । स्त्रियां द्विवचन एकवचन इति येऽर्था निर्दिष्टास्ते श्रूयमाणानामेव शब्दानां विशेषं न त्वङ्गस्येत्यर्थः। प्राप्तविशेषणसम्बन्धैस्त्रिचतुर्युष्मदस्मद्भिरङ्गं विशेष्यते । तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य ग्रहणं भवतीति केवलानां तदन्तस्य चादेशप्रवृत्तिर्द्विवचनैकवचने च पारिभाषिकेन गृह्येते किं तर्हि द्वयोर्वचनमभिधानं द्विवचनमेकस्य वचनमेकवचनमित्यर्थनिर्देशः । प्रियतिसेति । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्यकृत एव तिसृभावे लुकि कृते समासाद्या विभक्तिस्तस्यां तिसृभावः । स च निर्दिश्यमानस्यादेशा भवन्तीति त्रिशब्दस्यैव भवति । प्रियतिस्राविति । अचि रऋत इति रादेशः । प्रियतिसृ इति । कथं पुनरत्र तिसृभावो यावता स्वमोर्नपुंसकादिति लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधेन भाव्यम् । उच्यते । इकोऽचि विभक्ताविन्यत्राज्ग्रहणं ज्ञापकं क्व चिल्लुमतो लुप्तेपि प्रत्ययलक्षणस्य । तथा च हे



Indira Gandhi National Centre for the Arts

युवावौ। किमविशेषेण। नेत्याह। यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि त्वममौ ङसि इत्येतान् विधीन् वर्जयित्वा। अतिक्रान्तो युवामतित्वमत्यहम्। अतिक्रान्तौ युवामतियुवामत्यावाम्। अतिक्रान्ता युवामतियूयमतिवयम्। अतिक्रान्तं युवामतियुवामत्यावाम्। अतिक्रान्तौ युवामतियुवामत्यावाम्। अतिक्रान्तान् युवामतियुवान् अत्यावान्। अतियुवयाऽत्यावया। अतियुवाभ्यामत्यावाभ्याम्। अतियुवाभिरत्यावाभिः। अतितुभ्यमतिमह्यम्। अतियुवाभ्यामत्यावाभ्याम्। अतियुवभ्यमत्यावभ्यम्। अतियुवदत्यावत्। अतियुवाभ्यामत्यावाभ्याम्। अतियुवदत्यावत्। अतितव अतिमम। अतियुवयोरत्यावयोः। अतियुवाकमत्यावाकम्। अतियुवयि अत्यावयि। अतियुवयोरत्यावयोः। अतियुवास्वत्यावासु। त्वमावेकवचने। यद्यपि समासो द्व्यर्थो भवति बह्वर्थो वा एकार्थे च युष्मदस्मदी, भवत एव त्वमौ। किमविशेषेण। नेत्याह। तानेव विधीन् वर्जयित्वा। अतिक्रान्तस्त्वामतित्वमत्यहम्। अतिक्रान्तौ त्वामतित्वामतिमाम्। अतिक्रान्तास्त्वामतियूयमातिवयम्। अतिक्रान्तं त्वामतित्वामतिमाम्। अतिक्रान्तौ त्वामतित्वामतिमाम्। अतिक्रान्तान् त्वामतित्वान् अतिमान्। अतित्वयाऽतिमया। अतित्वाभ्यामतिमाभ्याम्। अतित्वाभिरतिमाभिः। अतितुभ्यमतिमह्यम्। अतित्वाभ्यामातिमाभ्याम्। अतित्वभ्यमतिमभ्यम्। अतित्वदतिमत्। अतित्वाभ्यामतिमाभ्याम्। अतित्वदतिमत्। अतितवातिमम। अतित्वयोरतिमयोः। अतित्वाकमतिमाकम्। अतित्वयि अतिमयि। अतित्वयोरतिमयोः। अतित्वास्वतिमासु। यद्येवं यूयवयौ जसि त्वाहौसौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतेभ्यो विधिभ्यः परत्वात् त्वमावेकवचन इति प्राप्नोति। सावकाशा ह्येते विधय इदानीं भवन्ति। को ऽवकाशः। अनेकार्थे युष्मदस्मदी। त्वमावेकवचन इत्यस्यावकाशः। अन्यानि वचनानि। एकार्थयोर्युष्मदस्मदोः। एतेषु वचनेषूभयं प्राप्नोति। परत्वात्त्वमावेकवचन इति प्राप्नोति। नैष दोषः। शेष इति वर्तते। कश्च शेषः। जसादिभिरव्याप्तं यदेक-

---

त्रपो इति संबुद्धिगुणो भवति क्व चित्प्रियत्रीति पाठः। स प्रत्ययलक्षणप्रतिषेधाश्रयः। इतीति। एते विधयः परत्वाद्युवावयोर्बाधकाः। शेष इति वर्तत इति। अन्यथा अतिक्रान्तो युष्मानतित्वमत्यहम्। अतिक्रान्ताय युष्मानतितुभ्यमतिमह्यम्। अतिक्रान्तस्य युष्मानतितवातिममेत्यनेकार्थत्वे युष्मदस्मदोः समासे सावकाशास्त्वाहादयो ऽसमासे समासे ऽपि युष्मदस्मदोरेकार्थत्वे परत्वात्त्वमाभ्यां बाधनाच्च प्राप्नुवन्ति। त्वमहं तुभ्यं मह्यं तव ममेति। शेषग्रहणानुवृत्तौ तु यत्र यूयादयो न भवितारस्तत्र त्वमौ भवतो नतु यूयादिविषये। तच्च शेषग्रहणं लोपग्रहणं सम्बन्धानुवृत्त्या यूयादिभिर्न सम्बध्यते त्वमावेकवचन इत्यत्र तु लोपग्रहणं निवृत्तं शेषग्रह-

वचनं तस्मिन् शेषेऽशेषत्वान्न भविष्यति । अथ वा त्वमावेकवचन इत्यत्र यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसि इत्येतदनुवर्तिष्यते ॥

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९ ॥ तिस्रभावे संज्ञायां कन्युपसंख्यानम् * । तिसृभावे संज्ञायां कनि उपसंख्यानं कर्तव्यम् । तिसृका नाम ग्रामः । चतसर्याद्युदात्तनिपातनं च * । चतसर्याद्युदात्तनिपातनं कर्तव्यम् । किं प्रयोजनम् । चतस्रः पश्य । शसिस्वरो मा भूदिति । किञ्चान्यद् उपदेशिवद्वचनं च * । उपदेशिवद्भावश्च वक्तव्यः । किम्प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामेवाद्युदात्तनिपातने कृते विभक्तिस्वरेण बाधनं यथा स्याच्चतसृणामिति । स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । उक्तं वा * । किमुक्तम् । विभक्तिस्वरभावश्च हलादिग्रहणाद् आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यमिति ॥

अचि र ऋतः ॥ १०० ॥ अचिरादेशो जस्युपसंख्यानं गुणपरत्वात् * ।

---

णमनुवर्तत इति न कश्चिद्दोषः । अथ वेति । वाक्यभेदेन त्वमयोर्विषये यूयादयो विधीयन्ते ॥ ९८ ॥

त्रिच ॥ तिसृकेति । तिस्र एव तिसृका स्वार्थे कन्प्रत्ययः । ह्रस्वत्वे कुत्सितत्वे वा विवक्षिते संज्ञायां कनिति कन् वा । तत्र विभक्तेर्लुकि कृते विभक्तौ विधीयमानस्तिसृभावो न प्राप्नोतीति वचनम् । तत्र केचिद् बहुवचनान्तः तिसृकाशब्दः संज्ञेत्याहुः । अपरे त्वेकवचनान्त इति । ग्रामस्य ह्येकस्य तिसृकेति संज्ञेति नास्ति बहुवचनप्रसङ्गः । चतस्र इति । चतुरः शसीत्यनेन स्थानिवद्भावाद् अन्तोदात्तत्वं प्राप्नोति । तत उदात्तयणो हल्पूर्वादिति शस उदात्तत्वप्रसङ्गः । चतसृणामिति । उपदेशावस्थायामाद्युदात्ते चतस्रादेशे कृते षट्त्रिचतुर्भ्यो हलादिरिति सति शिष्टस्वरः प्रवर्तते । यद्येवं चतस्रः पश्येत्यत्रापि चतुरः शसीति सतिशिष्टत्वात्प्राप्नोति । नैष दोषः । आन्तरतम्यादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वं निपात्यमानं चतुरः शसीत्यनेन विधीयमानं स्थानिवद्भावात्प्राप्तमन्तोदात्तत्वं बाधेत । तत्र बाधितत्वात्पुनः प्रसङ्गाभावात्कुतः सतिशिष्टत्वम् । उक्तमिति । चतुरः शसीत्यत्र । हलादिग्रहणं चतस्रः पश्येत्येतद्व्यावृत्त्यर्थमेव क्रियते । यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत तदा हलादिग्रहणमन्तरेणापि विभक्तेः स्वरो न भविष्यतीति किं हलादिग्रहणेन तत्क्रियमाणं निपातनस्वरो बाधक इति ज्ञापयति । अथ वा हलादिग्रहणेनाद्युदात्तनिपातनमेव न कर्तव्यमिति प्रतिपाद्यते । यदि चतस्रः पश्येत्यत्र चतुरः शसीत्यनेनान्तोदात्तत्वं स्यात् तत उदात्तयणो हल्पूर्वादिति स्यादेव विभक्तेराद्युदात्तत्वमिति तद्व्यावृत्तये हलादिग्रहणमनर्थकं स्यात्तस्माद्धलादिग्रहणाच्चतस्रः पश्येत्यत्र चतुरः शसीत्यस्याप्रवृत्तिरध्यवसीयते । ततश्चाद्युदात्तस्य चतुःशब्दस्याद्युदात्त एवान्तर्याच्चतस्रादेशो भवति । चतुःशब्दो न्रः संख्याया इति वा चतेरुरन्निति नित्वादाद्युदात्तः । चतसृणामित्यत्र तु षट्त्रिचतुर्भ्य इति विभक्तेरुदात्तत्वं भवति ॥ ९९ ॥

अचि र ऋतः ॥ अचि रादेश इति । मध्ये ऽपवादा इति पूर्वसवर्णदीर्घस्य

अचिरादेशे जस्युपसंख्यानं कर्तव्यम्। तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति। किं पुनः कारणं न सिध्यति। गुणपरत्वात्। परत्वाद् गुणः प्राप्नोति। तर्हि कर्तव्यम्। न वानवकाशत्वाद्रस्य। न वा कर्तव्यम्। किङ्कारणम्। अनवकाशत्वाद्रस्य। अनवकाशो रादेशः गुणं बाधिष्यते। सावकाशो रादेशः। कोवकाशः। तिस्रः पश्य चतस्रः पश्य। नैषोस्त्यवकाशः। अत्रापि पूर्वसवर्णदीर्घः प्राप्नोति। स यथैव पूर्वसवर्णं बाधते एवं गुणमपि बाधिष्यते। गुणोऽप्यनवकाशः। सावकाशो गुणः। कोवकाशः। हे कर्तः। नैष सर्वनामस्थाने गुणः। कस्तर्हि सम्बुद्धिगुणः। अयं तर्हि हे मातः। एषोऽपि सम्बुद्धिगुण एव। नात्र सम्बुद्धिगुणः प्राप्नोति। किङ्कारणम्। अम्बार्थनद्योर्ह्रस्व इति ह्रस्वत्वेन भवितव्यम्। भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यान्न स्यात्। ह्रस्वानां तु खलु ह्रस्वत्वं क्रियतां सम्बुद्धिगुण इति। परत्वात्सम्बुद्धिगुणेन भवितव्यम्। अथापि कथं चित्सावकाशो गुणः स्यात्। एवमपि न दोषः। पुरस्तादपवादा अनन्तरान् विधीन् बाधन्त इति।

---

ऋत उदित्युत्वस्य च बाधकः प्राप्नोति न तु जसि च ऋतो ङिसर्वनामस्थानयोरिति गुणस्येति भावः। न वेति। मध्ये अपवादा इति परिभाषानाश्रयेणोच्यते। विध्यन्तरपूर्वकत्वादस्य सर्वापवादत्वमित्यर्थः। गुणोऽप्यनवकाश इति। सोऽपि विध्यन्तरपूर्वकः कर्तारावित्यत्र पूर्वसवर्णदीर्घः प्राप्नोति कर्तार इत्यत्र जसि चेति गुणः सिद्धः। कर्तारमित्यत्रापि अमि पूर्व इति प्राप्नोति। तत्र द्वयोर्विध्यन्तरापवादविप्रतिषेधात्परत्वाद् गुणप्रसङ्गः। इतरोऽन्यविधिपूर्वकत्वाभावं गुणस्य दर्शयति सावकाश इति।हे कर्तरिति।संबुद्धौ ह्रस्वस्य गुण इति परत्वादृतो ङीति गुणो बाधत इति मन्यते तत्र कर्तारावित्यादौ यद्यपि परत्वात्पूर्वसवर्णादिकं बाधित्वा गुणो भवति तथापि विध्यन्तरपूर्वकेण रादेशेन बलीयसा न स्पर्द्धत इति भावः। नैष इति। एतदर्थो गुणस्य नारम्भो लक्षणान्तरेण सिद्धत्वादित्यर्थः। हे मातरिति। संबुद्धिनिमित्तो गुणोत्र नास्ति। अम्बार्थनद्योर्ह्रस्व इति ह्रस्वेन बाधनात्। एषोपीति। गुणो ह्रस्वत्वं परत्वाद्बाधत इति भावः। अम्बार्थेति। अस्मिंश्च सति ऋतो ङीति गुणः प्रवर्तते। भवेद्दीर्घाणामिति। ननु दीर्घाणां ह्रस्वविधानं ह्रस्वस्य गुण इति गुणविधानार्थमेव स्यात्। ह्रस्वानां तु ह्रस्वविधानं गुणबाधनार्थं स्यात्। नैतदस्ति। एवं हि दीर्घाणामेव गुणं विदध्यात्। नदीह्रस्वयोर्गुण इति प्रक्रियागौरवमेव परिहृतं भवति। परत्वात्संबुद्धिगुणेनेति। गुणस्यावकाशः, अग्ने वायो। ह्रस्वस्यावकाशः, अम्ब अक्क। हे मातरिति परत्वाद् गुणः। एवं च सर्वनामस्थानगुणः पूर्वसवर्णापवाद एवेति अपवादविप्रतिषेधात्तिस्रस्तिष्ठन्तीति परत्वाद्गुणप्रसङ्गः स च न जसि चेत्यनेन। किं तर्हि ऋतो ङीत्यनेन। जसि चेत्यस्मात्परत्वात्। अथापीति। ह्रस्वस्य गुण इति यदि योगविभागः क्रियते। अम्बार्थस्य ह्रस्वान्तस्य ह्रस्वो भवति। ततो गुण इति। ततश्च हे मातरित्यत्र ह्रस्वे कृते सर्वनामस्थानगुणः क्रि-

Indira Gandhi National Centre for the Arts

एवमयं रादेशः जसि गुणं बाधते । सर्वनामस्थानगुणं न बाधिष्यते । तस्मात्सुष्ठूच्यते अचि रादेशे जस्युपसंख्यानं गुणपरत्वादिति ॥

जराया जरसन्यतरस्याम् ॥ १०१ ॥ नुमोऽनङ्जरसौ भवतो विप्रतिषेधेन * । नुमोवकाशः, त्रपुणी जतुनी तुम्बुरुणी । अनङोऽवकाशः । प्रियसक्थ्ना ब्राह्मणेन । इहोभयं प्राप्नोति । अतिजरांसि ब्राह्मणकुलानि । अनङ्जरसौ नुमो विप्रतिषेधेन । अथेह लुक्कस्मान्न भवति । अतिजरसं पश्येति । किं पुनः कारणं द्वितीयैकवचनमेवोदाह्रियते न पुनः प्रथमैकवचनमपि । अतिजरसं तिष्ठतीति । अस्त्यत्र विशेषः । नात्राकृते ऽम्भावे जरस्भावः प्राप्नोति । किङ्कारणम् । अचीत्युच्यते । यदा च जरस्भावः कृतस्तदा लुग् न भविष्यति । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति । यद्येवमतिजरसमतिजरसैरित्यत्र न प्राप्नोति । अतिजरमतिजरैरिति भवितव्यम् । गोनर्दीय आह । इष्टमेवैतत्संगृहीतं

---

यते । एतच्चाभ्युपगम्योच्यते न तु योगविभागस्य किं चिदस्ति प्रयोजनम् । सर्वनामस्थानगुणमिति । यद्यप्यबाधिते सर्वनामस्थाने गुणे जसि गुणः फलतो न बाधितस्तथापि लक्षणव्यवस्थानुसारेणैतदुच्यते । न ह्ययं रादेशोनवकाशो यतः ऋतो ङिसर्वनामस्थानयोरित्येतं गुणं बाधेत । जसि चेति गुणबाधनेन ऋत उदित्युत्वबाधनेन शसि पूर्वसवर्णबाधनेन च सावकाशत्वात् । तस्मादिति । जसिग्रहणं ङिसर्वनामस्थानोपलक्षणमित्याहुः । तथा च प्रियतिस्राविति रादेशो भाष्य उदाहृतः । तेन प्रियतिस्रि निधेहि इत्यत्रापि रादेशो भवति । के चित्त्वाहुः चतसर्याद्युदात्तनिपातनमित्यत्र वार्तिके रादेशस्य ज्ञापकरणाज्जसोऽन्यत्र गुणविषये रादेशं वार्तिककारो नेच्छतीति नोपलक्षणं जस्ग्रहणम् ।

जराया ॥ प्रियसक्थ्नेति । नपुंसकेनाङ्गस्य विशेषणान्नुमोऽत्राप्राप्तिरनङ्विधौ त्वस्थ्यादीनां विशेषणं नपुंसकमित्यनङ् भवति । अतिजरांसीति । अतिजर अस् इति स्थिते यदि पूर्वं नुमागमः स्यात् स च पूर्वाङ्गभक्तोऽङ्गमेव न व्यवदध्यात् । अवयवस्य तु जराशब्दस्य व्यवधायक इति निर्दिश्यमानस्यादेशो विधीयमानो न प्राप्नोति । अथापि स्यात्तथापि सकारात्परस्य नुमः श्रवणं स्यात् । तस्मात्परत्वात्पूर्वं जरस्भाव एष्टव्यः । तत्र कृते झलन्तलक्षणो नुमागमः । अतिजरसं पश्येति । अतिजर अम् इति स्थिते एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसि कृते स्वमोर्नपुंसकादिति स्वमोर्लुक् प्राप्नोति । ननु चातिजरशब्दस्यादन्तत्वादतोमित्यम्भावेन लुग्बाधितः कथं प्राप्नोति । नैतदस्ति । नात्राम्भावः प्रवृत्तः । परत्वान्नित्यत्वाद्वा जरसादेशेन बाधितत्वाज्जरसादेशे कृते ऽनकारान्तत्वादम्भावाप्रसङ्गाल्लुक्प्राप्तिश्चोद्यते । न पुनरिति । सोऽपि हि लुक् नेष्यते यदा च जरस्भाव इति । या पूर्वं लुक्प्राप्तिः साऽपवादेन बाध्यते । कृते तु जरस्भावे सन्निपातपरिभाषया अजादिसन्निपातेन जरस्भावो निष्पन्नो नोत्सहते अजाद्यानन्तर्यं विहन्तुम् । यद्येवमिति । सोर्भिसश्चाकारान्तसन्निपातेनाजादिरादेशोऽकारान्ताविघातिनं जरसादेशमनिमित्तं

Indira Gandhi National Centre for the Arts

भवति । अतिजरमतिजरैरिति भवितव्यम् । सत्यामेव तस्यां परिभाषायां सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ॥

त्यदादीनामः ॥ १०२ ॥ त्यदादीनां द्विपर्यन्तानामकारवचनम् * । त्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम् । किम्प्रयोजनम् । युष्मदस्मदन्तानां भवत्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम् । तत्तर्हि वक्तव्यम् । त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः शेषे लोपस्य लोपेन ज्ञापते प्राक् ततोऽदिति । यदयं त्यदादीनामत्वेन सिद्धे युष्मदस्मदोः शेषे लोपं शास्ति तज्ज्ञापयत्याचार्यः प्राक् ततः अत्वं भवतीति न सर्वेषामिति । अपि चोपसमस्तार्थमत्वाभावात्कृतं भवेत् । नैतदस्ति ज्ञापकम् । उपसमस्तार्थमेतत्स्यात् । अतियूयमतित्वयम् । उपसमस्तानां हि त्यदादीनामत्वं नेष्यते । अतितत् अतितदौ अतितदः । टिलोपष्टाबभावार्थः कर्तव्य इति तत्स्मृतम् ॥ यस्तु शेषे लोपष्टिलोपः स वक्तव्यः । किम्प्रयोजनम् । टाप्प्रतिषेधार्थम् । टाब् मा भूदिति । स तर्हि टिलोपो वक्तव्यः । न वक्तव्यः । अथ वा शेषसप्त-

---

स्यात् । इष्टमिति । सन्निपातपरिभाषावशाद् अतिजरसं पश्येत्यत्र तु सकारान्तसन्निपातकृतमजादित्वं भवतीति भवत्येव जरसादेशः । स त्वजादिसन्निपातनिमित्तस्यादजादेर्लुकं प्रत्यनिमित्तमिति लुगभावः ॥ १०० ॥

त्यदादीनामः ॥ युष्मदस्मदन्तानामिति । युष्मद् भवतु अस्मद् इति येषां गणपाठः तदपेक्षयैतदुक्तम् । यद्यप्यस्मच्छब्द एवान्तस्तथाप्यन्तसाहचर्याच्छास्त्रे युष्मदस्मयोर्युष्मच्छब्दो निर्दिष्टः । भवदन्तानां वेति । युष्मद् अस्मद् भवत्विति पाठापेक्षमेतत् । किंशब्दस्य तु कादेशेन भवितव्यमिति त्यदादीनामन्तेऽपि किमः पाठे किमन्तानामिति नोक्तम् । केचित्तु द्विशब्दात्पूर्वं किंशब्दमधीयते । तेन किं सर्वनामबहुभ्योऽद्व्यादिभ्य इति किमो भेदेन ग्रहणं न कर्तव्यं भवति । तत्र भवच्छब्दस्यात्वापत्तिर्दोषो युष्मदस्मदोस्त्वात्वयत्वलोपैरत्वं बाध्यत इति दोषाभावः । शेषे लोपस्य लोपेनेति । यः शेषे लोपः प्रसिद्धस्तत्सम्बन्धिना लोपशास्त्रेणेत्यर्थः । क्वचित्तु शेषे रूपस्य लोपेनेति पाठः । तत्रायमर्थः । शेषे विषये । रूपस्य लोपो विधीयते येन तेन । ततोऽदिति । वृत्तपूरणार्थस्तपरनिर्देशः । सूत्रे त्वतपर एवाकारो निर्दिष्टः । अपि चेति । ज्ञापकत्वं विघटयति । उपसर्जनानां त्यदाद्यत्वाभावादुपसर्जनयुष्मदस्मदर्थो लोपः स्यात् । अतियूयमिति । त्वामतिक्रान्ता इति प्रादिसमासः । टिलोप इति । अत्वे सति टाप्प्रसङ्गात्तदभावार्थः शेषे लोपष्टिलोपः सति प्रयोजने न ज्ञापकम् । अलिङ्गे युष्मदस्मदी इत्यनभ्युपगम्यैतदुच्यते । एकपदवाच्यस्याप्यर्थस्य शब्दान्तराभिव्यङ्ग्यत्वं दृश्यते । अश्वस्त्वं ग्राममिति लिङ्गवत्त्वं कैश्चित्तयोरभ्युपगतम् । अत एव नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा इति विप्रतिषेधः पठितो न षट्स्वस्रादिभ्य इति च स्त्रीप्रत्ययनिषेधः षड्भ्यः कृतः । स तर्हीति । नत्वत्वेन सिद्धत्वाद्वचनाट्टिलोपो भविष्यति । नैतदस्ति । सर्वादेशः स्यादुपसर्जनस्यात्वासिद्धिरुक्ता । अथ वेति । उक्तमेतल्लोपमुत्सर्गं विधायानादेशो हलादावात्वम-

Indira Gandhi National Centre for the Arts

म्या शेषे लोपो विधीयते । इह युष्मदस्मदोर्लोप इति । इयता अन्त्यस्य लोपः सिद्धः सोयमेवं सिद्धे सति यच्छेषग्रहणं करोति तस्यैतत्प्रयोजनमत्रशिष्टस्य लोपो यथा स्यादिति । लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वेषां त्यदादीनामत्वं भवतीति । यदयं किमः क इति कादेशं शास्ति । इतरथा हि किमः अद् भवतीत्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च किमोऽत्वे न सिध्यति । अत्वे हि सति अन्त्यस्य प्रसज्येत । सिद्धमन्त्यस्य पूर्वेणैव । तत्रारम्भसामर्थ्यादिकारस्य भविष्यति । कुतो नु खल्वेतत् । अनन्त्यार्थ आरम्भे सति इकारस्य भविष्यति । न पुनः ककारस्य स्यात् । यत्तर्हि किमो ग्रहणं करोति । इतरथा हि काद् भवतीत्येव ब्रूयात् । एवमपि ककारमात्रात्परस्य प्राप्नोति । त्यदादीनामिति वर्तते । न चान्यत्किमस्त्यदादिषु ककारवदस्ति । एवमप्यनैकान्तिकं ज्ञापकम् । एतावत्तु ज्ञाप्यते न सर्वेषां त्यदादीनामत्वं भवतीति । तत्र कुत एतद् द्विपर्यन्तानां भविष्यति । न पुनर्युष्मदस्मदन्तानां वा स्याद् भवदन्तानां वा । किञ्च । अवश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यम् । कु तिहोः क्वातीति । कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः । कः कौ के इत्येवमर्थम् । तस्माद्द्विपर्यन्तानामत्वं वक्तव्यम् । त्यदादी-

---

जादौ तु यत्त्वमपवादो विधास्यत इति शेषग्रहणं विभक्तिविशेषणार्थमनर्थकम् । तत्क्रियते लोपस्य विषयार्थं मपर्यन्ताद्योन्यः स शेषः स च टिरेव तस्य लोपस्थानी विषयसप्तम्या निर्दिष्टः । नन्वेवं तव ममेत्यादावादेशेषु मपर्यन्ताभावात्तदपेक्षया अच्छब्दस्य शेषव्यपदेशाभावाल्लोपाभावप्रसङ्गः । नैष दोषः । प्रागादेशविधानाद्च्छब्दः शेषत्वेन परिच्छिन्न इति परिच्छेदायोपादानादतन्त्रत्वं मपर्यन्तस्य । लुप्तशिष्टे हीति । लुप्ते यः शिष्टस्तस्मिन् कार्यस्य टाबभावस्य सिद्धिः । तवममादिषु चादेशेष्वकार उच्चारणार्थो हलन्ता एव त्वादेशा इति न क चिट्टाप्प्रसङ्गः । यदयमिति । किं सर्वनामबहुभ्य इति । किम्शब्दस्य भेदेनोपादानाद्विशब्दात्परः किम्शब्दो गणे पठ्यत इति निर्णयः । यदि च द्विशब्दात्परेषामत्वं स्यात्किमः कं न विदध्यात्किम इत्येव ब्रूयात् । पूर्वसूत्रादकारस्यानुवृत्त्या पूर्वेणान्त्यस्यात्वे कृते इकारस्य तु किम इत्यनेन द्वयोरकारयोः पररूपेण क इत्यादेः सिद्धत्वात् । न पुनः ककारस्येति। अनन्त्यस्य विकारे ऽन्त्यसदेशस्येति तु परिभाषा प्रयोजनाभावात् प्रत्याख्याता । काद्दू भवतीति । ककारेकार उच्चारणार्थः । कादित्येतावत् सूत्रं क्रियते । अकारस्तु पूर्वसूत्रादनुवर्तते । स चादेः परस्येति इकारस्य भवति । मकारस्य तु पूर्वेण । ककारमात्रादिति । कृकवाकुरित्यादावपि । न चान्यदिति । यद्यपि सर्वाणि त्यदादीन्यकचा ककारवन्ति तथापि तेषां कात्परोऽकार एवेति नास्ति विशेषः । इकिशब्दस्य तु त्यदाद्यत्वं भवत्येव । एवमपीति । विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाभावात् । साकच्कार्थ इति । सर्वस्य साकच्कस्य कादेशो यथा स्यादित्येवमर्थं

Indira Gandhi National Centre for the Arts

नामकारेण सिद्धत्वाद् युष्मदस्मदोः ॥ शेषे लोपस्य लोपेन ज्ञायते प्राक् ततोदिति ॥ १ ॥ अपि चोपसमस्तार्थमत्वाभावात्कृतं भवेत् । टिलोपष्टाबभावार्थः कर्तव्य इति तत्स्मृतम् ॥ २ ॥ अथ वा शेषसप्तम्या शेषे लोपो विधीयते ॥ लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥ ३ ॥

क्वा ति ॥ १०५ ॥ किमर्थं क्वादेश उच्यते । न कुतिहात्स्त्विसेवोच्येत। का रूपसिद्धिः । क्व । यणादेशेन सिद्धम् । न सिध्यति । ओर्गुणः प्रसज्येत ॥

तदोः सः सावनन्त्ययोः ॥ १०६ ॥ किमर्थमनन्त्ययोरित्युच्यते । अन्त्ययोर्मा भूदिति । नैतदस्ति प्रयोजनम् । अत्वमन्त्ययोर्बाधकं भविष्यति । अनवकाशा विधयो बाधका भवन्ति । सावकाशं चात्वम् । कोवकाशः । द्विशब्दः । सत्वमपि सावकाशम् । कोवकाशः । अनन्त्यम् ॥ कथं पुनः सत्यन्त्ये अनन्त्यस्य सत्वं स्यात् । भवेद्यस्तकारदकाराभ्यामङ्गं विशेषयेत् । तस्यानन्त्ययोर्न स्यात् । वयं तु खल्वङ्गेन तकारदकारौ विशेषयामः। एवमप्युभयोः सावकाशयोः परत्वात्सत्वं प्राप्नोति । किञ्च स्यात् । यद्यन्तयोः

---

किमः क इति कर्तव्यम् । तेनाज्ञातार्थविवक्षायां क इत्येव भवति न तु कक इति भवति । ननु निर्दिश्यमानस्यादेशा भवन्तीति साकच्कस्य कादेशो न प्राप्नोति । न च शक्यं वक्तुं किमः क इति वचनसामर्थ्याद्भवतीति । किम इति स्थानिनिर्देशस्योत्तरार्थत्वात् । एवं तर्हि तन्त्राश्रयणात्साकच्कस्यापि भवतीत्यदोषः ॥ १०२ ॥

क्वाति॥ किमर्थमिति। कुभावे कृते अङ्गवृत्त इति वचनादोर्गुणो न भवति। यणादेशस्त्वनाङ्गत्वाद्भविष्यतीति भावः । न सिध्यतीति । निष्ठितस्य दुर्ज्ञानत्वात् ॥१०५॥

तदोः॥ किमर्थमिति । विशेषणविशेष्यभावे कामचारात्त्यदादीनां च द्विपर्यन्तानां मध्ये तकारान्तस्य कस्य चिदसम्भवात्त्यदादिभिर्विशेषितयोस्तदोः विधीयमानमनन्त्ययोः सावकाशमन्त्ययोरत्वेन बाधिष्यत इति प्रश्नः। अन्त्ययोरिति । परत्वात्प्राप्नोति तकारस्यान्त्यस्यासम्भवे ऽपि सूत्रे द्वयोरुपादानादन्त्ययोरित्युक्तम् । नैतददस्तीति । पूर्वविप्रतिषेधमाश्रित्य चोदयति द्विशब्द इति । उदाहरणमात्रमेतत् । अन्यत्र सोः सर्व एव त्यदादयोवकाशाः । सत्वमपीति । उभयोः सावकाशयोः परत्वात्सत्वप्रसङ्गः। कथं पुनरिति । आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानाय पृच्छति। समुदायावयवसन्निधौ उभयोरनुग्रहायावयवेन समुदायो विशेष्यते।एवं हि समुदायस्यापि कार्येण सम्बन्धः प्रतिपादितो भवति । अलोन्त्यस्येति वचनादवयवस्यापि । भवेदिति । व्याप्तिन्यायाश्रयणात्तकारान्तासम्भवाच्च त्यदादिभिस्तदौ विशेष्यते । एवमपीति । सिद्धान्तवादी । अथ वा सत्वमपीति चोदकस्य ग्रन्थः । स च पूर्वविप्रतिषेधं मन्यते । कथं पुनरिति । चोदकमाचार्यो बुद्धिपरीक्षार्थं पर्यनुयुङ्क्ते, भवेदिति चोदकः । एवमपीत्याचार्यः। अथ वा कथं पुनरित्यस्यायमर्थः । अनन्त्यस्यैव कथं सत्वं लभ्यते यावता अन्त्यस्यापि परत्वात्प्राप्नोति । चोदकस्त्व;

Indira Gandhi National Centre for the Arts

सत्वं स्याद् इह हे स इति एङ्ह्रस्वादिति सम्बुद्धिलोपो न स्यात्। इह च या सा अत इति टाब् न स्यात्। तस्मादनन्त्ययोरिति वक्तव्यम्। न वक्तव्यम्। एवं वक्ष्यामि। तदोः सः सौ। ततोऽदसः। अदसश्च दकारस्य सो भवतीति। इदमिदानीं किमर्थम्। नियमार्थम्। अदस एव दकारस्य नान्यस्य दकारस्येति। यदि नियमः क्रियते। द्रीयतेरप्रत्ययः, द्र इति प्राप्नोति। स्र इति चेष्यते। यथालक्षणमप्रयुक्ते॥

अदस औ सुलोपश्च॥ १०७॥ अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते॥ अदस एव सोर्भवेदौत्वं किमर्थं सुलोपो विधीयते। ह्रस्वाल्लुप्येत संबुद्धिः॥ इह हे असाविति एङ्ह्रस्वात्सम्बुद्धेरिति लोपः प्रसज्येत॥ न हलः। हलो लोपः सम्बुद्धिलोपः। तद्धल्ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतं हि तत्। प्रकृतं हल्ग्रहणम्। क्व प्रकृतम्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति। तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः। ह्रस्वादिरेषा पञ्चमी हलिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। अपि एत्वं भवेत्तस्मिन्॥ इह हे असौ ब्राह्मणि। आङि चापः सम्बुद्धौ चेति एत्वं प्रसज्येत। न झलीत्यनुवर्त्तनात्॥ झलीति तत्रानुवर्त्तते। क्व प्रकृतम्। सुपि च बहुवचने झल्येदिति। प्रत्ययस्थाच्च कादित्वम्। इह च असकौ ब्राह्मणीति प्रत्ययस्थात्कात्पूर्वस्येति इत्वं प्रसज्येत। नैष दोषः। प्रश्लिष्टनिर्देशोयम्। आ आप् आबिति। इहापि तर्हि न

---

गृहीताभिप्राय आह भवेदिति। आचार्यः स्वाभिप्रायमाह एवमपीति। किं च स्यादिति। अन्त्यस्यापि दस्य सत्वे हल्ङ्यादिलोपेन सिध्यतीति मत्वा प्रश्नः। लोपो न स्यादिति। सत्वे सति ह्रस्वान्तत्वाभावात्। ननु त्यदाद्यत्वेऽपि कृते सन्निपातपरिभाषया संबुद्धिलोपाप्रसङ्गः। अनित्यत्वादस्याः परिभाषाया नायं दोषः। इह चेति। न यासयोरिति लिङ्ग आश्रीयमाणे अनेकार्थः कल्पनीयः स्यात्। ततोऽदस इति। तत्र तदोः सः साविति वर्तते। तकारोऽसम्भवात् त्यज्यते। द्रीयतेरिति। द्राविच्छतीति द्रीयति। ततः क्विप्। अकारयकारापृक्तलोपास्तस्य सावीकारस्य त्यदाद्यत्वे सति स इति भवति। तदभावे तु द्र इति प्राप्नोति। यथालक्षणमिति। उपसर्जनत्वान्नात्र त्यदादिकार्येण भाव्यमिति द्रीरित्येव भवति। अथ वा प्रयुक्तानामन्वाख्यानारम्भाद् द्रिशब्दस्य च क्यजन्तस्य क्विपि प्रयोगाभावान्न केनचिल्लक्षणे प्रवर्तितव्यम्॥ १०६॥

अदसः॥ अदस इति। अदसः परस्य सोरेवौत्वं विधीयताम्। तत्र त्यदाद्यत्वे वृद्धिरेचीति वृद्धौ चासाविति सिध्यति। ह्रस्वादिति। यदि त्यदाद्यत्वं क्रियते तदा ह्रस्वान्तत्वात्संबुद्धिलोपप्रसङ्गः। तस्मादौत्वसुलोपौ विधीयेते। न हल इति। नायं दोषो यस्मादसो हलो लोपो विधीयते। तेनोकारस्य न भविष्यति। हे असाविति। अत्वे टापि च सति वार्णादाङ्गं बलीय इति वृद्धिरेचीति वृद्धिमेकादेशं बा-



Indira Gandhi National Centre for the Arts

प्राप्नोति । कारिके हे हारिके इति । शीभावश्च प्रसज्यते । इह च शीभावश्च प्राप्नोति । असौ ब्राह्मणी । आप उत्तरस्य औङः शी भवतीति शीभावः प्राप्नोति । तस्मात्सोर्लोपो वक्तव्यः । सौ औत्वप्रतिषेधः साकच्काद्वा सादुत्वं च* । सौ औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः । साच परस्य उत्वं वक्तव्यम् । असकौ असुकः । उत्तरपदभूतानामादेश उपदेशिवद्वचनम् * । उत्तरपदभूतानां सदादीनामादेश उपदेशिवद्भावो वक्तव्यः । परमाहं परमायं परमानेन । किम्प्रयोजनम् । अनादिष्टार्थम् । अकृते एकादेशे आदेशा यथा स्युरिति । किं पुनः कारणम् । एकादेशस्तावद्भवति । न पुनरादेशाः । न परत्वादादेशैर्भवितव्यम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गा आदेशाः । अन्तरङ्ग एकादेशः । असिद्धं बहिरङ्गमन्तरङ्गे । स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति । यदयं नेन्द्रस्य परस्येति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इन्द्रे द्वावचौ । तत्रैको यस्येति लोपेनापह्रियते । अपर एकादेशेन । अनच्क इन्द्रः संवृत्तस्तत्र को वृद्धेः प्रसङ्गः । पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति । ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति । अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते । ह्रस्वाल्लुप्येत सम्बुद्धिर्न हलः प्रकृतं हि तत् ॥ आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात् । प्रत्ययस्थाच्च कादित्त्वं शीभावश्च प्रसज्यते ॥

---

धित्वा आङि चाप इत्येवं प्राप्नोति । प्रश्लिष्टनिर्देशोऽयमिति । अकाररूपो यः श्रूयते आप् तत्रेत्वं भवति । इह तु वृद्धौ कृतायामौकाररूपम् । कारिकेति औङ आप इति शीभाव आद्गुणं च कृते एकारः श्रूयत इति इत्वन्न प्राप्नोति । संबुद्धौ वा कारिके इति रूपम् । ननु चात्रान्तरङ्गत्वात्प्राक्सुबुत्पत्तेरित्वं भविष्यति । असकावित्यत्र तु प्राक् सुबुत्पत्तेष्टाबस्ति । एवं तर्हि टापि कृत एकादेशात् पूर्वं वार्णादाङ्गं बलीय इति इत्वं प्राप्नोतीत्याकाररूप एवाबिति किं प्रश्लिष्टनिर्देशेन तस्मात्सामर्थ्याद्यथा वार्णादाङ्गमिति बाधित्वा एकादेशो भवत्येवं कारिके इत्यत्रापि अन्तरङ्गत्वात् पूर्वं विभक्तितन्निमित्तकार्यप्रसङ्गः । शीभावश्चेति । औङ इति वचनादौकारस्य यदा ङिदादेशानुमानं वर्णमात्रनिर्देशो वा ङकारस्तूच्चारणार्थस्तदा शीभावप्रसङ्गः । यदा तु पूर्वसूत्रेण निर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीभावेन भाव्यमिति दोषाभावः । इत्वमपि प्रश्लेषनिर्देशेन शक्यं परिहर्तुम् । न च कारिके इत्यत्र दोषः समानकालप्राप्तिकमेव ह्येकादेशमित्वं प्रतीक्षते न तु भिन्नकालप्राप्तिकम् । साकच्कादिति । साकच्काद्यः सुर्विहितः तस्मिन्नित्यर्थः । प्रतिषेधसन्नियोगेन सात्परस्याकारस्योत्वं भवति । बहिरङ्गा आदेशा इति । समासाद्या विभक्तिरुत्पद्यते तदपेक्षत्वात्ततोऽन्तरङ्गत्वादेकादेशे कृते तस्यादिवद्भावादादेशेषु क्रियमाणेषु परमाहं परमयमित्यादिरनिष्टप्रसङ्गः ॥ १०७ ॥

Indira Gandhi National Centre for the Arts

मृजेर्वृद्धिः ॥ ११४ ॥ मृजेर्वृद्धिविधौ क्ङिप्रतिषेधः * । मृजेर्वृद्धिविधौ क्व्यन्तस्य प्रतिषेधो वक्तव्यः । कंसपरिमृड्भ्यां कंसपरिमृड्भिः । धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् * । अथ वा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धम् । धातुप्रत्यये कार्यं भवतीति एषा परिभाषा कर्तव्या । कान्येतस्याः परिभाषायाः प्रयोजनानि । प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरस्यर्थम् * । सृजि, रज्जुसृड्भ्याम् । रज्जुसृड्भिः । सृजि । दृशि, देवदृग्भ्याम् । देवदृग्भिः । दृशि । मस्जि, उदकमग्भ्याम् । उदकमग्भिः । मस्जि । नशि, प्रणड्भ्याम् । प्रणड्भिः । नशि । हन्ति, वार्त्रघ्नः । भ्रौणघ्नः । हन्ति । गिरि, देवगिरौ । देवगिरः । गिरि । यदि स्वरूपग्रहण इत्युच्यते प्रमृड्भ्यां प्रमृड्भिः । अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति अम् प्राप्नोति । एवं तर्हीयं परिभाषा कर्तव्या धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषा यदयं भ्रौणहत्ये तत्त्वं शास्ति ॥

अचो ञ्णिति ॥ ११५ ॥ अज्ग्रहणं किमर्थम् । वृद्धावज्ग्रहणं गोर्थम् * वृद्धावज्ग्रहणं क्रियते । गोतो वृद्धिर्यथा स्यात् । गौरिति । नैतदस्ति प्रयोजनम् । णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति । अस्त्यन्यण्णित्करणस्य प्रयोजनम् । किम् । गावौ । गाव इत्यत्रात उपधाया इति वृद्धिर्यथा स्यात् । अथ योगविभागः किमर्थः । न ञ्णित्यत उपधाया इत्येवोच्येत । का रूपसिद्धिः । चायकः, लावकः, कारकः । गुणे कृतेऽयवोरपरत्वे चात उपधाया इत्येव सिद्धम् । योगवि-

---

मृजे ॥ कंसपरिमृड्भ्यामिति । विभक्तिमाश्रित्य वृद्धिः प्राप्नोति । क्ङिति चेति प्रतिषेधः क्ङिन्निमित्ताया एव वृद्धेरित्यत्र न प्रवर्तते । रज्जुसृड्भ्यामिति । प्रत्ययो झलादिरकिद्भवतीत्यमागमप्रसङ्गः । प्रणड्भ्यामिति । न शोर्वेति कुत्वमन्यत्र न भवतीति केचिदाहुस्तदयुक्तम् । पदत्वनिबन्धनत्वादस्य मस्जिनशोर्झलीति नुमागमस्तु प्रत्ययापेक्षत्वाद्धातुप्रत्यये न भवति । वार्त्रघ्न इति । हनस्तोऽचिण्णलोरिति तत्वं न भवति । कुमति चेति णत्वं कुव्यवाये हादेशेषु प्रतिषेध इति न भवति । देवगिराविति अचि विभाषेति लत्वं न भवति । अम् प्राप्नोतीति । तद्विधौ धातोः स्वरूपेणानुपादानात् ॥ ११४ ॥

अचो ञ्णिति ॥ अज्ग्रहणमिति । अन्तरेणाज्ग्रहणमिक्परिभाषोपस्थानादिगन्तस्य वृद्धिः सिध्यति । अकारस्य तु चिकीर्षक इत्यादावतो लोप इति लोपेन भाव्यम् । अकारस्य तु विशेषो नास्ति सन्ध्यक्षराणामात्वेन भाव्यमिति प्रश्नः । गोऽर्थमिति । असत्यज्ग्रहण इक्परिभाषोपस्थानाद् गौरित्यत्र वृद्धिर्न स्यात् । अथ योगविभाग इति । यद्यपि गौरित्युक्तेनोदाहरणेन योगविभागस्य प्रयोजनं ज्ञाप्यते तथाप्यनेक-

Indira Gandhi National Centre for the Arts

भागः सखिव्यञ्जनाद्यर्थः। योगविभागः क्रियते सख्यर्थो व्यञ्जनाद्यर्थश्च। सख्यर्थस्तावत्, सखायौ सखायः। व्यञ्जनाद्यर्थः, जैत्रं यौत्रं च्यौत्नम्। योगविभागे चेदानीं सखिव्यञ्जनाद्यर्थे क्रियमाणे ऽज्ग्रहणमपि कर्तव्यं भवति। किं प्रयोजनम्। गोर्थम्। ननु चोक्तं णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति। अस्त्यन्यण्णित्करणे प्रयोजनम्। किम्। गावौ गावः। अवादेशे कृते ऽत उपधाया इति वृद्धिर्यथा स्यात्। यत्तु सोणित्करणं तदनवकाशं तस्यानवकाशत्वादेव वृद्धिर्भविष्यति। यथैव खल्वपि णित्करणसामर्थ्यादनिको वृद्धिः प्रार्थ्यते एवं तत्वमपि प्राप्नोति। तत्वमपि हि ञ्णितीत्युच्यते। तस्मादज्ग्रहणं कर्तव्यम्॥

तद्धितेष्वचामादेः॥ ११७॥ अज्ग्रहणं कर्तव्यम्। ननु च क्रियत एव। द्वितीयं कर्तव्यम्। यथाचामादिग्रहणमज्विशेषणं विज्ञायेत अचामादेरच इति। अथा ऽक्रियमाणेऽज्ग्रहणे कस्याचामादिग्रहणं विशेषणं स्यात्। इग्विशेषणमित्याह। अचामादेरिक इति। तत्र को दोषः। इहैव स्यात्। ऐतिकायनः। औपगवः। इह न स्यात्। गार्ग्यो वात्स्य इति। तत्तर्ह्यज्ग्रहणं कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अचोञ्णितीति। यदि तदनुवर्तते ऽत उपधाया अचश्चेति अज्मात्रस्य उपधाया वृद्धिः प्रसज्येत भेदकश्छेदकइति। अकारेण तपरेणाचं विशेषयिष्यामः; अचः अत इति। इहेदानीमच इत्यनुवर्तते अत इति निवृत्तम्। अथ वा मण्डूकगतयोधिकाराः। तद्यथा। मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति

---

प्रयोजनोपन्यासाय प्रश्नप्रतिवचने। सखायाविति। सखि औ इति स्थिते वृद्धेरप्रसङ्गः णित्वं तु सखाय इत्यत्र जसि गुणे ऽयादेशे च कृते ऽत उपधाया वृद्ध्यर्थं स्यात् सखाय इत्येतत्तु प्रसङ्गेनोदाहृतम्। णित्वावकाशदर्शनार्थं वा। व्यञ्जनाद्यर्थं इति। व्यञ्जनादिर्यः प्रत्ययः तत्र वृद्ध्यर्थः। जैत्रमिति। जियुभ्यामौणादिकष्ट्रण्। च्यौत्नमिति। जनिदाच्युस्निति त्नण्। तत्वमिति। हनस्तोऽचिण्णलोरिति हन्तेरुच्यमानं गोरपि स्यात्। नैष दोषः। प्राप्तादित्यज्ग्रहणं क्रियते॥ ११५॥

तद्धि॥ अज्ग्रहणं कर्तव्यमिति। अचामित्यनेन निर्द्धारणषष्ठ्यन्तेन सामानाधिकरण्येनादेर्विशेषयितुमशक्यत्वादिक्परिभाषोपस्थानादिक एवाचो वृद्धिप्रसङ्गः। अथाक्रियमाण इति। निर्धारणं तुल्यजातीयस्य भवति यथा कृष्णा गवां संपन्नक्षीरतमेत्युक्ते गौरेव प्रतीयते तथा चाचामादिरजेव प्रत्येष्यत इति भावः। इग्विशेषणमिति। तुल्यजातीयनिर्द्धारणे ऽपि इक इत्यस्योपस्थानं न निवार्यते। अज्ग्रहणं तु क्रियमाणे निर्दिष्टस्थानिकत्वादिक्परिभाषानुपस्थानं यथाऽचोञ्णितीत्यत्र। अज्मात्रस्येति। नन्वद्ग्रहणसामर्थ्यादज्मात्रस्य न भविष्यति। तत्सामर्थ्यात्तर्हि निवृत्तिरेवाज्ग्रहणस्य स्यान्नियमार्थं वाऽद्ग्रहणं स्यात्। अकारस्यैव ह्रस्वस्य नान्यस्येति दीर्घस्य त्वीहक इत्यादावुपधायाः स्यादेव। अकारेणेति। विशेषणस्या-

Indira Gandhi National Centre for the Arts

तद्वदधिकाराः। अथ वैकयोगः करिष्यते अचोञ्णित्यत उपधायाः। ततस्तद्धितेष्वचामादेरिति। नचैकयोगेऽनुवृत्तिर्भवति। तद्धितेष्वचामादिवृद्धावन्त्योऽपधालक्षणप्रतिषेधः * तद्धितेष्वचामादिवृद्धौ अन्त्योपधालक्षणाया वृद्धेः प्रतिषेधो वक्तव्यः। क्रौष्ट्रः। जागत इति। ननु चाचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते। कथमन्यस्योच्यमानाऽन्यस्य बाधिका स्यात्। असति खल्वपि सम्भवे बाधनं भवति अस्ति च सम्भवो यदुभयं स्यात्। लोकविज्ञानात्सिद्धम्। सत्यपि सम्भवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति एवमिहापि सत्यपि सम्भवेऽचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते। विषम उपन्यासः। नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्ते आरभ्यमाणं बाधकं भविष्यति। इह पुनरप्राप्तायामन्त्योपधालक्षणायां वृद्धौ अचामादिवृद्धिरारभ्यते। सुश्रुत्सौश्रुत इति। पुष्करसद्ग्रहणाद्वा। अथ वा यदयमनुशतिकादिषु पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्योऽचामादिवृद्धावन्त्योपधालक्षणा वृद्धिर्न भवतीति। इति श्रीमद्भगव-

———————

न्तरनिवृत्तिः प्रयोजनम्। अथ वैकयोग इति। एको भवतिरध्याह्रियते तेन तुल्यकालत्वाद्विधानस्य स्वकार्ये व्यापारादन्यत्रोपस्थानाभावः। क्रौष्ट्र इति। क्रोष्टृशब्दात्तृजन्तात्तस्येदमित्यण्। जगत इति। जगच्छब्दादण्। ननु चाचामादिवृद्धिरिति। अङ्गं कार्यि मन्यते तत्र तक्रकौण्डिन्यन्यायावतारः। इतरस्तु स्थानिभेदं मत्वाह कथमन्यस्येति। आमलकीज इत्यादावन्यस्याऽपि स्वरो विधीयमानोऽन्यस्वरं बाधत एवेत्याशङ्क्याह असति खल्वपीति। लोकविज्ञानादिति। अङ्गं कार्यि तदेवावयवद्वारेण संस्क्रियते। ततश्चैकस्य कार्यद्वयं न प्रवर्तते। कौण्डिन्य इव दधि तक्रं च। नाप्राप्त इति। सामान्यविशेषभावो बाधहेतुः स चेह नास्ति। पुष्करसद्ग्रहणाद्वेति। वाशब्दस्तर्ह्यर्थे। पूर्वस्य हेतोरनवस्थितत्वात्। ननु च ठगर्थः पुष्करसदः पाठः स्यात्। पुष्करसदाचरति पौष्करसादिक इति। अणित्यत उपधाया इति वृद्धेर्विधानाट्ठक्यप्रसङ्गात्। एवं तर्हि ठगतोनभिधानान्न भवति। यद्वा प्रतिपदविहित इत्येव पुष्करसद उभयपदवृद्धिर्नान्यत्र। केचिदाहुः। लोकविज्ञानात्सिद्धमिति वार्तिककारस्य विप्रतिषेधो विवक्षितो यथा झलचोर्नुमविधायुगित्प्रतिषेधविप्रतिषेधात् सिद्धमिति। अन्त्योपधालक्षणाया वृद्धेरवकाशः गौःपाचक इति। अस्यावकाशः, सौश्रुत इति। क्रौष्ट्रो जागत इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भवति सकृद्गतपरिभाषाश्रीयते न तु पुनः प्रसङ्गविज्ञानम्। एवं च पुष्करसद्ग्रहणाद्वेति विकल्पार्थ एव। वाशब्दो बाधकत्वसामान्याभिप्रायेण च शास्त्रविज्ञानमेव लोकविज्ञानमुक्तम्। अथ यत्रादिवृद्धिः प्रतिषिध्यते तत्रान्त्योपधालक्षणा कस्मान्न भवति। व्यसोर्भावो वैयसवमिति इगन्ताच्चेत्यण्। व्यापदि भवं वैयापदमिति। अत्राप्यैचौ परत्वाद्बाधकाविति सर्वेष्टसिद्धिः॥११७॥ इत्युपाध्यायजैयटपुत्र

Indira Gandhi National Centre for the Arts

त्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥ देविकादिषु तदादिग्रहणम् * । देविकादिषु तदादिग्रहणं कर्तव्यम् । इहापि यथा स्यात् । दाविकाकूलाः शालयः । शांशपास्थला देवाः । किं पुनः कारणं न सिध्यति । अन्यत्र हि तद्ग्रहणात्तदन्तग्रहणाद्वा । अन्यत्र हि तस्य वा ग्रहणं भवति तदन्तस्य वा । न चेदं तद् नापि तदन्तम् । आद्यज्विशेषणत्वात्सिद्धम् *। आद्यज्विशेषणं देविकादयः । नैवं विज्ञायते देविकादीनामङ्गानामचामादेराकारो भवतीति । कथं तर्हि ञ्णित्सङ्गस्याचामादेरच आकारो भवति स चेद्देविकादीनामाद्यज्भवतीति । अन्तरतमनिवर्तकत्वाद्वा * । अथ वा नानेनानन्तरतमा वृद्धिर्निवर्त्यते किं तर्ह्यन्तरतमानेन निवर्त्यतेऽतोसिद्धात्र वृद्धिस्तद्धितेष्वचामादेरित्येव । तत्रानेनान्तरतमा वृद्धिर्निवर्त्यते । परिहारान्तरमेवेदं मत्वा पठितम् । कथं चेदं परिहारान्तरं स्याद् यदि नाद्यज्विशेषणं देविकादयः । अवश्यं चैतदेवं विज्ञेयमाद्यज्विशेषणं देविकादय इति । यदि नाद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति सुदेविकायां भवः सौदेविक इति । अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं; परिहारान्तरं न भवति । न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति

---

कैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च द्वितीयः ॥

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ देविकादिष्विति । विशेषणविशेष्यभावे कामचाराद्यदाङ्गेन देविकादीनि विशेष्यन्ते तदा तेषामङ्गमन्ते न सम्भवतीति तदन्तविध्यभावादङ्गानि देविकादीन्याश्रीयन्ते । यदा तु देविकादिभिरङ्गं विशेष्यते तदा तदन्तविधिना देविकाद्यन्तमङ्गं गृह्यते । न तु कथं चित्तदादिग्रहणं कर्तव्यम् । तत्र केवलानां देविकादीनां चकारो भवतीति वक्तव्यम् । अन्यथा केवलानां न स्यात् । दाविकमुदकं शांशपश्चमस इति । न च व्यपदेशिवद्भावोऽस्ति । अप्रातिपदिकेनेति प्रतिषेधात् । यदि तु प्रत्ययविधिविषय एवायं निषेधस्तदा केवलानां व्यपदेशिवद्भावात् सिध्यति । आद्यज्विशेषणमिति । अङ्गस्य देविकादिभिः सम्बन्धाभावः । अन्तरतमनिवर्तकत्वाद्वेति । ञ्णिति कितीति वर्तते । तत्र स्थानेन्तरतम इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदितिवचनेन निवर्त्यते । न त्वपूर्व आकारो विधीयते अनेन हि स्थानेऽन्तरतम इति नियमं बाधित्वा नियमान्तरं क्रियते देविकादीनामाकारो वृद्धिर्नान्या । परिहारान्तरमिति । परिभाषेयम् । देविकादीनां वृद्धिर्विधीयमानाकार एव भवतीति केवलानां तदादीनां च वृद्धिर्देविकादीनां भवतीति तत्रैव परिभाषा प्रवृत्तिः । सुदेविकायां तु या वृद्धिर्न सा देविकादिशब्दस्य किं तु तदन्तस्येति परिभाषानुपस्थानादौकार

Indira Gandhi National Centre for the Arts

किं तर्हि यत्र क्रियमाणे न दोषस्तत्र कर्तव्यम् । क्व च क्रियमाणे न दोषः । संज्ञाविधौ वृद्धिरादैज्देविकादीनामाकार इति । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं देविकादिषु तदादिग्रहणमन्यत्र तद्ग्रहणाद् तदन्तग्रहणाद्वेति । परिहृतमेतत् । आद्यज्विशेषणत्वात्सिद्धम् । न्यग्रोधे च केवलग्रहणात् * । न्यग्रोधे च केवलग्रहणान्मन्यामहे आद्यज्विशेषणं देविकादयइति । तस्य केवलग्रहणस्यैतत् प्रयोजनम् । इह मा भूत् । न्याग्रोधमूलाः शालय इति । यदि चाद्यज्विशेषणं देविकादयः ततः केवलग्रहणमर्थवद्भवति । तदेतत्कथं कृत्वा ज्ञापकं यदि न्यग्रोधशब्दोऽव्युत्पन्नं प्रातिपदिकं भवति । अथ हि न्यग्रोहतीति न्यग्रोधः । ततो नियमार्थं पदान्त इति कृत्वा न ज्ञापकं भवति । वहीनरस्येद्वचनम् * । वहीनरस्येत्त्वं वक्तव्यम् । वहीनरस्यापत्यं वैहीनरिः । कुणरवाडवस्त्वाह नैष वहीनरः कस्तर्हि विहीनर एषः । विहीनो नरः कामभोगाभ्यां विहीनरः । विहीनरस्यापत्यं वैहीनरिः ॥

**न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ३ ॥** य्वाभ्यां पर-

---

एव भवति । यथोद्देशपरिभाषाश्रीयते न कार्यकाला । अन्यथाऽङ्गप्रकरणे देविकादीनामादित्यस्योपस्थानादव्याप्त्यतिव्याप्त्योः पूर्ववदन्यतरप्रसङ्गः स्यात् । इह तु प्रदेशे सूत्रे क्रियमाणे विधिरेवाकारस्य भवति । अर्थादैकारस्य निवृत्तिरिति नायं परिहार उपपद्यते अन्तरतमनिवर्तकत्वाद्वेति । सूत्रं तर्हीति । अष्टाध्यायीलक्षणं सूत्रं संनिवेशान्तराश्रयणे भिद्यते । अथ वास्यैव सूत्रस्य स्थानभेदाद्भेदो भवति । आद्यज्विशेषणत्वादिति । द्वितीयः परिहारो दूषितः । पूर्वस्तु स्थित एव । अत्रैवार्थे लिङ्गदर्शनम् । न्यग्रोधे चेति । केवलग्रहणमिह प्रकरणे गृह्यमाणमाद्यज्विशेषणमिति ज्ञापयति । अन्यथा तदनर्थकं स्यात् । न च तदन्तविधिनिरासार्थमङ्गेन न्यग्रोधस्य विशेषणात्तदन्तविधेरप्रसङ्गात् । तदेतदिति । अव्युत्पत्तिपक्षे न्यग्रहोधस्य च केवलस्येति वृद्धिनिषेधस्यैचश्च विधायकमिति केवलग्रहणं ज्ञापकार्थं भवति । व्युत्पत्तिपक्षे तु न य्वाभ्यामिति सिद्धे केवलस्यैव न्यग्रोधशब्दस्य यथा स्यात् । न्याग्रोधमूलाः शालय इत्यादौ मा भूदिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति । न हि न्यग्रोधस्येत्येतावताऽभिमतनियमसिद्धिः । नन्वङ्गस्यैव न्यग्रोधस्य नाङ्गादेरित्येवमिष्टो नियमः सिध्यत्येव । नैतदस्ति । अनिष्टोऽपि नियमः स्यात् । न्यग्रोधस्यैव निशब्दात्परस्य वृद्धिप्रतिषेध इति । तथा च नैयायिको नैयासिक इत्यादौ न स्यात्तस्मात् केवलग्रहणमभिमतनियमसाधनाय । द्वारादेरित्ययं तु निषेध उक्तार्थे ज्ञापको भवति । वहीनरस्येति । वहोऽस्यास्तीति वही स चासौ नरश्चेति कर्मधारयसमासोऽन्येषामपि दृश्यते इति दीर्घः । तस्यापत्यमत इञ् तत्रादिवृद्धेरपवाद इकारो विधीयते । इकारस्य वृद्धिर्भवत्येव । न च तस्यां प्राप्तायामित्त्वं विधीयते । यतः सापि बाध्येत विहीनो नर इति । पृषोदरादित्वाल्लोपः ॥ २ ॥

Indira Gandhi National Centre for the Arts

स्याद्वाद्धित्वम्। य्वाभ्यां परस्याद्वद्धित्वं सिद्धम्। कुतः। अपवादौ वृद्धेर्हि तौ। अपवादौ वृद्धेस्तावैचावुच्येते। नित्यावैचौ तयोर्वृद्धिः। अथ वा नित्यावैचौ कृतायामपि वृद्धौ प्राप्नुतः अकृतायामपि। नित्यत्वादैचोः कृतयोर्यद्यपि वृद्धिस्तयोरेव। किमर्थं नेति शिष्यते। अथ किमर्थं प्रतिषेध उच्यते। ऐचोर्विषयार्थं प्रतिषेधसन्नियुक्तं वचनम्। ऐचोर्विषयार्थं प्रतिषेधसन्नियोगेनैवैचावुच्येते। यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यश्वेर्यथा न तौ। यत्र य्वाभ्यां परस्याद्वद्धित्वमुच्यते। तत्रैचौ यथा स्यातामिह मा भूतामाध्यश्विः, दाध्यश्विः, माध्वश्विरिति। नैतदस्ति प्रयोजनम्। अचामादेर्य्वाभ्यां हि तौ। अचामादिनात्र य्वौ विशेषयिष्यामः अचामादेर्यौ य्वाविति। कथं द्व्याशीतिकेन तौ। द्व्याशीतिक इत्यत्र कस्मान्न तौ भवतः। यत्र वृद्धिरचामादेस्तत्रैचावत्र य्वोर्हि सा। यत्राचामादेरित्येवं वृद्धिस्तत्रैचावुच्येते। अत्र य्वोरित्येवं वृद्धिः। किमिदं य्वोरिति। उत्तरपदस्येति। उत्तरपदाधिकारे ऽप्यवश्यमैजागमोऽनुवर्त्यः। पूर्वेष्वलिन्दे भवः पूर्वैषलिन्द इत्येवमर्थम्। नैष दोषः। उत्तरपदेनात्राचामादिं विशेषयिष्यामः। अचामादिना य्वौ

---

न य्वाभ्याम्॥ य्वाभ्यां पदान्ताभ्यां पूर्वावैजित्येव सूत्रं कार्यं नार्थो वृद्धिनिषेधेन। अपवादाविति। एकस्मिन्नङ्गविशेषे विधीयमानावैचौ सामान्यविहितायां वृद्धेर्बाधकौ। सत्यपि सम्भवे सामान्यविशेषविषयत्वेन बाध्यबाधकभावदर्शनात्। इदानीं विषयभेदादसत्यप्यैज्वृद्ध्योर्बाध्यबाधकत्वे प्रतिविधातुमाह यद्यपीति। अभ्युपगमवादेनोच्यते न हि वृद्धौ सत्यां सर्वेष्टसिद्धिः। वैयाकरणभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधप्रसङ्गात्। तस्माच्छब्दान्तरप्राप्तां वृद्धिमनित्यां बाधित्वा नित्यावैचौ भविष्यतः। बाधितत्वाच्च पुनर्वृद्धिर्न भविष्यतीत्यभ्युपगम्य। ऐचोर्विषयार्थमिति। याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता निषिध्यते ताभ्यां पूर्वावैचौ यथा स्यातामन्याभ्यां मा भूतामित्येवमर्थं प्रतिषेधविधानम्। आध्यश्वेर्यथानताविति। स्यातामिति वाक्यशेषः। अध्यारूढोऽश्वमिति प्रादिसमासः। अत इञ्। असत्यपि निषेधविधाने दोषं परिहर्तुमाह अचामादेरिति। अचामादेरचः स्थाने यौ य्वौ ताभ्यां पूर्वौ भवत इत्याश्रीयमाणे आध्यश्विरित्यादावैचोरप्रसङ्गः। द्व्याशीतिक इति। द्वे अशीतीभूत इति तद्धितार्थे समासः, ततष्ठञ्। अध्यर्धपूर्वद्विगोरित्यत्राहादित्यधिकाराल्लुग् न भवति। अत्राचामादेरचो यकारस्य विधानात्ततः पूर्वं ऐकारः प्राप्नोति। ताविति। द्विवचनं द्व्याशीतिकस्योपलक्षणत्वादुपात्तम्। यद्यपि य्वोरचामादिना विशेषणाभावे ऽप्यत्र दोषस्तथापि विशेषणे सर्वं न सिध्यतीति प्रतिपादनायेदमुच्यते। एतत्परिहरति यत्रेति। अचामादेरिति या वृद्धिः प्राप्नोति तदपवादावैचौ विधीयेते। अत्र तु संख्यायाः संवत्सरसंख्यस्येति वृद्धिर्विधीयते। अचामादेरिति वर्तते। तन्त्रेण च ते द्वे अचामादेरित्येतदाश्रीयते। तत्रैकं स्वरूपपरम्। तेनाचामादेरित्येवं या वृद्धिस्तस्यां प्राप्ता-

Indira Gandhi National Centre for the Arts

उत्तरपदस्याचामादेर्यौ य्वाविति । अथ कस्मात्पदान्ताभ्याम् । अथ किमर्थं पदान्ताभ्यामित्युच्यते । यथेणो न भवेद्यणः । इणो यणादेशो मा भूद् । यतश्छात्रा याता इति । इह वैयाकरणः सौवश्व इति शाकलं प्राप्नोति । य्वोश्च स्थानिवद्भावादायावौ प्राप्नुतः । शाकलायावादेशेषु चोक्तम् । किमुक्तम् । शाकले तावदुक्तम् । सिन्नित्यसमासयोः शाकलप्रतिषेध इति । आयावोः किमुक्तम् । अचः पूर्वविज्ञानादैचोः सिद्धमिति । य्वाभ्यां परस्यावृद्धित्वमपवादौ वृद्धेर्हि तौ । निसावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते ॥ यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यश्वेर्यथा न तौ । अचामादेर्य्वाभ्यां हि तौ कथं द्व्याशीतिकेन तौ ॥ यत्र वृद्धिरचामादेस्तत्रैचावत्र य्वोर्हि सा । अथ कस्मात्पदान्ताभ्यां यथेणो न भवेद् यणः ॥

द्वारादीनाञ्च ॥ ४ ॥ अथ परस्यावृद्धिरित्यनुवर्तते उताहो न । किं चातः । यद्यनुवर्तते शौवं मांसं टिलोपे कृते ऐजागमो न प्राप्नोति । अथ निवृत्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्वं ऐजागमः प्राप्नोति । यथेच्छसि तथास्तु । अस्तु तावदनुवर्तते । कथं शौवं मांसम् । आनुपूर्व्यात्सिद्धमेतत् । नात्राकृते ऐजागमे टिलोपः प्राप्नोति । किङ्कारणम् । प्रकृत्यैकाजिति प्रकृतिभावेन भवितव्यम् । तदेतदानुपूर्व्यात्सिद्धम् । अथ वा पुनरस्तु

---

यां तदपवादावचामादेरचः स्थाने य्वाभ्यां पूर्वावैचौ भवत इत्यर्थः सम्पद्यते । उत्तरपदाधिकारेऽपीति । तथा च द्व्याशीतिके दोषः । पूर्वत्रैयलिन्द इति । प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः प्राप्ता निषिध्यते । नैष दोष इति । द्व्याशीतिक इत्यत्र । तदेवं नेति प्रत्याख्यानम् । याता इति । आचामादेरचः स्थाने भवत्ययं यकार इति ऐच् प्राप्नोति । ननु चान्तरङ्गत्वात् पूर्वमेव यणा भाव्यम् । इहापि व्याकरणं स्वश्व इति पूर्वमेव यण् भवति । ततो यथा भूतपूर्वगत्यात्राचामादेर्यणौ भवतस्तथा यणादेशो भवतीत्यदोषः । अचः पूर्वविज्ञानादिति । योऽनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भाव इत्यर्थः ॥ ३ ॥

द्वार ॥ पूर्वसूत्रे वृद्धिनिषेधः प्रतिपत्तिलाघवाय कृतो नह्येकेनाचामादेरित्यनेनोभयं विशेषयितुं शक्यम् । नाप्यप्रतिषिध्यमानां वृद्धिरचामादेरित्यनेन शक्याविशेषयितुमिति यथान्यासं प्रतिषेधमाश्रित्य विचार्यते । परस्येति । यदीति । यत्रैव वृद्धिप्रतिषेधस्तत्रैवैज्भ्यां भाव्यं नान्यत्र । शौवमिति । शुनो विकार इति प्राणिरजतादिभ्योऽञित्यञ् । श्वन्शब्दस्य तु पाठस्तदाद्यर्थः स्याच्छौवहानमिति । यावन्तो यण इति । अपदान्तार्थत्वादस्य सर्वेभ्यो यण्भ्यः पूर्वावैचौ प्राप्नुतः प्रतिषेधे तु विधीयमानं याभ्यां य्वाभ्यां परस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वावैचाविति नास्ति सर्वप्रसङ्गः । प्रकृत्यैकाजिति । इष्टेमेयःसु प्रकृतिभावः । तथा च श्वा देवतास्य श्व इत्यत्र न भवति । इह त्वविशेषेण प्रकृतिभावमाश्रित्यैतदुक्तम् । परिहारादिक्प्रदर्श-



Indira Gandhi National Centre for the Arts

निवृत्तम् । ननु चोक्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते । तत्र यावन्तो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोतीति । कः पुनरर्हति स्वाध्यायशब्दं द्वारादिषु पठितुम् । एवं किल पठ्येत स्वाध्यायन इति । तच्च न । सुष्ठु वा अध्ययनं स्वाध्यायः । शोभनं वा अध्ययनं स्वाध्यायः । अथापि स्वमध्ययनं स्वाध्यायः । एवमपि न दोषः । अचामादेरिति वर्त्तते ॥

श्वादेरिञि ॥ ८ ॥ श्वन्शब्दो द्वारादिषु पठ्यते । तत्र कः प्रसङ्गो यत्तदादेः स्यात् । नैव प्राप्नोति नार्थः प्रतिषेधेन । तदादिविधिना प्राप्नोति । न वै तदादिविधिरस्ति । अत उत्तरं पठति प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणं तदादिग्रहणस्य शौवहानाद्यर्थम् * । प्रतिषेधे श्वादिग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्यः अन्यत्र श्वन्ग्रहणे तदादिविधिर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । शौवहानाद्यर्थम् । शौवहानं नाम नगरं शौवादंष्ट्रो मणिरिति । इकारादिग्रहणं च श्वागणिकाद्यर्थम् * । इकारादिग्रहणं च कर्तव्यम् । किम्प्रयोजनम् । श्वागणिकाद्यर्थम् । श्वगणेन चरति श्वागणिकः । तदन्तस्य चान्यत्र प्रतिषेधो वक्तव्यः । श्वाभस्त्रेः स्वं श्वाभस्त्रम् ॥

---

नार्थम् । अत्र हि परत्वाट्टिलोपं बाधित्वा वृद्धिः प्राप्ता प्रतिषिध्यते इति भवत्यैजागम इत्ययमत्र परिहारः । सुष्ठु वा अध्ययनमिति । अन्येषामपि दृश्यते इति दीर्घः । आङ् वा मध्ये प्रक्षेप्तव्यः । अचामादेरिति वर्तते इति । तत्रैवं सम्बन्धो ऽचामादेरनन्तरौ यौ य्वौ ताभ्यां पूर्वावैचौ भवत इति तेन स्वाध्ययशब्दे वकारात्पूर्वमैज् भवति न तु यकाराभ्यामित्यर्थः । यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाध्यायशब्दो न पठितव्यः स्वशब्दस्येह पाठात्तदादिविधेश्चेष्टत्वात्तथाऽपि पाठेऽपि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण पाठमभ्युपगम्य परिहारोभिहितः ॥

श्वादेः ॥ तदादिविधिनेति । आद्यज्विशेषणत्वाद्द्वारादीनां तदादिविधिरस्ति । इतरस्त्वगृहीताभिप्राय आह नैव तदादिविधिरस्तीति । श्वन्ग्रहण इति । श्वन्ग्रहणस्योपलक्षणार्थत्वादेतत्प्रकरणनिर्दिष्टैर्विकादिभिर्द्वारादिभिश्चादेरचो विशेषणात्तदादिविधिर्भवतीति ज्ञाप्यते । शौवहानमिति । जिहते ऽस्मिन्निति ल्युट् शुनां हानमिति षष्ठीसमासः । श्वहानमस्मिन्नस्तीति तदस्मिन्नस्तीति देशे तन्नाम्नीत्यण् वृद्धिनिषेधः ऐजागमश्च द्वारादित्वात् । शौवादंष्ट्र इति । शुनो दंष्ट्रा श्वादंष्ट्रा । शुनो-दन्तदंष्ट्रेति दीर्घः । तत्र भव इत्यण् । संज्ञापूर्वको विधिरनित्य इति वृद्धाच्छो न भवति । इकारादिग्रहणमिति । श्वादेरितीति सूत्रं कर्तव्यम् । तत्र यस्मिन् विधिस्तदादावल्ग्रहण इति तदादिविधिर्भवति । श्वागणिक इति । श्वगणाट्ठञ्चेति ठञ् । तदन्तस्येति । इञन्तस्य । श्वाभस्त्रमिति । इञश्चेत्यण् बाह्यतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरङ्गत्वादशक्य इञाश्रयेण निषेधेन निवारयितुमिति वचनारम्भः ॥ ८ ॥

Indira Gandhi National Centre for the Arts

**उत्तरपदस्य** ॥ १० ॥ किमर्थमिदमुच्यते । अवयवादृतोरिति वक्ष्यति तदुत्तरपदस्य यथा स्यात् । अचामादेर्मा भूत् । नैतदस्ति प्रयोजनम् । अवयवादिति पञ्चमी तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति । उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्येति । सुसर्वार्द्धादिति पञ्चमी । दिशो मद्राणां दिश इति पञ्चमी । प्राचां ग्रामनगराणाम् । दिश इत्येव । संख्यायाः सम्वत्सरसंख्यस्य च । संख्याया इति पञ्चमी वर्षस्य भविष्यति । संख्याया इत्येव । परिमाणान्तस्यासंज्ञाशाणयोरिति । संख्याया इत्येव । इदं तर्हि प्रयोजनम् । जे प्रोष्ठपदानामुत्तरपदस्य यथा स्यात्पूर्वपदस्य मा भूत् । प्रोष्ठपदासु जातः प्रोष्ठपादो ब्राह्मणः । तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम् * । तद्धितेष्वचामादेरुत्तरपदवृद्धिर्भवति विप्रतिषेधेन । किम्प्रयोजनम् । द्व्याशीतिकाद्यर्थम् । अचामादिवृद्धेरवकाशः, ऐतिकायनः औपगवः । उत्तरपदवृद्धेरवकाशः, द्विषाष्टिकम् । त्रिषाष्टिकम् । इहोभयं प्राप्नोति । द्व्याशीतिकः त्र्याशीतिकः । उत्तरपदवृद्धिर्भवति विप्रतिषेधेन । कः पुनरत्र विशेषोऽचामादिवृद्धौ सत्याम् उत्तरपदवृद्धौ वा । अयमस्ति विशेषः । यद्यत्राचामादिवृद्धिः स्यादैजागमः प्रसज्येत ॥

**प्राचां ग्रामनगराणाम्** ॥ १४ ॥ नगरग्रहणं किमर्थम् । न प्राचां ग्रामाणामित्येव सिद्धम् । न सिध्यति । अन्यो हि ग्रामः अन्यन्नगरम् । कथं ज्ञायते । एवं हि कश्चित्कं चित्पृच्छति कुतो भवानागच्छति ग्रामात् । स आह न ग्रामान्न-

---

उत्तरपदस्य ॥ किमर्थमिति । तस्मादित्युत्तरस्येति वचनादुत्तरपदस्यैव वृद्धिर्भविष्यतीति प्रश्नः । आचार्यस्तु शिष्यबुद्धिपरीक्षार्थमाह अवयवादृतोरिति । जे प्रोष्ठपदानामिति । पञ्चमीनिर्देशाभावादुत्तरपदस्य न स्यात् । वचनं त्वनाद्यजर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात् । नियमार्थं वा स्यात् । जातार्थ एव प्रोष्ठपदानां वृद्धिः प्रोष्ठपदानामेव वा जातार्थ इति । प्रोष्ठपाद इति । प्रोष्ठपदाभियुक्तः काल इत्यणो लुबविशेष इति लुपि कृते सन्धिवेलादिसूत्रेण जातार्थेऽण् अत्राङ्गस्याचामादेर्वृद्धिर्मा भूदित्येवमर्थमुत्तरपदाधिकारः । उत्तरपदवृद्धौ सर्वं चेत्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च । द्विषाष्टिकमिति । नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोति कथमयमवकाशः । अथात्र येन नाप्राप्तिन्यायेनादिवृद्धिर्बाध्यते । तदा द्व्याशीतिके विप्रतिषेधानुपपत्तिः उत्सर्गापवादयोरतुल्यबलत्वादिति वार्तिककारस्य विप्रतिषेधोपन्यासो न युक्त इति चिन्त्यमेतत् । यद्यत्रेति । सा च प्रतिषिध्यते ततस्तत्प्रतिषेधसन्नियुक्त ऐजागमः स्यादित्यर्थः । उत्तरपदवृद्धेस्तु यथात्र प्रतिषेधो न भवति तथा न य्वाभ्यामित्यत्र प्रतिपादितम् ॥ १० ॥

प्राचां ग्रामनगराणाम् ॥ नगरग्रहणमिति । यद्यपि समुदायवचनोऽपि ग्रामशब्दोऽस्ति भूतग्राम इन्द्रियग्राम इति तथापि जननिकायनिवासार्थत्वेनातिप्रसिद्धः अभक्ष्यो ग्राम्यकुक्कुटः, ग्रामे नाध्येयमिति तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः । अ-

Indira Gandhi National Centre for the Arts

गरादिति। ननु च भोः य एव ग्रामः तन्नगरम्। कथं ज्ञायते। ये हि ग्रामे विधयो नेष्यन्ते। साधीयस्ते नगरे न क्रियन्ते। तद्यथा। अभक्ष्यो ग्राम्यकुक्कुटः। अभक्ष्यो ग्राम्यसूकर इति उक्ते सुतरां नागरोऽपि न भक्ष्यते। तथा ग्रामे नाध्येयमिति साधीयो नगरेऽपि नाधीयते। तस्माद्य एव ग्रामस्तन्नगरम्। कथं यदुक्तम्। एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागच्छति ग्रामात्। स आह न ग्रामान्नगरादिति॥ संस्त्यायविशेषमसावाचष्टे। संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति। एवं तर्हि सिद्धे सति यद्ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। विशिष्टलिङ्गो नदीदेशोऽग्रामा इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति। यद्येतज्ज्ञाप्यते उदीच्यग्रामाच्च बह्वचोन्तोदात्तादित्यत्र नगरग्रहणं कर्तव्यम्। वाहीकग्रामेभ्यश्च। नगरग्रहणं कर्तव्यम्। दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु नगरग्रहणं कर्तव्यम्। इदं चतुर्थं ज्ञापकार्थम्। तत्रातिनिर्बन्धो न लाभः। तस्माद्यस्मिन्नेव ग्रामग्रहणे नगरग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः॥

संख्यायाः संवत्सरसंख्यस्य च॥ १५॥ संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति कृतत्वात् *। संवत्सरग्रहणमनर्थकम्। किङ्कारणम्। परिमाणान्तस्येति कृतत्वात्। परिमाणान्तस्यासंज्ञाशाणयोरित्येव सिद्धम्। ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य। एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां वृद्धिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। द्वैरात्रिकः त्रैरात्रिकः। अत्र वृद्धिर्न भवति। नैतदस्ति प्रयोजनम्। नास्त्यत्र विशेषः। सत्यां वोत्तरपदवृद्धाव-

---

भ्यो हि ग्राम इति। विशेषणविशेष्यान्तरस्याग्रहणान्नगरग्रहणम्। साधीयस्त इति। नगरस्याशुचितरत्वात्। संस्त्यायविशेषमिति। सामान्यशब्दस्यापि प्रकरणवशाद्विशेषावस्थानं दृश्यते संस्त्यायाच्चागमने निर्ज्ञाते विशेषपरिज्ञानाय कुत आगच्छतीति प्रष्टव्ये ग्रामशब्दोच्चारणाद्विशेषवाची ग्रामशब्दोऽनेन प्रयुक्त इति प्रतीयते। संस्त्यायो निवासः। ब्राह्मणकर्षकपुरुषप्रधानो देशो ग्रामः। गोमहिष्यादियुक्तो घोषः। प्राकारपरिखान्वितं श्रेणीधर्मयुक्तसंस्थानं नगरम्। प्राकारपरिखायुक्तश्रेणिधर्मान्वितो देशः संवाहः। न च नगरशब्दसन्निधाने गोबलीवर्दन्यायेन विशिष्टग्रामग्रहणाय संवाहादिनिवृत्तये नगरग्रहणं संवाहादिनिवृत्तेरनिष्टत्वात्। उदीच्यग्रामाच्चेति। मानगरमित्यादावर्थम्। वाहीकग्रामेभ्यश्चेति। शाकलिक इत्याद्यर्थम्। दिक्शब्दा इति। पाटलिपुत्रमित्यादौ पूर्वपदान्तोदात्तार्थम्। अतिनिबन्ध इति। अतिगौरवम्। न लाभ इति। लाघवम्॥ १४॥

संख्यायाः॥ संवत्सरग्रहणमिति। कालः क्रियापरिच्छेदहेतुत्वात्परिमाणं तद्विशेषवाची संवत्सरशब्द इति भावः। द्वैरात्रिक इति। द्वे रात्री अधीष्ट इति त-

Indira Gandhi National Centre for the Arts

समां वा । इदं तर्हि द्वैसमिकः त्रैसमिकः । इदं चापि प्रयोजनम् । द्वैरात्रिकः त्रैरात्रिकः । ननु चोक्तं नास्त्यत्र विशेषः समां वोत्तरपदवृद्धावसमां वेति । अयमस्ति विशेषः । यद्यत्रोत्तरपदवृद्धिः स्यात् । अचामादेर्वृद्धिर्न स्यात् । अपर आह । ज्ञापकं तु कालपरिमाणानां परिमाणाग्रहणस्य । एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि । द्विवर्षा त्रिवर्षा । परिमाणपर्युदासेन पर्युदासो न भवति ॥

प्रवाहणस्य ढे ॥ २८ ॥ परस्य वृद्धिर्नैत्यनुवर्तते उताहो न । किञ्चातः । यद्यनुवर्तते प्रवाहणेयी भार्यास्येति प्रवाहणेयीभार्यः । वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोति । अथ निवृत्तं, न दोषो भवति । यथा न दोषस्तथास्तु । अथ वा पुनरस्त्वनुवर्तते । ननु चोक्तं प्रवाहणेयी भार्यास्य प्रवाहणेयीभार्यः वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न प्राप्नोतीति । नैष दोषः । मा भूदेवं जातेरित्येवं भविष्यति ॥

यथातथयथापुरयोः पर्यायेण ॥ ३१ ॥ अयं योगः शक्योऽवक्तुम् । कथमयाथातथ्यमायथातथ्यम् । अयाथापुर्यमायथापुर्यम् । यदा तावत्पूर्वपदस्य वृद्धिः तदैवं विग्रहः करिष्यते । न यथातथा अयथातथा अयथातथाभावः आ-

———— ————

द्धितार्थे समासे राज्यहः संवत्सराच्चेति वाखविधानात्पक्षे ठञ् । द्वैसमिक इति । अधीष्टादिषु समायाः खः, द्विगोर्वेति पक्षे ठञ् । अचामादेवृद्धिर्न स्यादिति । सत्यपि सम्भवे बाधनं भवतीति न्यायात् । अपर आहेति । पूर्वं विशेषविषयं ज्ञापनमाश्रितम् । इदानीं तु सामान्यविषयमिति भेदः । द्विवर्षेति । द्वे वर्षे भूता तमधीष्ट इति ठञ् तस्य वर्षाल्लुक् चेति पक्षे लुक् द्विगोरिति ङीप्प्राप्तोऽपरिमाणेति प्रतिषिद्धः ॥ १५ ॥

प्रवा ॥ पूर्वस्य तु वेति वर्तते तत्र यदा पूर्वपदस्य वृद्धिर्नास्ति तदोत्तरपदस्य वृद्धिभावाभावयोः श्रुतौ विशेषाभावाद्विशेषान्तरजिज्ञासया प्रश्नः । परस्येति । प्रवाहणेयीति । शुभ्रादिभ्यश्चेति ढक् । ननु वृद्धेर्निमित्तं यस्मिन् णकारादिः स वृद्धिनिमित्त इत्याश्रितम् । ततोऽसत्यामपि वृद्धौ वृद्धिनिमित्तव्यपदेशसद्भावात् पुंवद्भावप्रतिषेधो भविष्यति । नैतदस्ति । अणकानां वृद्धिमुत्पादयतामेव वृद्धिं प्रति निमित्तत्वं नान्यदा । यथा स्नुक्रमोरनात्मनेपदनिमित्त इत्यत्र सत्येवात्मनेपदे स्नुक्रमोरनात्मनेपदनिमित्तत्वादिडभावो नास्ति । जातेरिति । गोत्रं च चरणैः सहेति जातिवाचित्वात् । अनुवृत्तेरेवं प्रयोजनाभावः ॥ २८ ॥

यथा ॥ न यथातथेति । यथातथेत्ययं निपातो विपरीतार्थवृत्तिरिति केचिदाहुः । अन्ये तु यथातथाशब्दयोः सुप्सुपेति समास एतदर्थमित्याहुस्ततो नञिति समासे कृते ब्राह्मणादिषु दर्शनात् ष्यञ् । स्वरेऽपि नास्ति विशेषः । आयथातथ्य-

Indira Gandhi National Centre for the Arts

यथातथ्यम् । यदोत्तरपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते । यथातथाभावः याथातथ्यम् । न याथातथ्यम् अयाथातथ्यम् ॥

हनस्तोऽचिण्णलोः ॥ ३२ ॥ हन्तेस्तकारे तद्धिते प्रतिषेधः * । हन्तेस्तकारे तद्धिते प्रतिषेधो वक्तव्यः । वार्त्रघ्नं भ्रौणघ्नम् । उक्तं वा * । किमुक्तम् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति ॥

आतो युक् चिण्कृतोः ॥ ३३ ॥ कृद्ग्रहणं किमर्थम् । इह मा भूत् । ददौ दधौ । नैतदस्ति प्रयोजनम् । अचिण्णलोरिति वर्तते । यद्यचिण्णलोरिति वर्तते अदायि अधायि इत्यत्र न प्राप्नोति । वचनाच्चिणि भविष्यति । अचिण्णलोरिति वर्तते । एवमपि चौडिर्बालाकिरित्यत्र प्राप्नोति । लोपोत्र बाधको भविष्यति । इदमिह सम्प्रधार्यं लोपः क्रियतां युगिति । किमत्र कर्तव्यं परत्वाद्युक् । एवं तर्ह्यचामादेरिति वर्तते । यत्राचामादिराकारस्तत्र युगिति । एवमपि ज्ञा देवताऽस्य स्थालीपाकस्य ज्ञः स्थालीपाकः अत्र प्राप्नोति।तस्मात्कृद्ग्रहणं कर्तव्यम्॥

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ३४ ॥ असत्यमिदमुच्यते अनाचमेरिति । अनाचमिकमिवमीनामिति वक्तव्यम् *। आचामः। कामः। वामः॥

शाच्छासाह्वाव्यावेपां युक् ॥३७॥ णिप्रकरणे धूञ्प्रीञोर्नुग्वचनम् * । णिप्रकरणे धूञ्प्रीञोर्नुग्वक्तव्यः । धूनयति प्रीणयति । पातेर्लुग्वचनम् * । पालयति ॥

---

मित्यस्य ञित्वादाद्युदात्तत्वादयाथातथ्यमित्यस्याव्ययपूर्वपदप्रकृतिस्वरत्वात् । प्रत्ययान्तरार्थत्वं तन्न भवति अनभिधानादेताभ्यां प्रत्ययान्तराभावात् ॥ ६१ ॥

आतो ॥ ददाविति । उत्तमस्य णलो णित्वाभावपक्षे सावकाशमौत्वं णित्वे परत्वाद्युक् बाधेत । अदायीति । सूत्रे चिणो निमित्तत्वेनोपादानादचिण्णलोरित्यनुवर्तनाच्च विधिनिषेधयोः पर्यायः स्यात् । वचनादिति । आतो युक् चिणि चेति चिणः साक्षादुपादानान्निषेधो न भविष्यति चिणि विधिः प्रत्यक्षशिष्टत्वादसन्दिग्धः, निषेधस्तु णलर्थ एवानुवर्तते । अथ चिणर्थोपीति सन्दिग्ध इत्यसन्दिग्धो विधिरेव प्रवर्तते । अचामादेरिति वर्तत इति । नन्वेवं दरिद्रायके युङ्न प्राप्नोति । एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्तस्तदाह एवमपीति । आदिवद्भावादत्र प्रसङ्गो यथादाय इत्यादौ ॥ ३३ ॥

नोदा ॥ काम इति । आयादय आर्धधातुके वेति यदा णिङ् नास्ति तदा घञि वृद्धिनिषेधस्य पर्युदासः । विश्रावशब्दस्त्वसाधुरेवोद्यमोपरमौ संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावात् ॥ ३४ ॥

शाच्छा ॥ पातेर्लुगिति । यद्यपि पालरक्षण इत्यस्य पालयतीति सिध्यति तथापि पातेर्युङ्निवृत्तये लुगागमविधानम् । लुग्विकरणत्वात्तस्य युकोप्रसङ्गः ॥ ३७ ॥

Indira Gandhi National Centre for the Arts

प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥ स्थग्रहणं किमर्थम् । इदं विचारयिष्यते इत्वे कग्रहणं सङ्घातग्रहणं वा स्यात् वर्णग्रहणं वेति । तद्यदा सङ्घातग्रहणं तदा स्थग्रहणं कर्तव्यम्। इहापि यथा स्यात् कारिका हारिका । यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा वचनाद्भविष्यति । अथासुप इति कथमिदं विज्ञायते असुब्वतोऽङ्गस्येति आहो स्विन्न चेत्सुपः पर आबिति । किञ्चातः । यदि विज्ञायते असुब्वतोऽङ्गस्येति बहुचर्मिका अत्र न प्राप्नोति । अथ विज्ञायते न चेत्सुपः पर आबिति न दोषो भवति। यथा न दोषस्तथास्तु । इदं विचार्यते । इत्वे कग्रहणं सङ्घातग्रहणं वा स्याद्वर्णग्रहणं वेति । कश्चात्र विशेषः । इत्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्तिः * । इत्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्तिः । एतिकाश्चरन्ति । वचनाद्भविष्यति । अस्ति ह्यन्यद्वचने प्रयोजनम् । किम् । कारिका हारिकेति। अस्तु तर्हि वर्णग्रहणम् ।

---

प्रत्ययस्था ॥ स्थग्रहणमिति । कादिति वर्णग्रहणं न च वर्णमात्रं ककारः प्रत्ययोऽस्तीति सामर्थ्यात्प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति प्रश्नः । इतरः पक्षान्तरे प्रयोजनमाख्यातुमाह इदमिति । वक्ष्यमाणस्य बुद्ध्या प्रत्यक्षीकृत्य परामर्शः । इहापीति । अन्यथा दत्तिकेत्यादावेव स्यादज्ञाताद्यर्थविवक्षायामत्र प्रत्ययः । स्थग्रहणं तु क्रियमाणे सर्वत्र भवति प्रत्ययस्यापि व्यपदेशिवद्भावेन प्रत्ययस्थत्वात् । असुब्वत इति । न सुब्वदसुब्वदिति नञ्समासोऽसुप इत्यस्य बहुव्रीहित्वप्रदर्शनाय भाष्यकारेण लाघवं नाश्रितं तदाश्रयणे बहुव्रीहिरेव न्याय्यो न तु मतुबन्तः समासः। तत्रायं प्रश्नः । किमसुप इति बहुव्रीहिराश्रीयते न विद्यते सुप् यस्मिंस्तदसुबिति । अथ तत्पुरुषः प्रसज्यप्रतिषेधश्च न चेत् सुपः पर आबिति । प्रत्ययग्रहणेन तदन्तविधः सुबन्तादिति बोद्धव्यम् । बहुचर्मिकेति। बहूनि चर्माण्यस्यामिति बहुव्रीहिः प्रत्ययलक्षणेन सुब्वदेतदङ्गमिति इत्वं न प्राप्नोति । न लुमताङ्गस्येति निषेधोऽत्र नास्ति लुमता लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः। इदं तु टाप्यङ्गम् । न दोषो भवतीति । चर्मशब्दः सुबन्तो न च तस्मात्पर आप् व्यवधानात् । बह्वः परिव्राजका अस्यां सा बहुपरिव्राजका इत्यत्र तु प्रत्ययलक्षणेन सुबन्तात्परिव्राजकशब्दात्पर आबिति प्रतिषेधः प्रवर्तते । पर्युदासाश्रयणे समासादसुबन्तात्पर आबिति स्यादेवात्रेत्वम् । तथासुप इत्यनर्थकं स्यादिति प्रसज्यप्रतिषेध आश्रीयते । इत्व इति । यद्यकारान्तस्य शब्दस्य कादिति निर्देशः ततः संघातग्रहणम् । अथागन्तुकाकारेण उच्चारणार्थेन निर्देशः ततो वर्णग्रहणम् । ननु वर्णग्रहणे स्थग्रहणात्संघातग्रहणेन भाव्यम् । नैतदस्ति । कोऽत्र निर्दोषः पक्ष इति विचार्यते । यदि च संघातग्रहणपक्षो दोषवान् । तस्मात्कारि स्थग्रहणमुपचयो भविष्यति । एतिका इति । एतदोऽकच्चि जसि त्यदाद्यत्वे टापीत्वे च रूपम् । अकचोऽकार उच्चारणार्थो न श्रवणार्थः । तेन भकिद्भिरकुदित्यादि सिध्यति । वचनादिति । यथैव कारिकेत्यादावेकादेशे कृतेऽ नञ्के ककारे संपन्ने भूतपूर्वगत्या भवत्येवमकजिवाधिसूत्रे क-

वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः * । वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति । कारिका हारिका । अकारेण व्यवहितत्वान्न प्राप्नोति । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव । एवं तर्ह्याहायं प्रत्ययस्थात्कात्पूर्वस्येति न च क्व चिद् व्यवधानं तत्र वचनाद्भविष्यति । वचनप्रामाण्यादिति चेत् रथकट्यादिष्वतिप्रसङ्गः * । वचनप्रामाण्यादिति चेद्रथकट्यादिषु दोषो भवति । रथकट्या गर्गकाम्या । नैष दोषः । येन नाव्यवधानं तेन व्यवहिते ऽपि वचनप्रामाण्यात् । केन नाव्यवधानम् । वर्णेनैकेन । सङ्घातेन पुनर्व्यवधानं भवति च न भवति च । अथ वा पुनरस्तु सङ्घातग्रहणम् । ननु चोक्तमित्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्तिरिति । परिहृतमेतत् । वचनाद्भविष्यतीति । ननु चोक्तमस्ति वचने प्रयोजनम् । किम् । कारिका हारिकेति । अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् । एवं तर्हि एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामपीत्वमिति । यदयं न यासयोरिति प्रतिषेधं शास्ति । मामकनरकयोरुपसंख्यानं कर्तव्यम् * । मामिका नरिका । किं पुनः कारणं न सिध्यति ।

---

शब्दः संघात उच्चारित इति तदाश्रया इत्वप्रवृत्तिः । अस्तीति । एकादेशस्य पूर्वविधौ स्थानिवद्भावात् । अथ वावचनादित्यस्यायमर्थः । न यासयोरिति ज्ञापकात् वचनाद्भविष्यति । इतरस्त्वगृहीताभिप्राय आह अस्तीति । ततश्चाभिप्रायमप्रकाश्य पक्षान्तरमाश्रयति । अस्तु तर्हीति । व्यवहितत्वादिति । ननु चापीत्यनेन ककारो न विशेष्यते किं तर्ह्यकारः । अपि च परतोऽकारस्य कात्पूर्वस्येति व्यवहितस्यापि पूर्वत्वादित्वं प्रवर्तिष्यते । नैतदस्ति । रथकट्यादावप्येवं प्रसङ्गात् । किञ्च कात्पूर्वस्येति पूर्वग्रहणं कृतं न त्वापि पूर्वस्येति । ततश्च निर्दिष्टपरिभाषोपस्थानात् व्यवधाने न प्राप्नोति । तत्र वचनादिति । आनन्तर्यमसम्भवान्नाश्रीयते । रथकट्येति । रथानां समूह इति इनित्रकट्यचश्चेति कट्यच् । गर्गकाम्येति । गर्गमिच्छत्यात्मन इति काम्यच्प्रत्ययान्तादप्रत्ययादित्यकारप्रत्ययः । येननाव्यवधानमिति । नानन्तर्यं परित्यज्यते किन्तु यावत्सम्भवति तावदाश्रीयते । यद्येवमेतिकाइत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्वं न प्राप्नोति । एकस्तसम्बन्ध्यकारो द्वितीयस्त्यदादीनाम इत्यकारः । नैष दोषः । द्वयोरकारयोरेकादेशे कृते टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाकारेण व्यवधानं न पुनः स्थानिवत्त्वप्रतिपत्तिर्यतो द्वावकारौ व्यवधायकौ स्याताम् । सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् । व्यपवर्गाभावादिति । वार्णादाङ्गं बलीय इत्येतदनाश्रित्योक्तम् । उभयत इति । अपि यः कशब्द इत्येवमुभयमाश्रीयते । अथ त्वापि परतोकारस्य कात्पूर्वस्येत्याश्रयिष्यते तथाप्युभयमेवाश्रितं तुल्यकालं भवति । एवंजातीयकानामिति । प्रकारवचने जा-

अप्रत्ययस्थत्वात् । त्यक्त्यपोश्च प्रतिषिद्धत्वात् * । त्यक्त्यपोश्चोपसंख्यानं कर्तव्यम् । दाक्षिणात्यिका । किं पुनः कारणं न सिध्यति । प्रतिषिद्धत्वात् । उदीचामातः स्थाने यकपूर्वाया इति प्रतिषिद्धत्वात् ॥

न यासयोः ॥ ४५ ॥ न यत्तदोरिति वक्तव्यम् * । इहापि यथा स्यात् यकामधीते । तकां पचामह इति । प्रतिषेधे त्यकन उपसंख्यानं कर्तव्यम् * । उपत्यका अधित्यका । तत्तर्हि कर्तव्यम् । न कर्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति नैवञ्जातीयकानामित्वं भवतीति । यदयं मृदस्तिकन्निति तत्वभूतं निर्देशं करोति । पावकादीनां छन्दस्युपसंख्यानं कर्तव्यम् * । हिरण्यवर्णाः शुचयः पावकाः । अलकाः । अलोमकाः । छन्दसीति किमर्थम् * । पाविका अलोमिका । आशिषि चोपसंख्यानं कर्तव्यम् * । जीवतात् जीवका । नन्दतान्नन्दका । भवताद्भवका । उत्तरपदलोपे चोपसंख्यानं कर्तव्यम् * । देवदत्तिका देवका । यज्ञदत्तिका यज्ञका । क्षिपकादीनां चोपसंख्यानं कर्तव्यम् * । क्षिपका ध्रुवका । चटका । तारका ज्योतिष्युपसंख्यानं कर्तव्यम् * । तारका । ज्योतिषीति किमर्थम् ।

———————

तीयर् प्रत्ययः । अकच्त्वतामित्यर्थः । मामिकेति । ममेयं, युष्मदस्मदोरित्यन्यतरस्यांग्रहणात्प्राग्दीव्यतोऽणित्यण् । तवकममकावेकवचन इति ममकादेशः । केवलमामकेत्यनेन संज्ञाछन्दसोर्ङीपो नियमादन्यत्र टाप् । नरं कायतीति नरिका । दक्षिणात्यिकेति । दक्षिणस्मिन् देशे दक्षिणा दक्षिणादाच् । तत्र भवा दक्षिणापश्चात्पुरसस्त्यगिति त्यक् । अज्ञाताद्यर्थविवक्षायां कः । इह भवेहत्यिका । अव्ययात्त्यप् । पूर्ववत्कः । उदीचामात इति पाक्षिकप्रतिषेधप्रसङ्गे वचनम् ॥ ४४ ॥

नया ॥ या सेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरं प्रतिषेधाप्रसङ्गादाह न यत्तदोरिति । उपत्यकेति । उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन् । नैवंजातीयकानामिति । येऽनेकाचो व्यञ्जनादयः प्रत्ययाः संज्ञाविषयास्तेषामित्यर्थः । यदयमिति । ननु च तद्धितलुगर्थमिकारोच्चारणं स्यात् । अन्यथा पञ्चभिर्मृत्तिकाभिः क्रीत इत्यार्हादिति ठकोऽध्यर्धपूर्वेति लुकि कृते लुक् तद्धितलुकीति टापो लुकि निमित्ताभावादित्वं न स्यात् । पञ्चमृत्तिक इति । अन्तरङ्गांश्च विधीन् बहिरङ्गो लुक् बाधते न सुब्लुगेव तथा च सनीस्रंस इत्यादौ नलोपो न भवति पञ्चभिः खट्वाभिः क्रीत पञ्चखट्व इत्यादौ टापा सहैकादेशो न भवति । अन्यथैकादेशस्यादिवद्भावादाब्ग्रहणेन ग्रहणाल्लुकि कृते ऽकारस्य श्रवणं न स्यात् । तदेवं सति प्रयोजने न ज्ञापकमिकारोच्चारणमिति चिन्त्यमेतत् । त्यिकन्निति प्रक्रियालाघवाय स्त्रीविषयत्वाद्वक्तव्ये त्यकनित्यकारोच्चारणमित्वाभावस्य न ज्ञापकम् । पञ्चभिरुपत्यकाभिः क्रीतः पञ्चोपत्यक इत्यादौ तद्धितलुकि अकारश्रवणार्थत्वात्तस्य । पावका इति । पुनन्ति पावयन्तीति वा पावकाः । जीवकेति । आशिषि चेति वुन् । देवकेति । अनजादौ च विभाषालोपो वक्तव्य इति दत्तशब्दस्य लोपः । क्षिपकेति । क्षिपेरिगुपधा-



Indira Gandhi National Centre for the Arts

तारयतीति तारिका दासी। वर्णका तान्तवे उपसंख्यानं कर्तव्यम् *। वर्णका। तान्तव इति किमर्थम्। वर्णिका भागुरी लोकायतस्य। वर्तका शकुनौ प्राचामुपसंख्यानं कर्तव्यम् *। वर्त्तका शकुनिः। शकुनाविति किमर्थम्। वर्तिका भागुरी लोकायतस्य। प्राचामिति किमर्थम्। वर्त्तिका। अष्टका पितृदेवत्ये उपसंख्यानं कर्तव्यम् *। अष्टका। पितृदेवत्ये इति किमर्थम्। अष्टिका खारी। वा सूतकापुत्रिकावृन्दारकाणामुपसंख्यानं कर्तव्यम् *। सूतका सूतिका। पुत्रका पुत्रिका। वृन्दारका। वृन्दारिका॥

उदीचामातः स्थाने यकपूर्वायाः॥ ४६॥ किमर्थं स्त्रीलिङ्गनिर्देशः क्रियते। न यकपूर्वस्येत्येवोच्येत। स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यादिह मा भूत्। शुभं याति शुभंयाः। शुभंयिका। भद्रंयाः भद्रंयिका। यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः *। किम्प्रयोजनम्। सुनयिका सुशयिका। अशोकिका अपाकिका॥

भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि॥ ४७॥ एषा द्वे नञ्पूर्वे अनुदाहरणे असुप इति प्रतिषेधात्। अथ भस्त्राग्रहणं किमर्थम्। न अभाषितपुंस्कादित्येव सिद्धम्। भस्त्राग्रहणमुपसर्जनार्थम्। उपसर्जनार्थोऽयमारम्भः। अभस्त्रका अभस्त्रिका। नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्येद्वचनात् *। नञ्पूर्वग्रहणं चान-

---

त्वात् के कृते अज्ञातादिषु कः। अथ वा क्वुञ्शिल्पिसंज्ञयोरिति क्वुन्। ध्रुवकेति। ध्रुव गतिस्थैर्ययोः। धुवकेति। धू विधूनने। वर्णकेति। वर्णयति महत्त्वादिकं गुणमिति वर्णका प्रावरणविशेषः तन्तूनां विकारस्तान्तवम्। ओरञित्यञ्। वर्णिकेति। व्याख्यात्रीत्यर्थः। भागुरी टीकाविशेषः। अष्टकेति। इष्यशिभ्यां तकन्निति तकन् पितरश्च देवताः पितृदेवताः तदर्थं कर्म पितृदैवत्यम्। देवतान्तात्तादर्थ्ये यदिति यत्। अष्टिकेति। अष्टौ परिमाणमस्याः संख्याया अतिशदन्तायाः कन्निति कन्। सूतकेति। न सामिवचन इति प्रतिषेधाज्ज्ञापकात् स्वार्थे कन्। पुत्रशब्दाच्छार्ङ्गरवादित्वात् ङीन्प्रत्ययस्ततः स्वार्थे कन्। केण इति ह्रस्वः तस्य पक्षे अकारो विधीयते। वृन्दारिकेति। वृन्दमस्यास्तीति शृङ्गवृन्दाभ्यामारकन् प्रत्ययो वक्तव्य इत्यारकन्॥ ४५॥

उदीचाम्॥ स्त्रीविषये इति। अर्थगतं स्त्रीत्वं शब्दे समारोप्य निर्देशः कृतः। शुभंयिकेति। शुभं याति भद्रं यातीति क्विप्। शुभंभद्रंशब्दौ निपातौ। अज्ञाताद्यर्थविवक्षायां कः केऽण इति ह्रस्वः। यकपूर्वं इति। धात्वन्ताभ्यां यकारककाराभ्यां परस्यातः स्थाने ऽकारस्येत्वप्रतिषेधस्य प्रतिषेधस्तेनेत्वं भवत्येव। शोभनो नयोऽस्याः सुनया। नास्ति शोकोऽस्या अशोका पूर्ववत्कः॥ ४६॥

भस्त्रै॥ पाक्षिकप्रतिषेधार्थ आरम्भः। एषाद्वे इति। न एषका न द्वके इति विगृह्यान्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधत इत्यकृतेषु त्यदाद्यत्वादिषु समासे कृते

र्थकम् । किङ्कारणम् । उत्तरपदमात्रस्येत्त्ववचनात् । उत्तरपदमात्रस्येत्त्वं वक्तव्यम्। निर्भस्त्रका निर्भस्त्रिका बहुभस्त्रका बहुभस्त्रिका । इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

ठस्येकः ॥ ५० ॥ किमिदं ठादेशे वर्णग्रहणमाहो स्वित्सङ्घातग्रहणम् । कश्चात्र विशेषः । ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः * । पठति-पठितुम् । अस्तु तर्हि सङ्घातग्रहणम् । सङ्घातग्रहणं चेद् उणादिमाथितिकादीनां प्रतिषेधः * । संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधो वक्तव्यः । उणादीनां तावत्, कण्ठः शण्ठः पण्ठः । इह च मथितं पण्यमस्य माथितिक इति अकारलोपे कृते तान्तादिति कादेशः प्राप्नोति । वर्णग्रहणे पुनः सत्यलिविधिरयं भवति । तस्माद्विशिष्टग्रहणम् * तस्माद्विशिष्टस्य ठका-

---

सुब्लुकि च समासाद्या विभक्तिस्तस्य त्यदाद्यत्वं ततष्टाप् स च प्रत्ययलक्षणेन सुबन्ताभ्यां पर इत्यसुप इतीत्वप्रतिषेधस्य व्यापाराद्नेषका इत्येव भवति । तस्मादनञ्पूर्वयोरेवैतयोः पाक्षिकप्रतिषेधः । एषका एषिका । द्वके द्विके इति । एषेति । प्रथमैकवचननिर्देशादन्यत्र नित्यमित्वमेतिका श्चरन्तीति । अभस्त्रिकेति । नास्ति भस्त्रा अस्या इति बहुव्रीहावुपसर्जनह्रस्वत्वे कृते यष्टाबुत्पद्यते स भाषितपुंस्काद्भस्त्राशब्दात्पर इत्युत्तरसूत्रेण पाक्षिकप्रतिषेधाप्रसङ्गाद्भस्त्राग्रहणम् । नञ्पूर्वग्रहणानर्थक्यमिति । अपिग्रहणेन केवलानां समुच्चयादन्यपूर्वाणामप्रसङ्गान्न कर्तव्यं नञ् पूर्वग्रहणम्।तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणात्सर्वेष्टासिद्धिः ॥४७॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यस्य तृतीये पादे प्रथममाह्निकम् ॥

ठस्येकः ॥ किमिदमिति । किं व्यञ्जनमात्रं प्रतिपिपादयिषितमागन्तुना तूच्चारणार्थेन अकारेण निर्देशोऽथ संघात एव स्थानी निर्दिष्ट इति प्रश्नः । धात्वन्तप्रतिषेध इति । संघातग्रहणे त्वेष न दोषः । पठतीत्यत्रापि ठस्यानर्थकयादर्थवद्ग्रहणपरिभाषयार्थवत् संघातग्रहणादप्रसङ्गः । वर्णग्रहणे त्वर्थवद्ग्रहणपरिभाषाया अव्यापारः वर्णग्रहणपक्षे च ठगादिष्वकार उच्चारणार्थो वर्णमात्रं प्रत्ययः । कण्ठ इति । कणेष्ठः । शण्ठ इति । शमेर्जनिदाच्युस्निति ठः । पण्ठ इति । पणोऽन्येभ्योऽपि दृश्यत इति ठः । वर्णपक्षेऽप्युणादीनां प्रसङ्गः सत्यपि संघातस्य प्रत्ययत्वे । इह च संघातग्रहणे ठगादयः संघाता एव प्रत्ययाः प्रतिज्ञायन्ते । माथितिक इति । सन्निपातलक्षणपरिभाषामनाश्रित्य चोद्यते । अन्यथाजादिसन्निपातेन तान्तता उपजाता कथमजादिविघातनिमित्तं स्याद् वर्णग्रहणे त्वनल्विधाविति स्थानिवत्त्वनिषेधादिकस्य कादेशोऽप्रसङ्गः । ननु तान्तादङ्गात्परस्य ठस्य कादेशो विधीयते न चैनत्तकारान्तमङ्गं तकारान्तात्प्रत्ययस्याविधानात् । नैतदस्ति । एकदेशविकृतस्यानन्यत्वादङ्गं भवति तकारान्तं चेति कादेशः प्राप्नोति । तस्माद्विशिष्टग्रहणमिति । तद्धितस्य ठादेरिक इति कर्तव्यम् । एवं च माथितिक इत्यत्र ठादेरिति वचनादादि-

Indira Gandhi National Centre for the Arts

रस्य ग्रहणं कर्तव्यम्। न कर्तव्यम्। अस्तु तावद्वर्णग्रहणम्। ननु चोक्तं ठादेशे वर्णग्रहणं चेद् धात्वन्तप्रतिषेध इति। नैष दोषः। अङ्गादिति वर्तते। न वै अङ्गादिति पञ्चम्यस्ति। एवं तर्हि प्रत्ययस्थस्येति वर्तते। क्व प्रकृतम्। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इति। तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाण्यामन्त्रयस्वैनं देवदत्तमिति गम्यते। देवदत्तस्य गावोऽश्वा हिरण्यमाढ्यो वैश्वेयः। देवदत्त इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्पञ्चमीनिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति। एवमप्युणादीनां प्रतिषेधो वक्तव्यः। न वक्तव्यः। उणादयोऽव्युत्पन्नानि प्रातिपादिकानि। एवमपि कर्मठ इत्यत्र प्राप्नोति। एवं तर्ह्यङ्गस्येति सम्बन्धषष्ठी विज्ञास्यते। अङ्गस्य यष्ठकारः। कश्चाङ्गस्य ठकारः। निमित्तम्। यस्मिन्नङ्गमित्येतद्भवति। कस्मिंश्चैतद्भवति। प्रत्यये। अथ वा पुनरस्तु सङ्घातग्रहणम्। ननु चोक्तं सङ्घातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेध इति। उणादीनां तावत्प्रतिषेधो न वक्तव्यः। परिहृतमेतत्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति। यदप्युच्यते। इह च माथितं पण्यमस्य माथितिक इत्यकारलोपे कृते तान्तादिति कादेशः प्राप्नोतीति। नैष दोषः। अकारलोपस्य स्थानिवद्भावान्न भविष्यति। न सिध्यति। पूर्वविधौ स्थानिवद्भावः। न चायं पूर्वविधिः। अयमपि पूर्वविधिः। पूर्वस्मादपि विधिः पूर्वविधिरिति। अथाप्युणादयो व्युत्पाद्यन्ते। एवमपि न दोषः। क्रियते

---

धित्वात् स्थानिवद्भावाभावात्कादेशस्याप्रसङ्गः। अङ्गादिति वर्तत इति। अर्थवशाद्विभक्तिविपरिणाम इति भावः। एवं तर्हीति। सामर्थ्यात्षष्ठ्यन्तमूह्यते। इतरो न क्वचित्षष्ठ्यन्तं प्रकृतमिति मत्वाह क्व प्रकृतमिति। अर्थादिति। ठस्येति षष्ठ्यन्तेन सम्बन्धात् षष्ठ्यन्तत्वेन विपरिणामः। कर्मणि घटने कर्मणि घटोऽठजित्यठच्। अङ्गस्येति। सम्बन्धषष्ठीत्वेनोपादानाद्विशिष्टो निमित्तनिमित्तिभावलक्षणः सम्बन्धो विवक्षितः। तेनाङ्गावयवस्याप्रसङ्गः। अङ्गव्यपदेशनिमित्तप्रत्ययग्रहणात्कर्मठ इति प्रत्ययावयवस्य न भवति। ननु समुदायस्य निमित्तत्वेनावयवस्यापि निमित्तत्वमाश्रीयते। तथा चक्रतुश्चक्रुरित्यत्र द्विर्वचननिमित्ते ऽच्यजादेशः स्थानिवद्भवति। एवं तर्हि साक्षान्निमित्तमिह गृह्यते स्थानिवत्त्वे तु लक्ष्यवशाद्यथाकथं चिन्निमित्तमाश्रीयते। पूर्वस्मादपि विधिरिति। सम्बन्धसामान्यवचनषष्ठ्यन्तस्य पूर्वशब्दस्य विधिशब्देन समास आश्रीयते। अथ वा वर्णग्रहणात्तदन्तत्वे लब्धे तान्तादित्यन्तग्रहणं प्रत्ययोपदेशकाले तान्तग्रहणार्थमिति माथितके कादेशाप्रसङ्गः। अथापीति। सर्पिषा यजुषेत्यादौ षत्वाद्यर्थं व्युत्पत्तिपक्षोऽप्यङ्गीक्रियते। क्रियते न्यास एवेति। येषां ठशब्दानामिक इष्यते तेष्वकारः स्वरित उच्चारितस्तदनुकरणं स्वरितमेव ठस्येति

न्यास एव विशिष्टग्रहणं ठस्येति ॥

इसुसुक्तान्तात्कः ॥ ५१ ॥ इह कस्मान्न भवति । आशिषा तरति आशिषिकः । उषा तराति औषिकः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । अथेह कथं भवितव्यं दोर्भ्यां तरति । दौष्क इति भवितव्यम् । कथम् । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥

हो हन्तेर्ञ्णिन्नेषु ॥ ५४ ॥ किमिदं ञ्णिन्नकारग्रहणं हन्तिविशेषणम्, ञ्णिन्नकारपरस्य हन्तेर्यो हकार इति, आहो स्विद्धकारविशेषणम् । ञ्णिन्नकारपरस्य हकारस्य स चेद्धन्तेरिति । कश्चात्र विशेषः । हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः * १ । घ्नन्ति घ्नन्तु अघ्नन् । अस्तु तर्हि हकारविशेषणम् । हकारस्येति चेद् ञ्णित्यप्राप्तिः * २। घातयति घातकः । किङ्कारणम् । व्यवहितत्वान्न प्राप्नोति । वचनाद्भविष्यति । इहापि वचनात्प्राप्नोति । हननमिच्छति हननीयति हननीयतेर्ण्वुल्हननीयक इति । स्थानिवद्भावाच्चाचो नकारे प्रसिद्धिः * । स्था-

---

न चोणादिठस्याकारः स्वरित इत्यादेशाप्रसङ्गः ॥ ५० ॥

इसु ॥ आशिषेति । आङः शासु इच्छायामित्यस्मादाशासनमाशीरिति सम्पदादित्वाद्भावे क्विप् । आशासः क्वावुपसंख्यानमितीत्वम् । उषेति । वसेः क्विप् । वचिस्वपीति संप्रसारणम् । षत्वस्यासिद्धत्वादिसुसौ भवत इति कादेशप्रसङ्गः । लक्षणेति । लाक्षणिकमनुमेयरूपम् । प्रतिपदोक्तं तु प्रत्यक्षरूपम् । अथेति । दौष्क इति दृश्यते न च प्राप्नोतीति प्रश्नः । दौष्क इति । तरतीति ठक् । उपसंख्येयोत्र कादेश इति भावः । क्व चित्तु कथं यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पाठः । तत्र यदीति निपातो न संदेहार्थ उपात्तः । किं तर्हि यदेत्यस्यार्थे वर्तते । ओकारे य उकारः स उकारग्रहणेन गृह्यते । तत्र च समुदायाश्रयं कार्यं नास्ति तत्रावयवाः स्वकार्यस्य प्रयोजका एव । तथा च नुड्विधिलादेशविनामा ऋकारावयवाश्रयाः प्रवर्तन्ते । अग्रहणपक्षे तु यथा नुड्विधिलादेशविनामेषु प्रतिविधीयते तथा दोष उपसंख्यानं कर्तव्यमिति संदेहार्थोपि यदिशब्दो व्याख्येयः ॥ ५२ ॥

होहन्ते ॥ किमिदमिति । हन्तिरपीहोपात्तो हकारोऽपि तत्र किं हकारस्य प्राधान्याद्विशेषणसम्बन्धोऽथ प्रधानोपकाराय गुणस्यापि हन्तेः पक्षद्वये ऽपि दोषदर्शनात्प्रश्नः । द्वन्द्वनिर्दिष्टास्तु ञ्णिन्ना एकयोगक्षेमा न्याय्या इति भिन्नेन सम्बन्धिना सम्बन्धं प्रतिपत्तुमनर्हा ञ्णिति हन्तेर्नकारे हकारस्येति । हन्तेरिति । स्वावयवेन पौर्वापर्यायोगात् । ञ्णित्यप्राप्तिरिति । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धकारस्य च ञ्णितानन्तर्यासम्भवाद् । वचनादिति । निर्दिष्टपरिभाषोपस्थानादेन नाव्यवधानमिति शब्दान्तरव्यवायो निवर्त्यते । इतरस्तु व्यवधानसम्भवान्निर्दिष्टाङ्गविकलपरिभाषोपस्थानं मत्वाह इहापीति । स्थानिवद्भावाच्चाच इति । अचो य आदेशो लोपस्तस्येत्यर्थः । नकारग्रहणेति । सर्वत्र व्यवहितो नकारो हकारात्पर इति नकारग्रहणसामर्थ्याद् ञ्णिद्ग्रहणसामर्थ्याच्च श्रुतिकृतमानन्तर्यमा-

Indira Gandhi National Centre for the Arts

निवद्भावाच्चाचो नकारे प्रसिद्धिः । घ्नन्ति घ्नन्तु वचनाद्भविष्यति । वचनप्रामाण्यादिति चेद् अलोपे प्रतिषेधः * । वचनप्रामाण्यादिति चेदलोपे प्रतिषेधो वक्तव्यः । हन्ता हन्तुम् । नकारग्रहणसामर्थ्यादलोपे न । नकारग्रहणसामर्थ्यादलोपे न भविष्यति । अस्त्यन्यन्नकारवचनस्य प्रयोजनम् । किम् । श्रूयमाणविशेषणम् । यत्र नकारः श्रूयते तत्र यथा स्यात् । इह मा भूत् । हतो हथ इति । सिद्धं तूपधालोप इति वचनात् * । सिद्धमेतत् । कथम् । उपधालोपे चेति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं हन्तेस्तत्परस्येति चेद् नकारे प्रसिद्धिरिति । वचनाद्भविष्यति । अथ वा पुनरस्तु हकारविशेषणम् । ननु चोक्तं हकारस्येति चेद् ञ्णित्यप्राप्तिरिति । वचनाद्भविष्यति । ननु चोक्तमिहापि वचनात्प्राप्नोति हननीयक इति । नैष दोषः । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् । क्वचिद्धात्ववयवेन नाव्यवधानम् । एतेन पुनः संघातेन व्यवधानं भवति च न च भवति । यदप्युच्यते स्थानिवद्भावान्नकारे प्रसिद्धिरिति वचनाद्भविष्यति । ननु चोक्तं वचनप्रामाण्यादिति चेदलोपे प्रतिषेध इति । नैष दोषः । आनन्तर्यमिहाश्रीयते । हकारस्य नकार इति । क्वचिच्च संनिपातकृतमानन्तर्यं न शास्त्रकृतमानन्तर्यं क्वचिच्च न सन्निपातकृतं नापि शास्त्रकृतम् । लोपे सन्निपातकृतमानन्तर्यं न शास्त्रकृतमानन्तर्यम् । अलोपे नैव सन्निपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ॥

अभ्यासाच्च ॥ ५५॥ अभ्यासात्कुत्वमसुपः * । अभ्यासात्कुत्वमसुप इति वक्तव्यम् । इह मा भूत् । हननमिच्छति हननीयति हननीयतेः सन् जिहननीयिषतीति । तर्हि वक्तव्यम् । न वक्तव्यम् । हन्तेरभ्यासादित्युच्यते न चैष

---

भविष्यते । सिद्धं त्विति । नकारग्रहणमपनीय उपधालोपग्रहणं कर्तव्यम् । वचनाद्भविष्यतीति । एकग्रहणवाक्यनिबन्धनानि बहूनि वाक्यानि लक्ष्यस्य संस्कारकाण्युपप्लवन्ते । हो हन्तेर्ञितिं हो हन्तेर्णिति हो हन्तेर्न इति । सहविवक्षायां द्वन्द्वेऽपि यथासम्भवं विशेषणविशेष्यभाव इति ञिता णिता च हन्तिर्विशेष्यते नकारेण हकारः । येन नाव्यवधानमिति । तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानेन धात्ववयेन नित्यव्यवायाच्छब्दान्तरेण व्यवधानं निवार्यते । वचनादिति । सत्यपि स्थानिवद्भावकृते व्यवधाने श्रुतिकृतानन्तर्याश्रयणाद् । नापि शास्त्रकृतमिति । यथामन्त्रितं पूर्वमविद्यमानवदित्युक्तं तथाकारस्य शास्त्रेणाव्यवधायकत्वं न क्व चित्प्रतिपादितमित्यर्थः । कुतश्चिदिति । निर्दिष्टपरिभाषोपस्थानाद् ॥ ५४ ॥

अभ्यासा ॥ असुप इति । असुबन्तावयवस्य हन्तेरभ्यासात्परस्य कुत्वं न सुबन्तावयवस्येत्यर्थः । हन्तेरभ्यासादिति । अङ्गाधिकारेण चाभ्यासेन च प्रत्ययस्याक्षेपादभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मात्कुत्वमिति भावः । इतर-

Indira Gandhi National Centre for the Arts

हन्तेरभ्यासः। हन्तेरेवाभ्यासः। कथम्। एकाचो द्वे प्रथमस्येति एवं तर्हि हन्तेरङ्गस्य योऽभ्यासस्तस्मादित्युच्यते। न चैष हन्तेरङ्गस्याभ्यासः। हन्तेरङ्गस्यैषोऽभ्यासः। कथम्। एकाचो द्वे प्रथमस्येति। एवं तर्हि यस्मिन् हन्तिरङ्गं तस्मिन् योऽभ्यासः तस्मादित्युच्यते यस्मिंश्चात्र हन्तिरङ्गं तस्मिन्नाभ्यासः यस्मिन्नभ्यासो न तस्मिन् हन्तिरङ्गं भवति॥

हेरचङि॥ ५६॥ अचङीति किमर्थम्। प्राजीहयद् दूतम्। हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् *। हेश्चङि प्रतिषेधोऽनर्थकः। किङ्कारणम्। अङ्गान्यत्वात्। ण्यन्तमेतत्। अङ्गमन्यद्भवति। लोपे कृते नाङ्गान्यत्वम्। स्थानिवद्भावादङ्गान्यत्वम्। ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानात्। एवं तर्हि ज्ञापयत्याचार्योऽन्यत्र ण्यधिकस्य कुत्वं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। प्रजिघापयिषतीत्यत्र कुत्वं सिद्धं भवति॥

सन्लिटोर्जेः॥ ५७॥ जिग्रहणे ज्यः प्रतिषेधः *। जिग्रहणे ज्यः प्रतिषेधो वक्तव्यः। जिज्युरिति। न वक्तव्यः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति एवमेतस्य न भविष्यति। सा तर्ह्येषा परिभाषा कर्तव्या। अवश्यं कर्तव्या। अध्याप्यगत इत्येवमर्थम्॥

न क्वादेः॥ ५९॥ क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् *। क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। कुत्वं कस्मान्न भवति। निष्ठायामनिटः कुत्ववचनात्। निष्ठायामनिटः

---

स्वगृहीताभिप्राय आह हन्तेरिति। पूर्वोक्तेनाभिप्रायेणाह हन्तेरङ्गस्येति। तथा चोक्तम्। सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावादिति। न चैव हन्तेरस्येति। अभ्यासनिमित्ते प्रत्यये हन्तिरत्र नाङ्गमित्यर्थः। इतराङ्गमात्रमाश्रित्याह हन्तेरिति। आचार्यः स्वाभिप्रायं प्रकाशयति एवं तर्हीति। यथा जघानेत्यत्र णलि हन्तिरङ्गं तस्मिन्नेव चाभ्यासः॥ ५५॥

हेर॥ अचङीति किमर्थमिति। यस्मिन् हिनोतिरङ्गं तस्मिन्नभ्यासे विज्ञायमाने णौ हिनोतिरङ्गं चङ्यभ्यास इति कुत्वं न भविष्यतीति मत्वा प्रश्नः। अन्यत्रेति। सनादावित्यर्थः॥ ५६॥

सन्लिटोः॥ जिज्यतुरिति। ज्या वयोहानौ लिट्यतुसि ग्रहिज्यादिसूत्रेण संप्रसारणे कृते पूर्वैकादेशे च यद्यपि हल इति दीर्घत्वं क्रियते तथाप्येकदेशविकृतस्यानन्यत्वाद्यथा जयतेर्जिगीषतीत्यत्र कुत्वं भवत्येवं जिनातेः प्राप्नोति। अध्याप्येति। विभाषाप इत्ययादेशः। इङादेशात्पुगन्तात्परस्य णेर्न भवति॥ ५७॥

न क्वादेः। क्वाद्यजीति। चजोः कुघिण्ण्यतोर्निष्ठायामनिट इति वक्तव्यं तेनैव क्वाव्रजादीनां कुत्वनिवृत्तेः सिद्धत्वान्नार्थः प्रतिषेधेनेत्यर्थः। ननु ग्लुचुग्लु-

Indira Gandhi National Centre for the Arts

कुत्वं वक्ष्यामि सेटश्चैते निष्ठायाम् । यदि निष्ठायामनिटः कुत्वमुच्यते कथं शोकः समुद्ग इति । शुच्युब्ज्योर्घञि कुत्वं वक्तव्यम् * । कथमर्कः । अर्चेः कविधानात्सिद्धम् । नैतद् घञन्तम् । औणादिक एष कशब्दः । तस्मिन्नाष्टमिकं कुत्वम् ॥

भुजन्युब्जौ पाण्युपतापयोः ॥ ६१ ॥ भुजः पाणौ * । भुजः पाणाविति वक्तव्यम् । कथं न्युब्ज उपताप इति । न्युब्जेः कर्तृत्वादप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । कुत्वं कस्मान्न भवति । कर्तृत्वात् । नैतद् घञन्तम् । कर्तृप्रत्यय एषः । न्युब्जतीति न्युब्जः । अधिकरणसाधनो वै लक्ष्यते । न्युब्जिताः शेरते ऽस्मिन् न्युब्ज उपताप इति । एषोपि हि कर्तृसाधन एव । कथं न्युब्जयतीति न्युब्जः ॥

यजयाचरुचप्रवचर्चश्च ॥ ६६ ॥ प्रवचिग्रहणमनर्थकं वचोशब्दसंज्ञाभावात् * । प्रवचिग्रहणमनर्थकम् । किङ्कारणम् । वचोशब्दसंज्ञाभावात् । वचोशब्दसंज्ञायां प्रतिषेध उच्यते । प्रपूर्वश्च वचिरशब्दसंज्ञायां वर्तते । उपसर्गनियमार्थं

---

ब्चुकुब्जुखुब्जूनां निष्ठायामनिट्त्वात् घिण्ण्यतोः कुत्वं वार्तिककारमतेन प्राप्नोति सूत्रकारमतेन तु न क्वादेरिति प्रतिषेधप्रसङ्गः। तथार्जिसार्जितर्जीनां निष्ठायां सेट्त्वात् कुत्वाप्रसङ्गः । उच्यते । वार्तिककारस्य सूत्रकारात्प्रमाणतरत्वात् । तन्मतेन तु कुत्वस्य भावाभावाववगन्तव्यौ । नन्वसत्यजेः प्रतिषेधे वेति इति निष्ठायामनिट्त्वात् समाज इति कुत्वं प्राप्नोति । नैतदस्ति । व्यादेशो निष्ठायामनिण्नत्वाजिः । न च स्थानिवद्भावोद् निष्ठायामनिडिति लौकिके व्यपदेशो ऽस्ति । शास्त्रीयेष्वेव कार्येषु स्थानिवत्त्वात् । वलादावार्धधातुके विकल्प इष्यते इति वीभावाभावपक्षे अजित इति निष्ठायामजिः सेडेव । कथमिति । शुच्युब्जी निष्ठायां सेठौ । ईशुचिर् पूतिभाव इति यद्यपि तिष्ठायामानिट् तथाप्यर्थभेदाश्रयः प्रश्नः । शुच्युब्जोर्घञीति । यथाभ्यासे ऽपि घञ्येव यथा स्यात् ण्यति मा भूदिति नियमार्थं वाच्यं तदेव न्यासभेदे विध्यर्थमिति भावः । यद्यपि गमेद्वर्चुपसर्गाद् इति सिध्यति तथाप्युब्जेर्घञि अकारनिवृत्तये कुत्वमभ्युपेयम् । औणादिक इति । कृदाधारार्चिकलिभ्यः कः घिण्ण्यतोस्त्वर्चोऽर्च्यमिति भवति ॥ ५९ ॥

भुज ॥ भुजेस्तौदादिकस्य रौधादिकस्य वा घञि गुणकुत्वनिषेधौ निपात्येते । भुजः पाणाविति । न्युब्जोपतापग्रहणं न कर्तव्यमित्यर्थः । लोके बाहौ भुजशब्दो भुजावयवत्वात्प्रयुज्यते । कर्तृप्रत्यय इति । पचाद्यच् । न्युब्जतीति । न्युब्जन्त्यस्मिन्नित्यधिकरणं प्रदर्शनीयम् । भाष्ये तु वस्तुमात्रं कथितम् । एषोऽपीति । यस्मिन् व्याधौ न्युब्जिताश्चेष्टारहिताः शेरते स व्याधिस्तान् न्युब्जयतीत्यच् । न चात्र घञचोः स्वरे विशेषः । थाथादिसूत्रेणान्तोदात्तत्वविधानात् । भुजशब्दस्तु घञ्याद्युदात्तो भवत्यचि त्वन्तोदात्तः स्यात् ॥ ६१ ॥

Indira Gandhi National Centre for the Arts

तर्हीदं वक्तव्यम् । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो यथा स्यादिह मा भूत् । अविवाक्यमहारिति । उपसर्गनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धम् । विशेषत एव तद्वक्तव्यमाविवाक्यमहारिति । क्व मा भूत् । अविवाच्यमेवान्यदिति । ण्यप्रतिषेधे त्यजेरुपसंख्यानं कर्तव्यम् । त्याज्यम् । भोज्यम् । भोज्यमभ्यवहार्य इति वक्तव्यम् * । इहापि यथा स्यात् । भोज्यः सूपः । भोज्या यवागूरिति । किं पुनः कारणं न सिध्यति । भक्षिरयं खरविशदे वर्तते तेन द्रवे न प्राप्नोति । नावश्यं भक्षिः खरविशदे वर्तते किं तर्ह्यन्यत्रापि वर्तते । तद्यथा । अब्भक्षो वायुभक्ष इति ॥

घोर्लोपो लेटि वा ॥ ७० ॥ वेति शक्यमवक्तुम् । कस्मान्न भवति तदग्निरग्नये ददात् । अस्त्वत्र लोपः । आटः श्रवणं भविष्यति । तेनोभयं भविष्यति सधद्रत्नानि दाशुषे दधात् ॥

ओतः श्यनि ॥ ७१ ॥ ओतः शितीति वक्तव्यम् * । किम्प्रयोजनम् । उत्तरत्र शिद्ग्रहणाभावाय । तत्रायमप्यर्थः ष्ठिवुक्लमुचमां शितीति शिद्ग्रहणं न कर्तव्यं भवति । ननु च भोः श्यन्ग्रहणमपि तर्ह्युत्तरार्थं वक्तव्यम् । शमामष्टानां दीर्घः श्यनीति श्यन्ग्रहणं न कर्तव्यं भवति । अत्राप्यस्तु शितीत्येव । यदा शितीत्युच्यते । अनुत्वेन्द्रो भ्रमतु मदतु अत्रापि प्राप्नोति । शमादिभिरत्र शितं विशेषयिष्यामः । शमादीनां यः शिदिति । कश्च शमादीनां शित् । शमादिभ्यो

---

यज ॥ अविवाक्यस्येति । यद्ययं नियमः क्रियते तदाऽविवाक्यमित्येव स्यान्नत्वाविवाच्यामिति । द्वयमपि चैतद्विषयविभागेनेष्यत इति यत्नान्तरं कार्यं न त्वयं नियमः । अन्योपसर्गपूर्वस्य च प्रतिषेध इष्यत एव । दशरात्रस्य यज्ञविशेषस्य दशममहरविवाक्यमुच्यते । यस्मिन् याज्ञिका न विब्रुवते न नानावाक्यान्युच्चारयन्तीत्यर्थः । तत्र पृषोदरादित्वात्कुत्वमन्यत्र प्रतिषेध इति प्रवचिग्रहणं प्रत्याख्यातम् । त्यजेरिति । पूज्यमिति तु ण्यन्तस्य पूजेरूपम् । भोज्यम् । नावश्यमिति । भाष्यकारः सूत्रन्यासं समर्थयते अब्भक्ष इति । न च शब्दान्तरसन्निधिगम्यं सामान्यवाचित्वामिति शक्यं वक्तुम् । न हि शब्दस्यानभिधेयं शब्दान्तरसन्निधानेनाभिधीयते नित्यत्वाच्छब्दार्थसम्बन्धस्य । भोज्यं भक्ष्यं लेह्यं पेयमित्यत्र गोबलीवर्दन्यायेन विशेषविषयत्वं भुजिभक्ष्योर्ज्ञेयम् ॥ ६६ ॥

घोर्लो ॥ भाष्यकारेण वेति प्रत्याख्यातम् । केचित्त्वनित्यमागमशासनमित्यस्य ज्ञापकं वाग्रहणं वर्णयन्ति । अनित्यत्वात्तस्य घसति ददादिति न स्यादिति तत्सिद्धये वाग्रहणं क्रियमाणमेनां परिभाषां ज्ञापयति ॥ ७० ॥

ओतः ॥ ओत इति । न हि श्यनोऽन्य ओतः शिदस्ति । तत्रायमप्यर्थ इति । न केवलं मात्रालाघवं यावदयमप्यर्थ इत्यर्थः । भ्रमत्विति । वा भ्राशेतिवचनात्पक्षे शप् । मदत्विति । व्यत्ययेन शप् । शमादिभ्यो यो विहित इति । श्यन्नेव सर्वेभ्यः



Indira Gandhi National Centre for the Arts

यो विहितः । एवमपि तस्यति यस्यति । अत्र प्राप्नोति । अष्टानामिति वचनान्न भविष्यति ॥

ष्ठिवुक्लमुचमां शिति ॥ ७५ ॥ दीर्घत्वमाङि चम इति वक्तव्यम् । आचामति । इह मा भूत् । उच्चमति विचमतीति ॥

इषुगमियमां छः ॥ ७७ ॥ इषेश्छत्वमहलि * । इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् । इष्णाति । इष्यति । तर्हि वक्तव्यम् । न वक्तव्यम् । अचीति वर्तते । एवमपीषाणेत्यत्र प्राप्नोति । अथाहलीत्युच्यमाने कस्मादेवात्र न भवति । नैवं विज्ञायते न हल् अहल् अहलीति । कथं तर्ह्यविद्यमानो हलस्मिन् सोऽयमहल् अहलीति । यद्येवमचीत्यपि वर्तमाने न दोषः । न ह्यचा शिद्विशेष्यते शिति भवति कतरस्मिन्नचीति । कथं तर्हि शिताज्विशेष्यते अचि भवति कतरस्मिन्छितीति ॥

**पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः** ॥ ७८ ॥ पिबेर्गुणप्रतिषेधः * । पिबेर्गुणप्रतिषेधो वक्तव्यः । पिबति । लघूपधगुणः प्राप्नोति । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । पिबतिरदन्तः । अदन्त इति चेदुक्तम् । किमुक्तम् । धातोरन्त इति चेदनुदात्ते च बग्रहणमिति । अथ वाङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्येवं न भविष्यति ॥

---

शमादिभ्यो विहित इति स एव गृह्यते । एवमपीति । शिद्विशेषणे शमादीनामुपयोगात्कार्यिनिर्देशाभावात् । अष्टानामिति । अष्टानामित्यनेन संख्येयाः कार्यिणो निर्दिश्यन्ते ते च सन्निधानाच्छमादय एव विज्ञायन्ते ॥ ७१ ॥

ष्ठिवु ॥ ष्ठिवुक्लमुचमां शितीति सूत्रपाठादाह दीर्घत्वमाङि चमेरिति । अथ वा सूत्रे तन्त्रमाङ् नतु यथोपेयिवानित्यत्रोपशब्दोऽतन्त्रमिति प्रदर्शनाय वार्तिकारम्भः ॥ ७५ ॥

इष ॥ इषुगमि इति पाठोऽनार्ष इत्याह इषेश्छत्वमहलीति । इषाणेति । इष आभीक्ष्ण्ये इत्यस्माच्छ्नः श्नः शानज्झाविति शानच् । स चाजादिरिति छत्वप्रसङ्गः । अथेति । अहलीति तत्पुरुषे शानजजादिरिति भावः । न ह्यचेति । विशेषणविशेष्यभावे कामचारात्तदादिविधिस्तदन्तविधिर्वा विशेषणेन भवति न विशेष्येण ७७

पाघ्रा ॥ धातोरन्त इति चेदिति । धातोरित्यत्र द्वौ पक्षावुक्तौ अन्त इति वर्तते न वा । यद्यनुवर्तते तदा अनुदात्ते चेति सूत्रं कर्तव्यं ददातीत्याद्युदात्तार्थं तथा पिबन्तीत्यादावाद्युदात्तत्वं मध्योदात्तनिवृत्त्यर्थं बान्तस्य धातोर्वक्तव्यमन्तग्रहणनिवृत्तौ तु क्रमप्राप्तत्वादादेरेवोदात्तत्वं सिध्यति । तत्रायं निर्णयः । अन्त इति वर्तते ऊर्णोत्याद्यर्थम् । अनुदात्ते चेति कृतमेव । पिबतेश्चाद्युदात्तनिपातनमिह कार्यम् । अथवेति । सत्यपि हलन्तत्वे गुणाभावः । पिबादेशेनैवाङ्गस्य प्रयोगार्हत्वात् ॥ ७८ ॥

Indira Gandhi National Centre for the Arts

ज्ञाजनोर्जा ॥ ७९ ॥ दीर्घोच्चारणं किमर्थम् । न ज्ञाजनोर्ज इत्येवोच्येत। का रूपसिद्धिः। जानाति जायते ऽतो दीर्घो यञीति दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यद् दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवति एषा परिभाषा-ऽङ्गवृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिबतेर्गुणप्रतिषेध-श्चोदितः स न वक्तव्यो भवति ॥

जुसि च ॥ ८३ ॥ जुसि गुणे यासुट्प्रतिषेधः * । जुसि गुणे यासुडादौ प्रतिषेधो वक्तव्यः । चिनुयुः सुनुयुरिति । न वक्तव्यः । नैवं विज्ञायते मिदेर्गुणः जुसि चेति कथं तर्हि मिदेर्गुणो ऽजुसि चेति। किमिदम् अजुसीति । अजादावु-सि अजुसीति । इहापि तर्हि प्राप्नोति चक्रुर्जह्रुरिति। एवं तर्हि शितीति वर्तते। एवमप्यजुहवुरबिभयुरित्यत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति । न सिध्यति । न हि उस् शित् भूतपूर्वः। उस् शिद् भूतपूर्वो नास्तीति कृत्वा उसि यश्शिद् भूत-पूर्वस्तस्मिन् भविष्यति । अथ वा क्रियते न्यास एव । अविभक्तिको निर्देशः । नैवं विज्ञायते मिदेर्गुणो जुसि चेति । कथं तर्हि । मिदेर्गुण उजुसि चेति । किमि-दमुजुसीति । उकारादौ जुसि उजुसीति । अथ वा अचीति वर्तते तेन जुसं वि-शेषयिष्यामः अजादौ जुसीति ॥

जाग्रोऽविचिण्णल्ङित्सु॥८५॥ इह जागरयति जागरक इति गुणे कृते रपरत्वे चेति उपधाया इति वृद्धिः प्राप्नोति तस्याः प्रतिषेधो वक्तव्यः । चिण्ण-लोः प्रतिषेधसामर्थ्यादत्र गुणभूतस्य वृद्धिप्रतिषेधः । यदयमचिण्णलोरिति प्रति-षेधं शास्ति । तज्ज्ञापयत्याचार्यो न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति । किं पुनरयं पर्युदासः यदन्यद्विचिण्णल्ङिद्भ्य इति । आहोस्वित्प्रसज्यायं प्रतिषेधः विचि-

---

ज्ञाज ॥ अतो दीर्घो यञीति । तत्र सार्वधातुकग्रहणं तुरुस्तुसूत्रादनुवर्तते न तु तिङीति । अत एवानेमुक् पूर्वान्तः कृतो न परादिः दीर्घप्रसङ्गात् । अङ्गवृत्त इति । ज्यादादीयस इत्याकारविधानस्य ज्ञापकत्वे जा इति दीर्घोच्चारणं दीर्घश्रव-णार्थमेतद्दीर्घोच्चारणे तु ज्ञापके तदाकारविधानमाकारश्रवणार्थम् ॥ ७९ ॥

जुसि च ॥ चिनुयुरिति । तद्वक्तस्तद्ग्रहणेन गृह्यत इति गुणप्रसङ्गः । शि-तीति वर्तते इति । ष्ठिवुक्लमुचमां शितीत्यतः । न च लिटि शिदस्ति । एवमपीति । उसिशितीति सामानाधिकरण्येन सम्बन्धं मन्यते । इतरस्तूसि यः शित् तस्मिन्नि-ति सम्बन्धं मत्वाह भूतपूर्वगत्येति । प्रत्ययलक्षणं तु नास्ति न लुमताङ्गस्येति नि-षेधात् । उकारादाविति । यासुडादेरनुकारादित्वाद् ग्रहणाभावः । अनुबन्धनिर्दे-शाच्च लिडादेशस्योसो ग्रहणाभावः । अचीति वर्तते इति । कसस्याचीत्यतः॥ ८३ ॥

जाग्रोवि ॥ इहेति । अङ्गवृत्त इत्यनाश्रित्योच्यते । गुणस्यावकाशः । जागरित इति। अचोञ्णितीति वृद्धेरवकाशः, कारक इति । जागरयतीत्यादौ उभयप्रसङ्गे

Indira Gandhi National Centre for the Arts

णलिङ्स्तु नेति । कश्चात्र विशेषः । प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधप्रसङ्गः उत्तमे च णलि * । प्रसज्यप्रतिषेधे जुसि गुणप्रतिषेधः प्राप्नोति । अजागरुः । उत्तमे च णलि प्रतिषेधः प्राप्नोति । अहं जजागर । न वानन्तरस्य प्रतिषेधात् * । न वा एष दोषः।किङ्कारणम् । अनन्तरस्य प्रतिषेधात्।अनन्तरं यद् गुणविधानं तस्य प्रतिषेधः । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । जुसि पूर्वेण विधानम् । जुसि पूर्वेण गुणो विधीयते । जुसि चेति । णलि च । किम् । न वानन्तरप्रतिषेधादित्येव । णलि च पूर्वेण गुणो विधीयते सार्वधातुकार्धधातुकयोरिति । अथ वा पुनरस्तु पर्युदासः । अतोन्यत्र विधाने वावगुणत्वम् * । अतोन्यत्र विधाने वौ अगुणत्वं वक्तव्यम् । जागृविः । न वा पर्युदाससामर्थ्यात् * । न वा वक्तव्यम् । किङ्कारणम् । पर्युदाससामर्थ्यादत्र गुणो नभविष्यति । अस्त्यन्यत्पर्युदासे प्रयोजनम् । किम् । क्विबर्थं पर्युदासः स्यात् । शुद्धपरस्य विशब्दस्य प्रतिषेधग्रहणम् । अनुनासिकपरश्च क्वौ विशब्दः । वस्वर्थस्तर्हि पर्युदासः स्यात् । जागृवांसो अनुग्मन् । कथं पुनर्वेः पर्युदास उच्यमानो वस्वर्थः

---

परत्वाद् गुणे कृतेऽत उपधाया इति वृद्धिः प्राप्नोति । गुणभूतस्येति । गुणशब्दः स्वरूपपदार्थको गुणशब्देन भूतो निष्पन्नो गुणभुत एवं गुणशब्देनाभिनिर्वृत्तौ गुणाभिनिर्वृत्तः । यद्यनेन गुणे कृतेऽत उपधाया इति वृद्धिः स्याच्चिण्णलोर्गुणप्रषेधोऽनर्थकः स्यात् कृते वृद्ध्या रूपस्य सिद्धत्वात्तस्माच्चिण्णलोः प्रतिषेध उपधावृद्ध्यभावस्य ज्ञापको वृद्धिमात्राभावस्य तु न ज्ञापकः । तथा च ह्म्यन्तक्षणेत्यत्र जागृग्रहणमजागरीदित्यत्र वृद्धिनिषेधार्थं कृतम् । अन्यथा गुणे कृते अतो ल्रान्तस्येति अनेन वृद्धिर्न भविष्यतीति किं जागृग्रहणेन । अजागरुरिति । लङ् सिजभ्यस्तविदिभ्यश्चेति जुसादेशः तस्य ङित्वाज्जुसि चेत्यनेनापि प्राप्तस्य निषेधः प्राप्नोति । तथा जजागरेत्यत्र णित्वाभावपक्षे सार्वधातुकार्धधातुकयोरित्यनेनापि प्राप्तस्य गुणस्य निषेधप्रसङ्गः। पर्युदासपक्षे तु न दोषः । तत्र विचिण्णल्ङिन्द्रयोऽन्यत्र गुणो विधीयते । न च तेषु निषिध्यत इति लक्षणान्तरेण गुणः प्रवर्तते एव । जागृविरिति । वृदृजागृभ्योविन्निति सूत्रपाठाश्रयेण चोद्यते । यदा तु जॄशॄस्तृजागृभ्यः क्विन्निति पाठस्तदा कित्त्वादेवार्धधातुकलक्षणगुणाप्रसङ्गः । यद्यपि प्रसज्यप्रतिषेधेऽप्ययं दोषोऽनन्तरस्य निषेधात्तथापि पर्युदासो दोषत्रानिति प्रतिपादनायेदमुच्यते । न वेति । यदि जागृविरित्यत्र लक्षणान्तरेण गुणः स्याद्वेः पर्युदासोऽनर्थकः स्यात् । क्विबर्थमिति । नहि लक्षणान्तरेण गुणप्रसङ्गः । न चात्र तदनुबन्धकपरिभाषोपतिष्ठते । अनुबन्धस्यानिर्देशादिति विग्रहेण न क्विबपि गृह्यत इति भावः । शुद्धपरस्येति विशब्दे इकारो निरनुनासिक उच्चारित इति क्विपो ग्रहणं नास्ति । तस्य हीकारोऽनुनासिकः।वस्वर्थ इति । विशब्दः सप्तम्यन्तो निर्दिश्यते निपातनाच्च सप्तम्या अलुक् यथा वरे यलोपेति । अथ वा इकार उच्चारणार्थ इति तत्र तदादि-

Indira Gandhi National Centre for the Arts

शक्यो विज्ञातुम् । सामर्थ्याद्, वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम् * । व-स्वर्थमिति चेत्तन्न । किङ्कारणम् । सार्वधातुकत्वात्सिद्धम् । कथं सार्वधातुकसंज्ञा छान्दसः क्वसुः लिट् च छन्दसि सार्वधातुकमपि भवति । तत्र सार्वधातुकमपिदिति ङित्वात्पर्युदासो भविष्यति । अथ वा वकारस्यैवेदमशक्तिजेनेकारेण ग्रहणम् ॥

पुगन्तलघूपधस्य च ॥ ८६ ॥ संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ॥ संयोगे गुरुसंज्ञायां भेत्ता भेत्तुमिति गुणो न प्राप्नोति । विध्यपेक्षं लघोश्चासौ ॥ विध्यपेक्षं लघुग्रहणं कृतम् । लघोश्चासौ विहितः । कथं कुण्डिर्न दुष्यति ॥ कुण्डिता हुण्डिता । अत्र कस्मान्न भवति । धातोर्नुमः । धातोर्नुम्विधावुक्तं तत्र धातुग्रहणस्य प्रयोजनम् । धातूपदेशावस्थायामेव नुम्भवतीति । कथं रञ्जे-

---

विधानात् क्वसोर्ग्रहणं भवतीति भावः । इतरस्तु यथोक्तमप्रतिपद्य वि इति समुदायो निर्दिष्ट इति मत्वाह कथं पुनरिति । इतरः पूर्वोक्तेनाभिप्रायेणाह सामर्थ्यादिति । औणादिको न पर्युदस्यते लक्षणान्तरेण प्रसङ्गादिति सामर्थ्याद्वकारादेः क्वसोर्ग्रहणमित्यर्थः । छान्दस इति । भाषायां सदवसश्रुभ्य एव क्वसुर्नान्येभ्य इति भावः । केचित्तु भाषायामपि क्वसुमिच्छन्ति तएवं परिहरन्ति । असंयोगाल्लिट्किदिति सिद्धे कित्वे क्वसोः कित्त्वं प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधार्थमिति क्वसो गुणाभावः । अथ वेति । अनच्कस्य हल उच्चारयितुमशक्यत्वाद् इकार उच्चारणार्थो निर्दिष्ट इति वकारादेर्ग्रहणं क्वसौ च प्रतिविहितमिति औणादिक एव पर्युदस्यते तत्सामर्थ्याल्लक्षणान्तरेणापि गुणो न भवति किन्तु लोपाद्वर्णाश्रये प्रत्ययलक्षणनिषेधाच्च पर्युदासं नेच्छन्ति । अन्ये तु यथाऽतृणेडिति प्रत्ययलक्षणेन इमागमो भवति वर्णस्य प्रत्ययविशेषणत्वादेवं क्विपोऽपर्युदास इत्याहुः ८५

पुगन्त ॥ संयोग इति । धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये संयोगे गुर्विति गुरुसंज्ञायां लघुसंज्ञाया बाधनाद्भेत्तेति गुणो न भवति । अजादौ च भेदनमित्यादौ सावकाशो गुणः । विध्यपेक्षमिति । गुणविधानमिति शेषः । लघूपधाद्ये विहिते सार्वधातुकार्धधातुके तयोरङ्गस्य गुण इत्यर्थः । ननु पञ्चम्यभावात्कथं विधानं भविष्यति । उच्यते । षष्ठीपक्षेऽपि लघूपधस्य ये सार्वधातुकार्धधातुके के च तस्य ये तस्माद्विधीयेते इत्युपपद्यते विधानविशेषणम् । ननु साम्प्रतिकालघूपधसम्भवे कथं विधानं विशेष्यते व्यासिन्यायाश्रयादेवं हि हलादावजादौ च गुणः सिध्यति । कथं कुण्डिरिति । अङ्गाधिकारे नुमो विधानादकृत एव नुमि प्रत्ययो लघूपधाद्विधीयते तस्मिन् परतो नुमि गुणः प्राप्नोति । उक्तं तत्रेति । तेन कुण्डेति गुरोश्च हल इत्यकारः सिध्यति अन्यथा क्तिन् स्यात् । कथं रञ्जेरिति । यदि षष्ठीनिर्देशेऽपि विधानं विशेष्यते तदान्यत्रापि प्रसङ्गः । ततश्चाकारोपधाद्विहिते प्रत्यये वृद्धिर्विधीयमाना रञ्जेः प्रत्ययोत्पत्तेः पुरस्तान्नकारोपधत्वाद्वृद्धिर्न प्राप्नोति । राग इति । रञ्जेश्च घञि च भावकरणयोरिति नलोपः । ननु चोपधाया अकारस्य वृद्धिरुच्यते

रूपाद्यालक्षणा वृद्धिः आश्चर्यो रागः विचित्रो रागः । स्यन्दिश्रन्थ्योर्निपातनात् ॥ यदयं स्यन्दिश्रन्थ्योरवृद्ध्यर्थं निपातनं करोति तज्ज्ञापयत्याचार्यो भवत्येवञ्जातीयकानां वृद्धिरिति । अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ अनङ्लोप । दध्ना सक्थ्ना । शिदीर्घत्वं कुण्डानि वनानि । एवं तर्हि । अभ्यस्तस्य यदाहाचि ॥ यदयं नाभ्यस्तस्याचि पिति सार्वधातुक इत्यज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येवञ्जातीयकानां गुण इति । लङर्थं तत्कृतं भवेत् ॥ लङर्थमेतत्स्यात् अनेनेक् । क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥ यदयं त्रसिगृधिधृषिक्षिपेः क्नुः इको झल्हलन्ताच्चेति क्नुसनौ कितौ करोति तज्ज्ञापयत्याचार्यो भवत्येवञ्जातीयकानां गुण इति । संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति । विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥ १ ॥ धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् । अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् । क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे॥२॥

**नाभ्यस्तस्याचि पिति सार्वधातुके** ॥८७॥ अभ्यस्तानामुपधाह्रस्वत्वमचि पस्पशाते चाकशीमि वावशतीरिति दर्शनात् * । अभ्यस्तानामुपधाया ह्रस्वत्वमचि वक्तव्यम् । किम्प्रयोजनम् । पस्पशाते चाकशीमि वावशतीरिति

---

न च ततः प्रत्ययविधिसम्भव इति विध्यपेक्षत्वं नाश्रयिष्यते एवं मन्यते । अकारोपधायो विधीयते सोऽवयवाद्नुमानाद्विहितो भवति । स्यन्दिश्रन्थ्योरिति । नलोपार्थं वृद्ध्यभावार्थं निपातनम् । यदि वृद्धिविधौ विधानं विशेष्यते ततो वृद्धिप्रसङ्गाभावात्तदभावार्थं निपातनं न क्रियते नलोपसिद्धये विधिरेवाश्रीयेत अनेकप्रयोजनसिद्धये निपातनाश्रयणम् । अनङ्लोपेति । अल्लोपोन इत्यत्र षष्ठीनिर्देशेऽन्नन्ताद्विहिते प्रत्यये लोपो विधीयमानो राज्ञ इत्यादावेव स्यानाऽस्थ्ना दध्नेत्यादौ दीर्घत्वं च सामानीत्यादावेव स्यान्न तु कुण्डानीत्यादौ तस्मात् षष्ठीनिर्देशो विधानविशेषणे दोषप्रसङ्गाद् गुणो भेत्तुर्न सिध्यति । अभ्यस्तस्येति । अज्ग्रहणस्य प्रयोजनं नेनेक्तीत्यादौ गुणप्रतिषेधो मा भूत् । यदि च हलादावलघूपधत्वाद् गुणो न स्यात्तदा गुणस्य प्राप्तिरेव नास्तीति किं तन्निषेधनिवारणार्थेनाज्ग्रहणेन । लङर्थमिति। लुप्ते प्रत्यये गुणप्रतिषेधनिवारणायाज्ग्रणं न ज्ञापकम् । अनेनेगिति । णिजिर्शौचपोषणयोरित्यस्माल्लङि तिप्शप्श्लुः द्विर्वचनं निजां त्रयाणां गुणःश्लावित्यभ्यासस्य गुणः हल्ङ्याब्भ्य इति तिलोपः प्रत्ययलक्षणेन लघूपधागुणः । क्नुसनोरिति । ननु सनः कित्त्वममभावार्थं स्यात् सिसृक्षति दिदृक्षत इति कथं ज्ञापकम् । उच्यते । यद्येतावत्प्रयोजनं स्यात् सृजिदृशोर्झल्यमकित्सनोरित्येव ब्रूयात् तस्माद्गुणप्रतिषेधार्थमिति कित्त्वं ज्ञापकमेव किन्तु धिप्सति धीप्सतीत्यत्र नलोपार्थं सनः कित्त्वं स्यादिति क्नोरेव कित्त्वं ज्ञापकम् ॥ ८६ ॥

नाभ्य ॥ अभ्यस्तानामिति । गुणप्रतिषेधमविधाय ह्रस्वत्वमेव विधेयं सर्वेष्ट-

Indira Gandhi National Centre for the Arts

दर्शनात्। पस्पशाते चाकाशीमि वावशतीरिति प्रयोगो दृश्यते। कपोतः शरदं पस्पशाते। अहं भुवनं चाकशीमि। वावशतीरुद्राजदिति। बहुलं छन्दसि आनुषक्जुजोषदिति दर्शनात् *। बहुलं छन्दसीति वक्तव्यमुपधाह्रस्वत्वम्। किम्प्रयोजनम्। आनुषक् जुजोषदिति दर्शनात्। यस्त आतिथ्यमानुषक् जुजोषत्। यद्युपधाह्रस्वत्वमुच्यते। प्रियां मयूरः प्रति नर्नृतीति। यद्वत्वं नरवर नर्नृतीषि हृष्टः। अत्र गुणः प्राप्नोति तस्मान्नार्थ उपधाह्रस्वत्वेन। कस्मान्न भवति पस्पशाते चाकशीति वावशतीरिति। स्पशिकशिवशयः प्रकृत्यन्तराणीति॥

भूसुवोस्तिङि॥ ८८॥ भूसुवोः प्रतिषेधे एकाज्ग्रहणं बोभवतीत्यर्थम् *। भूसुवोः प्रतिषेधे एकाज्ग्रहणं कर्तव्यम्। किम्प्रयोजनम्। बोभवतीत्यर्थम्। इह मा भूद् बोभवतीति। यद्येकाज्ग्रहणं क्रियते अभूत् अत्र न प्राप्नोति। क्व तर्हि स्यात्। मा भूत्। तस्मान्नार्थ एकाज्ग्रहणेन। कस्मान्न भवति बोभवतीति। बोभूत्वित्येतन्नियमार्थं भविष्यति। अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रेति। क्व मा भूद् बोभवतीति॥

---

सिद्ध्य इति भावः। किं प्रयोजनमिति। गुणनिषेधे ह्रस्वे चाविशेषं मत्वा प्रश्नः। पस्पशात इति। स्पशिर्वार्तिककारवचनादपठितोऽपि धातुस्तस्माल्लेटो व्यत्ययेनात्मनेपदं टेरेत्वं लेटो डाटावित्याट् शपो बहुलं छन्दसीति श्लुः द्विर्वचनम्। चाकशीमीति। काशृ दीप्तौ यङ्लुग् लट् मिप् शब्लुक्। यङो वेतीडागमः। वावशतीरिति। वाशृशब्दे यङ् लुक् लट् शप्ङीप्। जुजोषदिति। जुषी प्रीतिसेवनयोः। लट् व्यत्ययेन परस्मैपदं तिप् इतश्च लोपः परस्मैपदेष्विति इकारलोपे लेटोडाटावित्यट् व्यत्ययेन शपः श्लुः द्विर्वचनं गुणे कृते ह्रस्वाभावः। यदि तर्हीति। यदि गुणनिषेधं प्रत्याख्यायोपधाह्रस्वो विधीयते तदा नर्नृतीति गुणरपरत्वयोः कृतयोर्ह्रस्वभावि-न्युपधा नास्तीति रूपं न सिध्यतीति गुणनिषेध एव ज्यायान्। ननु परत्वाद् गुणं बाधित्वा ह्रस्वो भविष्यति सकृद्गतौ विप्रतिषेध इति पुनर्गुणो न भविष्यति। एवं तर्हि पुनः प्रसङ्गविज्ञानाद्गुणः स्यात्। स्पशिकशिवशय इति। स्पशबाधनस्पर्शनयोः कशगतिशासनयोरिति केचित्पठन्ति। अन्येतु कसगतिशासनयोरिति तन्मतेन कशिः सौत्रो धातुः कशेर्मुट् प्रतिष्कशश्च कशेरिति पाठात्, वशकान्तौ॥ ८७॥

भू॥ एकाज्ग्रहणमिति। द्विर्वचने कृतेऽनेकाच्त्वे गुणनिषेधनिवृत्त्यर्थम्। बोभवतीति। यङ्लुगन्ताल्लट् तिब् लेटोडाटावित्यट्। मा भूदिति। न माङ्योग इत्यट् प्रतिषेधादेकाच्त्वम्। अत्रैवेति। सिद्धे गुणनिषेधे निपातनं नियमार्थम्। यद्येवं सोषवीतीति गुणनिषेधः प्राप्नोति। उच्यते भाष्यं यथा तथा भवत्येव योगापेक्षं ज्ञापकमिति वक्तव्ये नियमार्थमिति वचनादथ वा नियमार्थेन निपातनेन द्वयोरपि भूसुवोर्यङ्लुकि गुणनिषेधो निवार्यते। यद्वा छान्दसो यङ्लुक्। न च सुवो यङ्लुगन्तस्य छन्दसि प्रयोगः। भाषायां तु क्व चिद्यङ्लुग् भवति न सर्वत्र॥ ८८॥

Indira Gandhi National Centre for the Arts

तृणह इम् ॥ ९२ ॥ किमर्थं तृहिरागतश्नम्को गृह्यते । न तृहेरिम् भवती-त्येवोच्येत । तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थम् * । तृणहिग्रहणं श्नमि कृते इम्यथा स्यात् । तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वात् * । तृहिग्रहणे हि सति इम्विषये श्नमोभावः स्यात् । किङ्कारणम् । अनवकाशत्वात् । अनवकाश इम् श्नमं बाधेत । इदमयुक्तं वर्तते । किमत्रायुक्तम् । तृणहिग्रहणं श्नमिमोर्व्य-वस्थार्थमित्युक्त्वा तत उच्यते । तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वादिति। तत्र वक्तव्यं तृणहिग्रहणं श्नमिमोर्भावाय तृहिग्रहणे हीम्विषये श्नमभावोऽनवका-शत्वादिति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । व्यवस्थार्थमित्येव सिद्धम् । न ह्यसतो व्यवस्थेति ॥

तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥ सार्वधातुक इति वर्तमाने पुनः सार्वधातुकग्रहणं किमर्थम् । पुनः सार्वधातुकग्रहणमपिदर्थम् । अपिदर्थोऽयमार-म्भः । अध्रिगो शमीध्वं सुशमिशमीध्वं शमीध्वमध्रिगो ॥

बहुवचने झल्येत् ॥ १०३ ॥ अतो दीर्घाद्बहुवचन एत्वं विप्रतिषेधेन*। अतो दीर्घाद्बहुवचन एत्वं भवति विप्रतिषेधेन । अतो दीर्घो यञि सुपि चेत्यस्यावकाशः, वृक्षाभ्यां प्लक्षाभ्याम् । बहुवचने झल्येदित्यस्यावकाशो वृक्षेषु प्लक्षेषु । वृक्षेभ्यः प्लक्षेभ्यः इहोभयं प्राप्नोति । एत्वं भवति विप्रतिषेधेन ॥

अम्बार्थनद्योर्ह्रस्वः ॥ १०७ ॥ डलकवतीनां प्रतिषेधो वक्तव्यः । अम्-बाडे अम्बाले अम्बिके । तलू ह्रस्वत्वं वा ङिसम्बुद्ध्योः । तलो ह्रस्वत्वं वा ङि-सम्बुद्ध्योरिति वक्तव्यम् । देवत । देवते । देवतायां देवते । स तर्हि प्रतिषेधो

---

तृणह ॥ किमर्थमिति । तृह इत्यस्य निवृत्त्यर्थो विकरणनिर्देशो भवति ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानादिति प्रश्नः । नह्यसत इति । व्यवस्थार्थमित्येवं ब्रुवता पूर्वं श्नमोभावः पश्चादिम् इत्युक्तं भवति । श्नमोभा-वायेति तूच्यमाने क्रमो न प्रदर्शितः स्यात् ॥ ९२ ॥

तुरु ॥ अपिदर्थमिति । नाभ्यस्तास्याचिपिति सार्वधातुक इति सार्वधातुक-ग्रहणं पिद्विशेषणसम्बद्धमिति तदनुवृत्तौ पितोऽप्यनुवृत्तिः स्यादिति तन्निवृत्त्यर्थ-मन्यत्सार्वधातुकग्रहणमित्यपितो ऽपि इड् भवति । हल्ग्रहणमनुवर्तते न हि तत्सा-र्वधातुकग्रहणेन सहनिर्दिष्टं यतस्तन्निवृत्तौ हलो निवृत्तिः स्यात् । शमीध्वमिति । शमेरन्तर्भावितण्यर्थात् प्रैषे लोट् व्यत्ययेनात्मनेपदं शपतस्य बहुलं छन्दसीति लुक् ॥ ९५ ॥

अम्ब ॥ डलकवतीनामिति । अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः । श्रु-त्यपेक्षया वा स्त्रीत्वेन निर्देशः । असंयुक्तानाञ्च डलकालानां ग्रहणादकाल्लेति ह्रस्वो भवत्येव। देवत इति।ङौ ह्रस्वे कृते ङ्याब्ग्रहणे ऽदीर्घ इति स्थानिवत्त्वनिषेधादाम्याः

वक्तव्यः । न वक्तव्यः । स कथं न वक्तव्यो भवति । अम्बार्थं द्व्यक्षरं यदि ॥ यद्यम्बार्थं द्व्यक्षरं गृह्यते । तत्तर्हि ह्रस्वत्वं वक्तव्यम् । न वक्तव्यम् । अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम् । उपगायन्तु मां पत्यो गर्भिणयो युवतय इत्येवमर्थम् । मातॄणां मातच् पुत्रार्थमर्हते * । मातृणां मातजादेशो वक्तव्यः । पुत्रार्थमर्हते । गार्गीमात वात्सीमात ॥

ह्रस्वस्य गुणः ॥ १०८ ॥ इह कस्मान्न भवति नदि, कुमारि, किशोरि, ब्राह्मणि, ब्रह्मबन्धु । ह्रस्ववचनसामर्थ्यात् । अस्त्यन्यद्ध्रस्ववचने प्रयोजनम् । पृथग्विभक्ति मोच्चीचरमिति । शक्यं पृथग्विभक्तिमनुच्चारयितुम् । कथ,मेवमयं ब्रूयात् । अम्बार्थानां ह्रस्वः नदीह्रस्वयोर्गुण इति । यद्येवमुच्यते जसि चेत्यत्र नद्या अपि गुणः प्राप्नोति । एवं तर्हि योगविभागः करिष्यते । अम्बार्थनद्योर्ह्र-स्वः ततो ह्रस्वस्य । ह्रस्वस्य च ह्रस्वो भवति । किमर्थमिदं गुणं वक्ष्यति तद्बाध-नार्थम् । ततो गुणः गुणश्च भवति ह्रस्वस्येति । अथ वा ह्रस्वस्य गुण इत्यत्रा-म्बार्थनद्योर्ह्रस्व इत्येतदनुवर्तिष्यते ॥

जसि च ॥१०९॥ जसादिषु छन्दसि वावचनं प्राङ्णौ चङ्युपधायाः *। जसादिषु छन्दसि वेति वक्तव्यम् । किमविशेषेण । नेत्याह । प्राङ्णौ चङ्युप-धायाः । किम्प्रयोजनम् । अम्बे दर्वि शतक्रत्व पश्वे किकिदीव्या । अम्बे अम्ब

---

डागमौ न भवतः।अम्बार्थमिति।द्व्यच्च एवाम्बार्थस्य ग्रहणाड् डलकवतामर्थात् प्रति-षेधः कृतो भवति । अवश्यमिति । व्यत्ययो बहुलमिति दीर्घस्य ह्रस्वः । मातॄणामि-ति । पूर्वपदे बहवो मातृशब्दा इति बहुवचनं मातृशब्दस्य मातजादेशो वक्तव्यो यो मातृशब्दः पुत्रार्थं पुत्रमभिधामपादीयते बहुव्रीहौ च वर्तिपदैरन्यपदार्थोऽभिधीय-ते इति तत्रैवायं संबुद्धौ मातजादेशः । गार्गीमातेति । गार्गी मातास्येति बहुव्रीहौ न-द्यृतश्चेति कप् येननाप्राप्त इति मातजा बाध्यते यः पुत्रः श्लाघ्यगुणत्वात्कुलसम्भूत-या मात्रा व्यपदेशमर्हति तत्र मातजादेशो नान्यत्र । गर्गवत्साभ्यां गर्गादिञ् यञ-श्चेति ङीप् ॥ १०७ ॥

ह्रस्व ॥ इह कस्मादिति । ह्रस्वविधानं नद्या गुणविध्यर्थमेव स्यात् । पृथगिति । यद्यम्बार्थानां ह्रस्व इत्युक्त्वा नद्या गुणो ह्रस्वस्य चेत्युच्यते तदा पृथगुच्चारयितव्या भवति । एवमयं ब्रूयादिति । ह्रस्वं विधाय गुणे विधीयमाने प्रक्रियागौरवं भवती-ति लाघवार्थं साक्षादेव गुणं विदध्यात् । नद्या अपीति । एकसमासनिर्देशाद् द्वयो-रपि नदीह्रस्वयोरनुवृत्तिप्रसङ्गात् । ह्रस्वस्य चेति । ह्रस्वस्येत्यत्राम्बार्थनद्योरिति वर्तते तेन नद्या ह्रस्वे कृते तस्य गुणबाधनाय ह्रस्व एव क्रियते । अथ वेति । सिद्धे ह्रस्वे पुनरनुवृत्त्या तद्विधानं गुणबाधनार्थम् ॥ १०८ ॥

जसि च ॥ जसादिष्विति । आदिशब्दः प्रकारवाची प्रकरणे ऽस्मिन् येषु कार्यं विधीयते ते जसादय इति पूर्वयोगनिर्दिष्टानामपि ग्रहणम् । दर्वीति । कृदिकाराद्-



Indira Gandhi National Centre for the Arts

दर्वे दर्वि । शतक्रत्वः शतक्रतवः । पश्वे पशवे किकिदीव्या किकिदीविना ॥

घेर्ङिति ॥ १११ ॥ घेर्ङितिगुणविधाने ङीसार्वधातुके प्रतिषेधो * २ वक्तव्यः । पट्वी । मृद्वी । कुरुत इति । सुबधिकारात्सिद्धम् * । सुपीति वर्तते । क्व प्रकृतम् । सुपि च बहुवचने झल्येदिति ॥

याडापः ॥ ११३ ॥ इहातिखट्वायातिमालायेति ह्रस्वत्वे कृते स्थानिवद्भावाद्याट् प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः । याड्विधानेऽतिखट्वायेत्प्रतिषेधो ह्रस्वादेशत्वात् * । याड्विधाने ऽतिखट्वायातिमालायेत्प्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । याट् कस्मान्न भवति । ह्स्वादेशत्वात् । ह्रस्वादेशोयम् । उक्तं चैतत् । ङ्याब्ग्रहणे ऽदीर्घ इति । अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते आबसौ भूतपूर्व इति कृत्वा याट् कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीं सत्यपि स्थानिवद्भावे तया परिभाषया शक्यमुपस्थातुम् । नेत्याह । नहीदानीं क्वचिदपि स्थानिवद्भावः स्यात् ॥

ङेराम्नद्याम्नीभ्यः ॥ ११६ ॥ इदुद्भ्यामाम्विधानमौत्त्वस्य परत्वात् * । इदुद्भ्यामाम्विधेयः । शकट्यां पद्धत्यां धेन्वामिति । किं पुनः कारणं न सिध्यति । औत्त्वस्य परत्वात् । परत्वादौत्त्वं प्राप्नोति । योगविभागात्सिद्धम् * ।

---

क्ङित इति पक्षे ङीष्विधानात्सिध्यति रूपद्वयम् । ङीष्विकल्पं त्वनपेक्ष्यैतदुक्तम् । शतक्रत्व इति । जसि चेति गुणाभावपक्षे प्रथमयोरिति पूर्वसवर्णदीर्घोऽपि वा छन्दसीति वचनान्न भवतीति यणादेशः प्रवर्तते । किकीदिविशब्दः कृविघृष्विच्छुणादिषु निपातितः ॥ १०९ ॥

घेः ॥ कुरुत इति । शेषोघ्यसखीति तस्य नदीसंज्ञा नास्ति स घिसंज्ञ इति कुरुशब्दो घिः ॥ १११ ॥

याडा ॥ अतिखट्वायेति । खट्वामतिक्रान्त इति प्रादिसमासे ह्रस्वे च कृते चतुर्थ्येकवचनस्य ङेर्य इति प्राप्नोति याडाप इति च तत्र परत्वाद्याट् प्राप्नोति तत्र कृते दीर्घत्वे चातिखट्वायै देवदत्तायेति प्रसङ्गः । ह्रस्वादेशत्वादिति । यतो ह्रस्वादेशः कृतस्ततो रूपभेदादाब्ग्रहणेन तस्य ग्रहणाभावात् । स्थानिवत्त्वं च नास्तीत्याह उक्तं चैतदिति । लक्षणेति । अकारस्य दीर्घे सत्या इति लाक्षणिकं रूपमिति न तस्य ग्रहणम् । ननु चेति । ङ्याब्ग्रहणे दीर्घ इति न वक्तव्यमिति चोद्यते । नेत्याहेति । परिहारः ॥ ११३ ॥

ङेः ॥ शकट्यामिति । शकटिशब्दस्य ङिति ह्रस्वश्चेति वा नदीसंज्ञाविधानात्तदभावपक्षे घिसंज्ञायां शकटाविति भवति । नदीसंज्ञापक्षे तु परत्वादौत्वं प्राप्नोति । आमोवकाशः कुमार्यामिति । औत्वस्यावकाशः सख्यौ पत्याविति । अत आह इदुद्भ्यामिति । पूर्वविप्रतिषेध आश्रयणीय इत्यर्थः । ननु कृते औत्वे पुनः प्रसङ्गविज्ञानादाम् भविष्यति पुनरौत्वं न भविष्यति । चक्रकेऽभ्युपगतो ऽव्यवस्थापना-

Indira Gandhi National Centre for the Arts

योगविभागः करिष्यते । ङेराम्नद्याम्नीभ्यः । तत इदुद्भ्याम् । इदुद्भ्यामुत्तरस्य ङेराम्भवतीति । शकृत्यां पद्धत्यां धेन्वामिति । तत औच्च घेः । औत्वे योगविभागः कर्तव्यः ॥

औत् ॥ ११८ ॥ औद्भवतीदुद्भ्याम् । ततः अच्च घेरिति । अकारश्च भवति घेरिति । किमर्थो योगविभागः । सखिपतिभ्यामौत्वार्थः । सखिपतिभ्यामौत्वं यथा स्यात् । सख्यौ पत्यौ । एकयोगे ह्यप्राप्तिरत्वसन्नियोगात् * । एकयोगे हि सख्यौत्वस्याप्राप्तिः । किङ्कारणम् । अत्वसन्नियोगात् । अत्वसन्नियोगेनौत्वमुच्यते । तेन यत्रैवात्वं स्यात् । नवाकारस्यान्वाचयवचनाद्यथा क्यङि सलोपः * । न वार्थ औत्वे योगविभागेन । किङ्कारणम् । अकारस्यान्वाचयवचनात् । प्रधानशिष्टमौत्वमन्वाचयशिष्टत्वम् । यथा क्यङि सलोपः । तद्यथा । प्रधानशिष्टः क्यङ् प्रातिपदिकमात्राद्भवति । यत्र च सकारस्तत्र लोपः । अत्वे टाप्प्रतिषेधः* । अत्वे टापः प्रतिषेधो वक्तव्यः । शकृतौ । पद्धतौ । धेनौ । अत्वे कृते ऽत इति टाप् प्राप्नोति । न वा सन्निपातलक्षणस्यानिमित्तत्वात् * । न वा वक्तव्यः । किङ्कारणम् । सन्निपातलक्षणस्यानिमित्तत्वात् । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति । एवं न भविष्यति । डित्करणाद्वा * । अथ वा डिदौकारः करिष्यते औडिच्च घेः ॥

———————

त् । नैतदस्ति । द्रव्यपदार्थपक्षे सकृद्गतिपरिभाषयाम्न स्यात् । योगविभाग इति । इदुद्भ्यामित्यत्र योगे नदीग्रहणानुवृत्त्या सख्यौ पत्यावित्यत्रामोऽप्रसङ्गः ॥ ११६ ॥

औत् ॥ औत्व इति । एकयोगे त्वत्वौत्वयोः सन्नियोगशिष्टत्वाद्यत्रात्वं तत्रौत्वं स्यात् । सख्यौ पत्याविति । असखीतिप्रतिषेधात् पतिः समास एवेतिनियमाच्चानयोर्नास्ति घिसंज्ञा । अस्त्र्याख्यत्वाच्च नास्ति नदीसंज्ञा । यदा सखिशब्दः स्त्रियां वर्तते तदा सख्यशिश्वीतिभाषायामिति ङीषा भाव्यं, पतिशब्दस्य तु स्त्रीवृत्ते यज्ञसंयोगादन्यत्र ङिति ह्रस्वश्चेति पक्षे नदीसंज्ञेति पत्यामिति भवति । न वेति । अन्वाचये चशब्दः । इदुद्भ्यां परस्य ङेरौद्भवति यत्र तु घिसंज्ञास्ति तत्र तस्यात्वमिति अत्वानपेक्षमौत्वं प्रधानशिष्टम् । अत्व इति । टापि सत्यौङ आप इति शीभावः प्राप्नोति । यदा तत्र सामान्यग्रहणार्थो ङकारो वर्णनिर्देशो वा । यदा तु पूर्वाचार्यनिर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीविधानादस्याप्रसङ्गः । अन्ये टापि याडप्रसङ्गमाहुः । न वेति । यासेत्यादौ टाब् भवति । त्यदाद्यकारस्याद्विधेरिति । दोषेषु परिगणनात् । डित्करणाद्वेति । अन्तोदात्तेषु स्वरभेदोऽपि नास्ति । डित्त्वउदात्तनिवृत्तिस्वरेण भाव्यम् । अडित्त्वे त्वेकादेश उदात्तेनोदात्त इति । ननु डित्त्वे सख्यौ पत्याविति टिलोपप्रसङ्गः । नैतदस्ति । औत् डिच्च घेरिति न्यासः क्रियते । पत्यावैश्वर्य इति निपातनाद्वा घेष्टिलोपाभावः । विंशताविल्यत्र तिविंशतेर्डितीति तिलोपो न भवति । नस्तद्धित इति योगविभागात्तद्धित इत्यत तिविंशतेर्डितीति न इति

**आङो नाऽस्त्रियाम्** ॥ १२० ॥ किमर्थमस्त्रियामित्युच्यते । नाङो ना पुंसीत्येवोच्येत । का रूपासिद्धिः । त्रपुणा । जतुना । नुमा सिद्धम् । नैवं शक्यम् । इह ह्यमुना ब्राह्मणकुलेनेति मुभावस्यासिद्धत्वात् नुम् न स्यात् । अस्त्रियामिति पुनरुच्यमाने न दोषो भवति । वक्ष्यत्येतन्नमुटादेश इति ।' इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

पादस्तृतीयः समाप्तः ॥

**णौ चङ्युपधाया ह्रस्वः** ॥ १ ॥ अथ णिग्रहणं किमर्थम् । न चङ्युपधाया ह्रस्व इत्येवोच्येत । चङ्युपधाया ह्रस्व इतीयत्युच्यमाने अलीलवत् अपीपवत् उकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति प्रयोजनम् । वृद्धिरत्र बाधिका भविष्यति । वृद्धौ तर्हि कृतायामौकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति । अन्तरङ्गत्वादत्रावादेशो भविष्यति । न हीदानीं ह्रस्वभाविन्युपधा भवति । तस्माण्णिग्रहणं कर्तव्यम् । अथ चङ्ग्रहणं किमर्थम् । न णावुपधाया इत्येव सिद्धम् । णा-

---

च्चानुवर्तते । अतद्धितानां ङित्करणसामर्थ्यात् । अथ वा टेरित्यनुवर्तताम् । तथाप्यतद्धितानां ङित्करणसामर्थ्याद् यथैव ह्यभस्य लोपो भवति एवमतद्धितेष्वपि ११८

आङो ॥ किमर्थमिति । आङो ना पुंसीत्युच्यमाने मात्रालाघवं भवतीष्टं च सिध्यतीति प्रश्नः । नुमेति । इकोचि विभक्तावित्यनेन । अमुनेति । पुंसीत्युच्यमाने नपुंसके नाभावो न स्यात् । नुमपीग्लक्षणो मुत्वस्यासिद्धत्वान्नास्ति । नमुटादेश इति । टाया आदेशष्टायामादेश इत्यनेकविभक्त्यन्तसमासाश्रयेण नाभावे कर्तव्ये ने च परतो दीर्घे मुत्वस्य सिद्धत्वाद् घिलक्षणो नाभावो भवत्यतो दीर्घो यञि सुपि चेति दीर्घत्वं न भवतीति सर्वेष्टसिद्धिः ॥ १२० ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च तृतीयः समाप्तः ॥

णौचङ्युपधाया ह्रस्वः ॥ अथ णिग्रहणमिति । ह्रस्वग्रहणादुपधाग्रहणाच्च चङा णिराक्षिप्तो नह्यण्यन्तानां चङि ह्रस्वभागुपधास्ति । ह्रस्वश्रुत्या ह्यच्परिभाषोपस्थानादच उपधाया ह्रस्वेन भाव्यम् । न श्रिद्रुस्रुचेट्श्वीनामजुपधा । कमिगुप्योस्तु ह्रस्व एवोपधा तत्र णावन्तरङ्गत्वाद् वृद्ध्यावादिषु कृतेषु चङ्युपधाह्रस्वभावात् नास्तीति सामर्थ्याच्चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्वो विज्ञास्यत इति प्रश्नः । इतरो यथाश्रुतसम्भवाच्चङि यः प्रत्यय इत्यध्याहारो न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादि ह्रस्वो बाधेतेति मत्वाह चङ्युपधाया इति । इतरस्तु चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्व इत्यध्याहारेण सूत्रार्थसंभवाद्युक्तान्तरङ्गबाधेति मत्वाह वृद्धिरत्रेति । इतरो ह्रस्वस्यानवकाशतां मत्वाह औकारस्येति । नन्वेवं वृद्धिरनर्थिका स्यात् । एतदेव तर्ह्युच्यते वृद्ध्यात्र न भाव्यमभ्युपगम्य तु वृद्धिरुच्यते' वृद्धौ तर्हि कृतायामिति । अपवादत्वाद्धि ह्रस्वो वृद्धेर्बाधक आवादेशस्य चेति भावः । इतरो वाक्याध्याहारेण ह्रस्वस्य सावकाशतां मत्वाह नैतदस्तीति । इतरो यथाश्रुतसम्बन्धसम्भवादनवकाशतामेव मत्वाह न हीदानीमिति । ननु वृद्धिं बा-

Indira Gandhi National Centre for the Arts

णावुपधाया ह्रस्व इतीयत्युच्यमाने कारयतिहारयत्योरपि प्रसज्येत । नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति न णावेव ह्रस्वत्वं भवतीति । यदयं मितां ह्रस्वत्वं शास्ति । इहापि तर्हि न प्राप्नोति । अचीकरत् अजीहरत् । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति । कारयति हारयति । तस्माच्चङ्ग्रहणं कर्तव्यम् । अथोपधाग्रहणं किमर्थम् । णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् * । णौ चङ्युपधाग्रहणं क्रियते । अन्त्यस्य ह्रस्वत्वं मा भूत् । णौ चङि ह्रस्व इतीयत्युच्यमाने अलीलवत् अपीपवत् । अन्त्यस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति प्रयोजनम् । अन्तरङ्गत्वादत्रावादेशो भविष्यति । न तर्हीदानीं ह्रस्वभाव्यन्त्योऽस्ति अन्त्यो ह्रस्वभावी नास्तीति कृत्वा वचनादनन्त्यस्य भविष्यति । इहापि वचनात्प्राप्नोति । अचकाङ्क्षदववाङ्क्षत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेनैकेन । एतेन पुनः सङ्घातेन व्यवधानं भवति च न भवति च । उत्तरार्थं तर्ह्युपधाग्रहणं कर्तव्यम् । लोपः पिबतेरीच्चा-

---

धित्वा भवतूकारस्य ह्रस्वस्तस्मिंस्तु कृते बाधितत्वान्मा भूद् वृद्धिः गुणस्तु केन वार्यते। ततो गुणावादेशौ च सिद्धमलीलवदिति । नैतदस्ति। गुणस्य वृद्ध्या बाधितत्वाद् वृद्धेश्च ह्रस्वेन भ्रष्टावसरस्य गुणस्य कुतः पुनः प्रवृत्तिरिति उवङ् प्रसज्येत । अदीदपदित्यत्र च ह्रस्वेन पुग्बाध्येत । अपीपवदित्यादौ च नैष ह्रस्वः स्यादिति णिग्रहणं क्रियते । यदा चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधस्तदा वृद्ध्यावादेशयोः कृतयोः पुकि च णिलोपस्य स्थानिवत्त्वाभावाच्चङि उपधा ह्रस्वभाविनी संभवतीति णिग्रहणं न कर्तव्यम् । सूत्रकारेण चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधो न कृत इति णिग्रहणं कृतम् । अथेति । मितां ह्रस्वविधानादनेन सर्वत्र णौ ह्रस्वो भविष्यति । प्रयोगदर्शनाच्चेष्टा व्यवस्थाश्रयितव्येति मत्वा प्रश्नः । इतरो वचनमन्तरेणेष्टानिष्टविभागो दुर्ज्ञान इति मत्वाह णावुपधाया इति । अथोपधाग्रहणमिति । न्यायान्नाग्लोपिशास्वृदितामिति निषेधाच्च लिङ्गादुपधाया एव ह्रस्वो भविष्यतीति प्रश्नः । चङ्युपधाग्रहणमिति । असत्युपधाग्रहणे ऽचःपरिभाषोपस्थानादचाङ्गस्य विशेषणादजन्तस्याङ्गस्य ह्रस्वो विधीयमानो ऽलोन्त्यस्येत्यन्त्यस्य स्यात् । लू इ अत् इति स्थिते ऊकारस्य ह्रस्वत्वप्रसङ्गः । वृद्धिरत्र बाधिका भविष्यतीति पूर्ववत्सर्वत्रानुषञ्जनीयं न्यायव्युत्पत्तये त्वन्यदभिधातुमाह नैतदस्तीति । इतरो ह्रस्वं निरवकाशत्वादन्तरङ्गाणां बाधकं मत्वाह न तर्हीदानीमिति । इतरो विशेषणविशेष्यभावे कामचारादङ्गेनाज्विशेष्यते अङ्गस्य यत्र तत्र स्थितस्याचो ह्रस्वो भवतीत्येवं विध्यन्तराण्यपि न बाधितानि भवन्ति । ह्रस्वश्च सावकाशो भवतीति मत्वाह अन्त्यो ह्रस्वभावीति । अङ्गस्येति चावयवषष्ठीविज्ञानादलोन्त्यस्येत्यस्योपस्थानाभावः । येन नाव्यवधानमिति । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्येन शब्देन अवश्यं व्यवधानं तेन व्यवहितेऽपि कार्यं विज्ञायमानमन्यव्यवधाने न प्रवर्तते ण्यङ्गाभ्यां ह्यज्विशेष्यते णौ परतोऽङ्गस्य योऽजिति सामर्थ्यादेकवर्णव्यवधानमवश्यं भावित्वा-

Indira Gandhi National Centre for the Arts

भ्यासस्य उपधाया यथा स्यात् । अपीप्यत् अपीप्यतामपीप्यन् । अथेह कथं भवितव्यम् । मा भवानाटिटदिति आहो स्विन्मा भवानटिटदिति । मा भवानाटिटदित्येवं भवितव्यम् । ह्रस्वत्वं कस्मान्न भवति । द्विर्वचने कृते परेण रूपेण व्यवहितमिति कृत्वा । इदमिह सम्प्रधार्यं द्विर्वचनं क्रियतां ह्रस्वत्वमिति । किमत्र कर्तव्यम् । परत्वाद्ध्रस्वत्वम् । नित्यत्वाद्द्विर्वचनम् । कृतेऽपि ह्रस्वत्वे प्राप्नोत्यकृतेऽपि । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति द्विर्वचनाद्ध्रस्वत्वं बलीय इति । यदयमोणिमृदितं करोति । कथं कृत्वा ज्ञापकम् । ऋदित्करण एतत्प्रयोजनमृदितां नेति प्रतिषेधो यथा स्यात् । यदि चात्र पूर्वं द्विर्वचनं स्याद् ऋदित्करणमनर्थकं स्यात् । द्विर्वचने कृते परेण व्यवहितत्वाद्ध्रस्वत्वं न भविष्यति । पश्यति त्वाचार्यो द्विर्वचनाद्ध्रस्वत्वं बलीय इति तत ओणिमृदितं करोति तस्मान्मा भवानटिटदिति भवितव्यम् । उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् * । उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । किं पुनः कारणं न सिध्यति णिचा व्यवहितत्वात् । णिलोपे कृते नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यते स्थानिवद्भावः । चङ्परनिर्ह्रासे न स्थानिवदिति । एवमप्यग्लोपिनां नेति प्रतिषेधः प्राप्नोति । वृद्धौ कृतायां लोपः । तन्नाग्लोप्यङ्गं भवति । इदमिह सम्प्रधार्यं वृद्धिः क्रियतां लोप इति । किमत्र कर्तव्यम् । परत्वाद्वृद्धिः । नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि । अनित्यो लोपोन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याकृतायां शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति उभयोरनित्ययोः परत्वाद्वृद्धिः । वृद्धौ कृ-

---

दाश्रीयते । एकस्मिंस्तु विषये ऽन्त्यसदेशानन्त्यसदेशयोर्ह्रस्वभाविनोरसम्भवादन्त्यविकारे ऽन्त्यसदेशस्यैव ग्रहणमिति परिहारो नोक्तः । अपीप्यदिति । अलोन्त्यस्येति युक्तो लोपप्रसङ्गादुत्तरार्थमुपधाग्रहणम् । ह्रस्वोपवादो लोपो विज्ञायमान उत्सर्गदेशत्वादपवादानामुपधाया एव भविष्यति । नैतदस्ति । ह्रस्वश्रुत्याच्परिभाषोपस्थानादङ्गेन चाचो विशेषणाद्युक्तं यदुपधाह्रस्वः स्यात् । लोपविधौ तु पिबतेरिति स्थानषष्ठ्या अन्त्ये ऽल्युपसंहारात् । अन्त्यस्यैव लोपः स्यात् भिन्नदेशावप्युत्सर्गापवादौ दृश्येते तथा शप्श्नमौ काकचौ सत्यपि सम्भवे बाधनं भवतीति न्यायाद्भिन्नदेशोऽप्यपवाद उत्सर्गं बाधते । यदि तर्ह्युत्तरार्थमुपधाग्रहणं तत्रैव वक्तव्यमाल्लोपः पिबतेरीच्चाभ्यासस्येति । नैतदस्ति । अन्तरङ्गमपि युकमनवकाशत्वादाल्लोपो बाधेत उपधाग्रहणे त्वन्तरङ्गत्वाद्युकि कृते आकारस्योपधाया लोप इति न कश्चिद्दोषः । अथेहेति । न्यायप्रयोगविरोधात्प्रश्नः । स एव प्रष्टा न्यायाश्रयेणाह मा भवानाटिटदित्येवमिति । इतरो वक्ष्यमाणलिङ्गावष्टम्भेन पृच्छति ह्रस्वत्वं कस्मान्न भवतीति । एवं तर्हीति । ज्ञापकात् पूर्वं ह्रस्वः पश्चाद् द्विर्वचनमि-

Indira Gandhi National Centre for the Arts

तायां लोपः । तत्राग्लोप्यङ्गं भवति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति वृद्धेर्लोपो बलीयानिति । यदयमग्लोपिनां नेति निषेधं शास्ति । नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र वृद्धावपि कृतायामग्लोप्येव लुप्यते । अत्यरराजत् । यत्तर्हि प्रत्याहारग्रहणं करोति इतरथा ह्यग्लोपिनां नेति ब्रूयात् । एवं तर्हि वृद्धेर्लोपो बलीयानिति । अथ वा आरभ्यते पूर्वविप्रतिषेधः । ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धमिति । तस्मादुपसंख्यानं कर्तव्यमिति ॥

**नाग्लोपिशास्वृदिताम्** ॥२॥ अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात् * । अग्लोपिप्रतिषेधोऽनर्थकः । किङ्कारणम् । स्थानिवद्भावात् स्थानिवद्भावादत्र ह्रस्वत्वं न भविष्यति । यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः । क्व च स्थानिवद्भावो नास्ति यो हलचोरादेशः । अत्यरराजत् । किं पुनः कारणम् । हलचोरादेशो न स्थानिवदित्युच्यते । अचादेशः स्थानिवदित्युच्यते । न चायमच एवादेशः किं तर्ह्यचश्चान्यस्य च । अग्लोपिनां नेत्यपि तर्हि प्रतिषेधो न

———

ति क्रमः । कृतायामपीति । स्थानिवद्भावात् । एवं तर्हीति । सर्वत्राको वृद्धौ कृतायामैकारोकारयोर्लोपो न त्वकः । अत्यरराजदिति । रजानमतिक्रान्तवानिति प्रातिपदिकाद्धात्वर्थे इति णिचि कृतेऽत उपधाया इति वृद्धौ कृतायामग्लोप्येव लुप्यते । यत्तर्हीति । प्रत्याहारग्रहणाल्लिङ्गात् पूर्वविप्रतिषेधेन लोपो भवति । ननु प्रत्याहारग्रहणं स्वामिनमाख्यदसस्वामत् । गोमिनमाख्यदजुगोमदित्यादौ वृद्धिप्रसङ्गाभावाल्लोपे ह्रस्वनिषेधार्थं स्यादिति कथं ज्ञापकमिति चिन्त्यमेतत् । अत्राहुः । अन भधानाण्णिजत्र नास्ति इति भाष्यकारस्याभिप्रायः । एवं तु ज्ञापकं नलोपस्य बलीयस्त्वे यदुक्तं हलिकलयोरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति तद्विरुध्यते अमत्यपि अत्वनिपातने वृद्धिं बाधित्वेकारस्य लोपे सति सन्वद्भावस्याप्रसङ्गादनाश्रित्य ज्ञापकाश्रयणं तु ज्यायः । पटुमाख्यदपपटदित्यादावकृतायां वृद्धौ लोपे सति सन्वद्भावस्य प्रसङ्गाभावार्थम् । अथ वेति । हलिकलयोरत्वनिपातनमेव ज्ञापकं लोपात् पूर्वं वृद्धिर्भवतीति । णिलोपस्तु वाचनिकेन पूर्वविप्रतिषेधेन वृद्धेः पूर्वं भवति । एवं पटुमाख्यदपीपटदिति सन्वद्भावप्रसङ्गात्प्रत्याहारग्रहणमेव ज्ञापकमाश्रयणीयं तेन वृद्धेः प्राग् लोपो विधेयः ॥ १ ॥

नाग्लोपिशास्वृदि ॥ अग्लोपीति । मालामाख्यदममालदित्यादौ टिलोपस्य स्थानिवत्त्वादनुपधात्वात्प्राप्तिरेव ह्रस्वस्य नास्तीति प्रतिषेधोऽनर्थकः । ननु प्रतिषिध्यते तत्र स्थानिवत्त्वं क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्विति । नैतदस्ति । यदर्थः स प्रतिषेधः । तस्य णेर्णिच्युपसंख्यानमित्यनेन साधितत्वान्न वक्तव्यः । हलचोरादेश इति । यथा सुधातुरकङ्चेत्यादेशे समुदाये अवयवस्यानादेशत्वादणो रपरत्वं न भवति सौधातकिरिति । तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेशत्वाभावान्नास्ति स्थानिवद्भावः । किं पुनरिति । अवयवात्मकत्वात्समुदायस्य तस्मिन् स्थानिन्यवयवानामपि स्थानित्वादजादेशत्वाद् न्याय्य एव स्थानिवद्भावः ।

Indira Gandhi National Centre for the Arts

प्राप्नोति । किङ्कारणम् । अग्लोपिनां नेत्युच्यते । न चात्रागेव लुप्यते किं तर्ह्यक्चान्यश्च । योत्राग्लुप्यते तदाश्रयः प्रतिषेधो भविष्यति । यथैव तर्हि योत्राग्लुप्यते तदाश्रयः प्रतिषेधो भवति । एवं योत्राग्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति । एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः इत उत्तरं स्थानिवद्भावो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । पूर्वत्रासिद्धे न स्थानिवदित्युक्तम् । तन्न वक्तव्यं भवति । यद्येतज्ज्ञाप्यते । आदीधयतेः आदीधकः । आवेवयतेः आवेवकः । यीवर्णयोर्दीधीवेव्योरिति लोपो न प्राप्नोति । इह च यत्प्रलुनीह्यत्र तिङि चोदात्तवतीत्येष स्वरो न प्राप्नोति । नैष दोषः । यत्तावदुच्यते । आदीधयतेः आदीधकः । आवेवयतेः आवेवकः । यीवर्णयोरिति लोपो न प्राप्नोतीति । यीवर्णयोरित्यत्र वर्णग्रहणसामर्थ्याद्भविष्यति । यदप्युच्यते तत्प्रलुनीह्यत्र तिङि चोदात्तवतीत्येष स्वरो न प्राप्नोतीति । बहिरङ्गो यणादेशः । अन्तरङ्गः स्वरः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

---

तथा च खट्वर्श्य इति ऋस्थानिकत्वाश्रयमणोरपरत्वं भवतीति भावः । इतरः पूर्वोक्तेनैवाभिप्रायेणाह अजादेश इति । इतरस्त्वनुमीयमानोऽवश्याश्रयितव्यः स्थास्यादेशभाव इति मत्वाह अग्लोपिनामिति । इत उत्तरमिति । पञ्चपाद्यामित्यर्थः । पूर्वत्रासिद्ध इति । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्तव्यमेव । यद्वा ज्ञापकज्ञापिता विधयोऽनित्या इति संयोगादिलोपलत्वेषु स्थानिवद्भावो भवत्येव । अचः परस्मिन्नित्यत्र विचारितं हलचोरादेशः स्थानिवदिति चोर्द्विंशतेस्तिलोप एकादेश इत्यादि तत्र निर्णीतं हलचोरादेशो न स्थानिवदिति । इह तु प्रतिषेधवचनमर्थान्तरज्ञापनायोक्तमिति ग्रन्थविरोधस्तस्माद् न्यायाश्रयेण हलचोरादेशो न स्थानिवदित्ययं पक्षो ग्राह्यः । इह त्वभ्युपेत्य स्थानिवत्त्वं ज्ञापकत्वमाश्रितम् । शिष्यबुद्धिव्युत्पादनायाऽस्थितो ऽपि पक्षः क्व चिदुपन्यस्यत इत्येवं विरोधः परिहार्यः । अग्लोपिग्रहणसामर्थ्याच्च समुदायलोपे ऽप्यग्लोप आश्रीयते केवलाग्लोपे प्रतिषेधस्यानर्थक्याद् खट्वर्श्य इत्यत्र त्वेकः पूर्वपरयोरित्यवयवावेवशब्देन चोदितावितिरपरत्वं प्रवर्तते । तदुक्तम् । यो ह्युभयोः षष्ठीनिर्दिष्टयोः स्थानी भवति लभतेऽसावन्यतरतो व्यपदेशमिति । आदीधक इति । दीधी णिच् दीधीवेवीटामिति गुणवृद्धिप्रतिषेधस्ततो ण्वुलि लोपे कृते तस्य स्थानिवद्भावाभावाद् यीवर्णयोरिति लोपो न प्राप्नोति । यद्यप्यन्तरङ्गत्वाल्लोपः सिध्यति तथापि वर्णग्रहस्यानन्यार्थस्य प्रयोजनाख्यानायोपक्षेपः । यत्प्रलुनीह्यत्रेति । तिङ्ङतिङ इति निघातो निपातैर्यद्यदीति निषिद्धः । हेरपित्त्वादाद्युदात्तत्वाच्च विकरणस्वरो लसार्वधातुकस्वरं बाधत इति श्नास्वराभावस्तत्र यणादेशे कृते उदात्तत्वाभावात्स्थानिवत्त्वाभावाच्च निघातो न प्राप्नोति । वर्णग्रहणसामर्थ्यादिति । वर्णग्रहणाद् भूतपूर्वगतिराश्रीयते । अन्तरङ्गत्वात्तु लोपे सिद्धे वर्णग्रहणं शक्यमकर्तुम् । तत्तु के चिद् ज्ञापकं वर्णयन्ति उत्तरत्र स्थानिवत्त्वाभावस्य अग्लोपि ग्रहणं तु सति प्रयोजने न ज्ञापकमस्यार्थ-

Indira Gandhi National Centre for the Arts

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥ ३ ॥ काण्यादीनां वेति वक्तव्यम् * । क पुनः काण्यादयः । काणिराणिश्राणिभाणिहेठिलोपयः । अचकाणत् । अचीकणत् । अरराणत् । अरीरणत् । अशश्राणत् । अशिश्रणत् । अबभाणत् । अबीभणत् । अजीहिठत् । अजिहेठत् । अलुलोपत् । अलूलुपत् ॥

दयतेर्दिगि लिटि ॥ ९ ॥ इहावदिग्ये ऽवदिग्याते ऽवदिग्यिरे । दिग्यादेशे कृते द्विर्वचनं प्राप्नोति । तत्र साभ्यासस्येति वक्तव्यम् । ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति । न सिध्यति । किङ्कारणम् । दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम् * । दिग्यादेशः क्रियतां द्विर्वचनमिति । परत्वाद्दिग्यादेशेन भवितव्यम् । तत्र साभ्यासस्येति वक्तव्यम् । एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते । पुनः प्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोति । पुनः प्रसङ्गविज्ञानादिति चेदमादिभिस्तुल्यम् * । पुनः प्रसङ्गविज्ञानादिति चेदमादिभिस्तुल्यमेतद्भवति । तद्यथा । अमादिषु कृतेषु पुनः प्रसङ्गाच्छिशीलुङ्नुमो न भवन्ति। एवं दिग्यादेशे कृते पुनः प्रसङ्गाद् द्विर्वचनं न भविष्यति । अथ वा विप्रतिषेधे

---

स्य । अन्तरङ्ग स्वर इति । यद्यप्युभयं पदद्वयाश्रयं तथापि पूर्वमुपसर्गेण सम्बन्धः पश्चादधिकरणवाचिनात्रशब्देनेति यणादेशो बहिरङ्गः ॥ २ ॥

भ्राज ॥ काण्यादीनां वेति ॥ आदिशब्दः प्रकारे येषां ह्रस्वविकल्पो दृश्यते ते काण्यादयः । काणिश्राणिराणिभाणिहेठिलोपिप्रभृतयः ॥ ३ ॥

दय ॥ दिग्यादेशे कृते इति।यद्यपि प्राप्ते द्विर्वचने दिग्यादेश आरभ्यते तथापि बाध्यबाधकभावे द्वैतलक्षणं वा क्षलणेन बाध्यते लक्ष्यं वा । तत्र यदा द्विर्वचनशास्त्रं दिग्यादेशशास्त्रेण बाध्यते तदा दिग्यादेशे कृते नास्ति द्विर्वचनप्रसङ्गः । यदा तु लक्ष्यं बाध्यते तदा तस्य द्विर्वचनं दिगिना बाध्यते दिगेस्तु तत्प्राप्नोति शास्त्रस्याबाधितत्वात् । ततश्च यथा चख्यावित्यादौ ख्याञादेशे कृते द्विर्वचनं भवति । एवं दिग्यादेशे कृते प्राप्नोति । साभ्यासस्येति । तेन कृते द्विर्वचने दिग्यादेशे न पुनर्द्विर्वचनं भवति सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्साभ्यासग्रहणसामर्थ्याच्च । ननु चेति । पूर्वविप्रतिषेधाल्लक्ष्यसिद्धये इष्टक्रमाश्रयणाद्वेति भावः । न सिध्यतीति । विप्रतिषेधे परं कार्यमित्यस्मिन् व्यवस्थाहेतौ सत्येव क्रमो दुर्लभः । तत्र द्विर्वचनस्यावकाशः पपाचेति । कृते द्विर्वचने दयतिसद्भावाद्दिग्यादेशस्य । अकृते तु द्विर्वचने तूभयप्रसङ्गे परत्वाद्दिग्यादेशः । एवं तर्हीति । नाप्राप्ते द्विर्वचने दिग्यादेशस्यारम्भात् । इतरस्तद्बुद्धिपरीक्षार्थं विप्रतिषेधाश्रयेण सकृद्गताइत्येवं दिग्यादेशो द्विर्वचनस्य त्वया बाधक उक्त इत्यारोप्य कथयति । पुनः प्रसङ्गविज्ञानादिति । इतरोऽप्यभ्युपगम्य तावद्विप्रतिषेधं सकृद्गतावित्याश्रित्याह पुनः प्रसङ्गादिति चेदिति । यथा यूयं ब्राह्मणकुलानि युवां त्वामित्यमादेशे कृते शिशीलुको न भवन्ति



Indira Gandhi National Centre for the Arts

पुनः प्रसङ्ग इत्युच्यते । विप्रतिषेधश्च द्वयोः सावकाशयोः । इह पुनरनवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते । यदि तर्ह्यनवकाशा विधयो बाधका भवन्ति । बभूव । भूभावो द्विर्वचनं बाधेत । सावकाशो भूरादेशः । कोवकाशः । भविता । भवितुम् । इह तर्हि चक्षिङः ख्याञ् वा लिटीति ख्याञ् द्विर्वचनं बाधेत । इह चापि बभूवेति । यदि तावत्स्थाने द्विर्वचनम् । भूभावः सर्वादेशः प्राप्नोति । अथ द्विःप्रयोगो द्विर्वचनम् । परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोति । नैष दोषः। आर्धधातुकीयाः सामान्येन भवन्ति । अनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये भूभावे कृते यो यतः प्राप्नोति स ततो भविष्यति ॥

ऋतश्च संयोगादेर्गुणः ॥ १० ॥ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् * । संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यम् । किमर्थम् । कृञ-

---

एवं दिग्यादेशे कृते द्विर्वचनाभावः । इदानीं न्याय्यं परिहारमाह अथ वेति । क्वचित्पाठो नैष युक्तः परिहारो विप्रतिषेधे पुनः प्रसङ्ग इति । योयं मदुक्तार्थस्य दिग्यादेशो द्विर्वचनं बाधिष्यत इत्यस्य त्वया परिहारोऽभिहितः पुनः प्रसङ्गविज्ञानाद् द्विर्वचनं प्राप्नोतीति स न युक्त इत्यर्थः । अनवकाशो दिग्यादेश इति । पूर्वं सामान्यविशेषभावमनाश्रित्योभयोः सावकाशत्वमुक्तम् । इदानीं तु सामान्यविशेषाश्रयेण नाप्राप्ते द्विर्वचने आरभ्यमाणस्यापवादत्वमुच्यते । यदि तर्हीति । नन्ववश्यमनवकाशेन बाधकेन भाव्यम् । अन्यथा न कश्चिद् बाधकः स्यात् । एवं तर्ह्यनवकाशाभिमता अनवकाशा इत्यर्थो विवक्षितो नैवायमनवकाशः कृते ऽपि द्विर्वचने प्रवृत्त्यविघातात् । अथ पुनरेवमप्यनवकाशत्वं मन्यसे तदा लक्ष्यदोषप्रसङ्गः।बभूवेति । अस्तेर्भूरिति भूभावः । सावकाश इति । यत्र द्विर्वचनाभावः । इह तर्हीति । आचख्याविरयत्र कृते ऽपि द्विर्वचने ख्याञः प्रवर्तनादनवकाशत्वाभावो यदा तु येन नाप्राप्तिन्यायेनानवकाशत्वमभ्युपगम्यते तदा ख्याञि कृते द्विर्वचनाप्रसङ्गः । सर्वादेश इति। स्थानिवद्भावादस्तिग्रहणेन ग्रहणात्कार्यकृतत्वाच्च पुनर्द्विर्वचनाभावादिष्टरूपासिद्धिः । पूर्वस्य श्रवणमिति । अयं दोषो नोत्सर्गापवादपक्षे उपात्तो भूभावस्यावकाशदर्शनेनोत्सर्गापवादभावनिराकरणात् । द्वयोस्तु सावकाशयोः परत्वाद्द्विर्वचने कृते बभूवेति न सिध्यतीति प्रतिपाद्यते । तत्रार्धधातुकसामान्य इति । द्विर्वचननिमित्तस्य लिटोऽनुपजातत्वादसति विप्रतिषेधे पूर्वं भूभावः पश्चाल्लिटि परतो द्विर्वचनमित्यदोषः । यो यतः प्राप्नोतीति । विषयसप्तमीफलं ज्ञापितं ख्याञ्विधावपि विषयसप्तम्याश्रीयते इति येन नाप्राप्त इत्यस्य न्यायस्यानवतारात् कृते ख्याञि द्विर्वचनं भवत्येव दिग्यादेशे तु लिटीति परसप्तम्याश्रयणाच्चाप्राप्ते द्विर्वचने दिगिरारभ्यमाणस्तद् बाधते ॥ ९ ॥

ऋतश्च ॥ संयोगादेरिति । इहाङ्गाधिकारादङ्गं संयोगाद्याश्रीयते न च स्कृइत्येतदङ्गं संयोगादि भवतीति भावः । उपधाग्रहणं संयोगस्यादेशविशेषोपलक्षणमस्मादस्योपधासंज्ञाविधानात् संयोगस्योपधात्वासम्भवात् । अथ वा संयोगशब्दो

Indira Gandhi National Centre for the Arts

र्थम् । इहापि यथा स्यात् । सश्वस्करतुः सश्वस्करुः । यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन । इहापि सस्वरतुः सस्वरुः । संयोगोपधस्येत्येव सिद्धम् । भवेत्सिद्धं सस्वरतुः सस्वरुरिति । इदं तु न सिध्यति सश्वस्करतुः सश्वस्करुरिति । किङ्कारणम् । सुटो बहिरङ्गलक्षणत्वात् । बहिरङ्गः सुडन्तरङ्गो गुणः । असिद्धं बहिरङ्गमन्तरङ्गे । संयोगादिग्रहणे संयोगोपधग्रहणमनन्यार्थं विज्ञायते । ऋतो लिटि गुणाद् ञ्णिद्वृद्धिर्विप्रतिषेधेन * । ऋतो लिटि गुणाद् ञ्णितीति वृद्धिर्भवति पूर्वविप्रतिषेधेन । ऋतो लिटि गुणस्यावकाशः, सस्वरतुः सस्वरुः । ञ्णिति वृद्धेरवकाशः, स्वारकः ध्वारकः । इहोभयं प्राप्नोति सस्वार दध्वार । ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन । पुनः प्रसङ्गविज्ञानाद्वा सिद्धम् *। अथ वा पुनः प्रसङ्गात् गुणे कृते रपरत्वे चात उपधाया इति वृद्धिर्भविष्यति । नैष युक्तः परिहारः । पुनः प्रसङ्गो नाम स भवति यत्र तेनैव कृते प्राप्नोति तेनैव चाकृते । अत्र खलु गुणे कृते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोति । अकृते चाचोञ्णितीति तस्मात्सुष्ठूच्यते ऋतो लिटि गुणाद् ञ्णिद्वृद्धिः पूर्वविप्रतिषेधेनेति ॥

शॄदॄप्रां ह्रस्वो वा ॥ १२ ॥ किमर्थं ह्रस्वो वेत्युच्यते । न गुणो वेत्युच्येत । तत्रायमप्यर्थः । गुणग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । क्व प्रकृतम् । ऋतश्च संयोगादेर्गुण इति । ऋतो ह्रस्वत्वमित्यप्रतिषेधार्थम् * । ऋतो

---

वर्तते तस्योपधात्वमस्त्येव बहिरङ्गः सुडिति । पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि न चासिद्धस्य विशेषणेन सम्बन्धो भवति सुट् कात्पूर्व इत्यत्र तूक्तं पूर्वं धातुरुपसर्गेण युज्यते इत्येवं च सुटोऽन्तरङ्गत्वात्सिद्धो गुण इति नार्थ उपसंख्यानेन संस्कृषीष्ट संस्क्रियत इत्यत्र त्विट्गुणयोः प्रतिविधेयम् । अनन्यार्थमिति । कृञर्थमेवेत्यर्थः । तत्र वचनादसिद्धत्वं बाध्यते । यथान्यत्रोक्तमाश्रयात्सिद्धत्वं यथारोरुत्व इति । पुनः प्रसङ्गविज्ञानाद्वेति । अस्तु परविप्रतिषेधेन गुणस्तस्मिन् कृते वृद्धिर्भविष्यति । अर्थाश्रित्य लक्षणभेदं च वृद्धिमात्रमेकत्वेनाश्रित्यैतदुक्तम् । पुनः प्रसङ्गो नामेति । वाचोयुक्तिरेवेयं न सङ्गच्छते लक्षणद्वयस्य परस्परप्रतिषेधादप्रवृत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमित्यनेन परस्मिन् कार्ये विहिते निमित्तसम्भवात् पूर्वस्य लक्षणस्य पुनः प्राप्तिः पुनः प्रसङ्ग उच्यते न त्वपूर्वलक्षणप्राप्तिः पुनः प्रसङ्गः । तस्मादिति । ननु यदि नाम पुनः प्रसङ्गवाचोयुक्तिर्न घटते किमेतावता गुणरपरत्वयोः कृतयोरुपधावृद्धिर्न हि न प्राप्नोति सत्यां च प्राप्तौ किं पूर्वविप्रतिषेधाश्रयणेनेत्यत्र चिन्त्यमेतत् ॥ ११ ॥

शॄदॄ ॥ न गुणो वेत्युच्येतेति । गुण एव पूर्वसूत्रेण नित्यं प्राप्तो विकल्पनीयस्तत्र गुणपक्षे विशशरतुरित्यादि भविष्यति । तदभावपक्षे तु यणादेशेन विशश्रतु-

Indira Gandhi National Centre for the Arts

ह्रस्वत्वमुच्यते । इत्वप्रतिषेधार्थ;मित्वं मा भूदिति । गुणो वेतीयत्युच्यमाने गुणेन मुक्ते इत्वं प्रसज्येत । ह्रस्वो वेति पुनरुच्यमाने ह्रस्वत्वेन मुक्ते यथाप्राप्तो गुणो भविष्याति ॥

के ऽणः ॥ १३ ॥ के ऽणो ह्रस्वत्वे तद्धितग्रहणं क्ङिद्यर्थम् * । के ऽणो ह्रस्वत्वे तद्धितग्रहणं कर्तव्यम् । किम्प्रयोजनम् । क्ङिद्यर्थम् । क्ङति मा भूद् राका धाका इति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि ॥

उपसर्गादृध्रस्व ऊहतेः ॥ २३ ॥ इह कस्मान्न भवति प्रोह्यते उपोह्यते । एकादेशे कृते व्यपवर्गाभावात् । एवमपि आऊह्यते ओह्यते इत्यत्र प्राप्नोति । अण इति वर्तते ॥

एतेर्लिङि ॥ ३४ ॥ एतेर्लिङ्युपसर्गात् * । एतेर्लिङ्युपसर्गादिति वक्तव्यम् । इह मा भूत् । ईयात् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उपसर्गादिति वर्तते । एवं तर्ह्याचार्योन्वाचष्टे उपसर्गादित्यनुवर्तत इति । नैतदन्वाख्येय-

---

इत्यादीति भावः । तत्रायमपीति । न केवलं गुणविधानप्रकरणमनुसृतं भवति । यावल्लाघवमपीत्यर्थः । इत्वं प्रसज्येतेति । वार्णादाङ्गं बलीय इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वेत्वं स्याद्ध्रस्वविधाने तु यणादेशः सिध्यति । विशशृवान्, विददृवान्, विपपृवानिति क्वसौ च सिध्यति गुणविकल्पे त्वेतद्रूपासिद्धिः । क्वसोः कित्त्वेन प्राप्तिषेधविषयस्यापि गुणस्य प्रतिषेधः प्रदेशान्तरे भाष्यकृता प्रदर्शितः । उत्तरार्थं च ह्रस्वग्रहणं कर्तव्यमिति लाघवमपि नास्ति ह्रस्वविधावपि उत्तरत्र ह्रस्वविधानादेकप्रकरणता भवतीति नास्ति पूर्वोक्तो विशेषः ॥ १२ ॥

उपसर्गा । प्रोह्यत इति । अकृते एकादेशे ह्रस्वभावाभावयोर्विशेषाभावादन्तरङ्गत्वाच्च प्रागेकादेशेन भाव्यम् । वार्णादाङ्गमित्येतत्तु समानाश्रयाङ्गवार्णविषयं तस्मादेकादेशे कृतेऽन्तादिवद्भावेन ह्रस्वप्रसङ्गश्चोद्यते । एकादेशे कृत इति । उपसर्गात्परस्योहते ह्रस्वो विधीयमान एकादेशे कृते भेदाभावाद्भेदनिबन्धनपौर्वापर्यानुपपत्त्योभयत आश्रये अन्तादिवद्भावाभावाच्च ह्रस्वत्वाभावः । आ ऊह्यत इति । धातूपसर्गयोरसंहिता नास्ति । तदुक्तम् । संहितैकपदे नित्या नित्या धातूपसर्गयोरिति । एवञ्च लौकिके प्रयोगे विग्रहाभावान्नित्यमेकादेशेन भाव्यम् । एतञ्च आ उह्यत इति ये ह्रस्वं पठन्ति ते न सम्यग्न्यायविदः लौकिकप्रयोगसम्पादनाय हि ह्रस्वो विधीयते । तस्मादलौकिकेन प्रक्रियावाक्येनाकृतह्रस्वेनाङा प्रश्लेषप्रदर्शनमात्रं क्रियते । अथ त्वलौकिके प्रक्रियावाक्ये ह्रस्वप्रतिपत्तिरुच्यते । तथापि न काचित्क्षतिस्तत्रैकादेशस्यादिवद्भावादुहिग्रहणेन ग्रहणात्सम: परस्य ह्रस्वत्वप्रसङ्गः । अण् इति वर्ततइति । एवञ्च रूपाश्रयोयं विधिरिति तादूप्यानतिदेशादण्त्वाभावादृध्रस्वाभावः ॥ २३ ॥

एतेः ॥ ईयादिति । आशिषि लिङ् । अकृत्सार्वधातुकयोर्दीर्घः । नैतदन्वाख्येय-

Indira Gandhi National Centre for the Arts

मधिकारा अनुवर्तन्त इति । एष एव न्यायो यदुताधिकारा अनुवर्तेरन् ॥

रीङृतः ॥ ३७ ॥ दीर्घोच्चारणं किमर्थम् । न रिङृत इत्येवोच्येत । का रूपसिद्धिः । मात्रीयति पित्रीयति । अकृत्सार्वधातुकयोरिति दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति ॥

यङि च ॥ ३० ॥ यङ्प्रकरणे हन्तेर्हिंसायामीट् * । यङ्प्रकरणे हन्तेर्हिंसायामीड्वक्तव्यः । जेघ्नीयते । यदीट् अभ्यासरूपं न सिध्यति । एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायामीक् । एवमप्युपधालोपो न प्राप्नोति । एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घ्नी ॥

न च्छन्दस्यपुत्रस्य ॥ ३५ ॥ अत्यल्पमिदमुच्यते अपुत्रस्येति । अपुत्रादीनामिति वक्तव्यम् । इहापि यथा स्यात् । जनीयन्तोन्वग्रवः । पुत्रीयन्तः सुदानवः । छन्दसि प्रतिषेधे दीर्घत्वस्य प्रतिषेधो वक्तव्यः * । संस्वेदयुः मित्रयुः । न वाश्वाघस्याद्वचनमवधारणार्थम् * । न वा वक्तव्यम् । किङ्कारणम् । अश्वाघस्याद्वचनमवधारणार्थं भविष्यति।अश्वाघयोरेव छन्दसि दीर्घो भवति नान्यस्येति॥

———— —

मिति वार्तिककारेणैतदन्वाख्येयं सर्वाधिकाराणामन्वाख्यानप्रसङ्गाद् वृत्तिकारास्त्वधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्षते ॥ १३ ॥

रीङृतः ॥ दीर्घत्वं भविष्यतीति । ननु नाप्राप्ते दीर्घे रीङारभ्यमाणस्तस्य बाधकः स्यात् । नैतदस्ति । ऋवर्णस्य बाध्यतां रीङस्तु कथं बाध्यते न हि तस्य दीर्घे प्राप्ते स आरभ्यते ततश्च द्रव्ये पदार्थे रिङि कृते दीर्घः प्रवर्तत एव ॥ ३९ ॥

यङि च ॥ यङ्प्रकरणइति । हिंसायास्त्वन्यत्र जङ्घन्यत इत्येव भवति । अभ्यासरूपं न सिध्यतीति । उपधालोपस्य स्थानिवत्त्वाद्धनिति द्विर्वचनं प्राप्नोति । एवं तर्हीति । ईको धातुभक्तत्वाद् द्विर्वचननिमित्तत्वाभावात् स्थानिवत्त्वाभावात् । एवमपीति । अजादौ प्रत्यये विधानात् । एवं तर्हीति । प्रक्रियालाघवाय घकाराद्यादेशविधानाद् घ्नीभावविधावभ्यासाच्चेति कुत्वे गौरवप्रसङ्गात् । व्यक्तिपदार्थाश्रयणे च घ्नीभावे कृते द्विर्वचनं प्रवर्तते । आकृतिपक्षे तु दिग्यादेशेनेव घ्नीभावेन द्विर्वचनबाधप्रसङ्गात् ॥ ३० ॥

न च्छन्द ॥ जनीयन्त इति । जनमिच्छन्तीति क्यच् लटः शत्रादेशः जस् उगिदचामिति नुम् । छन्दसीति । आनन्तर्यादीत्वस्यैव प्रतिषेधः प्राप्नोति ततश्चापवादे ऽपनीते उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रतिषेधो विधेयः । संस्वेदयुरिति। क्याच्छन्दसीत्युप्रत्ययः । न वेति । अश्वाघयोरनेनेत्वे प्रतिषिद्धे ऽकृत्सार्वधातुकयोरित्याकारे सिद्धे पुनराद्वचनं नियमार्थमित्यन्येषामाकारो न भवति ॥ ३५ ॥

Indira Gandhi National Centre for the Arts

शाच्छोरन्यतरस्याम् ॥ ४१ ॥ श्यतेरित्वं व्रते नित्यम् * । श्यतेरित्वं व्रते नित्यमिति वक्तव्यम् । संशितव्रतः । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । देवत्रातो गलो ग्राह इति योगे च सद्विधिः । मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ॥

दो दद् घोः ॥ ४६ ॥ अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि । सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥ किं पुनरयं तकारान्त आहो स्विद्दकारान्त उत धकारान्तः । अथ वा थकारान्तः । कश्चात्र विशेषः । तान्ते दोषो दीर्घत्वं स्यात् ॥ यदि तान्तः । दत्तीति दीर्घत्वं प्राप्नोति । दान्ते दोषो निष्ठानत्वम् । अथ दकारान्तः । रदाभ्यां निष्ठातो न इति नत्वं प्राप्नोति । धान्ते दोषो धत्वप्राप्तिः । अथ धान्तः । झषस्तथोर्धोऽध इति धत्वं प्राप्नोति । थान्ते ऽदोषस्तस्मात्थान्तः । अथ थकारान्तो न दोषो भवति ॥

———

शाच्छो । श्यतेरिति । व्रत इति विषयो निर्दिश्यते न तूत्तरपदं तेन संशितो ब्राह्मणइत्यत्रापि नित्यमित्वं भवति । यद्येवमित्वेन व्रतस्य द्योतितत्वात्संशितव्रतइति व्रतशब्दस्य प्रयोगो न प्राप्नोति । नैष दोषः । अन्यत्रापीत्वविधानात्संशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनायाविरुद्धो व्रतशब्दप्रयोगः । व्रते तु नित्यमित्वं विधीयते । न वक्तव्यमिति । साधारणेन न्यायेन सिद्धत्वादत एव तुल्यधर्मणः शब्दानुपन्यस्यति । देवत्रातइति । नुदविदोन्दत्रेति नत्वं संज्ञायां न भवति । देवग्रहणं संज्ञाविषयोपलक्षणार्थं तेन भवत्रात इत्यादावपि संज्ञात्वान्नत्वाभावः । यदा तु क्रियाशब्दस्त्राणं त्रातइति तदा नत्वविकल्पः । गलइति । अचिविभाषेति लत्वं प्राण्यङ्गे नित्यं भवति विषे तु गर इति लत्वाभावः । क्रियाशब्दे तूभयं भवति गरो गल इति । ग्राहइति । विभाषा ग्रहइति णप्रत्ययो जलचरे नित्यं भवति ज्योतिषि पचाद्यच् ग्रह इति । इति योगइति । लक्षणहेत्वोः क्रियायाइति शतृशानज्विधिर्हन्तीति पलायते वर्षतीति धावतीत्यादावितिप्रयोगे न भवति । मिथइति । एकस्मिन् विषये न विकल्प्यन्ते किन्तु विषयभेदेन । एतच्चाकृतिपक्षे उपपद्यते । तत्र हि सर्वं लक्ष्यमेकाविध्यमापाद्य उभयमुपदिश्यते ततश्चोभयं भवतीत्येतावतैव लक्षणस्य व्यापारः । असंकीर्णत्वं तु प्रयोगवशात्प्रतीयते । गवाक्षइति । वातायने अवङ्स्फोटायनस्येति नित्यमवङ् भवति प्राण्यङ्गे तु गोरक्षिगोक्षीति भवत्यन्यत्र तु विकल्पेन । एतच्चोदाहरणं न व्यवस्थितविभाषाणां परिगणनमन्यासामपि सम्भवात् ॥ ४७ ॥

दोदद्घोः ॥ अवदत्तमिति । आदिकर्मग्रहणं प्रदत्तशब्दस्यैव सम्भवाद्विशेषणमवदत्तादिसिद्ध्यर्थत्वाद्वचनस्यावदत्तादयोपि भवन्ति तथा चाच उपसर्गादित्यस्यावकाशः प्रत्तमवत्तमिति वक्ष्यते । तस्मान्निदत्तमिति चेष्यतइति चशब्देनावत्तादयोपीष्यन्ते इति सूच्यते । किं पुनरिति । यद्यपि दकारः श्रूयते तथापि संहितायां तकारादीनामप्येतस्य रूपस्य सम्भवात्प्रश्नः । तान्ते दोष इति । यदा ददित्येतस्य थस्तकारान्त आदेशस्तत्र दीर्घ इति सूत्रार्थस्तदायं दोषः । यदा तु तकारादौ दा-

अच उपसर्गात्तः ॥ ४७ ॥ अच उपसर्गात्तत्वे आकारग्रहणं * २ कर्तव्यम् । अलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति । न सिध्यति । किं कारणम् । आदेर्हि परस्य । अत्र हि तस्मादित्युत्तरस्यादेः परस्येति दकारस्य प्राप्नोति । नैष दोषः । अवर्णप्रकरणात्सिद्धम् । अस्येति वर्तते । क्व प्रकृतम् । अस्य च्वाविति । यद्यवर्णग्रहणमनुवर्तते दद्भावे दोषो भवति । एवं तर्हीवं वक्ष्यामि दोदद्घोरिति । दीर्घ आकारस्तस्याद्भवति ततः अच उपसर्गात्तः । अस्येत्येव । एवमपि सूत्रभेदः कृतो भवति । नासौ सूत्रभेदः । सूत्रभेदं तमुपाचरन्ति यत्र तदेवान्यत् सूत्रं क्रियते भूयो वा । यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः । अथ वा द्वितकारको निर्देशः क्रियते सोनेकाल्शित्सर्वस्येति सर्वस्य भविष्यति । इहापि तर्हि प्राप्नोति अद्भिरद्भ्य इति । अच इति वर्तते । तच्चावश्यमज्ग्रहणमनुवर्त्यं लवाभ्यामित्येवमर्थम् । अथ वा त्रितकारको निर्देशः कारष्यते इहार्थौ द्वौ उत्तरार्थश्चैकः । द्यतेरित्वादचस्तः * । द्यतेरित्वादचस्त इत्येतद्भवति विप्रतिषेधेन । द्यतेरित्वस्यावकाशः, निर्दितं निर्दितवान् । अचस्त इत्यस्यावकाशः, प्रत्तमवत्तम् । इहोभयं प्राप्नोति । नीत्तम् । वीत्तम् । अचस्त इत्येतद्भवति विप्रतिषेधेन ॥

---

देशे दीर्घस्तदा न दोषः । तस्मात्थान्त इति । सन्निपातपरिभाषाश्रये तु दान्तधान्तयोर्न दोषः ॥ ४६ ॥

अच उ ॥ यद्दीति । दाशब्दाकारस्य दद्भावे दत्तमिति संयोगादि श्रूयते । नासौ सूत्रभेद इति । दोषायेति शेषः । तदेव सूत्रं लघुक्रियमाणं प्रत्युत गुणं सम्पादयति । अथ वेति । लघुकरणेपि यदि न्यासान्तरत्वात् स्पष्ट एव सूत्रभेद इति मतं तदैवमुत्तरम् । अलोन्त्यस्य द्वावपवादौ आदेः परस्यानेकाल्शित्सर्वस्येति तयोर्विप्रतिषेधे परं प्रवर्तते । अच इति वर्तत इति । तेनाप्शब्दस्य यो ऽच् तस्मात्परस्य पकारस्य द्वितकार आदेशस्तत्रान्त्यस्य झलां जशोन्त इति जश्त्वं पूर्वस्य झलां जश् झशीति । लवाभ्यामिति । लूञ्ञ्रुदोराबित्यप् । अस्यापि भकारादौ तः प्राप्नोति अज्ग्रहणानुवृत्तौत्वप्शब्दस्य योच् तस्मात्परो भकारादौ न कश्चिदस्तीति तत्वाभावः । अथ वेति । तत्र तकारद्वयात्मक आदेशः पृथग्विभक्तिक इहार्थो यस्तु साचकस्तकारः तस्याचः स्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः । लवाभ्यामित्यादौ तु तत्वं न भवति पकारलोपादप्शब्दाभावात् । न च भूतपूर्वगत्याश्रयो न्याय्यः । अद्भिरित्यादौ साम्प्रतिकाप्शब्दसम्भवे गौणस्याग्रहणादत एव समकक्षत्वाभावात्प्रत्ययाप्रत्यययोः प्रत्यये सम्प्रत्यय इति नावतिष्ठति । अद्भिः संस्कृतमिति लिङ्गाद्वा । नहि प्रत्ययस्यैव ग्रहणे ऽद्भिरिति निर्देशोपपत्तिः । द्यतेरित्वादिति । पुरस्तादपवादा इति न्यायाद् इत्वं दद्भावस्यैव बाधकं न तत्वस्य । ततश्चेत्वतत्वयोर्दद्भावापवादयोर्विप्रतिषेधे परं तत्वं प्रवर्तते ॥ ३७ ॥

Indira Gandhi National Centre for the Arts

अपोभि ॥ ४८ ॥ अपोभि मासश्छन्दसि * । अपोभीत्यत्र मासश्छन्दस्युपसंख्यानं कर्तव्यम् । माद्भिरिष्ट्वा इन्द्रो वृत्रहा । अल्पमिदमुच्यते । स्ववसस्स्वतवसोर्मासउषसश्च त इष्यते । स्ववद्भिः स्वतवद्भिः समुषद्भिरजायथाः । माद्भिरिष्टा इन्द्रो वृत्रहा ॥

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ५४ ॥ इस्त्वं सनि राधो हिंसायाम् * । इस्त्वं सनि राधो हिंसायामिति वक्तव्यम् । प्रतिरित्सति । हिंसायामिति किमर्थम् । आरिरात्सति ॥

आप्ज्ञप्यृधामीत् ॥ ५५ ॥ ज्ञपेरीत्वमनन्त्यस्य * । ज्ञपेरीत्वमनन्तस्येति वक्तव्यम् । ज्ञीप्सति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । लोपो ऽन्त्यस्य बाधको भविष्यति । अनवकाशा हि विधयो बाधका भवन्ति सावकाशश्च णिलोपः । कोऽवकाशः । कारणा हारणा । एवमपीत्वमन्त्यस्य लोपस्य बाधकं स्यात् । अनवकाशा हि विधयो बाधका भवन्ति । ईत्वमपि सावकाशम् । कोवकाशः । अनन्त्यः । कथं पुनः सत्यन्त्ये ऽनन्त्यस्येत्वं स्यात् । भवेद्यो ऽचाङ्गं विशेषयेत्तस्यानन्त्यस्य न स्याद् वयं तु खल्वङ्गेनाचं विशेषयिष्यामः । अङ्गस्याचो यत्र तत्रस्थस्येति । एवमप्युभयोः सावकाशयोः परत्वादीत्वं प्राप्नोति । तस्मादनन्त्यस्येति वक्तव्यम् ॥

अत्रलोपोभ्यासस्य ॥ ५८ ॥ अभ्यासस्यानचि * । अभ्यासस्येति यदुच्यते तदनचि द्रष्टव्यम् । पतापतः । चराचरः । चलाचलः । वदावदः ॥

---

अपो ॥ माद्भिरिति । पद्दन्नो मासिति मासशब्दस्य मासादेशस्य छन्दस्येव विधानान्मासश्छन्दसीति छन्दोग्रहणं न कर्तव्यं तत्क्रियमाणं भाषायामपि क्वचित्पदादयः प्रयुज्यन्तइति ज्ञापनायेत्याहुः ॥ ४८ ॥

आप्ज्ञ ॥ ज्ञपेरिति ॥ इहाज्ग्रहणमनुवर्तते तेन ज्ञपौ विशेष्यमाणे ऽजन्तस्य ज्ञपेरित्वं विधीयमानमलोन्त्यस्येत्यस्य प्राप्नोतीति भावः । लोपोस्त्यस्येति । ज्ञपिनाज्विशेष्यते यथाप्यृधिभ्यामेव चैकप्रस्थानां विशेषणविशेष्यभावो भवति तत्रानन्त्यस्याचः सावकाशमीत्वं पूर्वविप्रतिषेधेन णिलोपो बाधते । इतरस्त्वगृहीताभिप्राय आह अनवकाशा इति । ईत्वमेव त्वनवकाशत्वाद् बाधकं प्राप्नोति । एवमपीति नन्वस्तु परत्वादीत्वं तस्य स्थानिवद्भावाण्णिलोपो भविष्यति ईत्ववचनं त्वनन्त्यस्य श्रवणार्थं स्यात् । नैतदस्ति।अकृद्गतौ विप्रतिषेधे यद्बाधितमिति लोपाप्रसङ्गात् ५५

अत्र लोपो ॥ चराचर इति । चरिचलिपतिवदीनामच्याक् चाभ्यासस्येति द्विर्वचनमगागमश्चेति हलादिशेषो ऽत्र न भवति । नन्वागागमविधानसामर्थ्याद्धलादिः शेषो न भविष्यति । नहि हलादिःशेषे आगमस्यादेशस्य वा विशेषो ऽस्तीत्यादेश एव आकारो विधेयः स्यात् । नैतदस्ति । सत्यपि हलादिःशेषे विगृहीतश्रवणार्थमाग्विधानं स्यादित्यनचीत्युच्यते ॥ ५८ ॥

Indira Gandhi National Centre for the Arts

हलादिः शेषः ॥ ६० ॥ किमयं षष्ठीसमासः । हलामादिर्हलादिः हलादिः शिष्यतइति आहोस्वित्कर्मधारयः हल् आदिर्हलादिः हलादिः शिष्यत इति । कश्चात्र विशेषः । हलादिः शेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः*। हलादिः शेषे षष्ठीसमास इति चेदजादिषु शेषः प्राप्नोति । आनक्ष आनक्षतुरानक्षुः । अस्तु तर्हि कर्मधारयः । कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनम् * । कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे आद्यस्य हलो भावे लोपो वक्तव्यः । आटतुः आटुः । तस्मादनादिलोपः । तस्मादनादिर्हल्लुप्यतइति वक्तव्यम् । उक्तं वा * । किमुक्तम् । प्रतिविधास्यते हलादिःशेष इति । अयमिदानीं स प्रतिविधानकालः । इदं प्रतिविधीयते इदं प्रकृतम् । अत्र लोपोभ्यासस्येति । ततो वक्ष्यामि । ह्रस्वः । ह्रस्वो भवत्यादेशः । अभ्यासस्य लोप इत्यनुवर्तते । तत्र ह्रस्वभाविनां ह्रस्वः । लोपभाविनां लोपो भविष्यति । ततो हलादिःशेषश्चेति । अथ वैवं वक्ष्यामि ह्रस्वोऽहल् । ह्रस्वो भवत्यभ्यासस्येति । ततोऽहल् अहल् च भवत्यभ्यासः । तत आदिशेषः । आदिशेषश्च भवत्यभ्यासस्येति । अथ वा योगविभागः करिष्यते । ह्रस्वादेशो भवत्यभ्यासस्य । ततः हल् । हल् च लुप्यते ऽभ्यासस्य । तत आदिशेषः । आदिशेषश्च भवत्यभ्यासस्य ॥

---

हलादिःशेषः ॥ हलामादिरिति । विग्रहप्रदर्शनं विस्पष्टप्रतिपत्त्यर्थम् । अजादिष्विति । अजादिष्वभ्यासेषु हलन्तरापेक्षयादित्वे हल आश्रीयमाणे दोषः प्राप्नोति। आनक्षेति । अक्षूव्याप्तौ सङ्घाते चेत्यस्माल्लिट् अत्र ककारस्य शेषः प्राप्नोति । कर्मधारयेत्वभ्यासापेक्षमादित्वं हलो विज्ञायत इति शेषो न भवति । आदिशेषनिमित्तत्वादिति । शेषशब्दोऽन्यनिवृत्तियुक्तमवस्थानमाहेति यत्रैवाभ्यासे पपाचेत्यादावादेर्हलोवस्थानं तत्रैवान्यस्य निवृत्तिः स्यान्नान्यत्र । अवस्थानं हि शब्दार्थत्वात्प्रधानम् । न च प्रधानाभावे आनुषङ्गिककार्यप्रवृत्तिरानक्षेत्यत्रापि ककारवकारयोरस्यामवस्थायां निवृत्त्यप्रसङ्गः । षष्ठीसमासेऽप्याटतुः आटुरित्यत्र टकारस्यादिवद्भावे शेषप्रसङ्गस्य च प्रागुक्त एव । तत्र यद्याकृतिपक्ष आश्रीयते तदाभ्यासाकृतौ वर्तमानो हलादिः सर्वस्यामभ्यासव्यक्तावनादेर्निवृत्तिं करोतीति दोषाभावो व्यक्तिपक्षे तु यस्यामेवाभ्यासव्यक्तौ हलआदेरवस्थानं तत्रैवानादेर्निवृत्तिर्नान्यत्रेति दोषप्रसङ्गः। ह्रस्वभाविनामिति । ह्रस्वश्रुत्याच्परिभाषोपस्थानादजन्तस्याभ्यासस्य ह्रस्वो विधीयमानो ऽलोऽन्त्यस्येति वचनादच एव दीर्घस्य ह्रस्वस्य च लोपबाधनार्थं विज्ञायते इति हल्विषय एवादिशेषनिरपेक्षो लोपोवतिष्ठते । तत आदेरपि हलो लोपे प्राप्ते तद्बाधनार्थं हलादिः शेषइति सूत्रम् । एतदेव ज्ञापकं लोपविधावलोन्त्यपरिभाषा नोपतिष्ठत इत्यानक्षेत्यादावनन्त्यस्यापि हलो लोपो भवतीति न कश्चिद्दोषः । अहल् चेति । अविद्यमानहल्को ऽभ्यासो भवतीत्यर्थः ॥ ६० ॥



Indira Gandhi National Centre for the Arts

शर्पूर्वाः खयः ॥ ६१ ॥ शर्पूर्वशेषे खर्पूर्वग्रहणम् * । शर्पूर्वशेषे खर्पूर्वग्रहणं कर्तव्यम् । खर्पूर्वाः खयः शिष्यन्ते । खरो लुप्यन्तइति वक्तव्यम् । किम्प्रयोजनम् । उचिच्छिषति । तुकः श्रवणं मा भूदिति । तर्हि वक्तव्यम् । न वक्तव्यम् । चर्त्वे कृते तुग्न भविष्यति । असिद्धं चर्त्वं तस्यासिद्धत्वात्तुक् प्राप्नोति । सिद्धकाण्डे पठितमभ्यासजश्त्वचर्त्वमेत्वतुकोरिति । एवमप्यन्तरङ्गत्वात्प्राप्नोति तस्मात्खपूर्वग्रहणं कर्तव्यम् । न कर्तव्यम् । एत्वतुग्ग्रहणं न करिष्यते । अभ्यासजश्त्वचर्त्वं सिद्धमित्येव । आदिशेषप्रसङ्गस्तु * । आदिशेषस्तु प्राप्नोति । तिष्ठासति । ननु चानादिशेष आदिशेषं बाधिष्यते । कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि सम्भवे बाधनं भवतीति । अस्ति च सम्भवो यदुभयं स्यादिति । यद्यादिशेषोऽपि भवति शर्पूर्ववचनमिदानीं किमर्थं स्यात् । शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपप्रतिषेधार्थम् * । शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपो मा भूदिति । व्यपकर्षविज्ञानात्सिद्धम् * । व्यपकर्षविज्ञानात्सिद्धमेतत् । किमिदं व्यपकर्षविज्ञानादिति । अपवादविज्ञानात् । अपवादत्वादनादिशेष आदिशेषं बाधिष्यते । ननु चोक्तं कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति । इदं तावदयं प्रष्टव्यः । यदि तन्नोच्येत किमिह स्यात् । हलादिशेषः । हलादिशेषश्चेन्नाप्राप्ते हलादिशेष इदमुच्यते तद्बाधकं भविष्यति । यदप्युच्यते असति खल्वपि सम्भवे बाधनं भवति । अस्ति च सम्भवो यदुभयं

---

शर्प ॥ उचिच्छिषतीति । उच्छी विवासे छेत्यन्तरङ्गत्वात्तुक् सन् इट् पूर्वत्रासिद्धमिति चुत्वस्यासिद्धत्वात् छिशब्दो द्विरुच्यते तकारस्य शेषे प्राप्ते छशेषार्थं वार्तिकम् । ननु च पूर्वत्रासिद्धीयमद्विर्वचन इति चुत्वे कृते छिशब्दस्य द्विर्वचने चकारशेषेणैव रूपं सिध्यति । न चेदमस्ति निमित्ताभावे नैमित्तिकस्याप्यभाव इति येन चुत्वं निवर्तते । एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदनित्यमुभौ साभ्यासस्येति वचनात् । अन्यथा कृतणत्वस्य द्विर्वचने प्राणिणदित्यादि सिध्यतीति किं सूत्रेण तथा चौजढदित्यसिद्धत्वस्योदाहरणं प्रदर्शयिष्यते । इतरो व्यवस्थितस्य समुदायस्य प्रविभज्यान्वाख्याने ऽन्तरङ्गत्वं तुकोऽनपेक्ष्याकृत एव तुकि द्विर्वचनं मत्वाह चर्त्वे कृत इति । अभ्यासे चर्चेति चर्त्वे छस्य कृते तुगभावाद्रूपं सिध्यति । असिद्धमिति । तुकि कर्तव्ये । एवमप्यन्तरङ्गत्वादिति । शब्दनित्यत्वे ऽप्युपायानामवश्याश्रयणीयो ऽन्तरङ्गबहिरङ्गभावः । एत्वतुग्ग्रहणमिति । तदकरणे हलादिशेषे ऽपि कर्तव्ये चुत्वलक्षणस्य चर्त्वस्यासिद्धत्वाभावात्तकारस्य चकारे कृते हलादिशेषेण निवर्तिते छकारे रूपं सिध्यति । आदिशेषप्रसङ्गस्त्विति । विषयभेदाद्विरोधाभावाच्च बाध्यबाधकभावायोगः । शर्पूर्ववचनमिति । अपवादाः वाक्यार्थद्वयं साधयन्त्यपवादं च विदधत्युत्सर्गं च निवर्तयन्ति । तत्रोत्सर्गाभ्युपगम एकार्थवत् द्वितीया

स्यादिति । सत्यपि सम्भवे बाधनं भवति । तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं बाधकं भवति । एवमिहापि सत्यपि सम्भवे अनादिशेष आदिशेषं बाधिष्यते ॥

दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रदत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च ॥ ६५ ॥ दाधर्तीति किन्निपात्यते । धारयतेः श्लौ अभ्यासस्य दीर्घत्वं णिलुक् च । अनिपात्यम् । तूतुजानवदभ्यासदीर्घत्वं पर्णशुषिवण्णिलुक् च भविष्यति । धृङो वा श्लौ अभ्यासस्य दीर्घत्वं परस्मैपदं च । अनिपात्यम् । तूतुजानवदभ्यासदीर्घत्वं युध्यतिवत्परस्मैपदञ्च भविष्यति । दर्धर्तीति किं निपात्यते । धारयतेः श्लौ अभ्यासस्य च रुक् परस्मैपदं च । अनिपात्यम् । देवा अदुह्रवद्रुट् युध्यतिवत् परस्मैपदं च भविष्यति । दर्धर्षीति किं निपात्यते । धारयतेः श्लौ अभ्यासस्य रुक णिलुक् च । अनिपात्यम् । देवा अदुह्रवद्रुट् पर्णशुषिवण्णिलुक् च भविष्यति । धृङो वा अभ्यासरुक् परस्मैपदं च । अनिपात्यम् । देवा अदुह्रवद्रुट् युध्यतिवत्परस्मैपदं च भविष्यति । बोभूत्विति किं निपात्यते । भवतेर्यङ्लुगन्तस्यागुणत्वं निपात्यते । नैतदस्ति प्रयोजनम् । सिद्धमत्रागुणत्वं भूसुवोस्तिङीति । एवं तर्हि नियमार्थं भविष्यति । अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्र । क मा भूत् बोभवतीति । तेतिक्ते इति किं निपात्यते । तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते । नैतदस्ति प्रयोजनम् । सिद्धमत्रात्मनेपदमनुदात्तङित आत्मनेपदमिति । नियमार्थं भविष्यति । अत्रैव

---

र्थस्य त्यागादानर्थक्यप्रसङ्ग एवेत्यर्थः । हलादिः शेष इत्यनेन खयां निवृत्तौ प्राप्तायामवस्थानविधानादानर्थक्यं नास्ति । ऽपकर्षविज्ञानादिति । ऽपकर्षणमुत्सर्गस्य निवर्तनं तस्य विज्ञानं तस्मादपवादविधानादित्यर्थः । एकाभ्यासविषयत्वादविरोधेऽप्युत्सर्गापवादभावः ॥ ६१ ॥

दाधर्ति ॥ श्लाविति । बहुलं छन्दसीति शपः श्लुः । तूतुजानवदिति । तुजादीनां दीर्घोऽभ्यासस्येति दीर्घत्वमित्यर्थः । पर्णशुषिवदिति । यथा पर्णानि शोषयन्ति पर्णशुषो वाता इत्यादौ क्विपि बहुलमन्यत्रापि संज्ञाछन्दसोरिति णिलुक् भवत्येवं दाधर्तीत्यादि भविष्यतीत्यर्थः । धृङ इति । धृङवस्थान इत्यस्य शे प्राप्ते व्यत्ययेन शप् । युध्यतिवदिति । व्यत्ययो बहुलमित्यनेनेत्यर्थः । रुडिति । शीङो रुट् । बहुलं छन्दसीत्यनेन । बोभवीतीति । लिङर्थे लेट् लेटोडाटावित्यट् । सिद्धमत्रेति । प्रत्ययलक्षणेन यद्यप्यनुदात्तङित इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथापि लोलूयत इत्यादौ यद्यङन्तादात्मनेपदं तत्प्रत्ययस्य ङित्त्वात्प्रत्ययलक्षणं भवत्येव । एतन्नियमार्थमिति । एवं चादादिषु चर्करीतं परस्मैपदमिति लिङ्गसिद्धानु-

Indira Gandhi National Centre for the Arts

यङ्लुगन्तस्यात्मनेपदं भवति नान्यत्रेति । क्व मा भूत् बेभिदीति चेच्छिदीति ॥

स्वपिस्यमिव्येञां यङि ॥ ६७ ॥ किमर्थं स्वपेरभ्यासस्य सम्प्रसारणमुच्यते । यदा सर्वेष्वभ्यासस्थानेषु स्वपेः सम्प्रसारणमुक्तम् । स्वापिग्रहणं व्यपेतार्थम् * । स्वापिग्रहणं क्रियते व्यपेतार्थम् । व्यपेतार्थोऽयमारम्भः । सुष्वापयिषतीति । अस्ति प्रयोजनमेतत् । किं तर्हीति । तत्र कृदन्तेऽतिप्रसङ्गः । तत्र कृदन्ते अतिप्रसङ्गो भवति । इहापि प्राप्नोति स्वापकमिच्छति स्वापकीयति । स्वापकीयतेः सन् सिष्वापकीयिषतीति । सिद्धं तु णिग्रहणात् * । सिद्धमेतत् । कथम् । णिग्रहणं कर्तव्यम् । न कर्तव्यम् । निर्देशादेव हि व्यक्तं ण्यन्तस्य ग्रहणमिति । नात्र निर्देशः प्रमाणं शक्यं कर्तुम् । यथा हि निर्देशस्तथेहापि प्रसज्येत । स्वापं करोति स्वापयति स्वापयतेः सन् सिष्वापयिषतीति । तस्माण्णिग्रहणं कर्तव्यम् ॥

निजां त्रयाणां गुणः श्लौ ॥ ७५ ॥ त्रिग्रहणानर्थक्यं गणान्तत्वात् * । त्रिग्रहणमनर्थकम् । किङ्कारणम् । गणान्तत्वात् । त्रय एव निजादयः । उत्तरार्थं तु * । उत्तरार्थं तर्हि त्रिग्रहणं कर्तव्यम् । भृञामित् । इह मा भूत् जहाति ॥

———————

वादः परस्मैपदग्रहणे कर्तर्येव चेदमात्मनेपदं नियम्यत इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव ॥ ६५ ॥

स्वपि ॥ किमर्थमिति । स्वपिरेव सौत्रत्वान्निर्देशस्य दीर्घं कृत्वा निर्दिष्ट इति पूर्वः पक्षः । तत्र च लिटि किति वचिस्वपीति संप्रसारणविधानात् कृतसंप्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारणं श्रूयते आकीति लिट्यभ्यासस्येति संप्रसारणं सनो रुदविदेति कित्त्वविधानाद्वचिस्वपीति संप्रसारणं स्वापिस्यमिव्येञां यङीति यङि चङि स्वापेश्चङीति व्यपेतार्थमिति । स्वपः सनादिषु परतो विहितं संप्रसारणं णिचा व्यवधाने न प्राप्नोति स्वापेर्ण्यन्तस्याभ्यासस्य संप्रसारणं विधीयते । सुष्वापयिषतीति । स्वापयितुमिच्छतीति सन् । इड्गुणायादेशाः । णौ कृतस्य स्थानिवत्त्वात् स्वापेर्द्विर्वचनमभ्याससंप्रसारणं स्तौतिण्योरिति षत्वम् । इतरस्तु ण्यन्तस्य ग्रहणमबुद्ध्वा येन केन चित्प्रत्ययेन व्यवहितस्य स्वपेरभ्याससंप्रसारणमनेनोक्तमिति मत्वाह अस्ति प्रयोजनमिति । स्वापितीति । स्वापकस्तामिच्छतीति क्यच् । निर्देशादेवेति । ण्यन्त एव स्वपिः सूत्रे निर्दिष्ट इत्यर्थः । स्वापं करोतीति । स्वपेर्घञन्तात्तत्करोति णिच् । तस्माण्णिग्रहणमिति । स्वपेर्णेरिति वक्तव्यम् । तेन स्वपेर्योणिर्विधीयते तदन्तस्य ग्रहणात् घञन्तात्णेर्ग्रहणाभावः ॥६७॥

निजाम् ॥ त्रिग्रहणमिति । वृत्करणपरिच्छिन्नास्त्रय एव निजादय इत्यर्थः । एकारे विधातव्ये गुणग्रहणमिक्परिभाषोपस्थानार्थं तेन हलादिशेषे कृते गुणो भवत्यन्यथा तदपवादो हलः स्थान एकारः स्यात् । अथाभ्यासविकारेऽपवादा नोत्सर्गान् बाधन्त इत्याश्रीयते तदा विस्पष्टार्थं गुणग्रहणम् ॥ ७५ ॥

Indira Gandhi National Centre for the Arts

अर्तिपिपर्त्योश्च ॥ ७७ ॥ अर्तिग्रहणं किमर्थम्। न बहुलं छन्दसीत्येव सिद्धम्। न ह्यन्तरेण छन्दोर्तेः श्लुर्लभ्यः। एवं तर्हि सिद्धे सति यदार्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामर्तेः श्लुर्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। इयर्तीत्येतत् सिद्धं भवति ॥

गुणो यङ्लुकोः ॥ ८२ ॥ ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वम्। ऐचोर्यङि दीर्घत्वं प्राप्नोति। डोढौक्यते इति। ननु च ह्रस्वत्वे कृते गुणो भविष्यति। दीर्घत्वं न भविष्यति। न सिद्ध्यति। किङ्कारणम्। ह्रस्वाद्धि परं दीर्घत्वम्। ह्रस्वत्वं क्रियतां दीर्घत्वमिति। परत्वाद्दीर्घत्वेन भवितव्यम्। न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् *। न वा एष दोषः। किङ्कारणम्। अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात्। अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इत्येषा परिभाषा कर्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं सन्वद्भावस्य दीर्घत्वम्। अचीकरत् अजीहरत्। सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते। मान्प्रभृतीनामित्वस्य। मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्वन्न बाधते। गणेरीत्वं हलादिशेषस्य। गणेरीत्वमपवादत्वाद्धलादिशेषं न बाधते। इदमयुक्तं वर्तते। किमत्रायुक्तम्। ऐचोर्यङि दीर्घत्वप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वमित्युक्त्वा तत उच्यते न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति। तस्याश्च परिभाषायाः प्रयोजनानि नामोच्यन्ते। प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्प्रभृतीनामित्वस्य गणेरीत्वं हलादिशेषस्येति। न च सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते किं तर्हि परत्वात्। न खल्वपि मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्वं बाधते किं तर्ह्यन्तरङ्गत्वात्। न खल्वपि गणेरीत्वमपवादत्वाद्धलादिशेषं बाधते। किं तर्ह्यनवकाशत्वात्। एवं तर्हीयं परिभाषा कर्तव्या अभ्यासवि-

---

अर्ति ॥ अर्तिग्रहणमिति। ऋ सृ गताविति जुहोत्यादौ पठ्यते गा स्तुतौ च छन्दसीति छन्दोग्रहणं पूर्वेषामपि घृप्रभृतीनां शेष इति। छान्दस एवार्तिः श्लुविषयः। इयर्तीति। तिप् शप् शपः श्लुः द्विर्वचनमुरदित्युत्वमित्वमभ्यासस्यासवर्ण इति इयङ् गुणरपरत्वे ॥ ७७ ॥

गुणो ॥ ऐचोरिति। ह्रस्वस्यावकाशः ययावित्यादि। दीर्घोऽकित इत्यस्यावकाशः कृते ऽकृते वा ह्रस्वत्वे पापच्यत इति। डोढौक्यत इत्यादौ तु परत्वादौकारस्य दीर्घे औकार एव प्राप्नोति। ऐकारस्योदाहरणं पेपैण्यते इति ह्रस्वत्वे कृते इति वक्ष्यमाणोऽभिप्रायः। गुणश्च दीर्घस्यापवाद इति दीर्घाभावः। इदमयुक्तमिति। परत्वाद्दीर्घप्रसङ्गमुक्त्वोत्सर्गापवादयोर्बाध्यबाधकत्वाभावः प्रतिपाद्यत इत्ययुक्तं प्रयोजनमपि किं चित्र वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तम्। न च सन्वद्भावस्यावकाशोऽचिक्षणदिति। इहोभयं प्राप्नोति अचीकरदिति तत्र परत्वाद्दीर्घः प्रा-

Indira Gandhi National Centre for the Arts

कारेषु बाधका न बाधन्तइति । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति । यदयमकित इति प्रतिषेधं शास्ति ॥

दीर्घोऽकितः ॥ ८३ ॥ अकित इति किमर्थम् । यंयम्यते रंरम्यते । अकित इति शक्यमकर्तुम् । कस्मान्न भवति यंयम्यते रंरम्यते इति । नुकि कृतेऽनजन्तत्वाद् । अत उत्तरं पठति । अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम् * । अकिद्वचनं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽन्यत्र किदन्तस्याभ्यासस्यालोन्त्यविधिर्न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । प्रयोजनं ह्रस्वत्वात्वेत्वगुणेषु । ह्रस्वत्वम्, अवचच्छतुः अवचच्छुः । अत्वम्, चच्छृदतुः चच्छृदुः । इत्वम्, चिच्छादयिषति । गुणः, चोच्छिद्यते चोच्छुप्यते । तुकि कृते अनन्त्यत्वादेते विधयो न प्राप्नुवन्ति । विप्रतिषेधात्सिद्धम् । नैतानि सन्ति प्रयोजनानि । विप्रतिषेधेनाप्येतानि सिद्धानि । तुक् क्रियतामेते विधय इति । किमत्र कर्तव्यम् । परत्वादेते विधय इति । तदन्ताग्रहणाद्वा । अथ वा नैवं विज्ञायते अभ्यासस्याजन्तस्य ऋकारान्तस्याकारान्तस्येगन्तस्येति । कथं तर्हि अभ्यासे यो ऽच् अभ्यासे य ऋकारः अभ्यासे यो ऽकारः अभ्यासे य इगिति।

---

प्नोति । न खल्वपीति । सन् प्रत्ययो ऽभ्यासदीर्घमित्वं तु बहिरङ्गं सनि परतोऽङ्गाधिकारान्तस्य विधानात् । न खल्वपीति । आदेः शेषो विधीयते ऽन्त्यस्य त्वीत्वमिति नास्त्युत्सर्गापवादभावो हलादिशेषे अभ्यासस्येत्यवयवषष्ठी । ई च गण इत्यत्राभ्यासस्येति स्थानषष्ठीति भिन्नविषयावीत्वहलादिशेषावनवकाशत्वात्तु बाधकमीत्वं हलादिशेषस्य निरवकाशा हि विधयःसावकाशान् विधीन् बाधन्त इति न्यायाद्यदातु येन नाप्राप्त इति न्यायः तदास्त्येवोत्सर्गापवादभावः । अभ्यासविकारेषु बाधकत्वमनपेक्षितनिमित्तविशेषमाश्रयणीयमित्यर्थः । यदयमिति । यथाचाकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते ॥ ८२ ॥

दीर्घो ॥ नुकि कृत इति । दीर्घश्रुत्वाच्परिभाषोपस्थानादचाभ्यासस्य विशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयते । स चालोऽन्त्यस्येति वचनादन्त्यस्याचो भवति । अकिद्वचनमिति । यद्यचाभ्यासो विशेष्यते अकित इति प्रतिषेधोऽनर्थकः स्यात्तस्मादभ्यासेनाज्विशेष्यते ततोऽभ्यासस्येति विशेषणषष्ठीत्यलोऽन्त्यस्येति नोपतिष्ठत इत्येतज्ज्ञाप्यत इत्यर्थः । अवचच्छतुरिति । छो छेदने आत्वं लिट् छाशब्दस्य द्विर्वचनमन्तरङ्गत्वाल्लुकि कृते ऽनन्त्यस्याप्यचो ह्रस्वत्वम् । चच्छृदतुरिति । उच्छृदिर् दीप्तिदेवनयोः । छृदो द्विर्वचनं छे चेति तुकि कृते उरादित्यत्वमभ्यासेन ऋवर्णस्य विशेषणात् । चिच्छादयिषतीति । छद संवरणे । परत्वादेते विधय इति । नह्येतेषूदाहरणेषु तुगन्तरङ्गः । प्रत्ययविशेषनिमित्तत्वादभ्यासस्याभ्यासाश्रयत्वात्तुक् ह्रस्वादीनाम् । तदन्ताग्रहणाद्वेति । ज्ञापकमन्तरेणापि विशेषणविशेष्यभावे कामचारात्कृते ऽपि तुक्येते विधयः सिध्यन्ति । एवं च कृत्वेति । ततश्चा-

Indira Gandhi National Centre for the Arts

एवञ्च कृत्वा दीर्घत्वं प्राप्नोति । एवं तर्हीदमिह व्यपदेश्यं सद् आचार्यो न व्यपदिशति । किम् । अपवादो नुक् दीर्घत्वस्येति । एवं तर्हि सिद्धे सति यदाकित इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा ऽभ्यासविकारेषु बाधका न बाधन्त इति । किमेतस्य ज्ञापने प्रयोजनम् । ऐचोर्याङि दीर्घप्रसङ्गे ह्रस्वाद्धि परं दीर्घत्वमित्युक्तं स न दोषो भवति ॥

नुगतोनुनासिकान्तस्य ॥ ८५ ॥ नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः * । नुकि सति यंयम्यते रंरम्यते इति रूपं न सिद्ध्यति । अनुस्वारागमवचनात्तु सिद्धम् । अनुस्वारागमो वक्तव्यः । एवमपीदमेव रूपं स्याद् यंयम्यते यँय्यम्यते इदं न स्यात् । पदान्तवच्चेति वक्तव्यम् । वापदान्तस्येति ॥

रीगृदुपधस्य च ॥ ९० ॥ रीगृत्वतः संयोगार्थम् * । रीगृत्वत इति वक्तव्यम् । किम्प्रयोजनम् । संयोगार्थम् । संयोगान्ताः प्रयोजयन्ति । वरीवृश्च्यते परीपृच्छ्यते । बरीभृज्यते ॥

रुग्रिकौ च लुकि ॥ ९१ ॥ मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं * २ कर्तव्यम् । मर्मृज्यते मर्मृज्यमानासः ॥

ऋतश्च ॥ ९२ ॥ किमिदमृकारग्रहणमङ्गविशेषणमृकारान्तस्येति आहोस्विदभ्यासविशेषणमृकारान्तस्याभ्यासस्येति । अङ्गविशेषणमित्याह । कथं ज्ञायते । यदयं तपरकरणं करोति । कथं कृत्वा ज्ञापकम् । नाहि कश्चिदभ्यासे दीर्घोस्ति यदर्थं तपरकरणं क्रियते । अथाङ्गविशेषणे ऋकारग्रहणे सति तपरकरणे

---

कित इति वचनं दीर्घनिषेधाय न तु ज्ञापनाय । अपवादो नुगिति । नाप्राप्ते दीर्घे नुक आरम्भात् । एवं तर्हीति । ओहाक् त्यागइत्यस्य तु निषेधायाकित इति न भवति धातुर्ह्ययं किद् न त्वभ्यासः। ककारो हि हश्च व्रीहिकालयोरित्यत्र हाङ्हाकोः सामान्यग्रहणार्थः ॥ ८३ ॥

नुग ॥ तपरकरणं भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थं तेन बाभाम्यत इति नुक् न भवति । नुकि यंयम्यत इति । अज्झलपरत्वादनुस्वारो न प्राप्नोति । एवमपीति । नित्यं परसवर्णः प्राप्नोति । विकल्पेन चेष्यते । पदान्तवच्चेति । तेन वापदान्तस्येति परसवर्णविकल्पः ॥ ८५ ॥

रुग्रिकौ ॥ मर्मृज्यत इति । रुग्रिकौ च लुकीति रुग्विधीयमानो न प्राप्नोतीति वचनम् ॥ ९१ ॥

ऋतश्च ॥ अङ्गविशेषणमिति । यद्यप्यभ्यासविशेषणं भूतपूर्वदीर्घनिवृत्त्यर्थं तपरकरणं तथापि मुख्यकल्पनासम्भवे गौणी कल्पना किमित्याश्रीयत इति मत्वा भाष्यकारेणाङ्गविशेषणमृत इत्याश्रितम् । पचतीति । लट उपलक्षणं तेन लटि चास्तर्कीयादि रूपाणि किरति यो नयेदित्यर्थः । प्रातिज्ञमिति । तपरकरणादङ्गविशेष-

Indira Gandhi National Centre for the Arts

किम्प्रयोजनम्। इह मा भूत् चाकर्ति चाकीर्तः चाकिरति। किरति चर्करीतान्तं पचतीत्यत्र यो नयेत्। प्रातिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥

सन्वल्लघुनि चङ्परेऽनग्लोपे॥ ९६॥ इह कस्मान्न भवति। अजजागरत्। लघुनि चङ्परइत्युच्यते व्यवहितं चात्र लघु चङ्परम्। इहापि तर्हि न प्राप्नोति। अचीकरत् अजीहरत्। वचनाद्भविष्यति। इहापि वचनात्प्राप्नोति अजजागरत्। येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्। केन च नाव्यवधानम्। वर्णेनैकेन। एतेन पुनः सङ्घातेन व्यवधानं भवति न भवति च। एवमप्यचिक्षद् अत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवञ्जातीयकानामित्वमिति। यदयमत्स्मृदृत्वरप्रथम्रदस्तॄस्पशामितीत्वबाधनार्थमत्वं शास्ति। सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम् *। सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानं कर्तव्यम्। वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिद्ध्यति। णिचा व्यवहितत्वात्। लोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिद्ध्यतेत्र स्थानिवद्भावः दीर्घविधिं प्रति न स्थानिवदिति। एवमप्यनग्लोपइति प्रतिषेधः प्राप्नोति। वृद्धौ कृतायां लोपः। तस्मान्ग्लोप्यङ्गं भवति। एवं तर्हीदमिह सम्प्रधार्यं वृद्धिः क्रियतां लोप इति। किमत्र कर्तव्यम्। परत्वाद् वृद्धिः। नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। लोपोप्यनित्यः। अन्यस्य कृतायां वृद्धौ प्राप्नोत्यकृतायामन्यस्य प्रा-

---

मृत इति तेन रुगादीनां विषयविभागेन या प्राप्तिस्तां जानातीत्यर्थः। प्रारब्ध इति। संग्रहणं संग्रहः साधुशब्दराशिः स तेन प्रारब्ध इति योग्यतातिशयोद्भावनेन स्तूयते॥ ९३॥

सन्वत्॥ चङ्पर इति बहुव्रीहिणान्यपदार्थो णिराश्रीयते तेनाचकमतेति केवले चङि सन्वद्भावो न भवति। नहि णिजव्यतिरेकेणान्यश्चङ् परः सम्भवति तेन चङ्परे णौ यल्लघु तस्मिन् परतो ऽभ्यासस्य सन्वत्कार्यं भवति। इह कस्मादिति। न क्व चिदभ्यासो लघोरनन्तरः सम्भवतीति सत्सप्तमीविज्ञानादत्रापि प्रसङ्ग इति भावः। इतरः परसप्तम्याश्रये येननाव्यवधानमित्याश्रीयते इत्याह लघुनीति। एवंजातीयकानामिति। संयोगव्यवहितानामित्यर्थः। णिचा व्यवहितत्वादिति। चङ्परे णौ यल्लघु तस्मिन् परतो ऽभ्यासस्य सन्वद्भावः। यस्मिंश्चात्र णौ लघुर्नासौ चङ्परः यस्तु चङ्परः न तस्मिन् परतो लघु। दीर्घविधिं प्रतीति। ननु दीर्घे कर्तव्ये भवति स्थानिवत्त्वनिषेधः। सन्वद्भावे तु प्राप्नोति स्थानिवद्भावः। एवं तर्हि दीर्घभावित्वादिकारो ऽप्युपचाराद्दीर्घशब्देनोच्यत इति भाष्यकारस्याभिप्रायः। किन्तु मुख्ये दीर्घे सम्भवतीति गौणग्रहणमयुक्तमिति चिन्त्यमेतत्। वृद्धौ कृतायां लोप इति। एतण्णौ चङीति सूत्रभाष्येण विरुध्यते तत्र ह्यगिति प्रत्याहारग्रहणसा-

Indira Gandhi National Centre for the Arts

ब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवतीत्युभयोरनित्ययोः परत्वाद्वृद्धिः, वृद्धौ कृतायां लोपः तन्नाग्लोप्यङ्गं भवति । मीमादीनां तु लोपप्रसङ्गः * । मीमादीनां तु लोपः प्राप्नोति । अमीमपत् । सिद्धं तु रूपातिदेशात् * । सिद्धमेतत् । कथम् । रूपातिदेशोयं सनि यादृशमभ्यासरूपं तत्सन्वद्भावेनातिदिश्यते न च मीमादीनां सन्यभ्यासरूपमस्ति । अङ्गान्यत्वाद्वा सिद्धम् * । अथ वा ण्यन्तमेतदङ्गमन्यत् । लोपे कृते नाङ्गान्यत्वम् । स्थानिवद्भावादन्यत् । कथमजिज्ञपत् । अत्र सन्यपि ण्यन्तस्यैवोपादानमाप्ज्ञप्यृधामीदिति । तत्राङ्गान्यत्वाभावादभ्यासलोपः स्यात् । तस्मात्पूर्व एव परिहारः । सिद्धं तु रूपातिदेशादिति ॥ इति श्रीमद्भगवत्पञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

इति चतुर्थः पादः ॥ सप्तमाध्यायः समाप्तः ॥

---

मध्यात् कृतायां वृद्धौ लोप इति प्रतिपादितम् । मीमादीनां त्विति । सनि यद्दृष्टमभ्यासकार्यं तदतिदिश्यते मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावात्प्राप्नोति । सिद्धं त्विति । नेह कार्यमतिदिश्यते अपि तु रूपं लोपश्चाभावः रूपं लोपो न भवतीति नातिदिश्यते किं चात्र लोपोऽभ्यासस्येति । अत्रग्रहणं विषयावधारणार्थं तेनेसादिविषय एवाभ्यासस्य लोपो भवतीति तदभावे तु सन्वद्भावाश्च भवति । अङ्गान्यत्वादिति । मीमादीनामङ्गानामभ्यासलोपो विहितः । अयं त्वभ्यासो ण्यन्तानामिति न लुप्यते । अन्येतु व्याचक्षते चङ्परे णौ यदङ्गं तदभ्यासस्य सन्वद्भावो विधीयते णौ मीमादीन्येवाङ्गानि युक्तस्तद्भक्तत्वात् तद्ग्रहणेन ग्रहणात्तस्मादङ्गान्यत्वादित्यस्यायमर्थः । येषामङ्गानामच इत्यादिर्विधीयते तदभ्यासस्यात्र ग्रहणाद्विषयावधारणाल्लोपो नान्येषामिति इसादिरहितानाममीमपदित्यादौ च धातोः सन्वद्भावाभावादिसाद्यभावादभ्यासलोपाभावः । अथ वा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे सामान्यातिदेशे विशेषानतिदेशाल्लोपाभावः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥ पादश्चतुर्थो, ऽध्यायश्च सप्तमः समाप्तः ॥

Indira Gandhi National Centre for the Arts

श्रीगणेशाय नमः ॥

# अथ प्रदीपसहिते व्याकरणमहाभाष्ये
## अष्टमोऽध्यायः ।

सर्वस्य द्वे ॥ १ ॥ सर्वग्रहणं किमर्थम् । सर्ववचनमलोऽन्त्य निवृत्त्यर्थम् * । सर्वग्रहणं क्रियते अलोऽन्त्यनिवृत्त्यर्थम् । अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य द्विर्वचनं मा भूदिति । क्व पुनरलोन्त्यनिवृत्त्यर्थेनार्थः सर्वग्रहणेन । नित्यवीप्सयोरिति । नित्यवीप्सयोरित्युच्यते न चान्त्यद्विर्वचने नित्यता वीप्सा वा गम्यते । इह तर्हि परेर्वर्जनइति। अत्र अन्त्यस्यापि द्विर्वचने वर्ज्यमानता गम्यते षष्ठीनिर्देशार्थं च सर्वग्रहणं कर्तव्यं षष्ठीनिर्देशो यथा प्रकल्पेत । अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः *। अक्रियमाणे हि सर्वग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात् । कस्य । स्थानेयोगत्वस्य । क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः सर्वग्रहणेन । यावता

---

श्रीगणेशाय नमः ॥ सर्वस्य द्वे ॥ सर्वशब्दो द्रव्यप्रकारावयवकात्स्न्र्यवृत्तिः द्रव्यकात्स्न्र्ये यथा सर्वस्वं ददातीति । प्रकारकात्स्न्र्ये यथा सर्वान्नं भक्षयतीति सर्वप्रकारमन्नं भुङ्क्ते इति गम्यते।अवयवकात्स्न्र्ये यथा । सर्वः पटो दग्ध इति । इह तु पर्यादीनां विशिष्टार्थानां कार्यित्वेनोपादानाद्द्रव्यप्रकारकात्स्न्र्यासम्भवादवयवकात्स्न्र्यवृत्तिः सर्वशब्दः तस्योपादानमलोऽन्त्यनिवृत्त्यर्थं वा स्याद् द्विप्रयोगनिवृत्तये स्थानषष्ठ्यर्थं वा। तत्र वक्ष्यमाणैर्लिङ्गसामर्थ्यादिभिरलोऽन्त्यनिवृत्तिं षष्ठ्यर्थपक्लृप्तिं च सिद्धां मत्वा स्थाने द्विर्वचनस्य द्विष्प्रयोगद्विर्वचनस्य च फलभेदमपश्यन् पृच्छति सर्ववचनमिति । अलोन्त्यनिवृत्त्यर्थमिति । ननु सर्वस्येत्यस्मिन्नसति स्थानषष्ठ्यभावादनुसंहाराभावः । स्थाने विज्ञातस्यानुसंहार इत्युक्तत्वात् । कथं चान्त्यस्य द्विर्वचनं प्राप्नोति । यावता अनेकाल्त्वात्सर्वादेशेन भाव्यम् । उच्यते । परेर्वर्जन इत्यादौ तावत् षष्ठी विद्यत एव । नित्यवीप्सयोरित्यत्रापि सामर्थ्याल्लभ्या षष्ठी । यच्चोक्तमनेकाल्त्वात्सर्वादेशो भविष्यतीति । हलन्तेष्वेतत् स्यात् । अजन्तेषु तु पर्यादिष्विकाराद्रेरन्त्यस्य प्राप्नोति । ननु द्वाविकारौ सर्वस्य स्यातां यथा डा आ डा इति प्रश्लेषनिर्देशात्सर्वादेशो डा भवति । उच्यते । द्वाविकारौ कृतैकादेशावादेशत्वं प्रतिपद्येते इत्येकाल्त्वादादेशो ऽलोन्त्यस्य प्राप्नोति । डास्तु प्रश्लेषनिर्देशसामर्थ्याद्विगृहीतरूपः सर्वादेशत्वं प्रतिपद्य सवर्णदीर्घत्वं प्रतिपद्यते । क्व पुनरिति । नित्यादिरर्थो ऽन्त्यद्विर्वचनेन न द्योतयितुं शक्यत इति भावः । अन्त्यस्यापीति । यथान्तरेण द्विर्वचनं परिवर्जनार्थः प्रयुज्यते परित्रिगर्तेभ्य इति । अत एवोच्यते परेर्वर्जने वावचनमिति । एवमन्त्यस्यापि द्विर्वचने परेर्वर्जनं प्रतीयेत । षष्ठीनिर्देशार्थं चेति । इष्टस्य षष्ठ्यर्थस्य प्रक्लृप्त्यर्थमित्यर्थः । कस्येति । नित्यवीप्सयोर्यः शब्दस्तस्य द्वे इति सामर्थ्यात् षष्ठ्यर्थो लभ्यतइति भावः । इतरः शब्दमन्तरेणानन्तर्यादेरपि



Indira Gandhi National Centre for the Arts

सर्वत्रैव षष्ठ्युच्चार्यते । परेर्वर्जने । प्रसमुपोदः पादपूरणे । उपर्यध्यधसः सामीप्ये । वाक्यादेरामन्त्रितस्येति । इह न काचित् षष्ठी नित्यवीप्सयोरिति । ननु चैषैव षष्ठी । नैषा षष्ठी । किं तर्हि अर्थनिर्देश एषः । नित्ये चार्थे वीप्सायां चेति । अलोऽन्त्यनिवृत्त्यर्थेन तावन्नार्थः सर्वग्रहणेन । इदं तावदयं प्रष्टव्यः । नित्यवीप्सयोर्द्वे भवत इत्युच्यते द्विशब्द आदेशः कस्मान्न भवति आचार्यप्रवृत्तिर्ज्ञापयति न द्विशब्द आदेशो भवतीति । यदयं तस्य परमाम्रेडितमनुदात्तं चेत्याह । कथं कृत्वा ज्ञापकम् । द्विशब्दोयमेकाच् तस्य एकत्वात्तस्य परमाम्रेडितमनुदात्तं चेत्येतन्नास्ति । पश्यति त्वाचार्यो न द्विशब्द आदेशो भवतीति ततस्तस्य परमाम्रेडितमनुदात्तं चेत्याह । यदि तर्हि न द्विशब्द आदेशो भवति के तर्हीदानीं द्वे भवतः । द्विशब्देन यदुच्यते । किं पुनस्तत् । द्विशब्दोयं संख्यापदम् । संख्यायाश्च संख्येयमर्थः । संख्येये द्वे भविष्यतः । क्व पुनस्ते । पदे । वाक्ये । मात्रे वा । तद्यदा तावत्पदे वाक्ये वा तदानेकाल्त्वात्सर्वस्यादेशः सिद्धः । यदा तावद् मात्रे अपि तदाऽनेकाल्शित्सर्वस्येति सर्वादेशो भवति । यदा तर्ह्यर्धमात्रे तदा सर्वादेशो न

———————

सम्बन्धः सामर्थ्याद्विज्ञायेतेति मत्वाह स्थानेयोगत्वस्येति । क्व पुनरिति । षष्ठी सर्वत्र विद्यतइति भावः । ननु चैषैवेति । नित्यार्थवचनः शब्दो नित्यो वीप्सार्थवचनश्च वीप्सेत्याश्रीयतइति भावः । अर्थनिर्देश इति । प्रयोक्तृधर्मा वीप्सा यथा आबाधो नत्वभिधेयधर्मः यद्वक्ष्यते वीप्सश्चेत्कर्त्ता भवतीति । वीप्सायाश्चार्थत्वे नित्यशब्दोऽप्यर्थवृत्तिरेव ग्राह्यो द्वन्द्वनिर्देशाद्भिन्नविभक्तिकत्वायोगात् । अलो ऽन्त्यनिवृत्त्यर्थेनेति । ननु च नित्यवीप्सयोरित्यत्रार्थाश्रयणेन पूर्वमेवालोऽन्त्यविधिर्निवारितः । तत्किमर्थं नित्यवीप्सयोरित्युपादीयते । परेर्वर्जनइत्यादि ह्युपादेयं प्रकरणोपलक्षणार्थत्वात्सर्वेषु वा सूत्रेषु परिहारस्य तुल्यत्वाददोषः । कथं पुनर्द्विशब्द आदेशः सम्भाव्यते यावता ग्रामो ग्राम इत्यस्मिन्नर्थे प्रतिपाद्ये द्विशब्दो न प्रवर्त्तते । पराभिप्रायेणैतदुच्यते । यथा भवान् सामर्थ्यादिन्यायत्यागेन शास्त्रसद्भावमात्रेणालोऽन्त्यविधिं मन्यते तथा स्वं रूपं शब्दस्येति शास्त्रप्रामाण्याद् द्विशब्दः प्राप्नोति न्यायाश्रये तु स्वरूपविधिवदलोऽन्त्यविधिर्न भविष्यति । आचार्यप्रवृत्तिरिति । न्यायसिद्धे ऽर्थे लिङ्गदर्शनम् । नहि द्विशब्द आदेशो ग्रामादिशब्दस्यार्थं वक्तुं समर्थ इति न प्रवर्त्तते नाम्रेडितस्यान्त्यस्य तु वा मित्यमाम्रेडितं डाचीत्येतदपि लिङ्गं द्रष्टव्यम् । यदि तर्हीति पृष्टे द्विशब्देन यदुच्यत इत्युत्तरउक्ते ऽपि सामान्याभिधानाद्विशेषो दुर्ज्ञान इति पृच्छति किं पुनस्तदिति । संख्येयमर्थ इति । अभिधेयमित्यर्थः । यदुच्यते । आदशभ्यः संख्याः संख्येये वर्त्तन्ते ऽत उत्तरं संख्याने संख्येये चेति । पदे इति । शब्दानुशासनप्रस्तावाच्छब्दप्रकारोपन्यासः । यदा तावन्मात्रे इति । यदुक्तम् । द्वाविकारौ कृतैकादेशावेकालादेशो ऽन्त्यस्य प्राप्नोतीति । तदयुक्तम् । नह्यप्रवृत्तयोरेकादेशशास्त्रप्रवृत्तिरस्ति प्रवृत्तिकाले चानेकाल्त्वात्सर्वा-

Indira Gandhi National
Centre for the Arts

सिध्यति । नैष दोषः । तदापि सिद्धः । न चार्द्धमात्रे द्विरुच्येते । किङ्कारणम् । इह व्याकरणे यः सर्वोल्पीयान् स्वरव्यवहारः स मात्रया भवति । नार्धमात्रया व्यवहारोस्ति । तेनार्द्धमात्रं न भविष्यतः । एवमपि कुत एतत् पदे द्वे भविष्यत इति । न पुनर्वाक्ये स्यातां मात्रे वा । नित्यवीप्सयोर्द्वे भवत इत्युच्यते । न च वाक्यद्विर्वचने मात्राद्विर्वचने वा नित्यता वीप्सा वा गम्यते । षष्ठीनिर्देशार्थमेव तर्हि सर्वग्रहणं कर्त्तव्यम् । न वा पदाधिकारात् * । न वा वक्तव्यम् । किङ्कारणम् । पदाधिकारात् । पदस्येति प्रकृत्य द्विर्वचनं वक्ष्यामि । तच्चावश्यं पदग्रहणं कर्त्तव्यं समासतद्धितवाक्यनिवृत्त्यर्थम् । समासनिवृत्त्यर्थं तावत् । सप्तपर्णो ऽष्टापदम् । तद्धितनिवृत्त्यर्थम् । द्विपदिका । त्रिपदिका । माषशः । कार्षापणशः । वाक्यनिवृत्त्यर्थम् । ग्रामे ग्रामे पानीयम् । माषं माषं देहि इति । अथ क्रियमाणे ऽपि वै पदग्रहणे समासनिवृत्त्यर्थमिति कथमिदं विज्ञायते । समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमाहो स्वित् समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति । किञ्चातः । यदि विज्ञायते समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमिति सिद्धं सप्तपर्णः सप्तपर्णौ सप्तपर्णा इति । सप्तपर्णाभ्यां सप्तपर्णेभ्य इत्यत्र प्राप्नोति । अथ विज्ञायते समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति । सप्तपर्णः सप्तपर्णौ सप्तपर्णा इत्यत्रापि

---

देशत्वमिति नास्त्यलोऽन्त्यविधिः । यदा तर्हीति । परिशब्देऽकारस्य द्वे अर्धमात्रे । अल्ग्रहणेनार्द्धमात्राया अग्रहणादनेकाल्त्वाभावात्प्राप्नुतः । इहेति । विशिष्टमर्द्धमात्राद्वयमुच्चारणायोगाद् अशक्य आदेशः कर्त्तुम् । तस्यादित उदात्तमर्द्धह्रस्वमित्यनेन तु ह्रस्वादिवर्णस्थाया अर्द्धमात्राया गुणाख्यानं क्रियते । न च वाक्यद्विर्वचन इति । नित्यत्वाद्यर्थप्रतिपादनाय तत्प्रतिपादनसमर्थः शब्दः प्रयुज्यते स्थाने ऽन्तरतम इत्युपस्थानाच्च शब्दतोऽर्थतश्चान्तरतमे एव द्वे पदे आदेशौ भवतः । परेर्वर्जन इत्यादौ तु पर्यादिशब्दसन्निधानाद् द्विशब्दः पर्यादीनेव संख्येयानाचष्ट इति वाक्ये मात्रे पदं अपि ये के चिन्न प्रवर्त्तेत । न वेति । शब्दान्तरं षष्ठ्यन्तमुपादेयम् । को विशेष इति चेदाह तच्चेति । सप्तपर्ण इति । सप्त संख्यानि पर्णानि वीप्स्यन्ते न तु तद्वान् वृक्ष इति वीप्सायामेकत्वस्यानन्तर्भावात्प्रागेव विभक्तेर्द्विर्वचनं प्राप्नोति । सप्तपर्णसप्तपर्णइति । पदाधिकारात्तु न भवति । द्विपदिकेति । द्वित्वसंख्यायुक्तः पदार्थो वीप्स्यते इति वीप्सायां स्त्रीत्वैकत्वलक्षणयोर्लिङ्गसंख्ययोरनन्तर्भावात् प्राक् तद्धितोत्पत्तेः समासे कृते पदत्वाभावाद् द्विर्वचनाभावः । ग्रामे ग्रामे पानीयमिति । वाक्यस्यापदत्वाद् द्विर्वचनाभावः । अथेति । सप्तपर्ण इत्यत्र संख्यायाः वीप्सा, अथ पर्णानाम्, अथ संख्याविशिष्टानां पर्णानाम् । तत्र यदि समुदायो वीप्स्यते तदा समुदायस्य प्राप्तं द्विर्वचनं पदाधिकारेण निवर्त्यते । अथ स्ववयवार्थवीप्सा तदावयवस्य प्राप्तं द्विर्वचनमिति समासे विद्यमानस्य निवृत्त्यर्थमित्यर्थः सम्पद्यते । एवं वाक्यतद्धितयोर्योज्यम् । यदि विज्ञायते इति । यदि समुदायो वीप्सायुक्त इति

Indira Gandhi National Centre for the Arts

प्राप्नोति । तथा तद्धितनिवृत्त्यर्थमिति कथमिदं विज्ञायते तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । आहो स्वित्तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । किञ्चातः । यदि विज्ञायते । तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । सिद्धं द्विपदिका इति । द्विपदिकाभ्यां त्रिपदिकाभ्याम् । माषशः । कार्षापणश इत्यत्र प्राप्नोति । अथ विज्ञायते तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । द्विपदिकाः त्रिपदिका इत्यत्रापि प्राप्नोति । तथा वाक्यनिवृत्त्यर्थमिति कथमिदं विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । आहो स्विद्वाक्ये निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । किञ्चातः । यदि विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । यदि वाक्यं वीप्सायुक्तं; भवितव्यमेव द्विर्वचनेन । अथाप्यवयवः भवत्येव - तदेतत्क्रियमाणे ऽपि पदग्रहणे आलूनविशीर्णं भवति । किञ्चित्संगृहीतं किञ्चिदसंगृहीतं च । सगतिग्रहणं च कर्त्तव्यम् । प्रपचतिप्रपचति प्रकरोतिप्रकरोतीति । किं पुनः कारणं न सिध्यति । न हि सगतिकं पदं भवति । समासनिवृत्त्यर्थेन तावन्नार्थः पदग्रहणेन । समासेनोक्तत्वाद्वीप्सायाः द्विर्वचनं न भविष्यति । किञ्च भोः समासो वीप्सायामित्युच्यते । न खलु वीप्सायामित्युच्यते । गम्यते तु सोर्थः । ततः किम् । उक्तः समासेनेति कृत्वा द्विर्वचनं न भविष्यति । यत्र च समासेना-

---

पक्षः । सिद्धं सप्तपर्ण इति । विभक्तौ परतः समासस्यापदत्वात् । सप्तपर्णाभ्यामिति । भ्यादिषु पूर्वस्य पदत्वाद् द्विर्वचनप्रसङ्गः । अथेति । यदावयवार्थवीप्सा तदा समासे प्रत्ययलक्षणेनावयवस्य पदत्वाद् द्विर्वचनप्रसङ्गः । उत्तरपदस्तूत्तरपदत्वेचापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात् पदत्वाभावः । सिद्धं द्विपदिका इति। हल्ङ्यादिलोपे तद्धितान्तस्य पदत्वाद् द्विपदिका इति बहुवचनान्तं पठितव्यम । द्विपदिकाभ्यामिति । एकादेशस्यान्तवद्भावात्तद्धितान्तं स्वादिष्विति पदं च । माषश इति । प्रत्ययलक्षणेन सुबन्तं तद्धितान्तं च वाक्यं वीप्सायुक्तमिति । वाक्यार्थस्य वीप्सायोगाभावाद् वीप्साग्रहण द्विर्वचननिमित्तोपलक्षणं तेन प्रपचतिप्रपचतीति नित्यतायां वाक्यस्य द्विर्वचनं भवत्येव । अथेति । यदा ग्रामार्थस्य वीप्सा तदा ग्रामे ग्रामे पानीयमिति भवति । यदा पानीयस्य तदा ग्रामे पानीयं पानीयं स्वाद्विति भवति । तदेतदिति । अतिव्याप्तिर्न कथं चित्परिहर्तुं शक्यते । सगतिग्रहणं चेति । पदाधिकारे क्रियमाणे सगतिग्रहणमधिकं कर्तव्यम । भाष्यकारः पदाधिकारेण विनापि समासादिनिवृत्तिप्रतिपादनायाह समासेनेति । सप्तपर्ण इति रूढिशब्दः परिगृहीतावयवार्थविशेषो वृक्षविशेषे वर्तत इत्यर्थः । किञ्च भो इति । ननु न वचनादर्थं शब्दः प्रत्याययति किन्तर्हि स्वसामर्थ्यात् । एवं मन्यते वाक्ये द्विर्वचनेन वीप्सा व्यज्यते सप्त सप्तपर्णान्यस्येति । एवं समासेपि वीप्साप्रतिपादनाय द्विर्वचनस्य प्रसङ्गात् प्रतिषेधो विधेयो नित्यवीप्सयोरसमास इति । यथा वक्ष्यते परैरसमास इति । न खल्विति । रूढिशब्दत्वादस्याक्षिप्तवीप्सोऽवयवार्थो

Indira Gandhi National Centre for the Arts